
ॐ

शिवाभ्यां नमः

श्रीशिवभक्तविलासः

उपमन्युमहर्षिप्रोक्तः



वेदान्तभूषण-शास्त्ररत्नाकरविरुदभाग्भिः

चेन्नपुरीसंस्कृतकालेज् प्रधानाध्यक्षैः

करुङ्गुळम् ब्रह्मश्री-कृष्णशास्त्रिवर्यैः

सम्यक् शोधितः

मद्रास् ला जर्नल् मुद्राशालायां

मुद्रितः

1931

मूल्यम् सार्धं रूप्यकद्वयम्] [Price Rs. 2. As. 8·

RT. 9. A.

LIBRARY

SRI RAMANASRAMAM
LIBRARY,
TIRUVANNAMALAI.
No. 35364
Date 26.1.12

SRI RAMANASRAMAM
LIBRARY,
TIRUVANNAMALAI.
No. CAN-127
Date 19/4/80

ॐ

शिवाभ्यां नमः

श्रीशिवभक्तविलासः

उपमन्युमहर्षिप्रोक्तः



वेदान्तभूषण-शास्त्ररत्नाकरविरुदभाग्भिः

चेन्नपुरीसंस्कृतकालेज् प्रधानाध्यक्षैः

करुङ्गुलम् ब्रह्मश्री-कृष्णशास्त्रिवर्यैः

सम्यक् शोधितः

मद्रास् ला जर्नल् मुद्राशालायां

मुद्रितः

1931

मूल्यम् साधे रूप्यकद्वयम्] [Price. Rs. 2. As. 8.

PRINTED AT

THE MADRAS LAW JOURNAL PRESS,

MYLAPORE, MADRAS.

INTRODUCTION

The one distinguishing feature of the Dravidian culture is the existence of the soul-stirring hymns of the *Samayachariyas* which when set to music, not only infuse a highly devotional spirit in the minds of the hearers, but also appeal to their æsthetic sense. A large portion of these hymns were sung by the three Saivite Saints, Appar, Sambandar and Sundarar and their life-history as that of the other Saivite Saints numbering sixty-three is the rich heritage of the Tamils. This life history is but the story of the spread of Saivism and the cult of Bhakti in South India and the decline, nay the disappearance of Jainism therefrom. The lives of these saints are told in Sanskrit verse in this book styled Upamanyu Bhakta Vilasam as they are stated to have been first expounded by *Upamanyu* at Kailas to the assembled *rishis* when they enquired of him about the nature of the spirit of Saint Sundara which advanced and merged into *Mahadeva* at the time. These stories have a permanent hold on the minds of the Tamils and the Sanskrit version of them is of great value in bringing them home to the devotional public in other parts of India. The stories are also full of interesting particulars regarding numerous shrines of Mahadeva and their surroundings which are of historic value. This book follows an old and authentic manuscript of the purāṇa, which has been carefully examined by Brahmasri Karungulam Krishna Sastrigal, Principal of the Madras Sanskrit College who stands for foremost amongst the expounders of *Saiva Purāṇas*. The book deserves to be in the hands of every devotee for daily study or pārāyaṇa.

15—4—'31.
MYLAPORE.

T. S. RAMACHANDRA IYER,
Retd. Dist. Registrar.

आमुखम्

भो भोः, आगमैकशरणाः आस्तिकशिखामणयः, निखिलतन्त्रनिष्णाताः पण्डित-प्रकाण्डाः, भक्तिपराधीनाः, परमपावनाः, आसेतुहिमाचलान्तरालवासिनो महाजनाः! इदमिदानीं निवेद्यते विदितवेद्यानामेव भवतां सविधे समेषाम्। तत्किमिति चेत्, "ज्ञानादेव तु कैवल्यम्, विद्वान्नामरूपाद्विमुच्यते, ब्रह्मविदाप्नोति परम्, ब्रह्मविद्ब्रह्मैव भवति, ब्रह्मैव सन् ब्रह्माप्येति, तदात्मानमेव वेदाहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्, ब्रह्मैवेदं सर्वम्, ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्चात्, सर्वं खल्विदं ब्रह्म, यत्साक्षादपरोक्षाद्ब्रह्म, अयमात्मा ब्रह्म सर्वानुभूः, आत्मैवेदं सर्वम्, आत्मैव पुरस्तात्, आत्मैवेदमग्र आसीत्, तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुः, आत्मविच्छोकं तरति, आत्मा वा अरे द्रष्टव्यः श्रोतव्यः, आत्मनस्तु कामाय सर्वं प्रियं भवति, तदेतद्वित्तात्प्रेयः, योऽयमात्मा, आत्मेत्येवोपासीत, आत्मानमेव लोक-मुपासीत, येषां नोऽयमात्मा नायं लोकः, आत्मानमेव लोकमिच्छन्तः प्रव्रजन्ति, सर्व-भूतेषु चात्मानं सर्वभूतानि चात्मनि। संपश्यन् ब्रह्म परमं याति नान्येन हेतुना॥, आत्मानं चेद्विजानीयादयमस्मीति पूरुषः, शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः, शिवोऽद्वैतः, यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति॥ चिन्मात्रोऽहं सदाशिवः, शिव एव केवलः, तत्त्वमसि, त्वं वा अहमस्मि भगवो देव ते अहं वै त्वमसि, हंसः सोऽहं सोऽहं हंसः, अहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चन मत्तो व्यतिरिक्त इति, सर्वो ह्येष रुद्र.। यो रुद्रो अग्नौ...यो रुद्रो विश्वा भुवना विवश, त्वं स्त्री त्वं पुमानसि त्वं वा कुमार उत वा कुमारी, त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः, तत्त्वमेव त्वमेव तत्, साक्षी चेता केवलो निर्गुणश्च" इत्यादिश्रुतिशतेभ्योऽद्वितीय-प्रत्यगभिन्नपरशिवतत्त्वसाक्षात्कार एव साक्षान्मोक्षसाधनमिति सुनिश्चितमवगम्यते। स च साक्षा-त्कारः उमासहायत्वनीलकण्ठत्वविरूपाक्षत्वाद्यनवधिककल्याणगुणगणालङ्कृततदीयदिव्यमङ्गल-विग्रहसंराधनाख्यया सात्त्विक्या नियतयोत्तमया भक्त्या प्रसादितस्य तस्यैव परशिवस्य परिपूर्णदेवा-नुग्रहात्कस्यचिदेव जायत इति ज्ञायते। तथा हि श्रुतिः—"अजात इत्येव कश्चिद्भीरुः प्रपद्यते, रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्। ध्यायीतेशानम्, शिव एको ध्येयः शिवङ्करः,

तस्याभिध्यानाद्योजनात्तत्त्वभावात्" इति । स्मृतयश्च "ज्ञानमिच्छेन्महेश्वरात्, शिवप्रसादेन विना न सिद्धिः, शिव एव गुरुः साक्षात्" इति । सा च सात्त्विकी पारमेश्वरी भक्तिस्तत्र परिनिष्ठितानां श्रीज्ञानसम्बन्धचरणादीनां त्रिषष्टिगणितात्मनां श्रीशिवभक्तशिखामणीनां विचित्रचरित्रविलास-पठनप्रवचनश्रवणादिसमनन्तरक्षणमेवाधिरुह्य हृदयपदं प्रतिकलं प्रवर्धमाना फलपर्यवसायिनी भवतीति तदर्थमिदं विचित्रचरित्राख्यं **श्रीशिवभक्तविलासाख्यं** श्रीस्कान्दोपपुराणं उपमन्युमुन्यु-पदिष्टप्रकारेण श्रीकाञ्च्यां श्रीकुम्भसम्भवमहर्षिणोपदिष्टं हरदत्तमुनिप्रणीतमन्विष्य सुचिरम् अवलम्ब्य मातृकात्रितयम्, संशोध्य च यथामति सम्मुद्रणाय समर्पितवतः सफलीकुर्वन्तु ममेमं परिश्रमं श्रीमन्तो महान्तो भवन्त इति अभ्यर्थयते ॥

इत्थम्

क. कृष्णशास्त्री,

वेदान्तविभूषणम्—शास्त्ररत्नाकरः.

शुद्धपत्रिका

पृष्ठः	पङ्क्तिः	अशुद्धं	शुद्धं
१	१०	स्कन्द	स्कन्दं
,,	२१	लस	लास
५	११	तनां	तानां
४	२	भूत्र	भुव
९	२	मोलौ	मौलौ
२०	७	बिलो	विलो
२१	२२	त्स्थाला	त्स्थला
२४	४	गारा	गरा
२५	७	गातं	गतं
,,	२६	रभिषिञ्चन्म	रभ्यषिञ्चन्म
३१	२२	ण्डिता	ण्डितो
३५	११	त्युपृ	त्यपृ
३४	३	सयुः	सख्युः
४७	५	त	तः
५०	२०	ययैष	ययैष
५१	२६	हश्वरे	हेश्वर
५६	२७	मर्चयानत	मर्चयात
५९	६	जाते	जाती
६३	१७	वृाद्धा	वृद्धा
७४	१९	सुकशी	सकेशी
७५	५	बट	वट
७७	४	लद	लाद
७८	४	न्तोर	न्तारे
,,	८	द्ग्राळ	द्ग्रळ
७९	१३	द्वक्ष	द्वृक्ष
८२	४	णर्थ	णार्थ
,,	१५	र्सशा	सर्वशा
८३	२२	तेन	तत्र
८७	२७	बुद्ध	बद्ध
,,	२८	म्बरे	म्बरं
८८	११	गाडा	गाढा
,,	,,	न्मख	न्मुख
,,	२०	द्रत्त	दत्त
८९	२३	र्स	र्श
९९	२	इत्युक्तः	इत्युक्त्वा
११३	५	पञ्चशो	पञ्चाशो
,,	१३	माः	मः
११४	१५	णात	णता
,,	१८	चत्वारिं	पञ्चा
११५	२	कम	क्रम
,,	४	पत्री	पत्नी
,,	२०	तस्या	तस्यां
११६	९	वेद्वा	वेदा
११८	२६	सैंव	सर्वे
१२०	२८	म्यवि	म्यत्वि
१२२	२५	वावस	वास
,,	२१	क्षै	क्षे
,,	२८	मित	मिति
१२६	१४	रस्व	रव
१३१	६	मानो	त्मानो
,,	२३	प्रं	तं
१३२	६	ण्ढि	ण्डि
,,	२५	ला	ल
१३७	२८	शा	शो ?
१४०	८	च्च	च्चे
१४१	२०	श्च	श्व

शुद्धपत्रिका

पृष्ठः	पङ्क्तिः	अशुद्धं	शुद्धं
१४३	२	सद	सादे
,,	१४	षरि	षपारि
१४४	७	स्सि	स्सि
१४५	२	क्ष	क्रु
,,	४	यु	त्यु
१४९	२१	प्र	प्रा
१५०	९	प	प्र
,,	१०	द	दे
१५२	२३	श्य	श्या
,,	२५	यु	त्यु
१५३	९	व	वे
१५८	७	ज	जा
१६०	२०	च	व
,,	,,	ण्य	ण्या
,,	२५	क्क	क्का
,,	२७	शी	शि
१६६	९	ध्यी	धी
१६८	१८	ल	ला
१६९	२४	चि	श्चि
,,	,,	ता	त
१६९	२६	क	को
१७६	२५	त्व	त्व
१८३	,,	द्व	द्वं
१८४	५	स	स्त
१८५	२४	द	दे
१८६	२५	त	ते
१८७	५	स्वं	स्त्वं
१८७	८	नञ्चे	नंश्चे
१८९	३	वि	नि
१९०	२८	दा	द
१९१	१३	स्वै	स्वे
१९७	३	साँ	सो
१९८	२४	स्यी	सी
,,	१७	श	शं
१९९	१४	च्छ	ञ्छं
,,	२३	नयय	नय

॥ श्रीशिवभक्तविलासविषयानुक्रमणिका ॥

अ०	विषयः	पुटः	अ०	विषयः	पुटः
१	शिवभक्तिप्रशंसा -	१	३१	मानविक्रमभूपालमुक्ति दानम्	७३
२	प्रश्न निधिः . .	३	३२	शङ्खलादायमुक्तिप्राप्तिः .	७६
३	परशिवदिव्यरूपस्वीकारः	६	३३	गोनाथमुक्तिप्राप्तिः -	७८
४	सुंदरहालाहलगर प्रतिग्रहः	८	३४	मूर्तिनाथमुक्तिप्राप्तिः	८०
५	सुन्दरस्य शाप प्राप्तिः .	१०	३५	स्कन्दनाथमुक्तिप्राप्तिः	८१
६	सुन्दरविवाहसन्नाहः -	१२	३६	श्रीरुद्रपशुपतिमुक्तिप्राप्तिः	८३
७	सुन्दरवृद्धव्यवहारः -	१४	३७	श्रीनन्दमुक्तिप्राप्तिः -	८४
८	सुन्दर दास्यपत्नप्रदर्शन परशिवाविर्भावः	१६	३८	भक्तेङ्गितवेतृमुक्तिप्राप्तिः .	८५
९	सुन्दरस्य कमलालयप्राप्तिः	१८	३९	चण्डेश्वरमुक्तिप्राप्तिः .	८८
१०	श्रीसोमास्कन्दमहिमवर्णने विष्णोर्भ्रूणहत्यानिवृत्तिः	२४	४०	तिलकावती विषादः	९२
११	इन्द्रस्य सोमास्कन्दमूर्तिप्राप्तिः	२६	४१	अज्ञानभिक्षुस्तोतृत्वप्राप्तिः	९४
१२	मुचुकुन्दप्रतिष्ठितत्यागराज महिमवर्णनम्	२८	४२	वारीशाचरितम् - .	९६
१३	चोलभूपनीतिपरीक्षणम् -	३१	४३	वागीशमुक्तिप्राप्तिः -	९९
१४	अम्बष्ठमहिमानुवर्णनम् - .	३३	४४	कुलालन्मनमुक्तिप्राप्तिः	१०३
१५	परवासुन्दरपरस्परदर्शनानुराग वर्णनम्	३४	४५	कुरंबभक्तमुक्तिप्राप्तिः	१०४
१६	त्यागेश्वरदौत्यवर्णनम् -	३६	४६	पुनीतवती मुक्तिः -	१०६
१७	सनकादिभिः सुन्दरस्य वेदान्तविज्ञानोपदेशः	३८	४७	जङ्घुलिमुक्तिः - -	११०
१८	श्रीनीलकण्ठकुलालभक्तमुक्तिप्राप्तिः	४२	४८	नीलनग्नमुक्तिप्राप्तिः	१११
१९	भक्तेङ्गितप्रदचरितम् -	४४	४९	नवनन्दिमुक्तिप्राप्तिः	११३
२०	मारभक्तमुक्तिप्राप्तिः -	४६	५०	ज्ञानसंबन्धोत्पत्त्यादि कथनम्	११४
२१	सत्यार्थमुक्तिप्राप्तिः -	४९	५१	श्रीज्ञानसंबन्धोपनयनादि वर्णनम्	११६
२२	वीरमिन्दचरितम् - -	५०	५२	तदीयविविधवैभववर्णनम्	१२०
२३	अमरनीतिचरितम् - -	५४	५३	,, ,,	१२३
२४	दारकमुक्तिप्राप्तिः . .	५६	५४	,, ,,	१२६
२५	एनादिनाथमुक्तिप्राप्तिः -	५८	५५	,, ,,	१२८
२६	धीरनिषादतनयोत्पत्तिः .	६०	५६	,, ,,	१३३
२७	धीरस्य स्वर्णमुरलीस्नानकथनम्	६३	५७	श्रीज्ञानसंबन्धमुक्तिप्राप्तिः	१३८
२८	श्रीकालहस्तीशसेवाकथनम्	६५	५८	सुन्दरचरितम् -	१४३
२९	धीरनिषादसारूप्यमुक्तिः	६८	५९	,, ,,	१४५
३०	कलिनाथमुक्तिप्राप्तिः	७१	६०	शङ्खलाविवाहः -	१४७
			६१	कलिकाममुक्तिप्राप्तिः	१४९

अ	विषय:	पुट:
६२	मूलनाथ मुक्ति प्राप्ति:	१६३
६३	दण्डि भक्त मुक्ति प्राप्ति:	१६५
६४	मूर्ख भक्त मुक्ति प्राप्ति:	१६६
६५	मार सोमयाजि चरित्रम्	१६८
६६	मार सोमयाजि कैवल्य प्राप्ति:	१६९
६७	शाक्यनाथ मुक्ति प्राप्ति:	१६४
६८	नरशार्दूल सारूप्य दानम्	१६५
६९	श्रीपति जननम्	१६६
७०	दभ्र भक्त चरितम्	१६८
७१	,, ,,	१७०
७२	दभ्र भक्त मुक्ति प्राप्ति:	१७१
७३	श्रीमुष्ण ब्राह्मणी मुक्ति प्राप्ति:	१७५
७४	चेर-चरित्रम् - -	१७९
७५	गणनाथ-चरितम् -	१८०
७६	परान्तक चरितम् -	१८१
७७	सत्यदास चरितम् -	१८२
७८	धर्मकेतन मुक्ति प्राप्ति:	,,
७९	नृसिंह मुक्ति प्राप्ति:	१८४
८०	अति भक्त मुक्ति प्राप्ति:	१८५
८१	कलिकम्प मुक्ति प्राप्ति:	१८६
८२	कलिनीति मुक्ति प्राप्ति:	१८७
८३	शक्ति मुक्ति प्राप्ति: -	१८८
८४	पञ्चपाद मुक्ति प्राप्ति: -	१८८
८५	मालूर तृणक मुक्ति प्राप्ति:	,,
८६	अधिकारि मुक्ति प्राप्ति:	१८९
८७	सुन्दर पाण्ड्य मुक्ति प्राप्ति:	,,
८८	वायुल मुक्ति प्राप्ति:	१९०
८९	शूरभिन्न मुक्ति प्राप्ति:	,,
९०	सिंहाङ्क मुक्ति प्राप्ति:	१९१
९१	पोडङ्क मुक्ति प्राप्ति:	,,
९२	युद्धसख चरित्रम्	१९२
९३	कीर्तिसख चरित्रम्	१९३
९४	शूरव्याध मुक्ति प्राप्ति:	,,
९५	शंभुख्याति चरित्रम्	१९४
९६	माहिळ्ळशी मुक्ति प्राप्ति:	१९६
९७	भक्तप्रिय चरित्रम्	,,
९८	शोणाक्ष मोक्ष प्राप्ति:	,,
९९	नीलकण्ठ चरित्रम्	१९८
१००	जटिल चरित्रम् -	१९९
१०१	सुन्दर चरित्रम् -	,,
१०२	सुन्दर कैलास प्राप्ति:	२०१
१०३	संसारोपवर्णनम्	२०२
१०४	सनकादि महर्षिभ्य: मुक्तिमार्गोपदेश:	२०४

॥ विषयानुक्रमणिका ॥
॥ संपूर्णा ॥

॥ वन्दे शंभुं विरिञ्चिप्रमुखसुरशिरोरत्नकोटीरकोटि
प्रोद्यन्माणिक्यनीराजितचरणनखं वेदवेदांगमूलम् ।
सोमं सोमार्धचूडं विमलसुरसरिद्वीचिरोचि:कपर्दं
विद्यामूर्तिं वरेण्यं वरदमभिमतप्राप्तये निश्चलार्थम् ॥

1. சுந்தரமூர்த்தி – ஸ்ரீஸுந்தர: – சுந்தரன்.
2. திவ்யவாதிகேசரி – ஸ்ரீதிவ்யதேசிகாக்ரேஸரவ்யய: –
3. திருநீலகண்டர் – ஸ்ரீநீலகண்ட: – நீலகண்டன்.
4. இயற்பகை – ஸ்ரீபக்திவைராக்யநிதி: – பக்திகீதபத: – மகாபதன்.
5. இசைஞானிமார் – ஸ்ரீவாதுகுலாதீச: – மாரபக்த: – மாரன்.
6. மெய்ப்பொருள் – ஸத்யாதயோநாத: – சத்யாத்ரி: – சத்யாத்மன்.
7. விறன்மிண்டர் – வீரமர்தன: – வீரமர்தன: – வீரமர்தனன்.
8. அமர்நீதி – சமரநீதி: – அமரநீதி: – அமரநீதி.
9. சாக்கியர் – ஸ்ரீவீரபக்த: – தாரக: – தாரகன்.
10. ஏனாதிநாதர் – வனாதிநாத: – ஏனாதிநாதன் – ஏனாதிநாதன்.
11. கண்ணப்பர் – ஸ்ரீத்ராவிட: – தீர: – தீரன்.
12. குங்கிலியக்கலயர் – ஸ்ரீகலாநாத: – கலாநாத: – கலாநாதன்.
13. மானக்கஞ்சாறர் – தாரகஸ்ரீநிதி: – மானவிக்ரம: – மானவிக்ரமன்.
14. அரிவாட்டாயர் – தாரய: – சுக்லதாய: – சுக்லதாயன்.
15. ஆனாயர் – தொநாயி: – கோநாத: – கோநாதன்.
16. மூர்த்தி – தந்திநாயி: – தந்திநாத: – தந்திநாதன்.
17. முருகர் – ஸ்கந்தநாயி: – ஸ்கந்தநாத: – ஸ்கந்தநாதன்.
18. உருத்திரபசுபதி – பசுபதி: – ருத்ரபசுபதி: – பசுபதி.
19. திருநாளைப்போவார் – ஸ்வாதந்த்ர்ய – நந்தி: – நந்தன்.
20. திருக்குறிப்புத்தொண்டர் – விசித்ரஸ்தித: – கீதவேது – விசித்ரவேதன்.
21. சண்டேசுரர் – அநுஜ்ஞாத: – சண்டேச்வர: – விசித்ரசண்டன்.
22. திருநாவுக்கரசு – வாகீச: – ஜிஹ்வாராஜ: – வாகீச: – வாகீசன்.
23. குலச்சிறை – கோத்ரவக்த்ர: – குலவக்த்ர: – குலவக்த்ரன்.
24. பெருமிழலைக்குறும்பர் – திதிக்ஷாபீஜ ஸ்தம்ப: – குரும்பக்த: – விஷ்ணுபக்தன்.
25. காரைக்காலம்மை – வ்ருத்தவதி – குணிதவதி – குணவதி.
26. அப்பூதி – தர்ஸநதி: – அப்பூதி – அப்பூதி அடிகள்.
27. திருநீலநக்கர் – நீலநக்ர: – நீலநக்ன: – நீலநக்னன்.
28. நமிநந்தியடிகள் – நமிநந்தி – நவநந்தி – நவநந்தி.
29. திருஞானசம்பந்தர் – ஸ்ரீஜ்ஞாநஸம்பந்த: – ஜ்ஞானஸம்பந்த: – ஜ்ஞானஸம்பந்தன்.
30. கலிக்காமர் – கலிகாம: – கலிகாம: – கலிகாமன்.
31. திருமூலர் – சுபத்ரவக்த்ர: – மூலநாத: – மூலநாதன்.
32. சண்டியடிகள் – சண்டீஸக்த: – தண்டிபக்த: – தண்டிபக்தன்.
33. மூர்க்கர் – சுபவேஷ: – மூர்க்கபக்த: – மூர்க்கன்.
34. சோமாசிமாறர் – லோகயாஜீவ: – மாரஸோமயாஜி – மாரன் (லோகயாஜி).
35. சாக்கியர் – சாக்யநாயி: – சாக்யநாத: – சாக்யநாதன்.
36. சிறப்புலி – நிதாயசாதூலப: – நரசார்தூல: – நிகரசார்தூலன்.
37. சிறுத்தொண்டர் – சுஜ்ஞாநக்த: – தக்ஷபக்த: – தக்ஷபக்தன்.
38. கோமான் பெருமான் – சேர: – சேர: – சேரமான்.

39. கணநாதர் – முணநாயி :– गणनाथः – கணநாதன்.
40. கூற்றுவர் – கூதாதெக :– परान्तक :– பராந்தகன்,
41. பொய்யடிமையில்லாதார் – சலசுத்சுந்தரி } सत्यदासः – சத்தியதாசன்.
42. புகழ்க்கேதனர் – கீர்த்தெனை :– धर्मकेतन :– தருமகேதனன்.
43. நரசிங்கமூனையரையர் – நரலிகூறசாதி :– नृसिंह :– நரசிங்கன்
44. அதிபத்தர் – சுதிறகத :– अतिभक्ति :– பத்தன்.
45. கலிக்கம்பர் – கலிகமு :– कलिकाम :– காளையனார்.
46. கலிநீதி – கலிநீதி :– कलिनीति :– கலிநீதி :.
47. சத்தி – சதிநாய :– शक्तिनाथ :– சத்தி.
48. ஐயடிகள்காடவர்கோன் – [illegible] :– पञ्चपाद :– பஞ்சபாதன்.
49. கணம்புல்லர் – கனனர் – गणनृपाल :– கணன்.
50 – காரி – காரிநாய :– कारिकारि – காரிகாரி.
51 – நின்றசீர்நெடுமோறர் – நீடசுநர் – दीर्घशुक्लधरपाल :– நெடுவீரமன்.
52. வாயிலார் – வாதி – वायुल :– [illegible]
53. மூனையதுவார் – நாவினறஞ்ஞ :– [illegible] – கமனதன்.
54. கழற்சிங்கர் – வாதசிகஹ :– [illegible] – சிங்கன்.
55. இடங்கழி – ஐவ [illegible] :– [illegible] :– திடன்.
56. செருத்துணை – [illegible] – [illegible]
57. புகழ்த்துணை – கீர்த்தெதுண [illegible] – கீர்த்திசகன்.
58. கோட்புலி – வீரமாதுத்ர :– [illegible] – [illegible]
59. பத்தராய்ப்பணிவார் – [illegible] – [illegible]
60. பரமனேயர் – [illegible] – [illegible]
61. சித்தத்தைத்திவன்பாலேனை – [illegible] – [illegible]
62. திருவாரூர்பிறந்தார் – [illegible]
63. மும்மைசூழ்திருமேனிநீண்முடியார் – திகாரூசிவாசூழ்ஸ்வர் :–
64. முருகநாயனார் – [illegible] – [illegible]
65. அப்பூதியடிகள்நாவர்கோன் – [illegible]
66. மூலனார் – மூலனை :– [illegible] – [illegible]
67. மங்கையர்க்கரசியார் – [illegible] – [illegible]
68. நேசர் – நெஹநாய :– [illegible] :– கிண்கிணமன்.
69. கோக்கழற்கட்சோழர் – சுகணாக்கி :– [illegible] :– லோகிதாக்ஷன்.
70. திருநீலகண்டயாழ்ப்பாணர் – நீலகரு :– नीलकण्ठ :– நீலகண்டன்.
71. சடையர் – கடை [illegible] – जटिल :– சடிலவிரதன்.
72. இசைஞானியார் – ஸ்ரீஞானி – ज्ञानवती – ஞானவதி.

ओं

श्रीमहागणपतये नमः

श्रीशिवः शरणम् । शुभमस्तु । अविघ्नमस्तु ॥

॥ श्रीमदुपमन्युमहर्षिप्रोक्त-शिवभक्तविलासप्रारम्भः ॥

॥ अथ प्रथमोऽध्यायः ॥

गिरिजाहस्तलिखितचित्रभित्तिविभूषणम् । महागणपतिं वन्दे मनोरथसमृद्धये ॥ १ ॥
वामाङ्कारूढवामोरुवक्षोजानीतपुष्करम् । विघ्नवारणहर्यक्षं विघ्नराजमुपास्महे ॥ २ ॥
गौरीगिरीशयोरङ्कादङ्के कृतगतागतम् । उद्यद्दशनषड्वक्त्रमुमासुतमुपास्महे ॥ ३ ॥
शिरसा शिवभक्तानां पादाम्बुजरजःकणान् । वन्दामहे वयं नित्यं वासनाध्वान्तभास्करान् ॥ ४ ॥
वन्दामहे वयं नित्यं श्रीकान्तं द्रुहिणं रविम् । स्कन्दं हरिमुखानन्यानुपमन्युमुखान्मुनीन् ॥ ५ ॥
मुनयो नैमिशारण्ये दीर्घसत्रे कृतश्रमाः । अष्टादशपुराणज्ञमपृच्छन् सूतमागतम् ॥ ६ ॥
सूत सर्वपुराणज्ञ व्यासशिष्य महामते । सन्दिहाना वयं सर्वे पृच्छामस्त्वां महत्तमम् ॥ ७ ॥
वेदानामागमानां च मन्त्राणामपि कर्मणाम् । प्रतिपादकवाक्यानां वाक्यानां महतामपि ॥ ८ ॥
कुत्र पर्यवसानोऽर्थे जगतः कारणं च किम् । विचारितेऽपि वेदान्ते तदर्थेऽनवगतेऽपि च ॥ ९ ॥
कर्मबन्धानुवृत्तिश्च न मुञ्चति कथं पुनः । एतत्सर्वमशेषेण विस्तराद्वक्तुमर्हसि ॥ १० ॥
इति पृष्टो मुनिवरैः सूतः सर्वार्थतत्त्ववित् । नमस्कृत्वा महाभागः शिवाय गुरुमूर्तये ॥ ११ ॥
विघ्नेशं भारतीं देवीं महासेनं च नन्दिनम् । महाविष्णुं च धातारं पार्वतीमद्रिकन्यकाम् ॥ १२ ॥
वेदव्यासमगस्त्यं च व्याघ्रपादं पतञ्जलिम् । दधीचिं भार्गवं रामं जैमिनिं गौतमं भृगुम् ॥ १३ ॥
उपमन्युं च कौन्तेयं मार्कण्डेयं महामुनिम् । वेदशास्त्रगुरूनन्यान् सम्प्रदायगुरूनपि ॥ १४ ॥
शिवभक्तान् महाभागान् नत्वायं करणैस्त्रिभिः । त्रैलोक्यपावनं पुण्यं चित्रं भक्तकथामृतम् ॥ १५ ॥
नाम्ना भक्तविलासाख्यं पुराणं लोकवन्दितम् । उपमन्युमुनिप्रोक्तं वक्तुं समुपचक्रमे ॥ १६ ॥

श्रीसूत उवाच ॥

साधु पृष्टं मुनिश्रेष्ठाः श्रोतव्यं यद्विशेषतः । उपमन्युमुनिप्रोक्तं यथा कैलासपर्वते ॥ १७ ॥
श्रुतं यथा गुरुमुखात् यथामति वदामि वः । वेदागमपुराणेषु मन्त्रेषु सकलेषु च ॥ १८ ॥
एक एव महादेवो विकारेषु यथार्णवः । नामान्तरपरेष्वेवं शब्देषु शशिशेखरः ॥ १९ ॥

विना संकोचमाम्नायेष्वधिष्ठानं प्रशस्यते । वेदादौ यः स्वरः प्रोक्तो वेदान्तेषु प्रतिष्ठितः ॥ २० ॥
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः । पुराणैरागमैः सर्वैः स्तूयते स महेश्वरः ॥ २१ ॥
ये ब्रह्मवादिनो विप्राः विदुस्तं सनकादयः । ज्ञानविज्ञानयोगेन यतस्ते छिन्नसंशयाः ॥ २२ ॥
जगन्नित्यमनित्यं वा शिवाज्जीवः परो न वा । मुक्तिरस्ति न वा ज्ञानादात्मा देहोऽथ वा परः ॥ २३ ॥
इत्याद्याः संशयाः सर्वे तावन्नश्यन्ति न क्वचित् । न यावद्देवतावुद्धिः गुरौ विज्ञानदायिनि ॥ २४ ॥
शिवादपि गुरुः श्लाघ्य इति शास्त्रार्थनिर्णयः । तस्मिन्मानुषबुद्धिर्यः प्रवाहस्तस्य संसृतेः ॥ २५ ॥
तस्यानुवर्ततेऽहन्ता जातिवर्णाश्रमादिषु । नित्यधीरप्यनित्येषु जायते प्रकृतेर्वशात् ॥ २६ ॥
भावना विपरीता चेत् सत्यसंभावनात्मनि । वेदान्तवाक्यशतकैरपि या न निवार्यते ॥ २७ ॥
तन्निवृत्त्यर्थमेवात्र यतन्ते ब्राह्मणाश्चिरम् । कारणं बहुधा तत्र कथयन्त्यविवेकिनः ॥ २८ ॥
कर्माहुः कारणं मुक्तौ तपः प्राहुरथापरे । पूर्तमन्येऽभिदधते दानमन्ये व्रतं परे ॥ २९ ॥
तीर्थेषु स्नानमपरे स्थलवासमथापरे । अष्टाङ्गयोगमपरे वेदान्तश्रवणं परे ॥ ३० ॥
श्रुतार्थमननं केचिन्मूर्त्युपास्तिमथापरे । अन्ये सत्सङ्गतिं प्राहुरित्यनेकमुखं जगत् ॥ ३१ ॥
कृत्वा सर्वमिदं कश्चित् पुनर्गर्भे निमज्जति । त्यक्तसर्वक्रियः कश्चिदयत्नान्मुच्यते मुनिः ॥ ३२ ॥
तदुक्तेभ्योऽस्त्युपायोऽन्यः सर्वबन्धविमोचकः । अन्वयव्यतिरेकाभ्यां सा नाम्ना भक्तिरुच्यते ॥ ३३ ॥
क्वचित्कृताकृता क्वापि मार्जारीभक्तिरुच्यते । आक्रामन्तीं नगादन्यं नगं मातरमात्मनः ॥ ३४ ॥
न सङ्कटेऽपि त्यजति संश्लिष्यन्मर्कटार्भकः । तथैवापत्सहस्रेऽपि यः शिवं शरणं व्रजेत् ॥ ३५ ॥
सा भक्तिरुत्तमा ज्ञेया सर्वबन्धविमोचनी । मन्दा च मध्यमा भक्तिरुत्तमेति त्रिधा मता ॥ ३६ ॥
कथायाः श्रवणे शम्भोर्नामसङ्कीर्तने स्मृतौ । क्वचिद्भवेच्चित्तरतिः सा मन्दा परिकीर्तिता ॥ ३७ ॥
गुरुपादेऽन्वहं पूजा लिङ्गे च नियमार्चनम् । वन्दनं शिवभक्तस्य या कारयति वासना ॥ ३८ ॥
मध्यमा भक्तिरेषा स्यात्सालोक्यादिप्रदायिनी । यया कैङ्कर्यतात्पर्यं त्यक्त्वा सर्वं महेश्वरे ॥ ३९ ॥
सख्यं करोति सततमविनाभावलक्षणम् । आत्मार्पणं शरण्येशे सोत्तमा भक्तिरुच्यते ॥ ४० ॥
पुराणश्रवणं शंभोर्नामसङ्कीर्तनं तथा । ध्यानं तद्दर्शनं तस्य पूजनं तन्नमस्क्रिया ॥ ४१ ॥
तदास्यं तस्य सख्यं च तस्मिन्नात्मार्पणं तथा । एवं नवविधा भक्तिरुत्तरोत्तरमुत्तमा ॥ ४२ ॥
यां काञ्चिद्भक्तिमप्याप्य पशुः पाशाद्विमुच्यते । भोगाय मन्दा कथिता सालोक्याप्त्यै तु मध्यमा ॥ ४३ ॥
अपुनर्भवदा भक्तिरुत्तमा दुर्लभा नृणाम् । आब्रह्मस्तम्बपर्यन्तं यत्रानन्दः प्रतीयते ॥ ४४ ॥
शिवे भक्त्या विना नान्यत्तत्र कारणमिष्यते । इति यो वेत्ति तत्त्वेन छिन्नपाशः स उच्यते ॥ ४५ ॥

स्यादल्पविषया भक्तिर्यावन्मन्दा न जायते । मन्दा मध्यमया नश्येत् मध्यमोत्तमया तथा ॥ ४६ ॥
तस्मान्मुमुक्षुभिः सेव्या शङ्करे भक्तिरुत्तमा । मार्कण्डेयोपमन्युश्रीकान्तनन्दिघटोद्भवैः ॥ ४७ ॥
उत्तमा सेव्यते भक्तिश्चरमे जन्मनि स्थितैः । जातिक्रियागुणकृता भिदा तावत्प्रवर्तते ॥ ४८ ॥
न यावदुत्तमा जन्तोः शिवे भक्तिः प्रजायते । यथा सिद्धरसाविद्धमयः प्रकृतिमात्मनः ॥ ४९ ॥
विमुञ्चति तथा जन्तुर्जात्यादीन्विजहात्यसौ । काञ्चनादिप्रभाभिश्रः काकोऽपि कनकायते ॥ ५० ॥
यथा देही तथा भक्त्या भवेदुत्तमया शिवः । भक्त्यान्तःकरणोपाधिं निरस्योत्तमया शिवे ॥ २१ ॥
यथानन्यत्वमाप्नोति तथा शृणुत हे द्विजाः । प्रतिबिम्बोऽप्सु नष्टासु बिम्बमात्रं यथा भवेत् ॥ ५२ ॥
प्रतिबन्धेषु नष्टेषु तथा देही परः शिवः । संशयो यदि युष्माकं नैमिशीया महर्षयः . ॥ ५३ ॥
अस्मिन्नर्थे निरस्यार्थमेतस्येदमुदीर्यते । उपमन्युमुनिप्रोक्तं भक्तमाहात्म्यमुत्तमम् ।
श्रुत्वा पुराणं भवत यूयं संच्छिन्नसंशयाः ॥ ५४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शिवभक्तिप्रशंसा नाम प्रथमोऽध्यायः ॥

॥ अथ द्वितीयोऽध्यायः ॥

ऋषय ऊचुः ॥
सूत भक्तविलासाख्यं भक्तमाहात्म्यमुत्तमम् । पुराणं ब्रूहि यच्छ्रुत्वा मिथ्याजाल्यादिकं भवेत् ॥ १ ॥
सूतः ॥
कलौ वेदेषु लुप्तेषु यागेषु विगतेषु च । योगेषु दूरपास्तेषु गुरुशिष्यक्रमे गते ॥ २ ॥
दयालुः सर्वभूतेषु हरभक्तो मुनीश्वरः । कृतवान् भक्तमाहात्म्यमुपमन्यूपदेशतः ॥ ३ ॥
यस्य श्रवणमात्रेण भक्तिः स्यादुत्तमा शिवे । तयातिमृत्युं तरति पुनरावर्तते न च ॥ ४ ॥
स्वानुबिम्बं शिवो जीवं कृत्वा जाल्यादि तस्य च । प्रवर्तयति भक्त्या च निवर्तयति तस्य तत् ॥ ५ ॥
भक्तानामुत्तमाः शम्भौ ये भक्त्या त्यक्तकिल्बिषाः । तानहं वः प्रवक्ष्यामि शृणुत ब्रह्मवित्तमाः ॥ ६ ॥
अस्ति दक्षिणदिग्भागे दुग्धसागरकौस्तुभः । देशः क्षीरतरङ्गिण्याः तीरे स्वर्गानुबिम्बवत् ॥ ७ ॥
तत्र काञ्चीति नगरी शिवस्य ममतास्पदम् । ब्रह्मविष्णुमुनीन्द्राणां तपस्सिद्धिविधायिनी ॥ ८ ॥
यत्र सा परमा शक्तिः कामाक्षीति जगत्प्रसूः । विद्योतते महाविद्या पराकाशबिलाश्रया ॥ ९ ॥
यत्र चैकाम्ररूपेण कुर्वतस्तप उत्तमम् । मूले वेदस्य भगवान् सन्निधत्ते सदाशिवः ॥ १० ॥
तपस्सिद्धिप्रदे क्षिप्रं तत्र सर्वे मुनीश्वराः । वसिष्ठाद्यास्तपोनिष्ठा धुरीणाः शम्भुभक्तकाः ॥ ११ ॥

तपसाऽऽनन्दयामासुः कामाक्षीनाथमीश्वरम् । अथैकदा महायोगी मलयाचलमन्दिरः ॥ १२ ॥
लोपामुद्रापतिः श्रीमान् शक्तिक्षेत्रं समाविशत् । मुनयस्तं प्रणम्याग्रे समभ्यर्च्य यथाविधि ॥ १३ ॥
इदमूचुरनूचाना विश्रान्तं कुम्भसंभवम् । भगवन् कुम्भसंभूत सर्वज्ञ करुणानिधे ॥ १४ ॥
पृच्छामो यत्समेत्यात्र वयं तदिह कथ्यताम् । तपश्च सुचिरं तप्तं विहिताः क्रतवः शतम् ॥ १५ ॥
अर्चितश्च महादेवस्तथाप्यन्तर्न शुध्यति । विषयाशारजोध्वस्तं मनश्चञ्चलमेव नः ॥ १६ ॥
कथं भविष्यी मुक्तिश्च वदैतन्मुनिपुङ्गव । इत्याकर्ण्य वचस्तेषामगस्त्यः प्राह तानिदम् ॥ १७ ॥
ध्यायन् हृदि महेशानमम्बिकापतिमव्ययम् । विना चोत्तमया भक्त्या सर्वान्तःस्थे महेश्वरे ॥ १८ ॥
न हि कल्पशतेनापि मुक्तिं विन्दन्ति मानवाः । यदि चर्मवदाकाशं वेष्टयेयुरिमं जनाः ॥ १९ ॥
तदा भक्त्या विना शम्भोः शोकस्यान्तो भविष्यति । भक्तिश्च तादृशी ज्ञेया सर्वत्यागपुरस्सरम् ॥
तदेकदास्यसंप्राप्तिश्चरमे सा भवेद्भवे । सर्वज्ञेन कुमारेण प्रोक्तमत्र वदामि वः ॥ २१ ॥
यस्य श्रवणमात्रेण पशुः पाशाद्विमुच्यते । शृणुत श्रद्धया यूयं मुनयः शुद्धमानसाः ॥ २२ ॥
पुरा कैलासशिखरे नानाधातुविचित्रिते । नानाभूतगणैर्युक्ते नानानिर्झरसङ्कुले ॥ २३ ॥
नानाविधतरुच्छन्ने नानापुष्पलतान्विते । नानामृगगणाकीर्णे नानापक्षिविराजिते ॥ २४ ॥
नानाश्चर्यसमायुक्ते नानाधातुविभूषिते । अनेककोटिसूर्याभप्रासादैरुपशोभिते ॥ २५ ॥
राजते राजते तत्र श्रीमद्भोगवती पुरम् । तन्मध्ये रत्नखचिते हेमसिंहासनोपरि ॥ २६ ॥
सुखासीनो महादेवः पार्वत्या सह शङ्करः । विराजते यदा तत्र तदादित्यमरुद्गणाः ॥ २७ ॥
देवाश्च यक्षगन्धर्वकिन्नरा गुह्यका अपि । सिद्धाः किंपुरुषाश्चापि मुनयः सनकादयः ॥ २८ ॥
नन्द्यादयो वन्दिनश्च रम्भाद्यप्सरसां गणाः । इन्द्रादयो लोकपालास्तथान्ये देवयोनयः ॥ २९ ॥
आवृत्य परितः शम्भुं मुदा सर्वे सिषेविरे । गायन्तश्च नमन्तश्च स्तुवन्तो भक्तिपूर्वकम् ॥ ३० ॥
नृत्यन्तश्चाखिलं वाद्यं वादयन्तश्च सर्वदा । तैरावृते स्थिते शम्भावुपमन्युर्महामुनिः ॥ ३१ ॥
अधोनितम्बे तस्याधोनिषण्णैः शौनकादिभिः । संवृतो मुनिवृन्दैश्च पिबन् शम्भुकथामृतम् ॥ ३२ ॥
सर्वानानन्दयन्नास्ते सकृत्तापससत्तमः । तत्र तत्समयेऽकाण्डादक्षिप्रसरतस्करम् ॥ ३३ ॥
अस्फुरज्ज्योतिराकाशे किञ्चित्कोट्यर्कसन्निभम् । तदालोक्योपमन्युं ते पप्रच्छुः किमिदं त्विति ॥
व्यधात्कृष्णं कृतार्थं यः पञ्चवर्णोपदेशतः । स्वस्वरूपविदं चापि द्वापरे ज्ञानदीक्षया ॥ ३५ ॥
स तदाह मुनीन् सर्वानुपमन्युर्महातपाः । गत्वेशशापाद्भूलोकं सुन्दरः प्राप्य मर्त्यताम् ॥ ३६ ॥
भूतले दक्षिणादेशात् कैलासं गच्छतीशितुः । आज्ञयेत्यञ्जलिं तस्मै दिशमुद्दिश्य चाकरोत् ॥ ३७ ॥
सर्वैर्वन्द्यो भवानस्मै कथमञ्जलिमादधे । वदैतत्संशयं ब्रह्मन्निति पृष्टो मुनीश्वरैः ॥ ३८ ॥

प्राहोपमन्युरिति तान् यः साक्षाच्छ्रीशिवाङ्कभूः । प्रतिबिम्बो महेशस्य शापाद्भूलोकमेत्य च ॥ ३९ ॥
तत्र स्थितानि क्षेत्राणि शम्भोः संसेव्य नित्यशः । प्रीणयन् शङ्करं भक्त्या गीत्वा द्राविडसूक्तिभिः ॥
भक्तिरत्नसमुद्राणां त्रिषष्टिगणितात्मनाम् । दासभावेन भक्तानां गीत्वा द्राविडसूक्तिभिः ॥ ४१ ॥
अद्यायं याति कैलासमित्युक्तास्ते महर्षयः । दासभावात्कथं गीतं त्रिषष्टिगणिताश्च के ॥ ४२ ॥
जातः स सुन्दरः कस्मिन् देशे ग्रामे यथाक्रमम् । अस्मत्कृताखिलप्रश्नानुक्त्वा पूर्वं ततः परम् ॥
सुन्दरस्यापि भक्तानां पश्चाद्ब्रूहि कथां क्रमात् । इत्यूचुरुपमन्युश्च वक्तुं समुपचक्रमे ॥ ४४ ॥
दासभावेन गीतं यद्वक्ष्ये तच्छृणुत द्विजाः । श्रीमत्तिलवनस्थानां त्रिसहस्रद्विजन्मनाम् ॥ ४५ ॥
श्रीमहाशैवमुख्यानां दासदासोऽस्मि सर्वदा । श्रीनीलकण्ठप्रमुखत्रिषष्टिगणितात्मनाम् ॥ ४६ ॥
चतुर्वर्णाश्रमजुषां हीनानामपि जातिभिः । शम्भुसामीप्यसारूप्यसायुज्यपदगामिनाम् ॥ ४७ ॥
भक्तिरत्नसमुद्राणां स्त्रीपुंरूपभृतामहम् । तादृशां शिवभक्तानां दासदासोऽस्मि सर्वदा ॥ ४८ ॥
इति द्राविडगानेन गीतमित्याह तान् पुनः । त्रिषष्टिगणितानां तु भक्तानां महतामिह ॥ ४९ ॥
पृथङ्नामानि नो ब्रूहि श्रोतुं कौतूहलं हि नः । इत्युक्तस्तैः पुनः प्राह नामानि च पृथक्पृथक् ॥ ५० ॥
सुन्दरो नीलकण्ठश्च वणिग्भक्तेङ्गितप्रदः । पश्चान्मारश्च सत्यार्थः शत्रुणा छद्मरूपिणा ॥ ५१ ॥
निकृत्तो वीरमिन्दाख्योऽमरनीतिश्च दारकः । अनपायनयश्चैनादिनाथो धीरनामकः ॥ ५२ ॥
कलानाथस्तथा मानविक्रमश्च ततः परम् । शङ्कुलादायगोनाथौ मूर्तिनाथस्ततः परम् ॥ ५३ ॥
स्कन्दनाथः पशुपतिर्नन्दः श्वोगन्तृनामवान् । श्रीभक्तेङ्गितवेत्ताथ चण्डो वागीश्वरस्ततः ॥ ५४ ॥
कुलबन्धः कुरूम्बश्च सा पुनीतवती तथा । अद्भुती नीलनग्नोऽपि नवनन्दी ततः परम् ॥ ५५ ॥
सम्बन्धः कलिकामोऽपि मूलनाथोऽथ दण्ड्यपि । अथ मूर्खः सोमयाजी शाक्यनाथस्ततः परम् ॥
नरशार्दूलनामापि दभ्रभक्तश्च चेरपः । गणनाथो नर्तकश्च सत्यदासस्तथैव च ॥ ५७ ॥
धर्मकेतननामापि नरसिंहोऽतिभक्तकः । कलिकंपः कलिनीतिः शक्त्यतिश्रेष्ठनामकौ ॥ ५८ ॥
मालातृण्यविकारी च कुब्जपाण्डयोऽथ वायुलः । शूरभिच्चैव सिंहाङ्कश्चैडङ्कश्च ततः परम् ॥ ५९ ॥
युद्धमित्रः कीर्तिसखः शूरव्याघ्रस्तथैव च । शम्भुध्यायी तु पाण्डयस्य पत्नी तु महिलेश्वरी ॥ ६० ॥
भक्तप्रियस्तन्तुवायो भक्तकौपीनदायकः । शोणाक्षो नीलकण्ठश्च वीणागानविशारदः ॥ ६१ ॥
जटिलश्च ज्ञानवती त्रिषष्टिगणिता इमे । शिवाङ्घ्रिनम्राः कवयस्तत्कीर्तिस्तोत्रतत्पराः ॥ ६२ ॥
शिवयोगविदश्चापि कमलालयजन्मिनः । आदिशैवास्तथा भस्मधारिणश्च ततः परम् ॥ ६३ ॥
श्रीचेरचोलपाण्डयान्यदेशस्थेश्वरभक्तकाः । ये वा त्रिषष्टिभक्तानामन्ये तेभ्यो नमो नमः ॥ ६४ ॥

तेषां दासस्य दासोऽहं तेभ्यो नित्यं नमो नमः । इति नामानि चाकर्ण्य मुदा ते मुनिपुङ्गवाः ॥
उत्पत्तिं सुन्दरस्योक्त्वा तस्य शापमतः परम् । तच्चरित्रमेशषं च प्रोक्त्वास्माकं क्रमेण च ॥ ६६ ॥
ब्रूहि त्रिषष्टिभक्तानां चरित्रमिति संयशः । प्रार्थयामासुरत्यन्तं विनीता त्रिप्रपुङ्गवाः ॥ ६७ ॥
तदोपमन्युस्तत्सर्वं वक्तुं समुपचक्रमे । सुन्दरस्य चरित्रं तु श्रोतुमिच्छावतां तु वः ॥ ६८ ॥
शृणुध्वं सावधानेन वक्ष्याम्यत्र महर्षयः । त्रिषष्टिभक्ता ये प्रोक्तास्तेषु मुख्यः स सुन्दरः ॥ ६९ ॥
तस्योत्पत्तिश्चरित्रं च वर्ण्यतेऽद्य मयाधुना ।

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे प्रश्नविधिर्नाम द्वितीयोऽध्यायः ॥

॥ अथ तृतीयोऽध्यायः ॥

अस्मिन् कैलासशिखरे पुरा भोगवती पुरे । विजहार महादेवो देव्या दिव्याङ्गरूपया ॥ १ ॥
चतुरङ्गविनोदेन मोदयामास पार्वतीम् । जिगाय देवी तत्रेशं लीलया यद्वशं जगत् ॥ २ ॥
इदमाह परा शक्तिर्भगवन् निर्जितोऽस्यलम् । अजितोऽस्मीति तां शम्भुरेवमासीन्मिथः कलिः ॥ ६ ॥
प्रवृत्ते कलहे देवीं प्रहस्योवाच शङ्करः । मायासि त्वं यतो लोका विजिताः प्राकृतास्त्वया ॥ ४ ॥
अहं च निर्मलोऽजय्यः सत्यं मिथ्या न बाधते ।

देवी ॥

निर्मलो मलिनो वा त्वमास्तामाकाशवत् प्रथा । जितोऽस्यद्धाजितोऽस्मीति सत्यं मिथ्यैव बाधते ॥ ५ ॥

श्रीशिवः ॥

देवि त्वद्व्यवहारश्च वस्तुनैवान्वितो मया । सर्वप्रकाशकेनाद्धा सत्यवत्प्रतिभासते ॥ ६ ॥

श्रीदेव्युवाच ॥

सृष्ट्यादिव्यवहारेण प्रकाशस्तव शङ्कर । स मया चान्वितस्यैव वह्नेः काष्ठयुजो यथा ॥ ७ ॥

श्रीशिव उवाच ॥

अप्रकाशं जगत्सर्वं स्वयंज्योतिरहं शिवे । आकाशवदरूपोऽस्मि रूपवानस्मि चेच्छया ॥ ८ ॥

श्रीदेव्युवाच ॥

इच्छासाध्यमिदं रूपं यद्विभर्षि महेश्वर ॥ ९ ॥
तवैव रमणीयं तत्तरुणेन्दुकलाधर । माला मुण्डमयी मौळौ जटाभारोऽत्र पन्नगाः ॥ १० ॥
लोचनं च ज्वलद्वह्नि कुण्डलं कुण्डलीश्वरः । भोज्यं च गरलं घोरं प्रालम्बोऽस्थिखगंसगा ॥ ११ ॥

आलेपनं चिताभस्म कपालं करभाजनम् । भूषणान्यहिरूपाणि वसनं च गजाजिनम् ॥ १२ ॥
महाश्मशाने सञ्चारो वृद्धोक्षश्चापि वाहनम् । भूतसङ्घाः परिजनो बान्धवास्तेऽप्यकिञ्चनाः ॥ १३ ॥
लब्धं त्वया परं रूपं वटमूलतपस्विना । पश्य मद्दृष्टिसंसृष्टान् सर्वसौभाग्यशालिनः ॥ १४ ॥
साध्यान्महद्भिः क्रतुभिर्लोकान् ब्रह्मादिसेवितान् । नयनानन्दजनकं यदि रूपं भवेत्तव ॥ १५ ॥
तदाभिरूप्याद्विजयी भविष्यसि न संशयः । सर्वत्र विजयी लोके स एकस्त्वादृशो जनः ॥ १६ ॥
यस्य लज्जाभिमानश्च न कुतश्चन विद्यते । उक्तमेतन्मया सर्वं क्षम्यतां विजयी भवान् ॥ १७ ॥
इत्युक्त्वा मौनमगमज्जगतां जननी शिवा । तस्थौ साचीकृतास्येन्दुरालापितशुकार्भका ॥ १८ ॥
अथ मन्दस्मितं कृत्वा भूतानां पतिरीश्वरः । पराङ्मुखीमिदं प्राह स्वाभिन्नां शक्तिमम्बिकाम् १९ ॥
यदहं न वधूर्देवि न च कर्ता भवामि च । न मे लज्जाभिमानश्च व्योमवत्सर्वतः स्थितेः ॥ २० ॥
नयनानन्दनं रूपं यदि ते प्रीतिसाधनम् । पश्याद्भुतमिदं रूपमाकर्णापूर्णलोचने ॥ २१ ॥
इत्युक्त्वा सर्वलोकानामीशानः शैलकन्यकाम् । यथा च तेजः काठिन्यं दधौ रूपमनुत्तमम् ॥ २२ ॥
सहस्रकोटिकन्दर्पसारसौन्दर्यकोमलम् । कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलम् ॥ २३ ॥
मन्दस्मितमुखाम्भोजं प्रसन्नायतलोचनम् । दिव्याभरणमालाढ्यं दिव्यगन्धानुलेपनम् ॥ २४ ॥
उदारहारकेयूरकटकाङ्गदकुण्डलम् । महार्हवसनोपेतं मणिकाञ्चीगुणान्वितम् ॥ २५ ॥
रत्ननूपुरकोटीरमुल्लसत्तिलकालिकम् । चक्षुः प्रक्षाल्य देवानामपि योग्यमवेक्षितुम् ॥ २६ ॥
गौरीविलोचनचकोरकिशोरलेह्यसौन्दर्यसारसमुदायसमुज्ज्वलाङ्गम् ॥
निर्माय रूपमथ निर्ममसेव्यपादः शीतांशुमौलिरकरोदलमद्रिराजम् ॥ २७ ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे परशिवदिव्यरूपस्वीकारो नाम तृतीयोऽध्यायः ॥

॥ अथ चतुर्थोऽध्यायः ॥

अगस्त्यः ॥

तदा हैमवती दृष्ट्वा रूपमत्यद्भुतं विभोः । विस्मिता प्रणता देवं तुष्टाव परमेश्वरम् ॥ १ ॥
नमः शिवाय देवाय शम्भवे सर्वसाक्षिणे । इच्छाधीनस्वरूपाय विरूपाक्षाय ते नमः ॥ २ ॥
मनसो वचसश्चापि नमस्ते दूरवर्तिने । विश्वाधिकाय रुद्राय वीतरागक्रुधे नमः ॥ ३ ॥
सृष्टये ब्रह्मरूपाय रक्षायै विष्णुमूर्तये । संहाराय प्रपञ्चस्य नमस्ते रुद्ररूपिणे ॥ ४ ॥
कालकर्मविदूराय नमः कैवल्यरूपिणे । कारुण्यनिधये तुभ्यं कालकण्ठाय ते नमः ॥ ५ ॥

यत्सत्ता जगतः सत्ता यद्भासा भासते जगत् । इदमारोपभिन्नाय शिवाय ज्योतिषे नमः ॥ ६ ॥
योऽन्तः प्रविश्य सर्वाणि भूतानि भुवनेश्वरः । संजीवयति सर्वात्मा नमस्तस्मै शिवाय ते ॥ ७ ॥
भक्तिगम्याय भव्याय भवपाशच्छिदे सताम् । भानुमण्डलवासाय भर्गाय भवते नमः ॥ ८ ॥
चतुर्भुजाय महते देवाय दहरात्मने । दशात्रयविहीनाय दक्षाध्वरभिदे नमः ॥ ९ ॥
इति स्तुतो महादेवः प्रसन्नः प्राह पार्वतीम् । वरं वृणीष्व कल्याणि मनो यत्र प्रवर्तते ॥ १० ॥

श्रीदेवी ॥

अत्यद्भुतमिदं रूपं दृष्टं तव जगत्पते । अनेन पूर्णः कामो मे भक्तिरस्तु स्थिरा त्वयि ॥ ११ ॥
क्षमस्व करुणासिन्धो वाङ्मनःकायसंभवम् । अपराधं मम स्वामिन् प्रसीद भगवन् मयि ॥ १२
इति देव्यां ब्रुवाणायां नन्दिनं प्राह शङ्करः । कुरु दूरे यवनिकां मरुतो व्यवधायिनीम् ॥ १३
अथ तेनापनीतायां यवन्यां रत्ननिर्मिते । भित्त्यन्तरे स्वां प्रतिमां ददर्शादर्शभे हरः ॥ १४ ॥
दर्शयामास पार्वत्यै पश्य पश्येति चान्तिके । गौरी तं प्रार्थयामास प्रतिबिम्बं तवेश्वर ॥ १५ ॥
अत्रागच्छतु ते शक्त्या वर एष ममोत्तमः ।

अगस्त्यः ॥

तत्क्षणे भगवान् शंभुरपरिच्छेद्यवैभवः ॥ १६ ॥
भो सुन्दर ममाभ्याशे चर त्वमिति चाह्वयत् । कर्तुं चापि तथाकर्तुमन्यथाकर्तुमीशितुः ॥ १७ ॥
प्रतिबिम्बोऽनुमत्याभूत्सुन्दराख्यो गणाग्रणीः । मनसापि विधेः कर्तुमशक्यं रूपमुद्वहन् ॥ १८ ॥
पश्यन्त्यां सादरं देव्यां प्रणम्योवाच शङ्करम् ।

सुन्दरः ॥

अनुजानीहि मां देव दासोऽस्मि करवाणि किम् ॥ ॥ १९ ॥
त्वदाज्ञापालनाज्जन्म साफल्यमिदमश्नुताम् । इति तद्वक्यमाकर्ण्य सस्मित चन्द्रशेखरः ॥ २० ॥
शशासेदं गृहाणेति स चासीद्भस्मपात्रभृत् । स्वयं गृहीत्वा तद्भस्म धारयन् परमेश्वरः ॥ २१ ॥
सुन्दराय ददौ सर्वां स्वशक्तिं भक्तवत्सलः । भस्माधारधरः शम्भुप्रतिबिम्बश्च सुन्दरः ॥ २२ ॥
दधावेतानि नामानि शिवेनैव कृतानि सः । भस्माधारभृता दत्तमादाय भसितं हरः ॥ २३ ॥
आलिम्पन् सर्वगात्रेषु दधौ प्रीतिमनुत्तमाम् । सन्ध्या ताण्डवलीलासु प्रवृत्तासु दिने दिने २४ ॥
विप्रकीर्णजटः श्रान्त्या तदंसे भुजमार्पयत् । नन्द्यादिगणनाथानां क्वचिदाह्वानकर्मणि ॥ २५ ॥
तन्नामाम्रेडयामास हासयन् गिरिजां हरः । शिवोऽहमिति यं ध्यायः क्षणं सञ्चिन्त्य मुच्यते ॥ २६ ॥
स एव तं विलोक्येशः सुन्दरोऽस्मीत्यचिन्तयत् । धारयन् फणिमञ्जीरं पादे तस्य कटीतटे ॥ २७ ॥

गजाजिनं मृगं पाणौ सर्वाङ्गे भस्म निर्मलम् । कण्ठेऽस्थिमालां विन्यस्य श्रवणे फणिकुण्डलम् ॥ २८ ॥
मौलौ जटाभरं तत्र कलाधरकलामपि । हरो वृद्धोक्षमारोप्य चारयन् प्रमथैः सह ॥ २९ ॥
स्वतन्त्रः सुन्दरं प्रीत्या कैलासशिखराङ्गणे । सेवार्थमागतान् देवान् तत्पादे संन्यपातयत् ॥ ३० ॥
चुचुम्ब च कपोले तं कपाली वृषभस्थितम् । सुन्दर त्वं शिवोऽसीति मुहुर्मुहुरुवाच ह ॥ ३१ ॥
द्वारि वेत्रभृतो वेदान् वेदान्तानामगोचरः । सुन्दरेशानुबिम्बेति बिरुदाळीरपाठयत् ॥ ३२ ॥
सृष्टिं स्थितिं च संहारं जगतां जगदीश्वरः । तिरोधानानुग्रहौ च सुन्दरं समशिक्षयत् ॥ ३३ ॥
क्वचिच्च सनकादीनां सन्देहं परिपृच्छताम् । सुन्दरं वादयामास पशुपाशेशनिर्णयम् ॥ ३४ ॥
किमत्र बहुनोक्तेन विहाय गिरिजामुमाम् । सर्वासां सम्पदां शम्भोः स्वतन्त्रः सुन्दरोऽभवत् ॥
अथ देवाश्च दैतेयाः संभूय कृतनिश्चयाः । प्रार्थयन्तोऽमृतं सर्वे ममन्थुः क्षीरसागरम् ॥ ३६ ॥
मन्थानं मन्दरं कृत्वा योक्त्रं कृत्वा तु वासुकिम् । सर्वौषधीश्च निष्पिष्य प्रक्षिप्य पयसां निधौ ॥ ३७ ॥
मथ्यमाने महाम्भोधौ प्रयत्नादेवदानवैः । तेषामशक्नुवन् सोढुं भुजनिष्पीडनं गिरेः ॥ ३८ ॥
निशिताश्मक्षितिक्षुण्णो वासुकिर्व्यथितः श्वसन् । उद्ववाम विषं घोरं तदापां दोषसङ्गतम् ॥ ३९ ॥
हालाहलमिति ख्यातं प्रलयानलसन्निभम् । संबभूव घनीभूतं येन प्लुष्टं जगत्त्रयम् ॥ ४० ॥
वनानि पर्वतान् सिन्धून् निर्दहत् सैन्धवं गरम् । यूथं सुरासुराणां तदाववारानिवारितम् ॥४१ ॥
हालाहलोष्मवेगेन व्यशीर्यन्त सुरासुराः । प्रधानेष्वपि लोकानां न कश्चित्प्रत्यदृश्यत ॥ ४२ ॥
दुद्राव द्रुहिणो भीत्या प्लुष्टः काष्ण्यं ययौ हरिः । न नासीरे शुनासीरः स्थातुमग्रेऽनलोऽनलम् ॥
शशाम शमनश्चापि यातु याति दिशो दश । अचेतनः प्रचेताश्च निष्क्रान्तो निधिनायकः ॥
अन्ये सुराश्च दैत्याश्च मूर्च्छिताः सिन्धुरोधसि । सिद्धचारणगन्धर्वा मुनयोऽन्ये च खेचराः ॥ ४५ ॥
शरण्यं शरणं जग्मुः कैलासे वृषभध्वजम् ।

आकर्ण्य हालाहलवेगमारादुमापतिः सुन्दरमादिदेश ।
निर्गत्य तूर्णं स च घोरमेतं जग्राह जम्बूफलवत्करात्रे ॥ ४६ ॥
आनीलहालाहलशोभमानमालोकयन् सुन्दरहस्तमीशः ।
सन्दर्शयामास गिरेः सुतायै सभृङ्गमम्भोजमिव प्रबुद्धम् ॥ ४७ ॥
दत्वा च हालाहलसुन्दराख्यां तस्मै तमादाय तदीयहस्तात् ।
हरोऽपिबत्सोऽप्यगजाङ्घयैव तदीयकण्ठाभरणं बभूव ॥ ४८ ॥

त्रैलोक्यस्थानि भूतानि लीलाकृष्टमहागरम् । आलोक्य सुन्दरं साक्षादमन्यन्त महेश्वरम् ॥ ४९ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरहालाहलगरप्रतिग्रहो नाम चतुर्थोऽध्यायः ॥

॥ अथ पञ्चमोऽध्यायः ॥

श्रीअगस्त्यः ॥

यदाज्ञया महेशस्य निजग्राह महाविषम् । तदासीत्सुन्दरो दृष्टो गणेन्द्राणां च पश्यताम् ॥ १ ॥
तस्यावलेपं विज्ञाय सर्वात्मा चन्द्रशेखरः । शिक्षां तदुचितां कर्तुं सङ्कल्पमकरोत्तदा ॥ २ ॥
एतस्मिन् समये देव्याः प्रसिद्धे परिचारिके । विख्याताऽनिन्दितेत्येका कमलिन्यपराख्यया ॥ ३ ॥
उभे गत्वाम्बिकोद्यानं पुष्पाण्याहृत्य तिष्ठतः । सुन्दरोऽपि तदा शम्भुं मृडानीसहितं मिथः ॥ ४ ॥
विज्ञाय विचचाराद्रेरुपान्ते पुष्पितद्रुमे । स गौरीमल्लिकोद्याने नीलाभ्रे विद्युताविव ॥ ५ ॥
निष्टप्तकाञ्चनच्छाये किंशुकप्रतिमांशुके । स्थलारविन्दसश्रीकचरणोद्घुष्टनूपुरे ॥ ६ ॥
रक्तोत्तुङ्गनखज्योतिर्लक्षाराञ्जितभूतले । मनोभवनिषङ्गाभजङ्घायुग्मविराजिते ॥ ७ ॥
कूर्मराजापराङ्गश्रीजानुद्वयविराजिते । कदलीकाण्डकरभकरिहस्तोपमोरुके ॥ ८ ॥
निर्मृष्टहेमफलकसमानजघनोन्नते । कन्दर्परथचक्राभनितम्बालम्बिमेखले ॥ ९ ॥
किञ्चित्समुच्छ्वसन्नीवीदृश्यनाभिमनोहरे । आलक्ष्यरोमलतिके करान्तमितमध्यमे ॥ १० ॥
वलित्रयविरोचिष्णुवटपत्रोदरोज्ज्वले । आपीनोपचितस्निग्धसम्प्रवल्गत्पयोधरे ॥ ११ ॥
हारप्रालम्बगुच्छान्तर्गतगोस्तनचूचुके । रत्नाङ्गुलीयमालांशुमञ्जरीपुञ्जकर्बुरौ ॥ १२ ॥
कुटिलारक्तनखरौ बिभ्राणे करपल्लवौ । स्थूलविद्रुमबन्धाढ्यस्फुरत्कटककङ्कणौ ॥ १३ ॥
केयूराङ्गदसंपृक्तौ दधाने शोभनौ भुजौ । स्फुरद्भुजशिरःस्पृष्टकुण्डलश्रुतिमण्डिते ॥ १४ ॥
कपोलस्थलसंक्रान्तसशैलवनविष्टपे । मन्दस्मितमयज्योत्स्नापरभागोज्ज्वलाधरे ॥ १५ ॥
स्वसितामोदसम्भ्रान्तभृङ्गसंत्रस्तलोचने । मौक्तिकाभरणोदारनासादण्डविराजिते ॥ १६ ॥
अपाङ्गलीलायमुनातरङ्गाक्रान्तदिक्तटे । भ्रूविभ्रमसमाहूतरतिकान्तशरासने ॥ १७ ॥
कस्तूरीतिलकभ्राजदर्धेन्दुललितालिके । आनीलवेणीकोटिस्पृक्पश्चाद्भागपदाम्बुजे ॥ १८ ॥
लावण्यरसनिष्यन्दचन्द्रबिम्बसमानने । पादाम्बुजपरागश्रीपराजिततिलोत्तमे ॥ १९ ॥
सुन्दरस्ते तु दृष्ट्वासीत्सद्यः संभ्रान्तमानसः । वैरादिव निजारातौ प्रतिबिम्बं पुरद्रुहः ॥ २० ॥

निर्विभेद तदा बाणैः सुन्दरं कुसुमायुधः । अहो निर्माणचातुर्यमहो तारुण्यजृम्भणम् ॥ २१ ॥
अहो सौन्दर्यसन्नाहो निस्तुलाकल्पचातुरी । आपादकेशमङ्गेषु स्निग्धयोर्मुग्धयोर्मम ॥ २२ ॥
निमग्नं नयनं भूयो नोत्यातुं शक्तिमृच्छति । किमस्याः प्रतिबिम्बः स्यादियमस्या भवेदियम् ॥२३॥
इमे कुतः किमु स्वप्नो माया वा मान्मथी पुरः । आपीनौ कठिनावेतौ निस्तुलौ निर्मलप्रभौ २४ ॥
संहितौ संप्रवल्गन्तावन्योन्यस्पर्धिलक्षणौ । स्तनौ वीक्ष्यानयोर्मन्ये न कस्याऽपि भवेद्धृतिः ॥ २५ ॥
जन्मकोटितपश्चर्याफलमालिङ्गनं सकृत् । योऽन्वहं स्वदते कोऽयमनयोरधरामृतम् ॥ २६ ॥
प्रार्थयामि स्वयं दास्यमदसीयमहं त्विति । सुन्दरः स्वं दुराचारमनुरागं निगूहितुम् ॥ २७ ॥
न शशाक तदाकृष्टः समीपमनयोरगात् । ते च तं मदनाकारं पश्यन्त्यौ पक्ष्मलेक्षणे ॥ २८ ॥
मनोभवरसावेशादवशे सम्बभूवतुः । कथं नु पञ्चभिर्बाणैः सममेव मनोभवः ॥ २९ ॥
श्रीर्निर्विभेद बलवान् समप्राङ्मृतविक्रमः । सव्रीडविभ्रमोदारैः कटाक्षैः सुन्दरस्तयोः ॥ ३० ॥
अन्तर्निमग्नैरामज्जन् विद्धो मूर्च्छामवाप हि । ते चापि तक्षणादेव तत्कटाक्षासिधारया ॥ ३१ ॥
भिद्यमानमिव स्वान्तं दधतुः सम्भ्रमाशये । अन्योन्यदर्शनादेवं ते उभे स च सुन्दरः ॥ ३२ ॥
सहजं धैर्यमुत्सृज्य म्लानिमङ्गेषु भेजिरे । सद्यो विस्मृतकृत्यानां दीर्घं निश्वसतां मुहुः ॥ ३३ ॥
दूयमानं वपुस्तेषां आचचक्षे स्मरव्यथाम् । अथ गौरीसमीपं ते ययतुः सुन्दरश्च सः ॥ ३४ ॥
यथापूर्वं भगवतः पार्श्वं प्राप स्मरार्दितः । म्लायमाननतुं वीक्ष्य सर्वज्ञः सुन्दरं हरः ॥ ३५ ॥
स्मयमानमुखः प्राह नन्द्यादीनां च शृण्वताम् । कामक्रोधविहीनानां मुनीनामूर्ध्वरेतसाम् ॥ ३६ ॥
अप्राप्यं मत्पदं प्राप्य किमिदानीं त्वया कृतम् । करस्थं यत्र कैवल्यं कैलासे तत्र सुन्दर ॥ ३७ ॥
मनसा चिन्तितः कामो भोज्यः स हि न संशयः । तस्माज्जन्म भुवि प्राप्य तत्र ताभ्यां समन्वितः ॥३८॥
भुङ्क्ष्व सांसारिकान् भोगाननात्मज्ञो यथा नरः ।

श्रीअगस्त्यः ॥

यथा सुन्दरमीशानः शशापैवं भवेदिति ॥ ३९ ॥
तथैव गिरिजा ते च शशाप परिचारिके । अथ वज्रमिवोत्सृष्टं शापमाकर्ण्य शाम्भवम् ॥ ४० ॥
सुन्दरः प्रणिपत्येशं रुदन्नेवमभाषत । देव देव दयासिन्धो भक्तानामभयङ्कर ॥ ४१ ॥
अपराधमिमं सोढ्वा प्रसीद परमेश्वर । भूतले यदि जन्म स्यात्कलिना दूषिते मम ॥ ४२ ॥
त्वद्विस्मरणमेव स्यात्पशोरिव न मे स्मृतिः । वाङ्मनःकायजातानामेनसां महतामपि ॥ ४३ ॥
त्वन्नामस्मरणं सद्यः प्रायश्चित्तमिति स्थितिः ।

करोमि नैवं पुनरिन्दुमौले जने त्वदीये करुणां कुरुष्व ।
स एवमुक्त्वा शतशः प्रणम्य रुदन् पदाम्भोरुहमाललम्बे ॥ ४४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरस्य शापप्राप्तिर्नाम पञ्चमोऽध्यायः ॥

॥ अथ षष्ठोऽध्यायः ॥

श्रीअगस्त्यः ॥

अथ प्रसन्नो भगवान् प्रणतार्तिहरो हरः । उत्थाप्य सुन्दरं प्राह करुणाशिशिरां गिरम् ॥ १ ॥
शृणु सुन्दर मद्वाक्यं मा रोदीर्मास्तु ते भयम् । न गिरामन्यथाभावो मम नित्यगिरामिव ॥ २ ॥
अविवेककृतं कर्म परिणामे महद्भवेत् । यथान्नं विषसंसृष्टमज्ञानादुदरंगतम् ॥ ३ ॥
ब्रह्मादयोऽपि मुह्यन्ति कामसङ्कल्पदूषिताः । सङ्कल्पैर्बध्यते जन्तुरसङ्कल्पाद्विमुच्यते ॥ ४ ॥
तस्मात्त्यजन्ति सङ्कल्पं मदेकशरणा जनाः । सङ्कल्पदासाः सर्वेऽपि सङ्कल्पेशो न कश्चन ॥ ५ ॥
हित्वा मां च मदीयांश्च मदनुग्रहभागिनः । महती विश्वमाया मे कामिनी काञ्चनात्मिका ॥ ६ ॥
आवृत्य विष्टपं सर्वं मोहाब्धौ पातयत्यहो । मामेव ये प्रपद्यन्ते मुक्तास्ते मायया तया ॥ ७ ॥
स्त्रीणां स्त्रीसङ्गिनां चैव सङ्गत्या कामवान् भवेत् । सतां सङ्गादसङ्कल्पो मयि भक्त्या च मुच्यते ॥ ८ ॥
प्रत्यक्षं दृष्टमेवैतत्तव सुन्दर साम्प्रतम् । यतो मत्सन्निधिं त्यक्त्वा स्त्रीसमक्षं गतो भवान् ॥ ९ ॥
अनर्थोऽयमभूत्तस्मादधःपातो यतोऽभवत् । एवमेव पुरा विष्णुः सङ्कल्पेन मुहुर्मुहुः ॥ १० ॥
अवतीर्य भुवं पश्चात्सङ्कल्पं जितवानथ । स्मृतिभ्रंशो न भविता तव जातस्य भूतले ॥ ११ ॥
भक्तिश्च मयि पूर्णास्तु स्तुहि पुण्यस्थलेषु माम् । तत्रोद्वाहे प्रवृत्ते ते सोऽहमागत्य सुन्दर ॥ १२ ॥
स्वैयं दासं विधाय त्वां रक्षिष्यामि न संशयः । यथा त्वच्चिन्तितं तत्र तथा कर्तास्मि सुन्दर ॥ १३ ॥
शोणाचलस्य निकटे जम्बूपुरनिवासिनः । जटिलाख्यादादिशैवान्मद्भक्ताज्जनिरस्तु ते ॥ १४ ॥
भूषयिष्यति वाणी त्वां प्राप्स्यसे परमं यशः । गच्छेत्यादिश्य भगवान् अन्तःपुरमगाहत ॥ १५ ॥

ऋषय ऊचुः ॥

दिक्षूत्तरादिषु क्षोण्यां सतीष्वपि कपर्दिना । दक्षिणा दिक्समुद्दिष्टा कस्मात्सुन्दरजन्मनि ॥ १६ ॥

श्रीअगस्त्यः ॥

दिग्भ्यो दशभ्यो हे विप्रा दक्षिणा दिग्विशिष्यते । व्याघ्रपादमुनेर्यत्र संन्यधत्त महेश्वरः ॥ १७ ॥

पुण्डरीकपुरे धाम्नि तस्मादेषा विशिष्यते । तस्मात्सैव समुद्दिष्टा दिशा सुन्दरजन्मनि ॥ १८ ॥
सुन्दरोऽपि विषादार्तो नमस्कृत्वा महेश्वरम् । कैलासादपतद्भूमौ स्वर्लोकान्निरये यथा ॥ १९ ॥
जन्मादिचरितं तस्य सुन्दरस्य महात्मनः । वक्ष्यामि वो मुनिश्रेष्ठाः श्रवणानन्दकारकम् ॥ २० ॥
अस्ति दक्षिणदिग्भागे ख्यातं **जम्बूपुरं** महत् । दक्षिणस्याः पिनाकिन्याः प्रख्याते दक्षिणे तटे ॥
नातिदूरेऽरुणाद्रेस्तु तस्मिन् ब्राह्मणसंकुले । शिवभक्ताग्रणीः कश्चिज्जटिलाख्यो शिवद्विजः॥ २२ ॥
वेदागमपुराणानां पारदृश्वा कृतक्रतुः । पितेव शिवभक्तानामन्नदाता शिवप्रियः ॥ २३ ॥
भार्या **ज्ञानवती** नाम तस्य श्रद्धानुसारिणी । तयोरनुपमं तत्र गार्हस्थ्यं सद्विराद्दतम् ॥ २४ ॥
अनपत्यौ दम्पती तौ पार्वतीपरमेश्वरौ । प्रदक्षिणार्चानतिभिस्तोषयामासतुश्चिरम् ॥ २५ ॥
अनुजग्राह भगवान् दत्वापत्यं तयोर्हरः । अथ गर्भवती तस्य भार्या भाग्यवती सती ॥ २६ ॥
रराज कृतसंस्कारा मणिरुत्तेजितो यथा । दशमे मासि सा लग्ने शुभग्रहनिरीक्षिते ॥ २७ ॥
असूत ज्ञानिनी पुत्रं पूर्णेन्दुमिव पूर्वदिक् । जातकर्माकरोत्तस्य मुदितो जटिलः पिता ॥ २८ ॥
ब्राह्मणेभ्यो ददौ वित्तं प्रभूतं ब्राह्मणोत्तमः । द्वादशे दिवसे प्राप्ते सम्मन्त्र्य सहभार्यया ॥ २९ ॥
कमलालयनाथाख्यं चक्रे स्वपितुराख्यया । दृष्ट्वा रूपं जनास्तस्य सर्वे सुन्दरमूचिरे ॥ ३० ॥
ततोऽयं ववृधे बालः पूर्षपक्षोडुराडिव । चूडाकर्मण्यथ कृते पूर्ववासनया स्वयम् ॥ ३१ ॥
ददौ महेश्वरे भक्तिं सुन्दरः सुरदुर्लभाम् । सकृदेवोपदेशेन लिपिभेदानबुध्यत ॥ ३२ ॥
धीधीषु श्रवणादेव कलाः सर्वा विवेद सः । सुन्दरस्त्वेकदा वीथ्यां बालकैस्तुल्यवार्षिकैः ॥ ३३ ॥
धूळीकेळिपरो राज्ञा **नरसिंहा**भिधेन सः । तद्देशेशेन चोळेन दृष्टो नीतः स्ववाहनम् ॥
अनपत्यस्य राज्ञोऽभूदमुष्मिन् प्रीतिरुत्तमा ॥ ३४ ॥
शिबिकामधिरोप्यामुं नीत्वा भवनमात्मनः । जटिलस्यानुमत्यायं पुत्रत्वेनाभ्यपालयत् ॥ ३५ ॥
जटिलोऽस्य पिता राज्ञा दत्तार्थेनात्मनोऽन्तिके । स्थितेन सह पुत्रस्य गायत्रीव्रतमादिशत् ॥ ३६ ॥
वेदानध्यापयामास साङ्गानपि सहागमैः । अधिगम्य च शास्त्राणि गुरुभ्यो दक्षिणामदात्॥ ३७ ॥
युवराजो भवत्वेष इति राजप्रचोदितः । सुन्दरो वारितः पित्रा न विप्राणां विधिस्त्विति ॥ ३८ ॥
युवराजसमं लेभे पदं विद्वद्विराद्दतम् । श्रीनूतनपुरे कश्चित्षडङ्गविदितीरितः ॥ ३९ ॥
स स्वकन्यां सुन्दराय कमलालयशर्मणे । प्रदातुं भार्यया सार्धमालोच्य चकमे तदा ॥ ४० ॥
दास्यामि कन्यां त्वत्सूनोः प्रेषयित्वेति पत्रिकाम् । तथा ममाभिलाषो हि सम्बन्धोऽस्त्वावयोरिति ॥
अनुमन्तुर्मुदा तस्मादानीय प्रतिपत्रिकाम् । जटिलस्यानुमत्या च कल्याणोद्योगमातनोत् ॥ ४२ ॥

वैशाखोत्तरफल्गुन्यामभूदुद्वाहनिश्चयः । वधूवरपक्षबन्धूनां समवायो महानभूत् ॥ ४३ ॥
नरसिंहाभिधो भूपश्चतुरङ्गबलान्वितः । आययौ सुन्दरोद्वाहमालोकयितुमात्तमुत् ॥ ४४ ॥
उत्सर्जनं व्रतानां च विधाय विधिपूर्वकम् । स्नानकर्म विधिं चक्रे सुन्दरो लोकसुन्दरः ॥ ४५ ॥
भेरीमृदङ्गपणवशङ्खगोमुखकाहळीः । वादयामासुरत्युच्चैर्वीणावेणून् जनाः परे ॥ ४६ ॥
राजवाहनमारुह्य सुन्दरो ब्राह्मणोत्तमैः । कृताशीः सहभार्यैश्च स षडङ्गविदो गृहम् ॥ ४७ ॥
आययौ सखिभिस्तूर्णं सवयोभिरलंकृतैः । प्रत्युज्जगाम पत्न्या तं सह जामातरं स तु ॥ ४८ ॥
कृतोपचारस्तेनायं यथावत्समलङ्कृतः । उद्वाहवेदिकामाप स्रग्भूषाङ्गनशोभितः ॥ ४९ ॥
निषसादासने रम्ये नवरत्नपरिष्कृते । ब्राह्मणैर्दीक्षितैर्वृद्धैः शिवभक्तैश्च भूषिता ॥ ५० ॥
छत्रकेतुवितानाढ्या स्वर्णस्तम्भपरिष्कृता । सवयोभिर्वरस्यापि सर्वाभरणभूषितैः ॥ ५१ ॥
पतिव्रतासहस्रेण किरता लाजजालकम् । समग्रकन्यकाभिश्च गायन्तीभिर्विभूषिता ॥ ५२ ॥
ज्योत्स्नाप्रदीपमालाभिरभिद्योतितदिङ्मुखा । नानाविधमहावाद्यनादपूर्णनभःस्थला ॥ ५३ ॥
शक्रेणेव महीभाजा नृसिंहेनाप्यधिष्ठिता । दिव्येनागरुधूपेन समन्तादधिवासिता ॥ ५४ ॥
सा सभा रुरुचे तत्र सुधर्मेव भुवं गता । सुन्दरश्च सभामध्ये वरवेषविभूषितः ॥ ॥ ५५ ॥
वध्वा च सहितो रेजे रमया च यथा हरिः । पवित्रपाणिः सङ्कल्प्य कर्मनिर्विघ्नहेतवे ॥ ५६ ॥
कृत्वा विघ्नेशपूजां तु नारिकेलं निवेद्य च । पक्षाद्यक्षतबलिं कृत्वा पुण्याहं च तदंशकम् ॥ ५७ ॥
बोधायनोक्तसूत्रेण स्वगृह्येन यथाविधि । वरप्रेषणपूर्वाणि कृत्वा कर्माणि सज्जनैः ॥ ५८ ॥
पयसा श्वशुरः पादौ प्रक्षाल्याङ्घ्री वरस्य च । मधुपर्कं ददेशास्मै जामात्रे मन्त्रपूर्वकम् ॥ ५९ ॥

विद्याववोरूपधनान्वयाद्यैर्न सुन्दरस्यास्ति समः पृथिव्याम् ।
सर्वे तदाशीर्वचसातिदीर्घमस्त्वायुरस्येत्यवदन् द्विजेन्द्राः ॥ ६० ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे विवाहसन्नाहो नाम षष्ठोऽध्यायः ॥

॥ अथ सप्तमोऽध्यायः ॥

श्रीअगस्त्यः ॥

सौवर्णपालिकालाजपूर्णकुम्भसमित्कुशैः । पुष्पदूर्वाशरावैश्च दधदा शोभिता सभा ॥ १ ॥
अथाङ्कुरार्पणं कृत्वा कृतकौतुकबन्धनः । पुरोहितोऽस्य षट्कर्मनिरतोऽपि द्विजैः सह ॥ २ ॥

दत्तानुमतिरारेभे सुन्दरोद्वाहमङ्गलम् । प्रस्तुतोद्वाहसङ्कल्पे सुन्दरेऽथ सभान्तरे ॥ ३ ॥
अदृश्यत महावृद्धस्तत्र किञ्चिज्जरावृतः । वेणुदण्डमवष्टभ्य स्खलदङ्घ्रिः पदे पदे ॥ ४ ॥
बिभ्रद्भ्रूपक्ष्मरोमाणि पलितानि सितानि च । कुण्डलालङ्कृतः प्रांशुश्चञ्चत्प्रांशुशिखण्डकः ॥ ५ ॥
भसितेनानुलिप्ताङ्गो रुद्राक्षस्रग्विभूषितः । विगलद्बन्धवसनो मुखे निश्शेषितद्विजः ॥ ६ ॥
सिराभिर्दत्तुरग्रीवः श्रीकण्ठपदलाञ्छनः । तमालोक्य सभामध्ये समवेता महीसुराः ॥ ७ ॥
केचिदुत्थाय दत्वार्घ्यं प्रणेमुस्तस्य पादयोः । हस्तालम्बनमन्ये तु भक्त्या प्रददुरादरात् ॥ ८ ॥
ददौ षडङ्गवित्तस्य पुरस्तादासनं महत् । सहस्रतालमहसन् सङ्घीभूय च बालकाः ॥ ९ ॥
सुन्दरस्तु तमालोक्य भस्मरुद्राक्षधारिणम् । शैलादिसदृशः कश्चिद्वृक्षो वा शिव एव वा ॥ १० ॥
सर्वथा पूज्य एवायमित्यमन्यत मानसे । अथोपविष्टं तं वृद्धमुवाच जटिलस्त्विदम् ॥ ११ ॥
महाब्राह्मण कोऽसि त्वं कुतः किं नाम तावकम् । त्वद्दर्शनात्कृतार्थाः स्मस्तपः फलितमद्य नः ॥
इति पृष्टोऽब्रवीद्वृद्धो जटिलं कम्पिताङ्गुलिः । कमलानगरे नित्यं वासो मे जटिलद्विज ॥ १३ ॥
जानामि त्वामहं न त्वमस्मान् वेत्सि कदाचन । आस्तां तावत्प्रसङ्गोऽयं समाजः कोऽत्र कर्म किम् ॥
सङ्घीभूताः स्त्रियो बाला वाद्यानामत्र को ध्वनिः ।

जटिलः ॥

कमलालयनाथाख्यः सुन्दरोऽयं जनैः कृतः ॥ ॥१५॥
पारगः सर्वविद्यानां प्राप्तो मत्तपसा सुतः । प्रस्तुतोऽस्य विवाहोऽत्र त्वदाशीर्भिः समृद्ध्यताम् ॥ १६ ॥
जटिलस्तमुवाचेत्थं वदन्तं वृद्धसत्तमः । शिथिलाक्षरया वाचा निजगाद सभासदः ॥ १७ ॥
श्रूयतामुच्यते किञ्चित् समवेता महाजनाः । ब्रूतावधार्य सर्वेऽपि सत्यमेवास्तु मा मृषा ॥ १८ ॥
दासमेनं क्रयक्रीतं सुन्दरं जटिलो मम । प्रलोभयित्वा मूढात्मा पुत्रीकृत्य बलादिह ॥ १९ ॥
वृद्धं ह्यगणयित्वा मां विवाहमपि कारयन् । स्वपुत्रतां स्थिरीकर्तुं यतते सत्यमुच्यते ॥ २० ॥
आवयोर्व्यवहारोऽस्ति जिते वाप्यजिते मयि । विवाहोऽस्य भवेत्पश्चादद्य मास्तु सभासदः ॥ २१ ॥
श्रिया मे न कुबेरोऽपि सदृशोऽन्यस्तु किं पुनः । सोऽहमस्यापि दासस्य विधेयं सकलं जगत् ॥
एतत्कारयिता लोके यदीच्छा मे भविष्यति । कोटिशः सन्ति मे दासाः दिशामन्तेषु भुञ्जते ॥ २३ ॥
श्रियं यथोचितां दत्तामयमप्यस्तु तादृशः । दास सुन्दर रे किं त्वं मां हित्वास्य गृहं गतः ॥ २४ ॥
उत्तिष्ठायाहि गच्छावो यदिष्टं तद्ददामि ते ।

श्रीअगस्त्यः ॥

इत्याकर्ण्य हसन् प्राह सुन्दरो वृद्धमीक्ष्य सः । अस्ति चेदनुभूतिस्ते तथा कर्तास्म्यहं वद ॥ २५ ॥

वृद्धः ॥

सुन्दरो मम दासोऽयं सम्यक् शृणुत भो जनाः । तद्दास्यपत्रिकाप्यस्ति चैतत्पैतामहाक्षरी ॥ २६ ॥

सुन्दरः ॥

लोके ब्राह्मणदास्यं किमस्ति पित्तोऽसि मूढवत् । क्रुद्धोऽब्रवीद्वीक्ष्य वृद्धमस्ति चेद्देहि पत्रिकाम् ॥२७॥

दासस्त्वं पत्रिकालोके न योग्यः किं तया फलम् । इति प्रवृद्धं धावन्तमनुद्रुत्य स सुन्दरः ॥२८॥

बुद्धिहीनोऽसि वृद्धेति हठादादाय पत्रिकाम् । वाचयित्वाक्षरं सर्वं कोपाच्चिच्छेद तां पुनः ॥ २९ ॥

यूयं पश्यत विद्वांसः पत्रिकाच्छेदभूदयम् । न्यायो नास्ति किमन्याय एवास्मिन् जनतापदे ॥ ३० ॥

चुक्रोशेति क्रुधा वृद्धो जनान् वीक्ष्य समन्ततः । यदनेन कृतं गर्वाद्दास्यं मे सुदृढीकृतम् ॥ ॥

एवं वदति वृद्धेऽस्मिन् सम्भ्रान्ता सा सभाभवत् । वधूवरासबन्धूनामासीन्मनसि विस्मयः ॥३२॥

जनकोलांहले शान्ते व्यवहारविचक्षणाः । विद्वांसो दिक्षु विख्याता नृसिंहनृपचोदिताः ॥ ३३ ॥

ब्राह्मणा ऊचुः ॥

अत्र वा व्यवहारस्ते प्रष्टव्योऽन्यत्र वा पुनः । इत्युक्तः प्राह तान् वृद्धोऽप्यत्र दुर्व्यवहारिणः ॥३४॥

गमिष्यामो वयं तत्र मध्यस्थाः सन्ति सज्जनाः । यत्र श्रीनवनीताख्ये पुरे महति पावने ॥ ३५ ॥

तथैव तत्र गत्वा तैरेवमुक्ताश्च ते जनाः । पुनरूचुश्च तं वृद्धं सान्त्वयित्वा गिरां चयैः ॥ ३६ ॥

वृद्धोऽसि व्यवहारेषु समर्थ इव जल्पसि । शास्त्रार्थेषु न हि क्वापि द्विजो विक्रेतुमर्हति ॥ ३७ ॥

अध्वश्रमेण वा भ्रान्त्या वृद्धभावेन वोदितम् । वचस्तवेदं क्षान्तं च तूष्णीमेहि प्रभुः परः ॥ ३८ ॥

नरसिंहनृपः शान्तः सुन्दरे क्षान्तिरुत्तमा । गुरुर्यः सर्वविद्यासु वृद्धोक्त्या नैव कुप्यति ॥३९॥

वृद्धः ॥

नास्ति कोपः प्रसादो वा दासानां मम विद्यते । इदमेव हि विख्यातमस्मद्दास्यैकलक्षणम् ॥ ४० ॥

मूलशासनमास्तेऽस्मत्करे पश्यत हे जनाः । किं पाटितेन पत्रेण कृत्रिमेणामुना पुनः ॥ ४१ ॥

इति ब्रुवाणे वृद्धेऽस्मिन् दासः को वेति तत्पिता । किं वा भ्रान्तस्य वाक्येन क्षान्तमेतन्मया द्विजाः ४२॥

विवास्यैनं बहिर्ग्रामे कर्मारब्धं प्रवर्तताम् । इत्युक्ते जटिलेनाथ वृद्धः क्रुद्धोऽब्रवीत्पुनः ॥ ४३ ॥

अराजकोऽयं किं देशः सन्तः सन्ति न वा पुरे । अबन्धोरगतेर्दासो यस्य मे नीयते परैः ॥ ४४ ॥

वद सुन्दर सत्यं त्वं चर धर्मं मदीरितम् । किं न दासोऽसि मे ब्रूहि सर्वेषामिह सन्निधौ ॥४५॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरवृद्धव्यवहारो नाम सप्तमोऽध्यायः ॥

॥ अथ अष्टमोऽध्यायः ॥

श्रीसुन्दर उवाच ॥

असङ्गतं भवानाह सत्यवद्ब्राह्मणोत्तम । शम्भोर्दासा वयं चादिशैवा जम्बूपुरे स्थिताः ॥ १ ॥
त्वां के जानन्ति चास्मांस्तु जानन्त्येते महाजनाः । हरदासो नान्यदासस्तस्य दासायते जगत् ॥ २ ॥
हरस्य दासं यो ब्रूते दासं द्रोही शिवस्य सः । सहेयेदं त्वदागोऽहं शङ्करो न सहिष्यते ॥ ३ ॥
भस्मरुद्राक्षभाजं त्वां नमाम्यथानुगृह्यताम् ।

वृद्ध उवाच ॥

किमेवं सुन्दर ब्रूषे किं ते न्यूनं मदन्तिके । पुत्राभ्यामविशेषं त्वामहं पश्यामि सुन्दर ॥ ४ ॥

श्रीसुन्दरः ॥

नाहं त्वामभिजानामि नास्मिन् जन्मनि सङ्गतिः ॥ ५ ॥
महान्तोऽपि यदि ब्रूयुरनृतं को निवारकः । इत्युक्त्वाथाह निर्विण्णो न्यायं ब्रूतेति तान् द्विजान् ॥
ते प्राहुरेनं वृद्धं च न्यायपूर्वेण भूसुराः । भुक्तिर्वा लिखितं वापि साक्षी यद्यस्ति ते वद ॥ ७ ॥

वृद्ध उवाच ॥

जनाः शृणुत मे हस्ते पत्रमस्ति ससाक्षिकम् । स्वहस्तलिखितं त्वस्यं क्रियते निह्नवः कथम् ॥ ८ ॥

द्विजा ऊचुः ॥

पत्रं दर्शय भो वृद्ध यत्रानेन कृता लिपिः । युवयोर्व्यवहारे च यः साक्षी सोऽपि वर्ण्यताम् ॥ ९ ॥

वृद्धः ॥

सतीनामुत्तमा देवी नवनीतेशनायिका । क्रयक्रीतो यदा मे त्वं तदा साक्ष्ये व्यवस्थिता ॥ १० ॥
स्त्रीसाक्ष्यं न प्रमाणं चेत्पुत्रौ तस्याश्च साक्षिणौ । इत्युक्त्वा मूलपत्रं तु विप्रेभ्यो दातुमुद्यतः ॥ ११ ॥
इदं पत्रछिदो मूर्खात्सुन्दराद्दौष्टचकन्दरात् । रक्षणीयं हि युष्माभिरित्युक्त्वादाच्च पत्रिकाम् ॥ १२ ॥
तथेति ते गृहीत्वा तत्पत्रं सर्वे महाजनाः । कायस्थं वाचयामासुः कञ्चिद्ग्रामनिवासिनम् ॥ १३ ॥
गणकेन यदुक्तं तु तद्वाचकमिहोच्यते । जम्बूपुरनिवास्यादिशैवान्वयभवोऽपि च ॥ १४ ॥
कमलालयनाथोऽहं तथा मत्पुत्रपौत्रकैः । जातैर्जनिष्यमाणैः श्रीनवनीतपुरस्थितेः ॥ १५ ॥
पित्राख्यस्यास्य दासोऽस्मि सत्यमस्मि लिपिर्मम । इति श्रुत्वा पुनर्दृष्ट्वा तस्य पैतामहाक्षरम् ॥ १६ ॥
साक्ष्यक्षराङ्कितं सर्वेऽप्यपश्यन् तत्तदक्षरैः । सार्धं तुल्यैर्विस्मितास्तद्वाच्यं सत्यं च मेनिरे ॥ १७ ॥
विप्राः सुन्दरमाहेति तव पैतामहाक्षरम् । ग्रन्थं तद्धस्तलिखितमानीयालोकयाक्षरम् ॥ १८ ॥
इत्युक्तः सहसानीयापश्यत्तुल्यं लिपिद्वयम् । पुनरूचुर्द्विजा वृद्धपत्रेण त्वं पराजितः ॥ १९ ॥

---

१. अस्येति षष्ठ्यन्तं पदं वस्तुगत्या उत्तरान्वयि पत्रार्थकम् । द्विजैस्तु, लिखितेन साकं पूर्वान्वयित्वेन गृहीतम् ।

कैङ्कर्यं सुन्दरास्यैव त्यक्त्वा शङ्कां च कुर्विति । उक्तः खिन्नो रुदन् किञ्चित् मच्छिरोलिखितं न्विदम् ॥
तथास्मि दासो वृद्धस्य सदनं क्वास्ति तत्पुरे । गच्छाम्यहं सहैतेन वृद्धो मे दर्शयेद्गृहम् ॥ २१ ॥
इत्युक्तमात्रादृद्धोऽपि दर्शयिष्यामि मद्गृहम् । उत्तिष्ठायाहि गच्छावो यदिष्टं तद्ददामि ते ॥ २२ ॥
इत्याहूतो भगवता वृद्धवेषेण शम्भुना । भ्रान्तश्चिरयसीत्युक्त्वा सहसोत्थाय सुन्दरः ॥ २३ ॥
वृद्धमग्रे विनिर्गत्य गच्छन्तं पृष्ठतोऽन्वगात् । सुन्दरानुगतो वृद्धो गव्यूतिद्वयसम्मितम् ॥ २४ ॥
पन्थानं समतिक्रम्य विप्रवीथीं विहाय च । गत्वा श्रीनवनीताख्यपुराधीशस्य शूलिनः ॥ २५ ॥
आलयं प्रविवेशान्तर्मणिगोपुरमण्डितम् । अस्मदीशालयं कस्मात् विशसि भ्रान्तवत्पुनः ॥ २६ ॥
इत्यनुद्रुत्य निःशङ्कमालयद्वारि सुन्दरः । तस्थौ मुहूर्तं साश्चर्यं वृद्धनिर्गमनाशया ॥ २७ ॥
अदृश्यतां गतो वृद्धो जनाः किमिति विस्मिताः । अथाविरासीदुमया सहसर्वगणैर्वृतः ॥ २८ ॥
आरूढो वृषभं दिव्यं स्कन्दविघ्नेश्वरान्वितः । द्वारदेशमनुप्राप्य स्तूयमानः सुरर्षिभिः ॥ २९ ॥
स्थितं सुन्दरमालोक्य स्मयमानमुखाम्बुजः । सुन्दरो मम दासोऽयमिति संदर्शयन् गिरेः ॥ ३० ॥
कन्यकायै कटाक्षेण पुनः प्रोवाच सुन्दरम् ॥ ३१ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे सुन्दरदास्यपत्रप्रदर्शनपराशिवाविर्भावो नामाष्टमोऽध्यायः ॥

॥ अथ नवमोऽध्यायः ॥

श्रीशिवः ॥

रे सुन्दर यत्प्रोक्तं पशूनां सन्निधौ त्वया । नाहं दासस्तवेत्येतत् साध्यतां किं विलम्बसे ॥ १ ॥
जननी जगतामेषा गौरी त्वद्दास्यसाक्षिणी । इमावपि तथाभूतौ गजवक्त्रषडाननौ ॥ २ ॥

सुन्दरः ॥

वृषारूढं समालोक्य सोमास्कन्दगणेश्वरम् । दधानं दक्षिणकरे महतीं दास्यपत्रिकाम् ॥ ३ ॥
विष्णुब्रह्मेन्द्रचन्द्रार्कयमाग्निवरुणाक्षुगैः । सिद्धचारणगन्धर्वैः स्तूयमानं वियद्गतैः ॥ ४ ॥
गणकोटिसमाघ्मातभेरीकाहळिकास्तुतम् । विलक्षहृदयो भूत्वा निमील्य नयने क्षणम् ॥ ५ ॥
आनन्दाश्रुपरीताक्षो रोमाञ्चाञ्चितविग्रहः । पुनरुन्मील्य तुष्टाव शंकरं सुन्दरो नमन् ॥ ६ ॥
अपराधं क्षमस्वेति पुनः पुनरुवाच सः । पुष्पवृष्टिरभूद्दिव्या दिव्यभूदुन्दुभिध्वनिः ॥ ७ ॥
तदा दयालुस्तं प्राह महेशो वृषकेतनः । पूर्वं महास एवासीः स्त्रीभ्रान्त्या जन्म ते पुनः ॥ ८ ॥
अत्र भूम्यामभूत्वं त्वेतत्संसारमुक्तये । आगत्य रुध्योद्वाहं ते दासं त्वां समकारिषम् ॥ ९ ॥

न कैङ्कर्यं किञ्चिदपि कर्तव्यं मे त्वया क्षितौ । स्तुहि नित्यं कवित्वेन गायस्व द्राविडोक्तिभिः ॥ १० ॥
तदेव पूजनं मेऽस्तु तेन प्रीतोऽस्म्यहं त्वयि । इत्युक्तः पुनरप्याह शम्भुना सुन्दरो रुदन् ॥ ११ ॥
भक्तिगद्गदया वाचा ह्यज्ञोऽहं मूढधीः कथम् । स्तौमि त्वां कथमीशानमपरिच्छेद्यवैभवम् ॥ १२ ॥
यथैवानुगृहीतोऽहं तथा कर्तास्मि शंकर । पुनस्तमीशः प्रोवाच पूर्वं कोपेन मां प्रति ॥ १३ ॥
पित्त भ्रान्तेति यत्प्रोक्तं पारुष्यात् सुन्दर त्वया । तत्पित्तशब्दमादौ त्वं उक्त्वा गायस्व मां प्रति ॥ १४ ॥
सन्निधास्यति मच्छक्त्या तव वाचि सरस्वती । इत्याज्ञप्तो महेशेन हर्षविस्मयसंयुतः ॥ १५ ॥
अगायदश गेयानि प्रथमं शिवशासनात् । तत्पित्तशब्दं पद्यादौ प्रयुज्य द्राविडोक्तिभिः ॥ १६ ॥
आहूय स्वयमादरेण भगवंस्त्वं सर्वलोकानतो मिथ्यात्माभिरतं मृषागिरमिमं वेधोहरीन्द्रादिभिः ।
अज्ञातो मनसा च नित्यवचसा दासं वितेने जनं तस्मै भक्तजनप्रियाय महते देवाय तुभ्यं नमः ॥
यस्यावलोकनादस्य मायाभूत्सृष्टिसाधिका । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ १८ ॥
अनामरूपसंसृष्टः कदाचिदपि यः शिवः । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ १९ ॥
महदैषम्यमुत्पन्नं मायया यस्य शक्तितः । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २० ॥
अहङ्कारस्तथा जज्ञे महतो यत्प्रभावतः । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २१ ॥
भूतेन्द्रियमनस्सृष्टिस्ततो यत्प्रेरितादभूत् । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २२ ॥
येन पञ्चीकृतान्यासन्नसंबन्धवतापि च । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २३ ॥
अनुप्रविश्य यस्तानि विराड्रूपं बिभर्ति च । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २४ ॥
सिसृक्षया गिरा युक्तः सृज्यं सृजति योऽखिलम् । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २५ ॥
अलंकृतः श्रिया तस्य रक्षां यस्तनुते हरिः । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २६ ॥
अनन्यसाध्यं संहारं यस्तस्य कुरुते हरः । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २७ ॥
प्राज्ञतैजसविश्वादिसाक्षी भोज्यः स्वयं स्थितः । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ ॥ २८ ॥
अहमाकाररूपेण यः सर्वं व्याप्य तिष्ठति । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ २९ ॥
ओतप्रोतमिदं यत्र सूत्रे मणिगणा यथा । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ ३० ॥
अन्तश्चिदात्मना तिष्ठन् इन्द्रियैर्यो विभाव्यते । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ ३१ ॥
यत्सत्ता जगतः सत्ता सर्वं स्फुरति येन च । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ ३२ ॥
यत्र नानाप्रपञ्चोऽपां विवर्ता इव सागरे । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ ३३ ॥
आदावन्ते च मध्ये य एकरूपः स्वयंप्रभुः । नमस्तस्मै महेशाय देवदेवाय ते नमः ॥ ३४ ॥
आदित्यमण्डले भाति पुरुषो यो हिरण्मयः । अन्तश्चक्षुषि भूतानां यः सर्वेषां परः पुमान् ॥ ३५ ॥
अङ्गुष्ठमात्रं पुरुषं यमन्तः कवयो विदुः । यन्नामस्मरणं जन्तोः कालकर्मादिनाशनम् ॥ ३६ ॥
यदविज्ञाय बन्धोऽयं यद्विज्ञानाद्विमुच्यते । गुरुमूर्तिर्महर्षीणां वटमूले बिभाति यः ॥ ३७ ॥

योऽपिबद्गरलं घोरं जगतामतिभीकरम् । मार्कण्डेयमुदे कालं यो व्यधात्स्वपदाहतम् ॥ ३८ ॥
भस्मसादकरोन्मन्दस्मितेन त्रिपुराणि यः । मृगरूपस्य यो दक्षक्रतोश्चिच्छेद मस्तकम् ॥ ३९ ॥
अवतारेषु यो विष्णुमनुजग्राह पूजितः । मणिमन्त्रौषधीनां च शक्तिर्यस्यानुभावतः ॥ ४० ॥
आब्रह्म स्तम्बपर्यन्तं यस्याज्ञा न विलङ्घ्यते । नमस्तस्मै नमस्तस्मै गिरिजावासमूर्तये ॥ ४१ ॥
चन्द्रशेखर दासोऽस्मि सह वंशद्वयेन च । मा जायतां कुले जन्तुः शंभोर्दासो न यो भवेत् ४२ ॥
अपराधं क्षमस्वैवं मम वाक्कायसंभवम् । प्रसीद करुणांसिन्धो प्रणतार्तिहराव्यय ॥ ४३ ॥
प्रसीद पार्वतीनाथ दयादृष्टया विलोकय । इत्युदीर्य पदाम्भोजे प्रणतं बाष्पवर्षिणम् ॥ ४४ ॥
समुत्थाप्य महादेवः सुन्दरं प्रत्युवाच ह । भो भो सुन्दर मा रोदीः प्रसादस्त्वयि मे महान् ॥ ४५ ॥
मयि प्रसन्ने न पुनः शोकमभ्येति कश्चन । स्तुत्या त्वत्कृतया येमां स्तुवन्त्यहरहर्नराः ॥ ४६ ॥
न तेषां दुरितं किंचिद्भविताति मतिर्मम । कृतः प्रसादो महता देवेनेत्यथ सुन्दरः ॥ ४७ ॥
उत्थितोऽञ्जलिमाधाय भगवन्तं व्यजिज्ञपत् । त्वदास्यभाग्यं मे लब्धं दुर्लभं योगिनामपि ॥ ४८ ॥
कृत्यं दासस्य मे किञ्चिद्विनिर्देष्टुं त्वमर्हसि ।

श्रीशिवः ॥

स्तुतिर्मम त्वया कार्या सदा सुन्दर सर्वतः । इदं मत्प्रीतये कृत्यं नित्यं यद्विहितं तव ॥ ४९ ॥

श्रीसुन्दरः ॥

चत्वारो न विदुर्वेदास्तथा देवादयोऽपि यम् । मनो निवर्तते यस्मादविज्ञातान्महेश्वर ॥ ५० ॥
स्तौमि तं त्वां कथं बालो ग्राम्यालापार्थया गिरा । कीदृशी ते स्तुतिस्तस्याः किमादिर्मध्यमुच्यते ॥
अवसानं च किंरूपं न जाने किञ्चिदप्यहम् । तवामूर्तस्य पूर्णस्य नामरूपनिरूपणे ॥ ५२ ॥
वाचापराधो भविता न हि तस्यास्ति निष्कृतिः । सर्वथा सापराधं मां करुणाकर पालय ॥ ५३ ॥
शीकरेण महाम्भोधेर्महिमा वर्ण्यते कथम् ॥ ५४ ॥

श्रीशिवः ॥

इमां पञ्चाक्षरीं विद्यां पञ्चपातकनाशिनीम् । गृहाण मम भक्तोऽसि तस्मादेनां ददामि ते ॥ ५५ ॥
भ्रान्तेति सदसि प्रोक्तं त्वया मां प्रति सुन्दर । तदादाय पदं पूर्वं स्तुहि वागस्त्वनर्गला ॥ ५६ ॥
भुवं प्रदक्षिणीकुर्वन् यत्र मे स्थानमुत्तमम् । यत्र लिङ्गाकृतिर्वाग्भिस्तुहि मां स्तुतिकृत्प्रियम् ॥ ५७ ॥
तत्र तत्र भविष्यामि प्रसन्नः सन्निधाय ते । इति पञ्चाक्षरीं विद्यामुपदिश्य महेश्वरः ॥ ५८ ॥
ब्रह्मादिभिरविज्ञातां शैवीं विद्यां व्यतीतरत् । शब्दब्रह्ममयी देवी तज्जिह्वायां ननर्त ह ॥ ५९ ॥
प्रोवाह वाचां लहरी तस्यामृतधुनी यथा । वाग्विभूतिं स सम्प्राप्य सुन्दरः परमेश्वरात् ॥ ६० ॥
भूयस्तमेव तुष्टाव सुन्दरः श्रीपुरेश्वरम् । भ्रान्तं प्रपञ्चविज्ञानात् विमलेन्दुकलाधरम् ॥ ६१ ॥

महान्तं देवमीशानं महेश्वरमहं भजे । भक्ताभयङ्करं भर्गं भक्तिमार्गेण सत्कृतम् ॥ ६२ ॥
भवानीसहितं देवं भावयामि सदाशिवम् । हंसकोटिप्रतीकाशं हंसविज्ञानमस्तकम् ॥ ६३ ॥
हंसैश्च परमं सेव्यं हंसनृत्यमुपास्महे । दुष्पूरकामशमनं सत्पूजितपदाम्बुजम् ॥ ६४ ॥
कर्पूरालेपकल्हारस्रग्भूषणमहं भजे । मुचुकुन्दमहीपालमुख्यभक्त्युररीकृतम् ॥ ६५ ॥
मुक्तिप्रदं मुमुक्षूणां मुग्धेन्दुमकुटं भजे । पुरा भक्तिपरीक्षायै श्रीमच्चोळमहीपतेः ॥ ६६ ॥
कृतान्तं तर्णकीकृत्य धेनुरूपः स्वयं भवान् । अध्वभ्रमणवेगेन तत्पुत्ररथवर्त्मनि ॥ ६७ ॥
चक्रनेमिहते वत्से घण्टां गोशृङ्गताडिताम् । विज्ञाय मन्त्रिभिः सार्धं सभाभाजि महीपतौ ॥ ६८ ॥
स्वमन्त्रिबोधनात्पुत्रं रथचक्रबलिं निजम् । कुर्वत्युज्जीवयन् वत्सं तत्कुमारं च यो दृशा ॥ ६९ ॥
समुत्थाप्य नृपायादात् सौभाग्यं भक्तिसंयुतम् । तं त्वां धीथिविटङ्काख्यं शरणं यामि शाश्वतम् ॥
एवं त्यागेश्वरं तत्र वाग्भिस्तुवति सुन्दरे । देवा ववर्षुः पुष्पाणि व्यनदद्देवदुन्दुभिः ॥ ७१ ॥
तत्रत्या ब्राह्मणाः सर्वे श्लाघन्ते स्माथ सुन्दरम् । एवं स्तुतः सुन्दरेण प्राह शंभुर्वचः पुनः ॥
भूम्यां मदीयक्षेत्रेषु स्तुहि सर्वत्र मामिति । तमनुज्ञाप्य भूतेशः सहभूतैस्तिरोदधे ॥ ७३ ॥
सुन्दरो लब्धवाग्भूतिः सार्वभौमैश्च पूजितः । ततः श्रीनवनीताख्यात् पुरान्निर्गत्य चात्मनः ॥
ग्रामे जम्बूपुरेशानं गीत्वा स्तुत्वा प्रणम्य च । स्थलानि शांभवान्येवं गातुं स्तोतुं च निर्गतः ॥ ७५ ॥
दिव्येषु शम्भुस्थानेषु स्तोतुं समुपचक्रमे । सा षडङ्गविदः कन्या रुद्रात्मोद्वाहमङ्गला ॥ ७६ ॥
अपि नान्यं पतिं भेजे वैराग्याद्भूतिनी सती । कृच्छ्रादिभिर्व्रतैर्नित्यं देहशोषणतत्परा ॥ ७७ ॥
ध्यात्वामुं सुन्दरं चित्ते ध्यायन्ती हृदि शङ्करम । अर्चयन्ती महेशानमाप कैवल्यमैश्वरम् ॥ ७८ ॥
निर्गतः सुन्दरः पश्चात् शिवस्थलदिदृक्षया । क्षेत्राणि दृष्ट्वा गत्वाऽयं मार्गे शम्भोर्महान्ति च ॥ ७९ ॥
अथासौ सुन्दरो द्रष्टुं चिदम्बरमहानटम् । प्रस्थितः सरितः पुण्याः समुत्तीर्य महामतिः ॥ ८० ॥
उपास्य पश्चिमां सन्ध्यां वीराट्टानस्थलं गतः । वीराट्टहासक्षपितत्रिपुरेशं निषेवितुम् ॥ ८१ ॥
प्रवेशमात्रात्तत्क्षेत्रस्यास्य बुद्धिरभूदिति । वागीशपाणिकलितकैङ्कर्ये शङ्करास्पदे ॥ ८२ ॥
पदा गन्तुमयुक्तं हि मयेत्येतत्स्थलाद्बहिः । मठं सिद्धवटाभिख्यं प्राप्य सुष्वाप तन्निशि ॥ ८३ ॥
तत्क्षेत्रस्थशिवोऽप्यस्य स्वपतः सुन्दरस्य च । आगत्य रात्रौ शिरसि स्वपादौ संप्रसारयन् ॥ ८४ ॥
आसीद्वीराट्टहासेशो निद्राण इव कैतवात् ।
श्रीसुन्दरः ॥
निद्रान्तरायकृत्कोऽयं मम मूर्ध्नि पदाहतेः । आस्तेत्युक्तः शिवः प्राह वृद्धोऽस्मि विगतेन्द्रियः ॥८५॥
मया न ज्ञायते किञ्चित्क्षमस्वागो ममेति च । उक्तस्तत्स्थलमुत्सृज्य सुष्वापान्यत्र तन्मठे ॥ ८६ ॥
तत्रापि निद्राकालेऽयं शम्भुरेत्य पदाहतिम् । सुन्दरस्यास्य मूर्ध्नीशो व्यधत्त स यथा पुरा ॥ ८७ ॥

श्रीसुन्दरः ॥

पदे पदे पदाघातं करोषि त्वं वदात्र कः । इत्युक्तः प्राह जानासि त्वं मां गङ्गाधरं न किम् ॥८८
इत्युक्त्वान्तर्दधे शम्भुः सहसोत्थाय सुन्दरः । भीतश्च विस्मितोऽत्यन्तं शम्भुरेवेति चिन्तयन् ॥
गीत्वा वीराट्टहासेशं तत्र स्थित्वैव सुन्दरः । निषेव्यान्यस्थलान्येवं गीत्वा स्तुत्वा व्रजन्नयम् ॥ ९० ॥
वामनेश्वरमभ्यर्च्य वाक्पुष्पैर्वामनार्चितम् । त्रिगव्यूतिमितं मार्गं समतीत्याथ सुन्दरः ॥ ९१ ॥
पुण्डरीकपुरं रम्यं ददर्शेन्द्रपुरोपमम् । महारजतसोपानैर्महानीलवितर्दिभिः ॥ ९२ ॥
महाद्रिशिखराकारैर्मणिस्तंभविराजितैः । प्रासादैरभ्रपथगैर्वृषभाङ्कितकेतनैः ॥ ९३ ॥
अलङ्कृताभिर्वीथीभिरजिह्माभिर्विभूषितम् । वीणावेणुमृदङ्गोत्थध्वनिपूरितदिङ्मुखम् ॥ ९४ ॥
ललनारत्नकोटीभिरप्सरोभिरिवोज्ज्वलम् । सालमन्दारसन्तानहिन्तालक्रमुकासनैः ॥ ९५ ॥
कदलीनारिकेळैश्च निबिडोपवनान्तरम् । सरोभिः पद्मकल्हारकुमुदोत्पलवासितैः ॥ ९६ ॥
स्वादुनिर्मलपानीयैः समन्तादुपशोभितम् । रथमातङ्गतुरगैः पदातिभिरलङ्कृतम् ॥ ९७ ॥
सहस्रत्रयसंख्यातैर्महार्हशयनोत्तमैः । शैवदीक्षाविधिज्ञानामालयैरुपशोभितम् ॥ ९८ ॥
वेदशास्त्रपुराणज्ञैरागमज्ञैर्महात्मभिः । वैदिकैरागमैर्मन्त्रैरभिषिक्तैः शिवात्मभिः ॥ ९९ ॥
अष्टाविंशत्यागमज्ञैराचार्यैरपि शोभितम् । श्रौतदीक्षाविधिज्ञानामालयैरुपशोभितम् ॥ १०० ॥
हविराज्यपुरोडाशपुण्यगन्धिभिरुच्छ्रितैः । अग्निहोत्राग्निधूमैश्च ब्रह्मस्थानेषु पावनम् ॥ १०१ ॥
मुखरं ब्रह्मघोषेण वर्णाश्रमिभिरावृतम् । चिदम्बरपुरं प्राप सुन्दरस्तुष्टमानसः ॥ १०२ ॥
अभ्युद्गतैस्तद्विप्रौघैः प्रविवेश शिवालयम् । शिवगङ्गाम्भसि स्नात्वा भस्मरुद्राक्षभूषितः ॥ १०३ ॥
मूलनाथं निषेव्यात्मसूक्तिमालाञ्चितं व्यधात् । नत्वाथ भक्तिपूर्वेण प्रययौ काञ्चनीं सभाम् ॥ १०४ ॥
सूर्यकोटिप्रतीकाशरत्नस्तम्भविराजिताम् । देवर्षिगणसंसेव्यां दर्शनान्मुक्तिदायिनीम् ॥ १०५ ॥
ददर्श तत्र परितो भक्तेषु प्रथितानपि । पतञ्जलिं व्याघ्रपादं भार्गवं कमलासनम् ॥ १०६ ॥
नारायणं नारदं च तुम्बुरुं च महामुनिम् । इन्द्रादीनपि दिक्पालान् गणान् शैलातिसम्मतान् ॥
पुररक्षां प्रकुर्वाणं विष्णुं च कमलासनम् । द्वारे गणेशमभ्यर्च्य नत्वा स्मृत्वा तथा गुहम् ॥ १०८
समनुज्ञाप्य नन्द्यादीन् सभाभ्यन्तरमाविशत् । पञ्चाक्षरमये पीठे पार्वत्या सह भासुरम् ॥१०९॥
मायायवनिकान्तस्थं स ववन्दे सभापतिम् । शतरुद्रीयमन्त्रेण नमस्कृत्वा नटेश्वरम् ॥ ११० ॥
सुन्दरः सूक्तिभिर्देवं स्तोतुं समुपचक्रमे ॥ १११ ॥

सते नमश्चिदे नमः सदामुदात्मने नमः सतश्च साक्षिणे नमः सभाधिपाय ते नमः ।
अरूपिणे च रूपिणे निरूपणाधिकायते कपालिनेऽकपालिने कपर्दिने नमो नमः ॥ ११२ ॥
नमो हराय जाह्नवीधराय चन्द्रमौलये त्रयीमयाय शम्भवे त्रिलोचनाय ते नमः ।
करालकालकूटनीलकण्ठनालकान्तये कपालमालिने नमः करीन्द्रचर्मधारिणे ॥ ११३ ॥

नमः शिवाय शंभवे नमस्त्रिशूलधारिणे नमोऽजगर्वहारिणे महोक्षकेतवे नमः।
दिगम्बराय ते नमश्चिदम्बराय ते नमः स्वयंभुवे सदा नमश्चिदम्बराय ते नमः ॥ ११४ ॥
नमः सुवर्णसंसदे नमः सभेश्वराय ते नमोऽस्तु भूतसंसदे नमो गणाधिपाय ते।
नमो गिरीन्द्रजापते नमो हिरण्यबाहवे नमोऽस्तु चेतसस्पते नमो नमः शिवाय ते॥ ११५ ॥

पुण्डरीकलसजं नौमि पुण्डरीकासनार्चितम्। पुण्डरीकाजिनधरं पुण्डरीकपुरेश्वरम् ॥ ११६ ॥
महादेवमहानृत्तमहाडम्बरसाक्षिणीम्। महादेवतनूं वामां शिवकामामहं भजे ॥ ११७ ॥
पुण्डरीकगजाराध्यं पुण्डरीकमुनिस्तुतम्। पुण्डरीकपुरीनाथं पुरारिं प्रणमाम्यहम् ॥ ११८ ॥

श्रीअगस्त्यः ॥

वाग्जन्म सफलीकुर्वन्येवं स्तोत्रेण सुन्दरे। विना व्योम्नि शरीरेण वाणी कापि व्यजृम्भत ॥११९॥
तव स्तोत्रेण तुष्टोऽस्मि सूक्तिसुन्दर सुन्दर। आयाहि श्रीपुरं शीघ्रं स्तुहि तत्रैवमन्वहम्॥ १२०॥
इत्युदीर्य नभो वाण्यां विरतायां हिरण्मयी। दिवः शिवाज्ञया वृष्टिरभूत्सुन्दरमूर्धनि ॥ १२१ ॥
देवाश्च विस्मयं जग्मुः किं पुनर्भुवि मानवाः। पादे प्रणेमुस्तत्रस्याः सुन्दरं मेनिरे हरम् ॥ १२२ ॥
अचिन्त्यशक्तेर्देवस्य ज्ञात्वा सङ्कल्पवैभवम्। अहंकारान्धकारान्तः प्रविवेश न सुन्दरः ॥ १२३ ॥
महाप्रसादो देवस्य कथमेवंविधो मयि। इति चिन्तापरः शम्भौ भूयसीं भक्तिमादधे ॥ १२४ ॥
सभां नत्वा नटेशस्य व्याघ्रपादमुखान् मुनीन्। नन्द्यादिगणनाथांश्च शिवभक्तान् महीयसः ॥
अभ्यनुज्ञाप्य गौरीञ्च चित्सभाधिपतिं प्रभुम्। निरगात्सुन्दरः श्रीमान् शिवशासनपालकः ॥१२६॥
सन्निवृत्यानुगान् सर्वान् नमस्कृत्वाग्रजन्मनः। उत्तीर्योत्तरकावेरीमगाद्ब्रह्मपुरं प्रति ॥ १२७ ॥
स्कन्धापरतनुर्ज्ञानसंबन्धो यत्र बालकः। गौरीस्तन्यामृतास्वादानर्तयामास भारतीम् ॥ १२८ ॥
ज्ञानसंबन्धपादाब्जरेणुपावनवीथिका। सेयं पुरी पदा स्प्रष्टुं न युक्तमिति सुन्दरः ॥ १२९ ॥
द्रोणीपुरेशमस्तौषीद्वाण्या वीथ्या बहिः स्थितः। आविर्भूयाग्रतस्तस्य सह गौर्या महेश्वरः॥१३०॥
प्रसादमकरोत्तस्मिन् वृषारूढस्तदीश्वरः। नमस्कृत्वाङ्घ्रियुगळे चानन्दाश्रूण्यवाकिरत् ॥ १३१ ॥
अथानुज्ञाप्य तं देवं दक्षिणाशामगाहत। श्रीचोळविषयाभोगसौभाग्यमवलोकयन् ॥ १३२ ॥
कावेरीतीरमगमत् कपर्दिस्थानभूषितम्। अवगाह्य नदीं पुण्यां कवेरतनुसम्भवाम् ॥ १३३ ॥
अवेक्षमाणः परितो ननन्द स महानदीम्। कमलोत्पलकल्हारघनामोदमहाह्रदाम् ॥ १३४ ॥
कर्पूरपुञ्जसच्छायमहापुलिनमण्डलाम्। हिन्तालक्रमुकस्पर्धावहरम्भावनान्तराम् ॥ १३५ ॥
सूर्यास्त्वचुरनिर्भिन्ननारिकेलफलस्रुतैः। पयःपूरैर्नदीवेऽपि काले कूलङ्कषोदकाम् ॥ १३६ ॥
अप्सरःस्तनशैलाग्रघातव्याकुलवीचिकाम्। मज्जच्चोलवधूनाभिनिष्पीतरयवेणिकाम् ॥ १३७ ॥
चोळेन्द्रसैन्यमत्तेभदानचन्द्रकभूषिताम्। तीरद्रुमकुलच्छायनिरुद्धार्कमहातपाम् ॥ १३८ ॥
शौकमायूरकापोतकलध्वनिमिलद्दिशम्। तटोटजमुनिव्रातवेदान्तध्वनिपावितम् ॥ १३९ ॥

यायजूकमहाशालायूपमालाविराजिताम् । योगनिद्रासमासक्तरङ्गनाथांसमालिकाम् ॥ १४१ ॥
महार्णवस्य महिषीं कावेरीं स महानदीम् । पश्यन्नत्यद्भुतकरीं सुन्दरोऽयं महाकविः ॥ १४२ ॥
मायूरेशं महाकालं श्रीस्तुत्यनगरेश्वरम् । गत्वा गीत्वा महेशानं तन्मार्गस्थस्थलानि च ॥ १४३ ॥
शनैरभ्यागतोऽभ्यर्णं श्रीपुरस्य महेश्वरः । त्यागराजोऽवदत्स्वप्ने भक्तानां क्षेत्रवासिनाम् ॥ १४४ ॥
सुन्दरो नाम मद्भक्त आयास्यत्यत्र सेवितुम् । सोऽभ्युद्गम्य च युष्माभिरानीतव्योऽत्र मद्गिरा ॥ १४५ ॥
उत्थाय ते तं साश्चर्यमभ्युद्गम्यानयन् पुरम् । नन्दितः सुन्दरः श्रीमान् विवेश कमलालयम् ॥ १४६ ॥
तत्रत्यैः स्वागतं पृष्टः सुन्दरः सूक्तिसुन्दरः । सन्निधौ त्यागराजस्य प्रणम्य स्तोतुमैहत ॥ १४७ ॥
सन्दर्शनान्महेशस्य तस्य सूक्तिर्व्यवर्धत । चन्द्रोदय इवाम्भोधेः पूरो वारामनर्गलः ॥ १४८ ॥

॥ इति श्रीशिवभक्तविलासे सुन्दरचरित्रे सुन्दरस्य कमलालयप्राप्तिर्नाम नवमोऽध्यायः ॥

॥ अथ दशमोऽध्यायः ॥

श्रीअगस्त्यः ॥

पुरा कल्पान्तरे विष्णुः शङ्खचक्रगदाधरः । प्रसादितः सुरैः सर्वैरसुरैरर्दितैर्युधि ॥ १ ॥
योद्धुमभ्युद्ययौ दैत्यानारूढपतगेश्वरः । देवानामसुराणां च बभूवायोधनं महत् ॥ २ ॥
नन्दकच्छिन्नमूर्धानो गदासञ्चूर्णितोरसः । मूर्च्छिताः शार्ङ्गनादेन विलूनाश्चक्रधारया ॥ ३ ॥
खगेशपक्षवातेन दूरोद्भूताश्च पर्णवत् । विद्राविता रणे दैत्याः पलायनमशिश्रयन् ॥ ४ ॥
हरिणाभ्यर्दितं यूथं आसुरं त्वाश्रमं भृगोः । प्रविश्य शरणान्वेषि न ददर्श भृगुं मुनिम् ॥ ५ ॥
अन्तर्वत्नीं मुनेः पत्नीं दैत्याः प्रापुर्गतिं पराम् । दत्ताभया भृगोः पत्न्या दैत्यावेद्यन्तराविशन् ॥ ६ ॥
अदृष्ट्वा दानवचमूं निवृत्तो हरिरध्वनि । देवसञ्चोदिताद्वह्नेः प्रवृत्तिममरद्विषाम् ॥ ७ ॥
उपलभ्य स्वशरणान् रक्षितुं त्रिदिवौकसः । भार्गवाश्रममासाद्य पक्षिराजादवारुहत् ॥ ८ ॥
आगतं विष्णुमालोक्य भृगुपत्नी यशस्विनी । कृताञ्जलिः प्रदायार्घ्यं स्वागतं पर्यपृच्छत ॥ ९ ॥
अथाब्रवीदिदं साध्वी हरिं सूनृतया गिरा । त्वद्दर्शनात्प्रमुदिता चिराल्लब्धनिधिर्यथा ॥ १० ॥
श्रीपते भूपते देव नमस्तेऽस्तु जगत्पते । प्रसीद मयि भक्तायां भक्तवत्सल केशव ॥ ११ ॥
त्वमनादिरनन्तश्च दृश्यस्थित्युद्भवान्तकृत् । ब्रह्मादिभिश्चाविदितः स्तुत्यः प्राचीनया गिरा ॥ १२ ॥
मया दृष्टोऽसि भाग्येन तपसैव महामुनेः । प्रसीदन्ति महात्मानः पत्रपुष्पफलार्चिताः ॥ १३ ॥
अनुग्रहाण मह्यं त्वमद्यागमनकारणम् । अनुगृह्णीष्व मां देव सुधामधुरया गिरा ॥ १४ ॥
इति संप्रार्थितः पत्न्या भृगोः कमललोचनः । स्मयमानो बभाषे तां वनमालाधरः पुमान् ॥ १५ ॥
शृणु मद्वचनं साध्वि पूजितोऽस्मि त्वयानघे । देवा दैत्यभयार्ता मां शरण्यं शरणं गताः ॥ १६ ॥
तद्रक्षणाय दैत्यानां संहारेऽस्मिन् कृतोद्यमः । हन्यमानेषु दैत्येषु मया केचन दानवाः ॥ २७ ॥
तवान्तरुटजं प्राप्ता इति वह्नेः श्रुतं मुखात् । देवान्यजति ते भर्ता प्रसन्नास्त्वयि सन्तु ते १८ ॥

चक्रेण दानवान् हन्मि निलीना यत्र ते वद । वैष्णवीं गिरमाकर्ण्य पुनः प्राह पतिव्रता ॥
निरुद्धय पर्णशालाया द्वारं भीता स्वधर्मतः ॥ १९ ॥

सन्तः समं त्वां विदुरादिपूरुषं न ते प्रियः कश्चिदथाप्रियोऽपि वा ।
जगद्गुरुर्धर्मपथप्रवर्तकः कथं परप्रेरणयासि पापधीः ॥ ॥ २० ॥

दैत्या मां शरणं प्राप्ता यथा त्वामसुरद्विषः । शरणागतसन्त्यागान्नान्यत्पापं महत्तरम् ॥ २१ ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥

श्येनाय दत्वा स्वशरीरमांसं शिबिः कपोतं शरणागतं हि । ॥ २२ ॥
ररक्ष कीर्तिं महतीं जगाम व्याधं कपोतः शरणागतं च ॥ २३ ॥

अपि प्राणभयं प्राप्तो न त्यजेच्छरणागतम् । त्यजतो निरये पातो यावदाचन्द्रतारकम् ॥ २४ ॥
न त्यजामि ततो दैत्यान् विष्णो याहि यथागतम् । अथ वा जहि मामग्रे पश्चात्संहर दानवान् ॥
इति रुद्धगृहद्वारां भृगुपत्नीं पतिव्रताम् । देवैः प्रोत्साहितो विष्णुश्चक्रेण निजघान ह ॥ २६ ॥
निहत्य दानवान् पश्चादरक्षत्त्रिदिवौकसः । पालिता हरिणा देवा बभूवुः सुखिता दिवि ॥ २७ ॥
भ्रूणहत्याथ महती रमापतिमुपाद्रवत् । भ्रूणहत्या विनाशाय बभ्राम भुवनेषु सः ॥ २८ ॥
विधया तपसा पत्नीमुज्जीव्य कुपितो भृगुः । शशाप केशवमपि स्त्रीवियोगस्तवास्त्विति ॥
हत्ययानुगतं विष्णुं विसृज्य कमलालया । कमलालयमासाद्य भर्तुर्हत्यानिवृत्तये ॥ ३० ॥
प्रयताभ्यर्चयामास भगवन्तं महेश्वरम् । अथ विष्णुर्मुनीन् देवान् मेलयित्वा निजांहसः ॥ ३१ ॥
निष्कृतिं परिपप्रच्छ प्राप्तुकामः श्रियं पुनः । प्रसादयित्वा मुनयः सह देवैर्मुनिं भृगुम् ॥ ३२ ॥
प्रायश्चित्तविधानाय येन मुच्येत केशवः । अमोदयन् महाप्राज्ञाः शान्तक्रोधश्च सोऽभवत् ॥३३॥
शान्तकोपः श्रियः कान्तमिदमाह महामुनिः । भ्रूणहत्यानिवार्या ते विष्णो कल्पशतैरपि ॥ ३४ ॥
यदि मे न क्रुधः शान्तिरिह स्यान्मधुसूदन । देवद्विजप्रार्थितस्य क्षमा दिष्ट्याभवन्मम ॥ ३५ ॥
सन्तो न प्रतिकुर्वन्ति सागस्सु त्वादृशेष्वपि । अनुगृह्णन्त्यपि त्वार्याः शोकभाजः प्रतिद्विषः ॥
न निष्कृतिरघस्यास्य तथापि श्रूयतामिदम् । रुद्राध्यायमहामन्त्रद्वादशावृत्तिकोटिभिः ॥ ३७ ॥
दुग्धधाराभिषेकेण शिवलिङ्गस्य निष्कृतिः । भस्मशय्याशयानश्च भस्मच्छन्नस्तथा कुरु ॥
सोमास्कन्दं निषेव्याथ भूयः श्रियमवाप्स्यसि ॥ ३८ ॥
इत्युक्त्वा स्वाश्रमं प्राप सह शिष्यैर्महामुनिः । हरिस्तु शतरुद्रीयं चिरमावर्तयन् मनुम् ॥ ३९ ॥
क्षीरधाराभिरभिषिञ्चन् महेश्वरम् । दिव्ये मारकते लिङ्गे दिव्यान् वर्षगणान् बहून् ॥ ४० ॥
दशकोटयब्दविलये वागभूदशरीरिणी । विलीना भ्रूणहत्या ते व्रज विश्वंभर श्रियम् ॥ ४१ ॥
श्रान्तोऽसि पूजयाद्य त्वं किं भूयः प्राप्तुमिच्छसि । विष्णुराकर्ण्य तां वाणीं तां दिशं प्रत्युदञ्जलिः ॥
प्रत्युवाच विभो नष्टा यदि हत्या तवार्चया । साक्षात्कर्तुं भवद्रूपमिच्छामि शशिशेखर ॥ ४३ ॥

इमं देहि वरं देव भक्तवत्सल शंकर । यादृशं भवतो रूपं देही ध्यात्वापि पापकृत् ॥ ४४ ॥
सद्यो विमुच्यते सर्वैर्वाङ्मनःकायजैरघैः । एवं हरिं प्रार्थयन्तं वाग्वैहायस्यभाषत ॥ ४५ ॥
ब्रह्मादयः सुरगणा अगस्त्याद्याश्च योगिनः । अपि क्रतुशतैरिष्ट्वा दत्वा दानानि भूरिशः ॥ ४६ ॥
पूजयित्वापि मां लिङ्गे तृष्णया मुषिताशयाः । न शक्नुवन्ति मां द्रष्टुं विना चित्तनिरोधनात् ॥ ४७ ॥
शृणु विष्णो इदं वाक्यं यदि मां द्रष्टुमिच्छसि । जितेन्द्रियः श्रिया सार्धं वर्षकोटिद्वयं व्रती ॥
विरक्तः सर्वभोगेषु व्रतं पाशुपतं चर । दर्शयिष्यामि संपूर्णे समये मत्कृते ततः ॥ ४९ ॥
द्रक्ष्यसे मम तद्रूपं दुर्दर्शं योगिनां च यत् । विरतायामुदीर्यैवं गिर्यग्रे वारिवाचिवत् ॥ ५० ॥
दधौ व्रते पाशुपते दीक्षां देवो जनार्दनः । भस्मावकुण्ठनं कृत्वा चीरवासा जटाधरः ॥ ५१ ॥
जपन् पञ्चाक्षरीं विद्यां षट्कालार्चनतत्परः । कण्ठदघ्ने जले तिष्ठन् दिवारात्रमतन्द्रितः ॥ ५२ ॥
महान्तं देवमुद्दिश्य चचार व्रतमुत्तमम् । भूयः संप्राप्य भर्तारं कमलापि शिवाज्ञया ॥ ५३ ॥
ज्ञात्वा हत्याविनिर्मुक्तं तत्राभूत्परिचारिका । चारुचित्रे रमालिङ्गे यैरानर्च महेश्वरम् ॥ ५४ ॥
स्थाने जव्वन्तिकापुष्पैः कमलालयनामनि । कमलाक्रीडविकचैस्तैरेव मधुसूदनः ॥ ५५ ॥
शिवनामसहस्रेण पूजयामास भक्तिमान् । कर्पूरालेपकल्हारकलिकामालिकार्चितः ॥ ५६ ॥
गते कोटिद्वयेऽब्दानां सुप्रीतश्चन्द्रशेखरः । सोमास्कन्दतनुर्भूत्वा विष्णुमन्वग्रहीद्वरः ॥ ५७ ॥

अभ्यर्चितान्मधुभिदा घनसारलिङ्गात् सार्धं गिरीन्द्रसुतया च षडाननेन ।
कर्पूरलेपकमनीयवपुः सुगन्धि सौगन्धिकस्रगभवत्पुरतोऽस्य शम्भुः ॥ ५८ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे श्रीसोमास्कन्दमहिमवर्णने विष्णोर्भ्रूणहत्यानिवृत्तिर्नाम दशमोऽध्यायः ॥

॥ अथ एकादशोऽध्यायः ॥

श्रीअगस्त्यः

सोमास्कन्दं महादेवं आविर्भूयाग्रतः स्थितम् । कर्पूरालेपकल्हारवासनाञ्चितदिङ्मुखम् ॥ १ ॥
तप्तकाञ्चनसच्छायसमुन्नतजटाभरम् । मृणालधवलां तन्वीं मौलौ चान्द्रमसीं कलाम् ॥ २ ॥
गङ्गाहिपुङ्गवाम्भोजभूकपालस्रजस्तथा । बिभ्राणमलिके चारु मृगनाभिविशेषकम् ॥ ३ ॥
स्फुटज्जव्वन्तिकापुष्पकण्ठाभरणभासुरम् । काश्मीरजाततिलकभास्वद्बृहिविलोचनम् ॥ ४ ॥
शोभनभ्रूलतासान्द्रकरुणापाङ्गवीक्षणम् । कपोलादर्शसङ्क्रान्तबिम्बगौरीमुखाम्बुजम् ॥ ५ ॥
समुन्नतनसं मुक्ताफलश्रीदशनावलिम् । विद्रुमोत्तमसच्छायमृदुलाधरपल्लवम् ॥ ६ ॥
वदनादर्शबृन्ताभचिबुकश्रीविराजितम् । कालकूटप्रभाभिश्रकण्ठकर्पूरलेपनम् ॥ ७ ॥
रत्नाङ्गुलीयकटकेयूरवलयाङ्गदम् । परश्वथमृगाभीतिवरमुद्रास्फुरत्करम् ॥ ८ ॥

गन्धबन्दीकृतोद्भ्रान्तभृङ्गसौगन्धिकस्रजम् । अपराङ्गविषक्ताद्रिकन्याभुजलतास्पदम् ॥ ९ ॥
ओड्डयाणनागमाणिक्यप्रभापूरितनाभिकम् । तारहारावलीनिष्कपदकाभाञ्चितोदरम् ॥ १० ॥
उपवीताहिनिश्वासमृष्टभस्मानुलेपनम् । व्याघ्रचर्मपरीधानं मणिनूपुरमण्डितम् ॥ ११ ॥
उत्फणाहिशिरोरत्नप्रभापाटलपादुकम् । नम्राहङ्कारतिमिरप्रभाकरतलप्रभम् ॥ १२ ॥
कालवक्षःस्थलशिलादम्भोलिनखभास्वरम् । कैवल्यकल्पकक्षोणीरुहनूतनपल्लवम् ॥ १३ ॥
भक्ताभयप्रदारावकिङ्किणीपरिभूषितम् । संसाररोगभैषज्यपरागस्मृतिवैभवम् ॥ १४ ॥
दधानं चरणाम्भोजं दलिताम्बुजसन्निभम् । रत्नसिंहासनारूढं रमणीयतमाकृतिम् ॥ १५ ॥
उन्मिषज्जीवरत्नश्रीपरिवेषपरीवृतम् । वसन्तीं वामभागेऽस्य वारिजायतलोचनाम् ॥ १६ ॥
शैलराजसुतां देवीं सर्वाभरणभूषिताम् । क्रीडन्तं च तयोर्मध्ये कुमारं कोमलाकृतिम् ॥ १७ ॥
मञ्जीरकिङ्किणीकाञ्चीकेयूरकटकाङ्गदैः । वलयैरङ्गुलीयैश्च महार्हैः परिभूषितम् ॥ १८ ॥
शार्दूलनखराश्लिष्टकण्ठाभरणभास्वरम् । उद्यद्विन्निरदैः षड्भिर्मुखैर्द्वादशकुण्डलैः ॥ १९ ॥
अर्धोक्ष्यमृतनिःष्यन्दमन्दहासमनोहरैः । श्रुत्यन्तसीममाहात्म्यदर्शिषट्त्रिविलोचनैः ॥ २० ॥
सिद्धाञ्जनासितापाङ्गलोलतारकलोचनैः । अम्बिकास्तन्यकणिकाभूषिताधरविद्रुमैः ॥ २१ ॥
सुविभ्रमभ्रूलतिकैर्मृगनाभिविशेषकैः । चूडामणिपरिष्वक्तनीलकुञ्चितकुन्तलैः ॥ २२ ॥
ललन्तिकामणिज्योतिरनुविद्धालिकस्थलैः । सामोदश्वसितैः षड्भिर्दर्शनीयमुखाम्बुजैः ॥ २३ ॥
अलोक्यानन्दभरितः पादयोर्निपपात ह । प्रणम्य कोटिशः स्तुत्वा श्रिया सह कृताञ्जलिः ॥ २४ ॥
दधार छत्रमस्योर्ध्वं बर्हिबर्हविनिर्मितम् । चञ्चच्चामरगुच्छेन श्रीरवीजयदन्तिके ॥ २५ ॥
पाञ्चजन्यं दरवरं प्रदध्मौ हर्षनिर्भरः । देवमालोक्य पुरतो यमानन्दमगाद्धरिः ॥ २६ ॥
न तस्य कणिकामात्रं ब्रह्मानन्दोऽपि संभवेत् । अथ प्रसन्नो देवेशः सोमास्कन्दो महेश्वरः ॥
प्रणतं प्राञ्जलिं प्रह्वमभाषत जनार्दनम् । निवृत्ता भ्रूणहत्या ते सङ्गतोऽसि श्रिया पुनः ॥ २८ ॥
मत्साम्यमधुना लब्धमनया व्रतचर्यया । यथापूर्वं त्रिजगतामस्त्वैश्वर्यमविक्षतम् ॥ २९ ॥
तवाहं गोचरोऽन्येषामदृश्यो योगिनामपि । रत्नसिंहासनारूढः स्कन्देन च सहोमया ॥ ३० ॥
ये सेवन्ते महाभागास्तेषां मुक्तिः करस्थले । श्रान्तोऽसि सुचिरं विष्णो किमन्यद्वाञ्छितं तव ॥

श्रीविष्णुः ॥

मत्प्रसादाय भगवन्नेवंरूपः सदा विभो । भव देवाश्च मुनयः कृतार्थाः सन्तु दर्शनात् ॥ ३२ ॥
योगनिद्राविधानाय प्रयच्छानुमतिं प्रभो ।
इति तत्प्रार्थितः शम्भुस्तथारूपो बभूव ह । देवाश्च योगिनो दृष्ट्वा तमासन् शुद्धचेतसः ॥ ३३ ॥
यद्यदिष्टतमं यस्य तस्य तत्तत्प्रदानतः । त्यागेश्वराभिधां भेजे मनोवाचामगोचरः ॥ ३४ ॥
अथ काले गतवति महार्णवशयः पुमान् । रत्नसम्पुटमध्यस्थं कृत्वा त्यागेश्वरं विभुम् ॥ ३५ ॥

निधायोरसि सुष्वाप लब्धानुज्ञो महेश्वरात् । निश्वासोच्छ्वासवेगेन निद्रालोः कमलापतेः ॥ ३६ ॥
प्रसक्तताण्डवं देवं हंसनृत्तमथास्तुवन् । योगिनो हंसनटनं विलोक्य गिरिजापतेः ॥ ३७ ॥
संसारार्तिं जहुर्वक्षः कंसारेरधिजग्मुषः । अथासुरेभ्यो भीतेन प्रार्थितो वज्रपाणिना ॥ ३८ ॥
उत्थाय हरिरिन्द्राय दत्त्वा वक्षोगतं हरम् । दिने दिने पूजयास्य विजयो भविता तव ॥ ३९ ॥
अनुशास्येति तं विष्णुर्हत्वा चक्रेण दानवान् । स्थापयित्वा हरिं नाके शयानोऽभवदर्णवे ॥ ४० ॥
इन्द्रोऽपि त्यागराजस्य पूजां विधिवदन्वहम् । कुर्वाणः सहितः शच्या महतीमृद्धिमाप्तवान् ॥४१

आकाशगङ्गापयसाभिषिच्य छत्रेण शङ्खध्वनिभिश्च मन्द्रैः ।
जज्वन्तिकाख्यग्निरुपास्य शम्भुं हरिः श्रियं प्राप यथा मुकुन्दः ॥ ४२ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे इन्द्रस्य सोमास्कन्दमूर्तिप्राप्तिर्नामैकादशोऽध्यायः ॥

॥ अथ द्वादशोऽध्यायः ॥

श्रीअगस्त्यः ॥

एतस्मिन्नन्तरे देवो देव्या सह महेश्वरः । कैलासशैलोपवनं प्रपेदे पुष्पितद्रुमम् ॥ १ ॥
राजरम्भासमुद्वान्तैः कर्पूरैः सैकतैरिव । पाण्डरं हेमपद्मानां परागैः कुङ्कुमैरिव ॥ २ ॥
अरुणं नवदूर्वाभिः श्यामलं क्वचिदुन्मदैः । अनेकवर्णैर्विहगैः कूजद्भिरभितो वृतम् ॥ ३ ॥
प्रविश्योपवनं गौरीं कामिनीमिव कामुकः । अलञ्चक्रे नवैः पुष्पैः कामदर्पहरो हरः ॥ ४ ॥
अलके कर्णिकारं च कर्णयोः पद्मकर्णिकाम् । उन्नते नासिकाग्रे च चारुपुन्नागकुड्मलम् ॥ ५ ॥
कपोले लोध्ररेणुं च कण्ठनाले मनोहरम् । सिन्दुवारकृतं दाम मृणालवलयानि च ॥ ६ ॥
हस्ते महोत्पलं दत्तं पत्रैरेखाङ्किते स्तने । प्रसूनाभरणं गौरी बिभ्राणारमयद्धरम् ॥ ७ ॥
श्रीफलद्रुममूले तां प्रसूनशयने हरः । उपवेश्य तदुत्सङ्गे शिश्ये सर्वगुहाशयः ॥ ८ ॥
पश्चिमाचलपर्यन्ते लम्बते स्म तदा रविः । दिष्ट्या तदा प्रदोषोऽभूत्पावनः पापिनामपि ॥ ९ ॥
यत्र बिल्वदलैः शम्भुमर्चयन् मुच्यते नरः । तदानीं रोमशः कश्चिद्वोलाङ्गूलोऽसिताननः ॥ १० ॥
शाखाचङ्क्रमणं कुर्वन् श्रीवृक्षाग्रे पपात ह । विश्रान्तस्तस्य शाखाग्रे चेष्टया जातिसिद्धया ॥ ११ ॥
बभञ्ज बिल्वपत्राणि कोमलान्यक्षतानि च । तानि सर्वाणि पत्राणि पतन्ति धरणीतले ॥ १२ ॥
दिष्ट्या गौरीसमेतस्य निपेतुः पादयोर्विभोः । गणयामास तानीशो यावदष्टोत्तरं शतम् ॥ १३ ॥
कीशं चादर्शयद्दैवैं सा कटाक्षेण चैक्षत । तत उत्थाय संहृष्टः पशूनां पतिरीश्वरः ॥ १४ ॥
आगच्छेत्यह्वयामास बिल्वोपरिगतं कपिम् । तत्क्षणे जातविज्ञानः सोऽवरुह्य ततो द्रुमात् ॥ १५ ॥
प्रदक्षिणीकृत्य पदे शिवयोर्निपपात ह । तमाह भगवानीशः प्रीतो बिल्वदलार्चनात् ॥ १६ ॥
अष्टोत्तराब्दसाहस्रशतपर्यन्तमेकराट् । मण्डलाधिपतिर्भूत्वा चान्ते मत्पदमेष्यसि ॥ १७ ॥

गन्धबन्दीकृतोद्भ्रान्तभृङ्गसौगन्धिकस्रजम् । अपराङ्गविषक्ताद्रिकन्याभुजलतास्पदम् ॥ ९ ॥
ओड्डयाणनागमाणिक्यप्रभापूरितनाभिकम् । तारहारावलीनिष्कपदकाभाञ्चितोदरम् ॥ १० ॥
उपवीताहिनिश्वासमृष्टभस्मानुलेपनम् । व्याघ्रचर्मपरीधानं मणिनूपुरमण्डितम् ॥ ११ ॥
उत्फणाहिशिरोरत्नप्रभापाटलपादुकम् । नम्राहङ्कारतिमिरप्रभाकरतलप्रभम् ॥ १२ ॥
कालवक्षःस्थलशिलादम्भोलिनखभास्वरम् । कैवल्यकल्पकक्षोणीरुहनूतनपल्लवम् ॥ १३ ॥
भक्ताभयप्रदारावकिङ्किणीपरिभूषितम् । संसाररोगभैषज्यपरागस्मृतिवैभवम् ॥ १४ ॥
दधानं चरणाम्भोजं दलिताम्बुजसन्निभम् । रत्नसिंहासनारूढं रमणीयतमाकृतिम् ॥ १५ ॥
उन्मिषज्जीवरत्नश्रीपरिवेषपरीवृतम् । वसन्तीं वामभागेऽस्य वारिजायतलोचनाम् ॥ १६ ॥
शैलराजसुतां देवीं सर्वाभरणभूषिताम् । क्रीडन्तं च तयोर्मध्ये कुमारं कोमलाकृतिम् ॥ १७ ॥
मञ्जीरकिङ्किणीकाञ्चीकेयूरकटकाङ्गदैः । वलयैरङ्गुलीयैश्च महार्हैः परिभूषितम् ॥ १८ ॥
शार्दूलनखराश्लिष्टकण्ठाभरणभास्वरम् । उद्यद्विन्निरदैः षड्भिर्मुखैर्द्वादशकुण्डलैः ॥ १९ ॥
अर्धोक्ष्यमृतनिःष्यन्दमन्दहासमनोहरैः । श्रुत्यन्तसीममाहात्म्यदर्शिषट्त्रिविलोचनैः ॥ २० ॥
सिद्धाञ्जनासितापाङ्गलोलतारकलोचनैः । अम्बिकास्तन्यकणिकाभूषिताधरविद्रुमैः ॥ २१ ॥
सुविभ्रमभ्रूलतिकैर्मृगनाभिविशेषकैः । चूडामणिपरिष्वक्तनीलकुञ्चितकुन्तलैः ॥ २२ ॥
ललन्तिकामणिज्योतिरनुविद्धालिकस्थलैः । सामोदश्वसितैः षड्भिर्दर्शनीयमुखाम्बुजैः ॥ २३ ॥
अलोक्यानन्दभरितः पादयोर्निपपात ह । प्रणम्य कोटिशः स्तुत्वा श्रिया सह कृताञ्जलिः ॥ २४ ॥
दधार छत्रमस्योर्ध्वं बर्हिबर्हविनिर्मितम् । चञ्चच्चामरगुच्छेन श्रीरवीजयदन्तिके ॥ २५ ॥
पाञ्चजन्यं दरवरं प्रदध्मौ हर्षनिर्भरः । देवमालोक्य पुरतो यमानन्दमगाद्धरिः ॥ २६ ॥
न तस्य कणिकामात्रं ब्रह्मानन्दोऽपि संभवेत् । अथ प्रसन्नो देवेशः सोमास्कन्दो महेश्वरः ॥
प्रणतं प्राञ्जलिं प्रह्वमभाषत जनार्दनम् । निवृत्ता भ्रूणहत्या ते सङ्गतोऽसि श्रिया पुनः ॥ २८ ॥
मत्साम्यमधुना लब्धमनया व्रतचर्यया । यथापूर्वं त्रिजगतामस्त्वैश्वर्यमविक्षतम् ॥ २९ ॥
तवाहं गोचरोऽन्येषामदृश्यो योगिनामपि । रत्नसिंहासनारूढः स्कन्देन च सहोमया ॥ ३० ॥
ये सेवन्ते महाभागास्तेषां मुक्तिः करस्थले । श्रान्तोऽसि सुचिरं विष्णो किमन्यद्वाञ्छितं तव ॥

श्रीविष्णुः ॥

मत्प्रसादाय भगवन्नेवंरूपः सदा विभो । भव देवाश्च मुनयः कृतार्थाः सन्तु दर्शनात् ॥ ३२ ॥
योगनिद्राविधानाय प्रयच्छानुमतिं प्रभो ।
इति तत्प्रार्थितः शम्भुस्तथारूपो बभूव ह । देवाश्च योगिनो दृष्ट्वा तमासन् शुद्धचेतसः ॥ ३३ ॥
यद्यदिष्टतमं यस्य तस्य तत्तत्प्रदानतः । त्यागेश्वराभिधां भेजे मनोवाचामगोचरः ॥ ३४ ॥
अथ काले गतवति महार्णवशयः पुमान् । रत्नसम्पुटमध्यस्थं कृत्वा त्यागेश्वरं विभुम् ॥ ३५ ॥

सम्भ्रान्तस्तत्सपर्यायां न विवेद शचीपतिः । पूजावसाने भूपालं गमिष्यन्तं महीतलम् ॥ ४७ ॥
किमभीष्टमिति प्राह गाढालिङ्गनमाचरन् । अथ पाणौ गृहीत्वेन्द्रमिदमाह महीपतिः ॥ ४८ ॥
सोमास्कन्दमिमं देहि सौहार्दं यदि ते मयि । पूजां विधातुमिच्छामि कृतार्थः प्रणयात्तव ॥ ४९ ॥
उवाचेन्द्रोऽपि भूपालं स्मयमानमुखाम्बुजः । सखे सत्यं वदाम्येतद्देयं ते किं मया तव ॥
विष्णोर्न्यासमिमं विद्धि पूजामात्रेऽस्य चोदितः । तवाप्यमुष्य पूजायां यदि वाञ्छास्ति भूपते ॥
श्रीपतिं प्रार्थयस्वैनं यदि सम्मनुते हरिः । अथ दातास्मि दानस्य प्रभुरस्य न चान्यथा ॥ ५२ ॥
ऐन्द्रीमाकर्ण्य स गिरं दध्यौ हृदि महेश्वरम् । तदाज्ञप्तो व्रजेत्याशु गत्वा वैकुण्ठमच्युतम् ॥ ५३ ॥
नत्वा स्तुत्वा च बहुधा सोमास्कन्दमयाचत । केशवश्च क्षणं ध्यात्वा नियोगात्पारमेश्वरात् ॥
ददावनुमतिं भूपः पुनर्गत्वाह वज्रिणम् । लब्धानुज्ञोऽस्मि विष्णोस्त्वं जिष्णो देहि महेश्वरम् ॥
अत्येति समयः क्षोणीं यामि सौहार्दमेधताम् । श्रुत्वा नृपगिरं शक्रश्चिन्तामाप कथन्तराम् ॥
इमं दास्यामि शून्यानि यास्यन्ति दिवसानि मे । कथं नु पूर्णकामः स्यान्मुचुकुन्दो महीपतिः ॥
आलोच्य धीमानभ्याशे शक्रस्त्वष्टारमभ्यशात् । न जानीयाद्यथा राजा प्रतिबिम्बोऽस्य कल्प्यताम् ॥
निर्माय विश्वकर्मापि ददौ बिम्बं शचीपतेः । हस्ते रहसि संप्राप्तं समादाय शचीपतिः ॥ ५९ ॥
प्रदाय कल्पितं बिम्बं प्रयाहीत्यभ्यभाषत । आदावादाय तमपि सखायं प्राह भूपतिः ॥ ६० ॥
अकल्पितं परं देहि मा मा वञ्चय मामिह । इत्युक्तोऽपि नृपेणायं वञ्चयामास वासवः ॥ ६१ ॥
त्वष्टा रहःकल्पितानि षड्बिम्बानि ददौ मुहुः । तान्यादाय प्रतिष्ठाप्य पूजयामास भूतले ॥
पूजान्ते प्रार्थनाकाले शम्भुराकाशमूर्तिमान् । मम कृत्रिमबिम्बोऽयं तमित्याह पृथक्पृथक् ॥ ६३ ॥
यदा यदा शिवेनैवमुक्तं वाक्यं तदा तदा । भूपस्तु ज्ञातवृत्तान्तः पुरन्दरमुपेत्य सः ॥ ६४ ॥
बिम्बान्तराण्यपि प्राप कृत्रिमाण्येव षट् क्रमात् । स तानि प्रतिगृह्याथ चिकीर्षुः सप्तमं पुनः ॥
वञ्चनां मुञ्च वृत्रारे साक्षात्प्रेरयतीश्वरः । अकल्पितं महेशानं देहि नो चेत्कलिर्भवेत् ॥ ६६ ॥
अथानुनीय भूपालं सोमास्कन्दं महेश्वरम् । रत्नसिंहासनारूढं ददौ राज्ञे शचीपतिः ॥ ६७ ॥
बर्हिछत्रं च शङ्खं च जम्बन्तीपुष्पमेव च । कल्हारमालां कर्पूरलेपनं नियमात्कुरु ॥ ६८ ॥
इत्यादिश्य महीपालं प्रेषयामास गां प्रति । प्रदक्षिणीकृत्य भुवं मुचुकुन्दोऽपि हृष्टधीः ॥ ६९ ॥
सर्वोन्नते गिराऽतन्व्या सत्क्षेत्रे कमलालये । आज्ञप्तोऽवनिरक्षायै महेशं प्रत्यतिष्ठिपत् ॥ ७० ॥
स्थानेषु षट्सु परितः प्रतिष्ठाप्य पराः कलाः । नित्यं संपूजयन् कीर्तिं विमलां प्राप शाश्वतीम् ॥
स्मृत्वैतत्सुन्दरो देवं तुष्टावातीव हृष्टधीः । अन्वग्रहीद्यः प्राग्विष्णुं यो महेन्द्रमनन्तरम् ॥ ७२ ॥
मुचुकुन्दं ततो यश्च प्रसीदतु स मे प्रभुः ॥ ७३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे श्रीत्यागराजमहिमवर्णने
मुचुकुन्दप्रतिष्ठितत्यागराजप्रतिष्ठा नाम द्वादशोऽध्यायः ॥

॥ अथ त्रयोदशोऽध्यायः ॥

श्रीअगस्त्यः ॥

श्रूयतामुच्यते यत्तत् कमलालयवैभवम् । मुचुकुन्दो हरेर्लब्ध्वा यत्रेशं प्रत्यतिष्ठिपत् ॥ १ ॥
सोमास्कन्दं स्वभक्तानां यत्र त्यागेश्वराख्यया । ख्यातो ददाति सर्वार्थान् इष्टकामफलप्रदः ॥ २ ॥
यत्र श्रीत्यागराजेशो जन्मभाजां विमुक्तिदः । यत्र विप्राग्निहोत्रोत्थधूमस्यालोकमात्रतः ॥ ३ ॥
मेघभ्रान्तिजुषो हर्षान्नृत्यन्त्येव शिखिण्डिनः । लाङ्गलीश्रेणिका यत्र फलपत्रविशोभिता ॥ ४ ॥
स्नातोत्थिताङ्गनाकेशं धुनोतीव पृथुस्तनी । यत्र स्रुतस्वकुसुममकरन्दच्छलाद्द्रुमाः ॥ ५ ॥
दृष्ट्वागेशचरिताः किरन्तीवाश्रुहर्षिताः । नानापुष्पतरुच्छन्ना भाति भूः कमलालये ॥ ६ ॥
ईशापदानश्रवणहर्षरोमाञ्चितेव सा । तत्राद्भुतकथा काचित् वर्ण्यते श्रूयतां बुधैः ॥ ७ ॥
नीतिशालीति राजाभूत् सूर्यवंशसमुद्भवः । नीत्या मनुरिव क्षोणीं पालयंश्चोलभूपतिः ॥ ८ ॥
कान्त्या कामोऽपर इव क्षान्त्या भूरिव विद्यया । वाचस्पतिरिव स्थैर्ये हिमवानिव राजते ॥ ९ ॥
दातृत्वे कल्पतरुवद्वेदशास्त्रार्थकोविदः । अयजद्विधिवच्छम्भुमध्वरैरुक्तदक्षिणैः ॥ १० ॥
सर्वदा शिवपादाब्जभावनापूतमानसः । पालयामास मनुवच्चतुराश्रमवर्णकान् ॥ ११ ॥
नीतिघण्टान्निबध्यात्मप्रासादाग्रे च लम्बिनीम् । ताडयन्तु जना घण्टामन्यायोपद्रुता इति ॥ १२ ॥
अन्यायवर्तिनं मर्त्यं सद्यो हन्म्यसिना मम । इति नीतिपरस्यास्य राज्ञः शम्भोरनुग्रहात् ॥ १३ ॥
अजायत सुतः कश्चित् मान्धाता स मनोर्यथा । क्रमेण वर्धितः पित्रा जग्राह सकलाः कलाः ॥
यौवराज्येऽभिषिक्तोऽयं सवयोभिर्नृपात्मजैः । मन्त्रिपुत्रैः समं वीथ्यां वाजिहस्तिरथादिकम् ॥ १५ ॥
आरुह्य क्रीडमानोऽसावहर्निशमवर्तत । कदाचिदारूढरथो वाद्यघोषसमावृतः ॥ १६ ॥
मित्रैः परिजनैर्वीथ्यामन्वितो निर्जगाम ह । तत्पितुश्चोलभूपस्य भक्तिं नीतिं परीक्षितुम् ॥ १७ ॥
काश्चित् वीथिविटङ्केशः क्रियामेवं व्यधाद्विभुः । कृतान्तं तर्णकीकृत्य धेनुर्भूत्वा स्वयं तदा ॥ १८ ॥
शम्भुर्वीथिविटङ्केशः संचचार सतर्णकः । अध्वभ्रमणवेगेन तत्पुत्ररथवर्त्मनि ॥ १९ ॥
पपात तर्णकस्तूर्णं तत्तौर्यत्रिकभीतवत् । भूमौ पतनमात्रेण रथस्यागच्छतो रयात् ॥ २० ॥
चक्रेण खण्डितो द्वेधा पेषितोऽभूच्च तर्णकः । आक्रोशन्नत्यजत्प्राणांस्तत्तु न ज्ञायते जनैः ॥
सा तु गौर्वत्समालोक्य चाकुश्याकुश्य दुःखिता । मृतवत्सं समाघ्राय चुक्रोशाश्रूणि मुञ्चती ॥ २२ ॥
केचिद्राजात्मजं भूत्या ज्ञातवृत्तमकारयन् । तच्छ्रुत्वा दुःखितो भूत्वा चावरुह्य रथात्स्वकात् ॥ २३ ॥
आलोक्य किं कृतमिति विषसाद नृपात्मजः । राज्ञो नीतिमतोऽप्यस्य पुत्रेणापि दुरात्मना ॥ २४ ॥
मया कृतस्य पापस्य निष्कृतिः का भवेदिति । चिन्तान्विते नृपसुते सति निर्विण्णमानसे ॥ २५ ॥
तदानुगो जगत्सैको मन्त्रिपुत्रो महामतिः । अश्रावयित्वा राजानं कृत्यमेतत्त्वयाधुना ॥ २६ ॥
प्रायश्चित्तं तु कर्तव्यं यथाशास्त्रोक्तमार्गतः । तेन निष्कृतिरेव स्यादज्ञानागतपात्मनः ॥ २७ ॥

इत्युक्तो राजपुत्रोऽपि तथा कर्तुं समुद्यतः । रथमारुह्य स पुनर्जगाम च यथागतम् ॥ २८ ॥
सा गौरपि समालोक्य गच्छन्तं राजनन्दनम् । मृतवत्साऽपेतनीतिं किं कर्तव्यमितः परम् ॥ २९ ॥
चिन्तयन्ती नृपद्वारं गन्तव्यमिति चेतसा । यथैतज्ज्ञायते राज्ञा मया गत्वा विधीयताम् ॥ ३० ॥
इति निश्चित्य निर्गत्य राजद्वारमुपागता । नीतिघण्टां निरीक्ष्येयं पूर्वं केनाप्यताडिताम् ॥ ३१ ॥
अनीतिवादिना तां गौः सन्ताडयितुमुद्यता । वल्गन्त्या क्रोशयन्ती सा उत्पतन्ती स्वशृङ्गतः ॥ ३२ ॥
जघान नीतिघण्टां तां कोऽप्यन्यायविचारकः । न्यायवर्ती महीपालः पुरेऽस्मिन्नास्त्यहो किमु ॥
शंसन्तीवेति तां घण्टां जघानोत्पत्य सा मुहुः तद्घण्टारवमाकर्ण्य राजा किमिति शङ्कितः ॥ ३४ ॥
अन्तःपुरादिनिर्गत्य बहिरास्थानमण्डपम् । प्राप्योवाच महीपालः पार्श्वगान् मन्त्रिपुङ्गवान् ॥ ३५ ॥
एतावत्कालमन्यायो राज्ये नास्ति ममाधुना । सा नीतिघण्टाप्यन्यायगौरवात्ताडिता गवा ॥ ३६ ॥
अनयेति किमेतद्धि ब्रूतेत्युक्तास्तु मन्त्रिणः । ज्ञातवृत्ता अपि च ते त्वेकसूनोर्महीपतेः ॥ ३७ ॥
आज्ञाभयान्न जगदुर्न विद्म इति ते जगुः । तदैकभृत्यमाहूय तत्र गत्वानया गवा ॥ ३८ ॥
कृतः केनापराधोऽस्यै ज्ञात्वागच्छेत्यचोदयत् । स तु निर्गत्य राजाज्ञां वहन् मूर्ध्ना तया गवा ॥
जगाम निहतो यत्र रथपादेन तर्णकः । वत्सान्तिकं गता सापि भ्रमन्त्याघ्राणसंज्ञया ॥ ४० ॥
दर्शयामास गौरस्मै वत्सं रथपदाहतम् । स दृष्ट्वा विस्मितो राज्ञे तद्वृत्तान्तं जगाद ह ॥ ४१ ॥
रथारूढे भवत्सूनौ वीथ्यां सैन्येन निर्गते । सेनासम्मर्दितोऽद्यस्या वत्सः स्यन्दनवर्त्मनि ॥ ४२ ॥
पतंस्तच्छकटेनासीत्येषितो मृत इत्यथ । श्रुत्वा राजातिनिर्विण्णः पशोरपि विषादवान् ॥ ४३ ॥
आश्वास्य सचिवास्तं तु राजानमिदमूचिरे । प्रायश्चित्तं तु कर्तव्यं खेदो मास्तु महीपते ॥ ४४ ॥
अज्ञानादागताघस्य दानाद्भवति निष्कृतिः । इत्युक्तः प्राह तान् राजा प्रायश्चित्तान्न निष्कृतिः ॥
सर्वान् रञ्जयतीत्येष राजा भवति भूमिपः । आपन्नानां तु जन्तूनां दुःखानि परिहृत्य च ॥ ४६ ॥
अरक्षणान्मे राजत्वं कथं स्यात्पापजन्मनः । आत्मनः स्वजनाच्चापि शत्रोर्वा तस्कराच्च वा ॥ ४७ ॥
अग्नेररण्यात् सलिलात् व्याघ्रादेरागतं भयम् । परिहृत्य प्रयत्नेन दयया करणैस्त्रिभिः ॥ ४८ ॥
प्राणिनां स्वशरण्यानां रक्षिता क्षत्रियो भवेत् । पालिताः किमनीत्येमाः प्रजाः पातकिना मया ॥
तत्फलं फलितं वाद्य यस्मात्क्रोशति गौरियम् । आगोऽन्यस्मिन्यदि भवेदंहो हि क्रियते मया ॥
सत्यात्मन्यपराद्धेऽस्मिन् प्रायश्चित्तं किमर्हति । गौरप्याकर्ण्य मत्कीर्तिं नीतिघण्टामताडयत् ॥ ५१ ॥
तन्निष्कृतिश्चेन्न कृता ममाकीर्तिर्भविष्यति । अथाह नृपतिः कोपादेकमाहूय मन्त्रिणम् ॥ ५२ ॥
परम्परागतं प्राणप्रियं बुद्धिविचक्षणम् । सद्यो गत्वा मम सुतं नीत्वा तद्रथवर्त्मनि ॥ ५३ ॥
आरुह्य स्यन्दनं शीघ्रं तं च नाशय पापिनम् । नो चेन्ममाप्रियोऽसि त्वमसि लोकद्वयाहितः ॥
यथापकीर्तिर्न स्यान्मे गच्छेत्याह स्वमन्त्रिणम् । भीत्या निर्गत्य सचिवो राजपुत्रं निरीक्ष्य च ॥
भूपतेरेकपुत्रं तु पुरन्दरसुतोपमम् । युवानं सुन्दराकारं कोमलावयवोज्ज्वलम् ॥ ५६ ॥

निर्घृणोऽहं कथं त्वेनं रथस्य चरणाध्वनि । क्षिपेयमिति संचिन्त्य तद्दुःखालोकनासहः ॥ ५७ ॥
मन्त्री तत्याज संछिन्द्य स्वप्राणानसिधारया । मृतं मन्त्रिणमाकर्ण्य बहुधा दुःखितो नृपः ॥ ५८ ॥
मद्वाक्यलङ्घनभयात्तमहत्वा स्वयं मृतः । महत्पापमभून्मेऽद्य न स्यादेवमितः परम् ॥ ५९ ॥
अन्यो न हन्ति मत्सूनुं स्वप्राणांस्त्यजतीति च । स हन्तव्यो मयैवेति स्वयमुत्थाय भूपतिः ॥
एकं पुत्रमपि स्वीयं रथचक्रपथे क्षिपन् । स्यन्दनं गमयामास पुत्रोपरि महीपतिः ॥ ६१ ॥
स वत्सवद्विधा भूतो राजपुत्रो यदा मृतः । आलोक्य तं राजपुत्रं मृतं सर्वेऽपि दुःखिताः ॥
तन्माता दुःखितात्यन्तं पुत्रवात्सल्यसंयुता । बालेन निष्कृतिर्न स्यादनेनास्यास्तु गोरतः ॥
मम प्राणपरित्यागात्तृप्तिं गच्छतु गौरियम् । इत्युक्त्वा शंकरं ध्यात्वा तत्याजासून् रथानसि ॥ ६४ ॥
राज्ञा निर्विण्णमनसा स्त्रीमन्त्र्यात्मजनाशतः । मत्प्राणरक्षणात्किं स्यात्फलमत्रेति भूतले ॥ ६५ ॥
स्वप्राणान् त्यक्तुकामेन खड्गे कण्ठेऽर्पिते सति । तन्नीतिपरितुष्टस्य शंभोराज्ञावशेन च ॥ ६६ ॥
रथचक्रहतो वत्सो मृतो मन्त्री च नन्दनः । राज्ञः पत्नी मृता सापि पुनर्जीवेन चोत्थिताः ॥
तदा ववर्षुः पुष्पाणि देवा व्योम्नि स्थिता मुदा । तर्णः स्वमातरं प्राप राजमन्त्रिसुतस्त्रियः ॥
राजानं नेमुरागत्य हर्षाद्राजालिलिङ्ग तान् । दृष्ट्वाद्भुतं जनाः सर्वे तत्रत्या विस्मयं गताः ॥ ६९ ॥
वत्सोऽदृश्योऽभवत्पश्चात्पश्यतां विस्मयप्रदः । स्वयं वीथीविटङ्काख्यस्त्यागराजस्सदाशिवः ॥ ७० ॥
पशुरूपं परित्यज्य वृषारूढो महेश्वरः । भूत्वा कृपां विधायास्मिन् दयालुर्धरणीपतौ ॥ ७१ ॥
अनुगृह्य कटाक्षात्तमाह भूपमितीश्वरः । त्वन्नीतिशोधनार्थं तु मया गोरूपिणागतम् ॥ ७२ ॥
धर्मेण वत्साकारेण प्राप्तमत्र महीपते । तुष्टोऽस्मि तव नीत्याहं यत्त्वदिष्टं ददामि तत् ॥ ७३ ॥
प्राप्तप्राणैः सहैतैस्त्वं चिरं स्त्रीपुत्रमन्त्रिभिः । भुक्त्वेह भोगान् विपुलानन्ते मल्लोकमेष्यसि ॥ ७४ ॥
अनुगृह्येति राजानमन्तर्धानमगात्क्षणात् ।

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे चोलभूपनीतिपरीक्षणं नाम त्रयोदशोऽध्यायः ॥

॥ अथ चतुर्दशोऽध्यायः ॥

श्रीअगस्त्यः ॥

पुनरन्यापदानं तु त्यागेशस्याद्भुतं मया । शिवभक्ताग्रगण्यस्य धर्मिणः सर्वदर्शिनः ॥ १ ॥
कथ्यतेऽम्बष्ठभक्तस्य कैवल्यप्रदमत्र वः । श्रीपुराभ्यर्णविषये पूयहार्याख्यमङ्गले ॥ २ ॥
कश्चिदम्बष्ठभक्ताख्यो वसन् शंकरभक्तिमान् । शिवव्रतप्रियो नित्यं शिवसेवासमुत्सुकः ॥ ३ ॥
शिवभक्ताङ्घ्रिशुश्रूषारचनोद्युक्तमानसः । शिवभक्तेष्टदो नित्यं शिवलाञ्छनभूषितः ॥ ४ ॥
ददाति शिवभक्तेभ्यो वस्त्रं धान्यं च तण्डुलम् । विशिष्यास्य व्रतं वक्ष्ये यो वा को वा शिवाश्रितः ॥
विभूतिरुद्राक्षधरः स्वगृहं चेत्समागतः । वस्त्रं वपति तत्केशान् स काचग्रहणं विना ॥ ६ ॥
एवं नियमशीलस्य भक्तानां वपतः क्षितौ । तस्यास्याम्बष्ठभक्तस्य गता हि बहुवत्सराः ॥ ७ ॥

अथैकदा महादेवस्त्यागराजोऽस्य मन्दिरम् । आगतो विप्ररूपेण भक्तिशोधनकाङ्क्षया ॥ ८ ॥
रुद्राक्षालंकृतग्रीवो धृतरुद्राक्षकुण्डलः । भस्मालंकृतफालोऽयं धृतरुद्राक्षमस्तकः ॥ ९ ॥
पूयासृक्क्लिन्नसर्वाङ्गः पूतिगन्धिव्रणान्वितः । पूयासृग्जटिलाशेषरोमरोमशदेहवान् ॥ १० ॥
तद्व्रणस्थितपूयासृक्कीटकोटिगणव्रणम् । वहन् जुगुप्सितं वेषं पूतिगन्धीपुरान्तकः ॥ ११ ॥
शंकरोऽशीतिवृद्धः सन् दण्डभृत्कम्पयन् वपुः । स्वस्य कारयितुं तेन क्षौरमाविरभूत्तदा ॥ १२ ॥
तमागतं द्विजश्रेष्ठं मत्वा शंकररूपिणम् । उत्थाय नत्वा बताय कृतार्थोऽस्मीति पिप्रिये ॥ १३ ॥
किमर्थमागतं स्वामिन् श्रीमद्विग्रहं प्रति । सहसा साधयिष्यामि वक्तव्यं कृपया मयि ॥ १४ ॥
इत्युक्तः प्राह तं शंभुः प्रत्युत्तरमुमापतिः । मृदुवक्त्रा पटुकर इति त्वाहं निशम्य च ॥ १५ ॥
अभ्यागतस्त्वदभ्याशं त्वया वापयितुं मम । सुखेन त्वं वपसि चेद्दद्यां वाञ्छितवेतनम् ॥ १६ ॥
इत्याकर्ण्याब्रवीद्विप्रो नाऽत्र वेतनकाङ्क्ष्यहम् । करोमि वपनं तूष्णीं भक्तानामिति मे व्रतम् ॥
तस्मात्तुभ्यमकमपि भोः सर्वाङ्गं निवपाम्यहम् । इतीरितस्तथा चेत्त्वं जलसेकं विना कुरु ॥ १८ ॥
शीताम्बुस्पर्शमात्रेण व्रणे बाधा भविष्यति । अशक्यं चेद्विना तोयं लिहन् लालाजलेन मे ॥ १९ ॥
संसिच्य पूयशुष्काणि रोमाण्येवाजुगुप्सयन् । त्वद्रसज्ञावलीढं त्वल्लालासिक्तं त्वया यदि ॥ २० ॥
मदशेषाङ्गवपनं कृतं चेन्मे सुखं भवेत् । इतीरितस्तथास्त्वेवं करोमीत्यजुगुप्सितः ॥ २१ ॥
यथाकथंचिद्वक्तेष्टं भवत्वेतदलं मम । इति प्रसार्य रसनां सर्वाङ्गाणि लिहन् लिहन् ॥ २२ ॥
पूयश्लेष्मितकीटौघान् व्यपोह्य रसनाजलैः । सुखेन वपनं चक्रे सोमास्कन्दस्य धूर्जटेः ॥ २३ ॥
अनेन क्षौरमात्रेण तत्पूयासृग्व्रणादिकम् । गतं जुगुप्सितं वेषात्सुकुमारमभूद्वपुः ॥ २४ ॥
पुनः क्षणान्महादेवस्त्यक्त्वा रूपं तदद्भुतम् । आविर्भूय वृषारूढः सोमार्धकृतशेखरः ॥ २५ ॥
सोमास्कन्दो गणाधीशो विधृतैणपरश्वधः । दृष्ट्वातिभक्तिमम्बष्ठे तुष्टोऽभूत्कृपयान्वितः ॥ २६ ॥
सायुज्यमुक्तिं दत्वास्मै सद्यः शंभुस्तिरोदधे । एवं तत्र शिवो नित्यमनुगृह्णाति चात्मगान् ॥ २७ ॥
यत्र श्रीत्यागराजस्य महिमा वाग्गोचरः । तदेतत्सुन्दरकविर्जगाम कमलालयम् ॥ २८ ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे अम्बष्ठमहिमानुवर्णनं नाम चतुर्दशोऽध्यायः ॥

॥ अथ पञ्चदशोऽध्यायः ॥

श्रीअगस्त्यः ॥
चरित्रं सुन्दरस्याद्य विचित्रं शृणुत द्विजाः । सर्वलोकेषु विख्यातं सर्वपापप्रणाशनम् ॥ १ ॥
किं दुर्लभं भगवति प्रसन्ने वृषभध्वजे । तथापि नान्यद्वाञ्छन्ति भक्ता भक्तिं विनेश्वरे ॥ २ ॥
स्तुत्वा सर्वशिवस्थाने वाचा शंभुं स सुन्दरः । तुष्टाव त्यागराजेशं संप्राप्तकमलालयः ॥ ३ ॥

कर्पूरलेपाय कलाधराय कल्हारजव्वन्तिसुगन्धिताय ।
कल्पद्रुमायाङ्घ्रिसरोजभाजां कैवल्यदायास्तु नमः शिवाय ॥ ४ ॥

इति सुन्दरसूक्तिसुधामुदितस्तरुणेन्दुकलाभरणो भगवान् ।
परिकल्पितमौलिरुवाच भवान् अमुकल्पित एहि सखा भव मे ॥ ५ ॥
इत्यादिष्टा महेशस्य तदारभ्य सखाभवत् । सुन्दरं शंभुराहेति त्वं सखा मे सखास्मि ते ॥ ६ ॥
यथा कल्याणसमये पुरा भूषणभूषितः । अनुलेपाञ्जनस्रग्वी रञ्जितो नयनप्रियः ॥ ७ ॥
त्वं तथाविधवेषेण नित्यमायाहि सुन्दर । मत्समीपेऽत्र मत्प्रीत्या इत्यादिष्टः पिनाकिना ॥ ८ ॥
नित्यकल्याणवपुषा शंभुमेत्य सुखं स्थितः । तदारभ्यास्य नामाभूत् त्यागेश्वरसखेति च ॥ ९ ॥
वरवेषधरं देवं प्रणमन्तं सुहृत्तमम् । धृतकल्याणवेषो मां भजेत्याह महेश्वरः ॥ १० ॥
किमन्यद्भुवने भाग्यं सुन्दरः शाङ्करः सखा । वन्दारुवर्गं कौबेरं वन्दीचक्रे सुवेषभृत् ॥ ११ ॥
उमावक्षोजसंक्रान्तकर्पूरालेपगन्धिना । हरोरसा समाश्लिष्टं स्वं मेने सुन्दरो गुहम् ॥ १२ ॥
त्यागेश्वरासकल्हारकर्पूरामोदवासितम् । त्यागेशभावनावन्तः प्रणेमुः सुन्दरं जनाः ॥ १३ ॥
कथं सुन्दरदूतोऽभूत्त्यागेशः कुम्भसंभव । चरित्रमेतदाचक्ष्वेत्यपृच्छन् मुनयस्तदा ॥ १४ ॥

श्रीअगस्त्यः ॥

कैलासे सुन्दरासक्ते ये गौरीपरिचारिके । जाते शापान्महेश्वर्याः क्षोण्यां मानुष्यजन्मके ॥ १५ ॥
तयोः कमलिनी पूर्वा जाता हि कमलालये । त्यागराजेशगणिकावंशे मुक्तेव सा बभौ ॥ १६ ॥
रूपलावण्यसौन्दर्यैः परान्वांति जनानिति । परवेत्यभिधां चक्रे तन्माता गणिकाग्रणीः ॥ १७ ॥
लालिता निजमात्रा सा ववृधे परवा तदा । सामुद्रिकोक्तनिःशेषलक्षणोत्तमलक्षिता ॥ १८ ॥
अव्याजसुन्दरी बाला विद्याभिः सात्मवाहयत् । परिज्ञाताखिललिपिर्नृत्तगीतविशारदा ॥ १९ ॥
सर्वातिशायिनी लोके चित्रनिर्माणकर्मणि । जगदानन्दसन्दोहघनीभाव इवोत्थितः ॥ २० ॥
देहस्तदीयो लोकानां नेत्रानन्दकरोऽभवत् । यौवनारम्भयोगेन श्रियं सा भूयसीं दधौ ॥ २१ ॥
यथा वसन्तयोगेन माधवी पुष्पशालिनी । शारदी चन्द्रलेखेव विद्युद्वल्लीव वार्षिकी ॥ २२ ॥
भूयिष्ठशोभा सा तन्वी मणिरुत्तेजितो यथा । सा वसन्ती गृहे मातुर्न कस्यापि दृशः पथि ॥ २३ ॥
चन्द्रलेखेव सुमुखी निलीना मेघमण्डले । सखीजनैः परिवृता प्रत्यहं भक्तिपूर्वकम् ॥ २४ ॥
निषेव्य त्यागराजेशं गच्छत्यात्मगृहं प्रति । एकदा शंभुसेवार्थमागता परवालयम् ॥ २५ ॥
सुन्दरस्तां कौमलाङ्गीमपश्यत् स्तिमितेक्षणः । आपादभागाभिष्वक्तनीलकुन्तलमञ्जरीम् ॥ २६ ॥
निश्वासामोदसंमोदमानमत्तमधुव्रताम् । व्याघ्रहुंकारसंत्रस्यन्मृगार्भकविलोचनाम् ॥ २७ ॥
कपोलादर्शसंक्रान्तवल्गन्माणिक्यकुण्डलाम् । अलकान्तरसंसक्तनखकिंशुकशोरणीम् ॥ २८ ॥
मनोभवमहाराजोपकार्याधोरणभ्रुवम् । अलिकासक्तकस्तूरीलेखोज्ज्वलमुखाम्बुजाम् ॥ २९ ॥
नानाभरणरत्नश्रीपरिष्वक्तगलस्थलाम् । सूक्ष्मसंध्याननिर्मोकदृश्योन्नतपयोधराम् ॥ ३० ॥
महार्हक्षौमसंवीतमापादगलमञ्चकम् । बिभ्राणामभ्रगलितामिव सौदामिनीलताम् ॥ ३१ ॥

लावण्यामृतनिष्यन्दशीकाराननमौक्तिकाम् । मीनकेतनकल्पद्रुनवोद्यत्पल्लवाधराम् ॥ ३२ ॥
पादारविन्दवाचालमणिमञ्जीरमण्डिताम् । मन्दमन्दपदन्यासकलाजितमरालिकाम् ॥ ३३ ॥
निर्मितां रतिकोट्येव लक्ष्म्याः प्रतिकृतिं यथा । मान्मथी मोहनकलामूरीकृततनूमिव ॥ ३४ ॥
तादृशीं सुन्दरो दृष्ट्वा विलक्षहृदयोऽभवत् । पुरारिनेत्रनिर्दग्धः स्मरस्तत्सुहृदं तदा ॥ ३५ ॥
तां चापयष्टिमादाय जिगाय किल सुन्दरम् । स्तब्धस्य तामुदीक्ष्याथ सर्वाश्चेन्द्रियवृत्तयः ॥ ३६ ॥
लोचनद्वयमार्गेण निपतन्ति स्म तन्मुखे । सापि दृष्ट्वा तमालोक्य सानुरागेत्यमन्यत ॥ ३७ ॥
विद्याधरो वा गन्धर्वो गुह्यकः किन्नरोऽपि वा । इन्द्रो वाथ जयन्तो वा मुकुन्दो वायमागतः ॥ ३८ ॥
स्मरो वा त्यक्तपुष्पेषुरागतः किमिहाधुना । चन्द्रो वायं वसन्तो वा वेषान्तरमुपेत्य च ॥ ३९ ॥
ममेन्द्रियाणि सर्वाणि किं क्षोभयितुमागतः । इति चित्तेऽभिमन्वाना सर्वावयवसुन्दरी ॥ ४० ॥
कटाक्षोत्पलमालाभिर्वीक्षमाणा च सुन्दरम् । तदीये चैतदीये च लोचने मिलिते पथि ॥ ४१ ॥
अन्योन्यं गाढमाश्लिष्य परां निर्वृतिमापतुः । अथ तस्यां प्रयातायां प्रतिवेश्म स सुन्दरः ॥ ४२ ॥
तत्रत्यानिति पप्रच्छ केयं सौन्दर्यशालिनी । आगत्य गच्छतीशानं निषेव्य सदनं प्रति ॥ ४३ ॥
इत्युक्ताः प्रोचुरेषा हि परवा गणिकोत्तमा ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे परवासुन्दरपरस्परदर्शनानुरागवर्णनं नाम पञ्चदशोऽध्यायः ॥

॥ अथ षोडशोऽध्यायः ॥

श्रीअगस्त्यः ॥
इत्याकर्ण्यानुरागेण तस्यामीशस्तवेन ताम् । प्राप्तुकामस्तदा शंभुं नत्वा गीत्वा विनिर्गतः ॥ १ ॥
मृगयन्ननुगत्वा तामनङ्गपरतन्त्रधीः । अदृष्ट्वाप्राप्य निर्विण्णस्तदेवाश्रयमण्डपम् ॥ २ ॥
तद्रूपं मनसा दध्यावेकान्ते मीलितेक्षणः । अहो कैश्यमहो सुभ्रूर्विभ्रमापाङ्गवीक्षणम् ॥ ३ ॥
अहो मन्दस्मितमहो वदनेन्दुरहोऽधरः । अहो तस्याः स्तनद्वन्द्वमहो मन्दतमा गतिः ॥ ४ ॥
इति चिन्तयतस्तन्वीं चेतस्ताद्रूप्यभागभूत् । हित्वा पञ्चाक्षरीं विद्यां परवेत्यक्षरत्रयम् ॥ ५ ॥
जपतोऽभून्मनस्तस्य कामोन्मादान्ध्यमेदुरम् । उद्यानान्यभूतालापः कर्णे दम्भोलिपातवत् ॥ ६ ॥
फणिफूत्कारवत्तस्य बभूव मलयानिलः । मौलीन्दुदर्शनभयान्न त्यागेशमसेवत ॥ ७ ॥
नास्तौषीद्विमना देवं मुचुकुन्दवरप्रदम् । विषास्वाद इवाहारो भस्मनेव सितं वपुः ॥ ८ ॥
उन्मत्तशेखरो भूत्वा स्थाने शंभोरभूत्सखा । परवा सापि विरहात् कृशाङ्गी पाण्डराङ्गिका ॥ ९ ॥
पिकस्य मञ्जुवचनं कठोरं मनुते हृदि । जगदाह्लादकं पूर्णचन्द्रमेव सचन्द्रिकम् ॥ १० ॥
अग्निकुण्डमिवोत्कीलं मनुते मारयज्वनः । इयं तु विरहाधिक्यात्यक्त्वा कन्दुकखेलनम् ॥ ११ ॥
सखीजनैः सहालापमाहारमपि चात्मनः । त्यक्त्वा क्रीडाशुकालापं विरहानलतापिता ॥ १२ ॥

रम्भापत्रे शयाना सा ध्यात्वा ध्यात्वा च सुन्दरम् । मुमोह विवशस्वान्ता मन्मथास्त्रसुपीडिता ॥
पपात मूर्च्छया भूम्यां परवाऽपि विचेतना ॥ १४ ॥

चन्द्रातपो रात्रिषु चन्द्रमुक्तश्चण्डातपौष्ण्यमगादमुष्याः ।
प्रसूनशय्यान्तरसंनिवेशोऽप्यङ्गाररशावजनि प्रवेशः ॥ १५ ॥

एवं विरहिणावास्तां परवासुन्दरावुभौ । रात्रौ विनिद्रावासीनावन्योन्यस्तुतसद्गुणौ ॥ १६ ॥
विकारमुभयोर्वीक्ष्य शंभुस्त्यागेश्वरस्तदा । तयोर्विरहशान्त्यर्थं सुन्दरान्तिकमागतः ॥ १७ ॥
ध्यानमौनपरिम्लानमानसं मदनान्तकः । निशि निर्निद्रमासीनं त्यागेशः प्राह सुन्दरम् ॥ १८ ॥
सखे सुन्दर किं दैन्यमुपयासि स्थिते मयि । न स्तौषि मां यथापूर्वं म्लानं च वदनं कुतः १९ ॥
किमिति त्वं न निद्रासि नाश्नासि न च भाषसे । किं ते व्याधिसमुत्थानं यथावद्वद सुन्दर २० ॥
शोचन्तः सुहृदे ह्युक्त्वा स्वाधिमश्नुवते सुखम् । उत्तिष्ठ ब्रूहि शोकस्य कारणं शमयामि ते ॥ २१ ॥

श्रीसुन्दरः ॥

आधिर्महीयन् मम दुर्निवारस्त्वया विना नास्ति हि शान्तिकर्ता ।
अनङ्गरोगादव मां सखायं भिषक्तमं त्वां भिषजां शृणोमि ॥ २२ ॥

परवेत्यस्ति नाम्नैकं स्त्रीरत्नमतुलप्रभम् । यामादाय प्रहरणं मां पीडयति मन्मथः ॥ २३ ॥
अनङ्गज्वरदूनोऽस्मि तत्कृते व्यसनं महत् । यदि तस्याः परिष्वङ्गो लभ्यते सकृदेव मे ॥ २४ ॥
त्यागेश्वर भवत्पूजाफलमेतन्न संशयः ॥

त्वद्रूपचिन्तां परिहृत्य तावत्तद्रूपचिन्तातरलं मनो मे ।
त्वन्नाममाङ्गल्यमपास्य दूरे तन्नामपारायणसादरोऽस्मि ॥ २५ ॥

दीनस्य कामदूनस्य त्यागेश्वर दयानिधे । देहि संजीवनीमेनां सर्वाधिव्याधिशान्तये ॥ २६ ॥
दूतस्त्वमेव गत्वा तां यद्यानयसि शंकर । अनर्घपद्मसाहस्रमर्पयामि स्तवप्रिय ॥ २७ ॥
तस्यैवोपदेशसाहस्रैस्तस्यामाशा न वार्यते । उपेक्षसे यदि स्वामिन् प्राणा गच्छन्ति मे ध्रुवम् ॥ २८ ॥
इत्युक्त्वा प्रणतं पादे सुन्दरं भक्तवत्सलः । प्रतिज्ञाय तथेत्यस्मै दूतरूपमबीभरत् ॥ २९ ॥
अथार्धरात्रे सर्वेषु निद्राणेषु शरीरिषु । सुन्दरस्य विनिद्रस्य त्यागेशस्तापशान्तये ॥ ३० ॥
एकः सर्वगुहावासी ययौ स परवागृहम् । यान्तं सुन्दरदूतं तं कर्पूरालेपसुन्दरम् ॥ ३१ ॥
वीक्ष्य विश्वाधिकं देवं विस्मयन्ते स्म खेचराः । तस्य पादाब्जविन्यासपरिपूतानि वीथिषु ॥ ३२ ॥
रजांसि शिरसा धृत्वा सिद्धा मुक्तिमवापिरे । परवावेश्म यातीशे त्यागेशे दूतकर्मणि ॥ ३३ ॥
जय सुन्दरदूतेति काहली व्योम्न्यजृम्भत । अवन्यां सुन्दरसखं गच्छन्तं दूतरूपिणम् ॥ ३४ ॥
व्यजिज्ञपन् परिजनाः देव्यै दिव्यविभूतये । मणिसौधाग्रमध्यास्य कमलालयनायिका ॥ ३५ ॥

गवाक्षेण विलोक्येशं गौरीमन्दस्मितं दधौ । दध्यौ च मनसा देवी तदप्येतस्य भूषणम् ॥ ३६ ॥
भस्मास्थिमालान्त्रकरोटिपात्रश्मशानचर्याजरदुक्षभाजः ।
स्वयुः कृते दैवमिदं पशूनां पत्युर्विनोदो न हि दूषणाय ॥ ३७ ॥
अथातीत्य महावीथीं महादेवो दयानिधिः । प्रययौ परवावेश्म द्वारं शुभवितर्दिकम् ॥ ३८ ॥
दृष्टं वराहवपुषा न मुरारिणा यत्पादाम्बुजं पशुपतेर्गणिकागृहस्य ।
पस्पर्श तत्खलु शिलाविधिहंसमृग्यं नासाशिरोऽपि निशि सुन्दरदूत्यभाजः ॥३९॥
अथार्चकतनुर्भूत्वा त्यागेशः सर्वरूपभाक् । उद्घाटयारं प्राप्तोऽस्म्यहं कोऽत्रेत्यभाषत ॥ ४० ॥
अथार्धरात्रे गम्भीरां गिरमाकर्ण्य शङ्किता । तस्य सा परवा मात्रा विनिद्रा सार्धमाययौ ॥ ४१ ॥
बाले त्वं परवे पश्चाद्भव पश्यामि कः पुमान् । निशीथेऽस्मद्गृहद्वारमेत्याह्वयति साहसी ॥ ४२ ॥
इति मातार्गलन्यस्तपाणिस्तस्थौ विशङ्किता । प्राह सा परवा तत्र जननीं सुन्दराशया ॥ ४३ ॥
मातः कर्पूरकल्हारजव्यन्तीपुष्पवासना । बहिराकर्षति घ्राणं कोऽयं द्वारि विलोक्यताम् ॥ ४४ ॥
पूर्वेद्युः कश्चनेत्येवमधोक्ते विरराम ह । उद्घाटयाररमिति ध्वनिरासीद्बहिः पुनः ॥ ४५ ॥
त्यागेश्वरोऽवतु सुते कुलदैवतं नस्त्वां प्रत्यसावुपगतो ननु तर्कयामि ।
आहूत एति गणिकागृहमर्धरात्रे बालापि साहसमिदं कथमातनोषि ॥ ४६ ॥
बाले स्थिते मयि तु तेऽपरतन्त्रता किं युक्तायमेतु नृपसंनिधिमानयामि ।
उक्त्वेति सा गृहमुखाररभेदकृत्तं माता ददर्श बहिरर्चकवेषमीशम् ॥ ४७ ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे त्यागेश्वरदौत्यवर्णनं नाम षोडदशोऽध्यायः ॥

॥ अथ सप्तदशोऽध्याय ॥

श्रीअगस्त्यः ॥
मत्वार्चकं शिवं प्राप्तमाह सा परवाप्रसूः । किं न्विदं किं गुरूणामप्युचितं मद्गृहापणम् ॥ १ ॥
धन्यास्म्यनुगृहीतास्मि वृषी चेयमिहास्यताम् । निशीथे त्वादृशो वेश्यासदनं चेन्महान् व्रजेत् ॥ २ ॥
अपचारपरो मूढो लोकः किं किं न वक्ष्यति । अनुप्राह्या वयं ब्रूहि किमागमनकारणम् ॥ ३ ॥
इति तस्यां ब्रुवाणायां स्मयमानमुखाम्बुजः । मायार्चकवपुः प्राह भगवान् परमेश्वरः ॥ ४ ॥
शृणु त्वं परवामातः शृणोतु च सुता तव । श्रेयसे यशसे भूत्यै पुत्र्यास्ते वचनं मम ॥ ५ ॥
त्यागेश्वरसुहृत्कश्चिदस्तीह खलु सुन्दरः । स दृष्ट्वा त्वत्सुतां मोहात्ताम्यत्यत्यन्तमूर्च्छितः ॥ ६ ॥
दूतं तस्यागतं विद्धि सांप्रतं त्वद्गृहं प्रति । ऐश्वर्यमिमं तस्य वयो नवमनुत्तमम् ॥ ७ ॥
रूपं च विद्या प्रथिता यथासीत्सुहृदीश्वरः । आवयोऽवधि ते पुत्र्याः प्रणयोऽस्यास्त्वखण्डितः ८ ॥
भूयादनर्घं कौशेयं एतत्संप्रति गृह्यताम् । इत्युक्त्वा प्रददौ भस्म तयोर्हस्ते महेश्वरः ॥ ९ ॥

माता पुत्रीमुवाचेदं तथैव क्रियतामिति । व्याजलज्जावती सा तमाह छद्म शिवद्विजम् ॥ १० ॥
मम त्यागेश्वरोदिष्टः पतिर्भवति संमतः । साक्षाद्वदा मे स भवेत्तदानीं तं वृणे वरम् ॥ ११ ॥
तदाकर्ण्यार्चकः प्राह त्यागेशस्यापि संमतम् । इदमेव सुहृत्तस्य यतोऽसौ सुन्दरः कविः ॥ १२ ॥
तथात्र परवे कार्यमानयेयं तमन्तिकम् । पुनः सा परवा प्राह स्वामिनः संमतं यदि ॥ १३ ॥
स एव साक्षाद्वदतु करिष्यामि तथा पुनः । इति तस्यां ब्रुवाणायां स एवायात्पतीश्वरः ॥
उक्त्वेत्यर्चकरूपीशो निर्गतस्तद्गृहाद्बहिः । क्षणात्तद्रूपमुत्सृज्य स्वीयं रूपमदर्शयत् ॥ १५ ॥
भगवाननयोस्तत्र त्यागराजो द्विजोत्तमाः । ते प्रणम्य पदाम्भोजे वृषभारूढमीश्वरम् ॥ १६ ॥
प्रार्थयामासतुर्मुक्तिं देहान्तेऽस्त्विति सोऽब्रवीत् । सुन्दरस्यानया सङ्गः श्वः स्यादिति तिरोदधे ॥
प्राह नागरिकान् स्वप्ने प्रत्येकं दिव्यशक्तिमान् । त्यागेश्वरस्तां परवां सुहृदाघटयेति सः ॥ १८ ॥
सुन्दरं च समासाद्य तत्सङ्गः श्वो भविष्यति । सुघट्टयामि परवामेव ते सुन्दर ध्रुवम् ॥ १९ ॥
इत्युक्त्वा तत्स्तुतिस्नेहाद्गाढमाश्लिष्य सुन्दरम् । सखे तद्रतिकाले मां मा विस्मर यथासुखम् ॥
विहरेति तमादिश्य धाम स्वं प्रत्यपद्यत । अथापरेद्युः सर्वेऽपि नागरा मिलिता जनाः ॥ २१ ॥
परस्परानुरूपेण स्वप्नालोकेन विस्मिताः । प्रातः कल्याणमुभयोः कारयित्वा शिवाश्रिताः ॥ २२ ॥
भेरीपटहवाद्यानां नादानां संभ्रमेण च । कल्याणं पश्यतां नृणां नेत्रानन्दोऽभवत्तदा ॥ २३ ॥
पश्चात्परवया रात्रौ सुन्दरं समयोजयन् । योजितः सुन्दरः पश्चात्क्षणं स्थित्वा तया सह ॥ २४ ॥
त्यागेशदर्शनाकाङ्क्षी वस्त्रस्रग्गन्धभूषणैः । आत्मानं समलंकृत्य तथा तां परवामपि ॥ २५ ॥
परवापाणिमालम्ब्य निर्गतो द्रष्टुमीश्वरम् । वाद्यघोषैः परिवृतो वन्दिभिश्चाभिनन्दितः ॥ २६ ॥
बोद्धुं संक्षुब्धयन्नात्मपालितं कुक्कुटद्वयम् । युद्धाय प्रेषयन् मत्तं संक्रुद्धमुरणद्वयम् ॥ २७ ॥
वादयन् वचनं क्रीडाशुकं नानाविनोदवान् । ददर्शेशालयं गच्छन् श्रीदेवाश्रयमण्डपे ॥ २८ ॥
स्थितान् भक्तान् महाभागान् मनसा संप्रणम्य च । एषां दासः कदा भूत्वा कृतार्थः स्यामिति स्मरन् ॥
अन्तर्विवेश तं शंभुं नत्वा कृत्वा प्रदक्षिणम् । अगायदद्भाविडैर्गानैस्त्यागेशममृतोपमैः ॥ ३० ॥
तत्स्तोत्रमुदितः शंभुः प्रसन्नः प्राह सुन्दरम् । कृता त्वदिष्टपूर्तिर्हि मत्स्तोत्रादधिकं तु यत् ॥
मद्भक्तस्तोत्रमाधेहि भक्तानां दासभावतः । वर्तन्तेऽत्र च ये भक्ताः ते मद्रूपा न संशयः ॥ ३२ ॥
तान् गायस्वेति संप्रोक्तस्त्वादौ गेयं कथं त्विति । पृष्टवान् सुन्दरः शंभुमिति गानादिमाह सः ३३ ॥
श्रीतिल्लवनविप्राणां दासदासोऽस्म्यहं त्विति । स्तुहि श्रीनीलकण्ठादित्रिषष्टिगणितात्मनाम् ३४ ॥
दासभावेन गायस्वेत्युक्त्वान्तर्धिमगाच्छिवः । इत्युक्तो दासभावेन भक्तानां गानमादधे ॥ ३५ ॥
स्तुत्वा शिवाज्ञया भक्तान् दासभावेन सुन्दरः । तैश्च संपूजितस्तेषां बभूवाग्रेसरः सुधीः ॥ ३६ ॥
सुन्दरः पुनरभ्येत्य परवावेश्म शोभितम् । स्वर्लोकदुर्लभान् भोगानन्वभूदिह देववत् ॥ ३७ ॥
सुन्दरालोकनालापशयनाश्लेषभाग्यभाक् । प्राप सा परवानन्दं श्रिता वल्लीव कल्पकम् ॥ ३८ ॥

माणिविद्रुमसोपानस्वर्णस्तम्भविभूषिते । मूर्च्छितागरुधूपान्धपुष्पन्धयसमाकुले. ॥ ३९ ॥
माधवीचम्पकाशोककुसुमस्रगलंकृते । नानापरिमलद्रव्यगन्धभारसुगन्धिते ॥ ४० ॥
प्रासादे निवसन्नित्यं प्रेयसीं तामरीरमत् । मन्दरोन्मथिताम्भोधिपयःफेनोत्करप्रभाः ॥ ४१ ॥
यत्र शय्याः सुखस्पर्शाः प्रवालकुसुमास्तराः । सत्कवेः परवाश्लेषात्क्रीडासौख्यामृतोर्मयः ॥ ४२ ॥
त्यागेशवन्दिनस्तस्य पुपुषुर्धिषणालताम् । दिने दिने तत्परवानखदन्तक्षतान्वितम् ॥ ४३ ॥
उत्थायोषसि गच्छन्तमर्धमृष्टानुलेपनम् । कपोलगर्भसंभिन्नताम्बूलकबलोज्ज्वलम् ॥ ४४ ॥
सुन्दरं सुहृदं दृष्ट्वा त्यागेशः प्रीतिमानभूत् । अथैकदा कृतस्नानं कृताह्निकमुपागतम् ॥ ४५ ॥
संनिधौ स्तोतुकामं तमुवाच त्यागनायकः । प्रातस्तत्परवागेहादुत्थितस्य सखे तव ॥ ४६ ॥
वेषो मनोहरतरस्तथा नित्यं भजस्व माम् । न कर्म मम दासस्य बन्धाय सुहृदः किमु ॥ ४७ ॥
इत्यादिष्टो भगवता तथासेवत सुन्दरः ॥

हासावलोकनविलासदृढोपगूढक्रीडासुखानुभवकोटिषु कोमलाङ्गयाः ।
न व्यस्मरत्सुहृदमाप्ततमं महेशं त्यागेश्वरं स गिरिशस्तुतिसुन्दरोक्तिः ॥ ४८ ॥

अकृताह्निकमासीनमालये वीक्ष्य सुन्दरम् । अस्पृश्यं गणिकासक्तं धूर्तं केचित् बभाषिरे ॥ ४९ ॥
केचिदीशप्रसादाढ्यं त्यागेशं मेनिरे जनाः । सुन्दरस्तु सुहृच्छंभोर्निन्दास्तुत्योः समोऽभवत् ॥ ५० ॥
न तस्य गणिकाभोगो दोषाय स्मरतः शिवम् । यथा गङ्गाप्रवाहस्य कर्दमक्षोणिसंगमः ॥ ५१ ॥
अथैकदा समायान्तं प्रत्यूषे परवालयात् । करे गृहीत्वा पप्रच्छ त्यागेशः सुन्दरं रहः ॥ ५२ ॥
सखे सुन्दर पृच्छामि किंचित्तत्प्रमुदीर्यताम् । सुखं तत्परवासङ्गे यादृशं तन्निवेद्यताम् ॥ ५३ ॥
यच्च कुम्भस्तनस्पर्शे गाढाश्लेषे च यत्सुखम् । यच्चाधरामृतास्वादे यच्च गोष्ठीषु सुभ्रुवः ॥ ५४ ॥
सौहार्दादेव पृच्छामि प्रश्नो नैवंविधोऽन्यतः । यथानुभूतं तत्सर्वमेतन्मे वक्तुमर्हसि ॥ ५५ ॥
इत्युक्तः प्राह तं शंभुं सुन्दरो युक्तिपूर्वकम् । दर्वी पाकपरिज्ञानं जानाति किमिहान्धसाम् ॥ ५६ ॥
यथा पक्ता विजानाति तथा जानासि तत्सुखम् । मोदप्रमोदानन्दानां न किंचिद्वेत्सि शंकर ॥ ५७ ॥
भोक्तुः सुखं न जानाति शयनप्रच्छदांशुकः । सर्वेन्द्रियप्रेरयिता सर्वलोकगुहाशयः ॥ ५८ ॥
कर्ता भोक्ता त्वमेवैतज्जानास्यखिलतत्त्ववित् । नास्मि कर्ता न भोक्ता च प्रेरणीयस्तवास्म्यहम् ॥
यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि च । नामरूपात्मकं वस्तु त्वन्मयं सकलं खलु ॥ ६० ॥
इत्युक्त्वा त्यागराजस्य प्रणिपत्य पदाम्बुजे । तस्थौ स सुन्दरस्तूष्णीं पार्श्वे भृत्यो यथा प्रभोः ॥ ६१ ॥
तस्य चित्तपरीपाकमवलोक्य महेश्वरः । ददौ वेदान्तविज्ञानं यत्तैतद्वीचिवज्जले ॥ ६२ ॥
स्वपादाब्जोदकस्नातं सुन्दरं ज्ञानदीक्षया । कृतार्थयति गौरीशे तत्रासन् सनकादयः ॥ ६३ ॥
प्रणम्य संशयच्छेदं प्रार्थयत्स्वपि तेष्वथ । शृण्वत्सु मुनिषु श्रीमान् सुन्दरं प्राह शंकरः ॥ ६४ ॥
निष्क्रियं निर्मलं शान्तं निरवद्यं निरञ्जनम् । परिपूर्णमहं प्रत्यग्ज्योतिस्तत्त्वमसि ध्रुवम् ॥ ६५ ॥
प्रागासमेक एवाहमिदं नान्यदसच्च यत् । विलीनेष्वथ सर्वेषु योऽवशिष्टोऽहमस्मि सः ॥ ६६ ॥

अङ्गुष्ठमात्रं पुरुषं गुहाशयमनामयम् । प्रत्यङ्मुखेन ध्यायन्ति मनसा मां मुनीश्वराः ॥ ६७ ॥
मनो मत्प्रेरणादेव पतत्यसुगणो मया । चोदितोऽन्तश्चरत्यत्र चित्रं छिद्रघटाम्बुवत् ॥ ६८ ॥
जायमानेषु भूतेषु लीयमानेषु वा मयि । न मे विकारो वियतो यथा भेघोदयान्तयोः ॥ ६९ ॥
आब्रह्मस्तम्भपर्यन्तं यत्प्रज्ञानमनन्तरम् । तदस्म्यहमिति ज्ञात्वा पशुः पाशाद्विमुच्यते ॥ ७० ॥
रूपं येनेक्षते चक्षुर्येन शब्दग्रहः श्रुतेः । स्वादुविद्रसना येन सोऽस्मि सर्वेन्द्रियान्तरः ॥ ७१ ॥
मयि ज्योतिषि सूर्याद्या न भान्तीने प्रदीपवत् । अनुयानकृतः सर्वे राजानमनु सैन्यवत् ॥ ७२ ॥
भूतजातं मयि मृषा सिन्धौ वारिविकारवत् । भिदाम्भश्चन्द्रवन्मिथ्या द्रष्टुः स्वप्नशरीरवत् ॥ ७३ ॥
द्वौ सखायौ खगौ वृक्षं परिष्वज्य स्थिताविमौ । पिप्पलाशी तयोरन्यस्त्वन्योऽनश्नन् प्रकाशते ॥
कर्मानन्दा इमे सिन्धौ शीकरा इव ते मयि । ज्ञात्वेति मुक्तसंकल्पो देही नावर्तते पुनः ॥ ७५ ॥
आन्वीक्षिक्यादयो विद्या न मद्विज्ञानहेतवः । स मामुपनिषद्दीपः प्रकाशयति तद्विदः ॥ ७६ ॥
भक्त्यैवोपनिषद्वेद्यं चिरेण मदनुग्रहात् । ज्ञात्वा मामञ्जसा कश्चिच्छोकं तरति दुस्तरम् ॥ ७७ ॥
यथोर्णनाभिः सृजति ग्रसते च तथेश्वरः । सृजत्यवत्यत्ति जगदिति ज्ञात्वा विमुच्यते ॥ ७८ ॥
मामेव सर्वभूतानां हृदिस्थं परमेश्वरम् । तरन्ति शरणं प्राप्ताः प्राकृताः सर्वसाक्षिणम् ॥ ७९ ॥
इति वेदान्तजं ज्ञानं दत्तं सुन्दर ते मया । विरक्त एतद्विज्ञाय मुच्यते कर्मबन्धनैः ॥ ८० ॥
श्रद्धया परया भक्त्या तपसा गुर्वनुग्रहात् । संच्छिन्नसंशयो धन्यः कश्चिदेव विमुच्यते ॥ ८१ ॥
तस्मात्सुन्दर मामेव शरणं प्राप्तवानसि । मत्प्रसादात्त्वया विद्या लब्धा ब्राह्मी सुखी भव ॥ ८२ ॥
विज्ञाय सर्वं मद्रूपं न नीडं च स्मरिष्यसि । त्यक्तं यथाहिर्निर्मोकं निवृत्तं न स्मरेत्पुनः ॥ ८३ ॥
इमां मे चिन्मयीं मुद्रां ध्यात्वा जन्मार्णवं तर । इत्युक्त्वादर्शयन्मुद्रां त्यागेशः स्वस्य चिन्मयीम् ॥
संच्छिन्नसंशयाः सर्वे सनकाद्याश्च सुन्दरः । सहस्रकृत्वस्त्यागेशं प्रणेमुः पूर्णमानसाः ॥ ८५ ॥
अथाज्ञप्ता भगवता ते जग्मुः सनकादयः । भावयन्तो ज्ञानमुद्रां नित्यं त्यागेशदर्शिताम् ॥ ८६ ॥

त्यागेश्वराज्ज्ञानमवाप्य सुन्दरः स्तुवन् सदा द्राविडसूक्तिभिः शिवम् ।
नमन् भजन् तत्परवातिसौख्यमुवास भुञ्जन् कमलालये चिरम् ॥ ८७ ॥
दौत्यापचारं परमेशकृत्यं क्षमापयन् स्तोत्रशतेन सुन्दरः ।
विमुक्तसङ्गो विषयेषु निर्वृतिं परामवाप स्मरभित्प्रसादतः ॥ ८८ ॥

चरित्रं सुन्दरस्यैतच्छृण्वन्ति च पठन्ति ये । तेषां शिवप्रसादेन मुक्तिः स्यान्नात्र संशयः ॥ ८९ ॥
विचित्रं सुन्दरस्यैतच्चरित्रं कथितं मया । नीलकण्ठस्य वक्ष्यामि चरित्रं कुम्भकारिणः ॥ ९० ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे परवासुन्दरसंयोजनपूर्वकं
सनकादिभिः सुन्दरस्य वेदान्तविज्ञानोपदेशो नाम सप्तदशोऽध्यायः ॥

॥ अथाष्टादशोऽध्यायः ॥

श्रीअगस्त्यः ॥

न दैवतं महादेवादपरं सुलभेष्टदम् । वृथा परिश्रमो लोकः सेवते देवतान्तरम् ॥ १ ॥
स्वकालभयमोक्षाय शक्तिर्नान्यस्य कस्यचित् । भीतः कालाज्जनस्तस्य सेवया किं करिष्यति ॥ २
प्रारब्धाधीनभोगानां भूत्वा भूत्वा विनश्यताम् । उपास्यो देहिनामेको भगवान् कालशासनः॥ ३
फलं तु सुमहत्तस्य भजनेऽस्त्यपुनर्भवः । सुकरं चास्य भजनं मूढाः क्लिश्यन्ति संसृतौ ॥ ४ ॥
अनन्यया हरो भक्त्या प्रसीदति दयानिधिः । प्रसादादस्य मुक्तिश्च न ज्ञानान्नापि कर्मणा ॥ ५
अधिकारिविशेषे हि ज्ञानं कर्म प्रवर्तते । भक्तिमन्तो जना ये च ते शंभोर्मुक्तिभागिनः ॥ ६ ॥
सर्वेऽधिकारिणो भक्तेरिति शास्त्रेषु निर्णयः । भक्त्या केवलया जन्तोः पत्रपुष्पफलादिभिः ॥ ७ ॥
प्रसीदत्यर्चितः शम्भुर्न विद्यासत्कुलादिभिः । विना योगेन साङ्गेन तपसोत्तमजन्मना ॥ ८ ॥
कर्मणा विद्यया चापि भक्त्या मुक्ताः सहस्रशः । अत्रैवोदाहराम्येतच्चरित्रं शृणुत द्विजाः ॥ ९ ॥
यस्य श्रवणमात्रेण भक्तिर्भवति शङ्करे । अस्ति भूमण्डलस्यास्य मण्डनं क्षेत्रमुत्तमम् ॥ १० ॥
श्रीमच्चिदम्बरं नाम्ना दर्शनान्मुक्तिदं नृणाम् । यत्र स्वर्णसभामध्ये नृत्तं दृष्ट्वा पिनाकिनः॥ ११॥
बभूवतुर्मुक्तबन्धौ व्याघ्रपादपतञ्जली । महेशं यजतां यत्र ब्राह्मणानां गृहे गृहे ॥ १२ ॥
अग्निहोत्रोत्थितो धूमः सायं प्रातश्च पावनः । हविराज्यपुरोडाशपुण्यगन्धमनोहरः ॥ १३ ॥
दिग्वधूमुखकस्तूरीपत्रभङ्गाङ्कुरायते । तत्र कश्चित्कुलालोऽस्ति कुम्भकारकुलोत्तमः ॥ १४ ॥
दिवि त्वष्टुरिवामुष्य भुवि निर्माणकौशलम् । स नित्यं शिवगङ्गायां स्नात्वा भस्मावकुण्ठितः॥१५॥
रुद्राक्षमालाभरणः शिवध्यानपरायणः । जपन् पञ्चाक्षरं मन्त्रं पिबन् शिवकथामृतम् ॥ १६ ॥
ददाति शिवभक्तेभ्यस्तण्डुलं धान्यमोदनम् । उखाशरावभाण्डौघान् कूर्परं च कमण्डलुम् ॥ १७ ॥
नियमाद्वसनं चापि यद्यद्वाञ्छन्ति शाम्भवाः । तत्तत्सर्वं ददात्येव शिवभक्तशिखामणिः ॥ १८ ॥
विशिष्य नूतनं भाण्डं नृत्तराजमुदे ददौ । वर्षाकाले त्वकाले वा नित्यं रात्रौ च याचितम् ॥१९॥
ददाति शिवभक्तेभ्यो वाञ्छितं पात्रमुत्तमम् । स भावयन् शिवाकारान् शिवभक्तानसेवत ॥ २० ॥
भार्या चास्य वरा साध्वी शिवभक्त्या महीयसी । तयान्वितस्य भक्तस्य नासीद्वंशकरः सुतः ॥२१॥
न चानपत्यभावेन खेदस्तस्याभवत्क्वचित् । श्रीमच्चिदम्बराधीशे भक्त्यानन्दमुपेयुषः ॥ २२ ॥
शृण्वतः शिवमाहात्म्यं शिवगङ्गातटेऽन्वहम् । सकलस्य नटेशस्य बिम्बे चित्तमभूद्दृढम् ॥ २३ ॥
कदाचित्स्वप्नसंदृष्टां स्मरतः शाम्भवीं तनुम् । कण्ठनाले महेशस्य कालकूटप्रभाञ्चिते ॥ २४ ॥
रतिरासीत्तदारभ्य नीलकण्ठेति सर्वदा । वदन् सर्वैर्जनैर्नाम्ना नीलकण्ठः कृतो हि सः ॥ २५ ॥
तस्यैवं वसतः कालः सुमहानत्यवर्तत । अथ प्रावृषि सायाह्ने कदाचिद्भाण्डमूतकम् ॥ २६ ॥
प्रदत्वा नृत्तराजाय प्रतस्थे स्वगृहं प्रति । अन्तरा महती वृष्टिरभूज्झञ्झासमन्विता ॥ २७ ॥
तया न ज्ञायते भूमिर्दिशोऽध्वा तु किं पुनः । आसारपीडितश्चायमार्द्रवस्त्रश्च खिन्नधीः ॥२८॥

आसन्नवेश्यासदनद्वारभूमिं तदा ययौ । तं नीलकण्ठं विज्ञाय वेश्या तद्गृहवासिनी ॥ २९ ॥
नीत्वा तमन्तःसदनं वह्निं प्रज्वाल्य चेन्धनैः । अनार्द्रं वसनं दत्वा ताम्बूलादि समर्प्य च ॥ ३० ॥
ददावागरवालेपं शैत्यं येनोपशाम्यति । अथासौ विरते वर्षे वेश्यया चानुमोदितः ॥ ३१ ॥
नीलकण्ठो गृहं प्राप सोऽङ्गरागेण भूषितः । शयानो भार्ययाऽऽलेपं प्रति पृष्टः स सत्यवाक् ॥३२॥
सर्वं जगाद तत्त्वेन साप्याहस्मातिशङ्किता । चिराय वेश्यासक्तस्त्वं माद्य प्रभृति मां स्पृश ॥३३॥
तद्ग्रन्थिगन्धालिसाङ्गो मां मा स्पृश कदाचन । नीलकण्ठोपारिकृतः शापो दूरे स्थितो भव ॥३४॥
इति साध्व्यापि स प्रोक्तस्तदा प्रत्यशृणोत्क्रुधा । आदेहपतनं नैव त्वां स्पृशामि निशम्य तत् ॥
चकम्पे परमा साध्वी सान्त्वयामास तं पुनः । प्रतिज्ञां नात्यजत्सोऽपि चक्रे शोकं च सा हृदि ॥
तयोर्निवसतोरेवमेकान्तकलहं जनाः । न केचिदपि जानन्ति स तु वेत्ति महेश्वरः ॥ ३७ ॥
अन्योन्यसन्निधानेऽपि तयोरिन्द्रियनिग्रहात् । भक्त्या नटेशः संप्रीतः प्रसादं कर्तुमैहत ॥ ३८ ॥
मुनिवेषमुपादाय हरस्तत्सदनं ययौ । तमुत्थाय प्रणम्याथ नीलकण्ठोऽभ्यपूजयत् ॥ ३९ ॥
किं कार्यमिति पप्रच्छ दत्वासनमनुत्तमम् । स्मयमानो नीलकण्ठं तमुवाच नटेश्वरः ॥ ४० ॥
न योगिनो मे वाञ्छास्ति कुत्रचिद्दृश्यवस्तुषु । तथापि किंचिद्वाक्यं मे नीलकण्ठ निशम्यताम् ॥
तपसा पात्रमेतन्मे लब्धमन्येन दुर्लभम् । यदाहं यच्च वाञ्छामि तदेतन्मे ददाति च ॥ ४२ ॥
न्यासभूतमिदं रक्ष यावदागमनं मम । इत्युक्त्वा तस्य हस्ते तत्प्रदायाद्भुतभाजनम् ॥ ४३ ॥
ययौ मुनिः स्वैरगतिः स च तत्संररक्ष ह । यथा न कोऽपि जानाति पात्रमन्तर्गृहे स्थितम् ॥
स गत्वा यत्र कुत्रापि पुनरेत्य तदीक्षते । देहान्तःप्राणवत्तेन रक्षितं भाजनं गृहे ॥ ४५ ॥
न्यासं रक्षन्ति येऽन्यस्य तेषां लोकाः सनातनाः । हस्ते तस्य मुनेर्न्यासं पात्रं दत्वा कृतार्थताम् ॥
यास्याम्यायास्यति कदा स चेति समचिन्तयत् । इति चिन्तापरे तस्मिन्नीशमायाप्रकल्पितम् ॥
तिरोबभूव तत्पात्रं शास्त्रमस्मरतो यथा । आहाथ तापसोऽभ्येत्य नीलकण्ठेन पूजितः ॥ ४८ ॥
त्वयि विन्यस्तपात्रस्य देशान्तरचरस्य मे । न कदाचिद्विचारोऽस्ति प्रसीदतु तवेश्वरः ॥ ४९ ॥
देहि पात्रं मदीयं तन्मां यद्रक्षति मातृवत् । अन्नाभ्यञ्जनवस्त्राणि प्रदायाभीप्सितान्यहो ॥ ५० ॥
नीलकण्ठोऽपि तच्छ्रुत्वा यत्र तत्स्थापितं गृहे । न ददर्श स तत्पात्रमन्विष्टमपि तत्पुनः ॥ ५१ ॥
भार्यामाह क्व तत्पात्रं सा न वेद्मीत्यभाषत । किं माया किं नु दुःस्वप्न उपसर्गोऽथ भौतिकः ॥
अपवादाम्बुधेरस्मान्नीलकण्ठोद्धरस्व माम् । नो चेदहमिमान् प्राणान् सापवादान्न धारये ॥ ५३ ॥
इति निश्चित्य मनसा मुनेरन्तिकमाययौ । मुनीश्वरोऽपि तं प्राह नीलकण्ठाशु दीयताम् ॥ ५४ ॥
मदीयं पात्रमधुना विलम्बः क्रियते कुतः । अथ तं प्रणतः प्राह भीतः शोकविमूढधीः ॥ ५५ ॥
इदमाकर्णय स्वामिन्नपराधं क्षमस्व मे । सुरक्षितं ते तत्पात्रं दुरितान्मे न दृश्यते ॥ ५६ ॥
अन्यत्तत्सदृशं पात्रं ददामि प्रतिगृह्यताम् । नीलकण्ठे ब्रुवत्येवं चुकोप सहसा मुनिः ॥ ५७ ॥
वाणिज्यादिकृतः सर्वान् मेलयित्वेदमब्रवीत् । अहो पश्यत दौरात्म्यं कुम्भकारस्य दुर्मतेः ॥ ५८ ॥

अपहृत्येष्टदं पात्रं मृत्पात्रं दातुमिच्छति । व्याघ्रस्य गोमुखस्येव वञ्चनाचातुरी तव ॥ ५९ ॥
दृष्ट्वास्मि वञ्चितो वेषं भस्मरुद्राक्षधारिणः । गां दोग्ध्रीमपहृत्यैव प्रदातुं खरमिच्छति ॥ ६० ॥
यदि किंचिदिदं लोके चरितं सम्मतं भवेत् । शृण्वन् शिवकथां नित्यं भस्मरुद्राक्षभूषितः ॥ ६१ ॥
परद्रव्यापहाराय भवान् भ्रमति साधुवत् । बलादपहृतं द्रव्यं द्विजस्यासप्तमं कुलम् ॥ ६२ ॥
दहेद्धृतं वञ्चनया कुलानामेकविंशतिम् । वनस्थस्य हृतं द्रव्यं चतुष्षष्टिकुलं दहेत् ॥ ६३ ॥
यतेरपहृतं द्रव्यं कुलकोटिं दहेद्ध्रुवम् । नीलकण्ठ ततोऽहं त्वां ब्रवीम्याशा निवर्त्यताम् ॥ ६४ ॥
अन्यथान्वयकोटीभिर्निरये पतनं ध्रुवम् । सहमानो दुरुक्तीस्ताः प्राञ्जलिः प्रणिपत्य तम् ॥ ६५ ॥
न मयापहृतं पात्रं सत्यमित्याह कुम्भकृत् । नीलकण्ठमथ प्राह स मुनिर्जनसंसदि ॥ ६६ ॥
त्वद्वाक्ये मे न विश्वासो यदि सत्यं ब्रवीषि च । शिवगङ्गाम्भसि स्नात्वा कुलतन्तोः शिरः स्पृश ॥
अनपत्योऽसि चेद्भार्यां हस्ते धृत्वार्द्रवस्त्रभृत् । नटेशसन्निधौ स्नात्वा सत्यमेतदुदाहर ॥ ६८ ॥
नष्टं चेदस्ति तत्पात्रं हतस्त्वत्सङ्गमादहम् । प्रतिज्ञाभङ्गभीरुस्तन्नानुमेने स कुम्भकृत् ॥ ६९ ॥
निनायाथ बलाद्योगी नटेशपदसेविनाम् । यज्वनां संसदं चैनं व्याजहाराखिलं जनैः ॥ ७० ॥
प्रत्ययः कार्य इत्युक्तः स च स्वश्रुतमभ्यधात् । वञ्चनैवं विधास्येति मुनिः प्राहाथ तेऽवदन् ॥
नीलकण्ठ मुनिः क्रूरः प्रतिज्ञा युवयोर्यदि । उपायस्तत्र दृष्टोऽयं सदस्यैः श्रूयतामिदम् ॥ ७२ ॥
अपवादोऽन्यथा वां स्याज्जरां प्राप्तवतोश्चिरम् । न नटेश्वरभक्तस्य भवन्ति विपदः क्वचित् ॥ ७३ ॥
मुनिर्महात्मा तेजस्वी प्रत्ययस्तस्य दीयताम् । सङ्घीभूय महान्तो यद्वदन्ति श्रेयसे हि तत् ॥ ७४ ॥
कोटी द्वे वेणुदण्डस्य गृहीत्वा द्वौ युवामिह । शिवगङ्गाम्भसि स्नात्वा प्रत्ययं ददतं मुनेः ॥ ७५ ॥
इति यज्ञत्रिसाहस्रप्रोक्तं वाक्यं निशम्य तौ । दम्पती वेणुदण्डस्यालम्ब्य कोटिं ममज्जतुः ॥ ७६ ॥
शिवगङ्गाम्भसस्तस्मादुन्मज्जन्तौ युवाकृती । तौ मुनिं वृषभारूढं नटेशं तमपश्यताम् ॥ ७७ ॥
पुनराह महेशस्तु सङ्गोऽस्तु युवयोरिह । पश्चादाकारवैशिष्ट्याज्जन्मान्तरमिति स्मरन् ॥ ७८ ॥
यावच्छतायुः स पुनर्नीलकण्ठः शिवाज्ञया । क्रीडंस्तया चिरं पुत्रैः साकं ध्यायन् शिवं स्थितः ॥
तयोः प्रसन्नो भगवान् दत्वान्ते मुक्तिमीप्सिताम् । सह ताभ्यां चिदाकाशं स्वधाम प्रत्यपद्यत ॥
यः पठेदिममध्यायं शृणुयाद्वा समाहितः । नटेश्वरप्रसादेन न पुनर्जायते भुवि ॥ ८१ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीनीलकण्ठकुलालभक्तमुक्तिप्राप्तिर्नाम अष्टादशोऽध्यायः ॥

॥ एकोनविंशोऽध्यायः ॥

मुनयः ॥
चरितं सुन्दरस्योक्तं सर्वज्ञस्य महात्मनः । भक्त्या वशंवदो यस्य गुरुरासीन्महेश्वरः ॥ १ ॥
तथैव नीलकण्ठस्य शिवकैङ्कर्यकारिणः । आकर्णितं तच्चरितं भक्तिमान् यो महेश्वरे ॥ २ ॥

न येषामधिकारोऽस्ति वेदान्तज्ञानसाधने । स्वयं च कर्तुं कैङ्कर्यमशक्तास्त्रिपुरद्विषः ॥ ३ ॥
अथापि मुक्तिं वाञ्छन्ति निकृष्टकुलसंभवाः । केन प्रीतो ददात्येषां मुक्तिमीशस्तदुच्यताम् ॥ ४ ॥
श्रीअगस्त्यः ॥
अत्रेतिहासं ब्रुवतो मत्तः शृणुत भूसुराः । यस्य श्रवणमात्रेण जनः पापैः प्रमुच्यते ॥ ५ ॥
ज्ञानाधिकारिणां पुंसामपि कर्माधिकारिणाम् । अनुरूपार्चया शम्भुर्यथा प्रीणाति सर्ववित् ॥ ६ ॥
निकृष्टकुलजातानां ज्ञानकर्मजडात्मनाम् । स्वभक्तपूजयैवेशस्तथा प्रीणाति देहिनाम् ॥ ७ ॥
यद्यदिष्टतमं लोके शिवभक्तस्य वाञ्छितम् । तत्तत्प्रदाय हीनोऽपि जात्या सद्यो विमुच्यते ॥ ८ ॥
बहवः सन्ति भूलोके शिवभक्तैकपूजया । विमुक्तबन्धनाः सद्यो मुक्ताः शंभोरनुग्रहात् ॥ ९ ॥
तीर्थाटनाध्वरतपोव्रतदानपूर्तसन्मन्त्रतन्त्रनिगमागमवर्त्मभाजाम् ।
प्रीणाति सर्वजगतां पतिरिन्दुमौलिर्यद्वत्तथा स्वपदभक्तजनेषु भक्त्या ॥ १० ॥
अस्ति दक्षिणदिग्भागे कावेरीतीरभूषणम् । नगरं धनिनां लोके वणिजां धनवर्धनम् ॥ ११ ॥
वर्षमात्रनिवासेन यत्र क्षुद्रोऽपि निर्धनः । सम्पदं महतीं प्राप्तः स्पर्धते धनदेन च ॥ १२ ॥
हट्टेषु नवरत्नेषु वणिग्भिर्यन्निवासिभिः । क्रोशतीव महाम्भोधिरुदस्तोर्मिकरोऽन्वहम् ॥ १३ ॥
तत्रासीद्भूरुजः कश्चिद्धनदेन समः श्रिया । ख्यातो महाधनो रत्नपरीक्षासु विचक्षणः ॥ १४ ॥
जनेङ्गितप्रदो नाम्ना देहीति वचनेऽपि यः । सकृत्तस्य करस्पृष्टमप्यल्पं वर्धते धनम् ॥ १५ ॥
तत्रार्णवचराः सर्वे नौधनाः पादसेविनः । बाल्ये तेनार्जितं द्रव्यमभून्मेरुरिवापरः ॥ १६ ॥
भार्या **वसुमती** नाम्ना सर्वलक्षणसंयुता । तस्यासीद्बन्धुकोटीभिर्यस्याः परिवृतं जगत् ॥ १७ ॥
स तया सहितो नित्यं बुभुजे स्वर्गदुर्लभान् । भोगाननर्घाभरणालेपवस्त्रस्रग्वस्त्रभासुरः ॥ १८ ॥
एवं भार्यासमेतस्य समयः सुमहानगात् । व्रतचर्यापरस्यापि नासीद्वंशकरः सुतः ॥ १९ ॥
सदारः खिन्नधीस्तेन परित्यक्तविभूषणः । वाणिज्ये कल्पयित्वैकं दासं तूष्णीं गृहेऽवसत् ॥ २० ॥
एकदा स तु कावेर्यां प्रातः स्नात्वा सह स्त्रिया । गृहं जिगमिषुस्तीरे पौराणिकमवन्दत ॥ २१ ॥
स तेनास्त्वेति निर्दिष्टः सभार्यश्चाशृणोत्कथाम् । तस्माच्छिवपुराणानि पठतो ब्राह्मणोत्तमात् ॥ २२
श्रुत्वा शिवकथां पुण्यां भक्तिस्तस्य शिवेऽभवत् । दिने दिने पुराणस्य श्रवणात्तस्य चेतसः ॥ २३
सभार्यस्य विरक्तस्य शान्ता विषयवासना । तौ दम्पती द्विजं वृद्धं शिवतत्त्वेऽतिनिष्ठितम् ॥ २४ ॥
प्रसाद्य प्रापतुर्मन्त्रं पञ्चाक्षरमनुत्तमम् । क्षेत्रवस्त्रगृहादीनि तस्मै दत्वा विशुद्धधीः ॥ २५ ॥
तदा शिवपुराणेषु संसक्तोऽभून्महाधनः । गुरुं कदाचित्पप्रच्छ विनीतो विहिताञ्जलिः ॥ २६ ॥
मुक्तोर्मे कथं मुक्तिर्भवितेशप्रसादतः । ज्ञानेन कर्मणा वापि विहितेन यथाविधि ॥ २७ ॥
पाशितो जगत्कर्ता प्रसीदति महेश्वरः । न तयोरधिकारो मे कथं मोक्षो भविष्यति ॥ २८ ॥
शंसन्ति पुराणानि कर्मणो ज्ञानमुत्तमम् । इमं मे संशयं छिन्द्धि सर्वज्ञोऽसि दयानिधे ॥ २९ ॥
तदाकर्ण्य गुरुस्तस्य वाक्यमेतदभाषत । विश्वासो यदि मे वाक्ये प्रसीदति महेश्वरः ॥ ३० ॥

संशयश्चेद्गुरोर्वाक्ये संशयात्मा विनश्यति । असत्सङ्गं परित्यज्य सदा सत्सङ्गवान् भव ॥ ३१ ॥
असतां च सतां चापि शृणु वक्ष्यामि लक्षणम् । यत्परिज्ञानमात्रेण मतिः सत्सङ्गतौ भवेत् ॥
देहात्मवादिनो वित्तगृहक्षेत्रेषु सस्पृहाः । लौकिकव्यवहारेषु संसक्ताः सद्विलक्षणाः ॥ ३३ ॥
तेषु ये सङ्गता वैश्य शोकस्तेषां दुरत्ययः । न ते संभाषणीयास्ते सन्तो येषामसंमताः ॥ ३४ ॥
सतां च लक्षणं तावदुच्यमानं मया शृणु । शिव एव जगत्कर्ता शिवे सर्वं प्रतिष्ठितम् ॥ ३५ ॥
कर्मान्धकारे भ्रमतां मार्गदर्शी स भानुमान् । स एव शरणं नान्यदैवतं यमशासनम्[१] ॥ ३६ ॥
शिव गौरीपते शंभो जय चन्द्रकलाधर । मां कालकवलं पाहि कालशासन शंकर ॥ ३७ ॥
इति ये शिवनामानि कीर्तयन्ति दृढव्रताः । शिवलिङ्गार्चनपरा भस्मरुद्राक्षधारिणः ॥ ३८ ॥
पापिनामपि मुक्तिः स्यान्नूनं तत्पादसेवया । यद्यदिष्टतमं तेषां भक्तानां परमेशितुः ॥ ६९ ॥
तद्दत्वा भवति क्षिप्रं शिवानुग्रहभाग्जनः । प्रीणाति न तथा क्षिप्रं कुर्वतां स्वपदार्चनम् ॥४०॥
भक्तोपासनया शंभुर्यथा झटिति तुष्यति । कुर्वन् लोकविरुद्धानि शिवभक्तमुदे नरः ॥ ४१ ॥
शिवप्रसादात्संसारशोकं तरति दुस्तरम् । निषेव्य शिवभक्ताङ्घ्रिमिष्टवस्तुसमर्पणात् ॥ ४२ ॥
ज्ञानाभ्यासप्रयासेन विना मुक्तो भविष्यति । इति स्वगुरुणादिष्टस्तं प्रणम्य तथेति सः ॥ ४३ ॥
भाग्यवान् शिवभक्तानां पादसेवां चकार ह । भस्माङ्कितालिकं दृष्ट्वा तथा रुद्राक्षधारिणम् ॥
नमस्करोति शतशस्तदभीष्टं प्रयच्छति । प्रददात्यविलम्बेन दुर्लभं तदभीप्सितम् ॥ ४५ ॥
भस्मानुलिप्तसर्वाङ्गो रुद्राक्षसमलंकृतः । नित्यान्नदाता भक्तानां तदुच्छिष्टाशनोऽभवत् ॥ ४६ ॥
पतिव्रता च तद्भार्या भर्तुरिष्टानुसारिणी । अनुकूलास्य कृत्येषु गुरुवाक्येन चोदिता ॥ ४७ ॥
बान्धवास्तस्य तत्कर्म मिलिता नानुमेनिरे । वितेनुः प्रतिषेधं च स तेषां नाशृणोद्वचः ॥ ४८ ॥
उच्छिष्टभोजी दासोऽयं वञ्चितो भस्मधारिभिः । करोत्यनुचितान्येव ह्यसौ नित्यं बहिष्कृतः ॥४९॥
इति स्वबान्धवाक्रुष्टोऽप्यचलन्न स्वधर्मतः । न कश्चिच्छिवभक्तोऽस्ति स तेनानर्चितो हि यः ॥ ५० ॥
इतीशभक्तदासस्य महान् कालोऽत्यवर्तत । सर्वं ब्राह्मणसात्कृत्वा यदनेनार्जितं धनम् ॥ ५१ ॥
भक्तपादजुषस्तस्य प्रसन्नोऽभूदुमापतिः । पञ्चविंशतिवर्षस्य ब्रह्मबन्धोर्विधाय सः ॥ ५२ ॥
वेषं मध्याह्नसमये तद्गृहद्वारमाययौ । भिक्षां देहीत्युवाचोच्चैर्भस्मरेखाङ्कितालिकः ॥ ५३ ॥
ससस्यमन्नमादाय तद्भार्या निरगाद्बहिः । तां विलोक्य द्विजस्तस्थौ तरुणीं धूर्तशेखरः ॥ ५४ ॥
भिक्षां गृहाणेत्युक्तोऽपि प्रतिजग्राह नैव सः । तस्याः स्तनौ मुखं चापि स्तब्धदृष्टिरवैक्षत ॥
तद्दृष्टिशङ्किता साध्वी नाथमेहीत्युवाच सा । तं प्राप्य भैक्षं गृह्णीष्वेत्युवाच स महाधनः ॥ ५६ ॥
तमुवाच महादेवः प्रहसन् छद्मना विटः । आगतो नान्नभिक्षार्थं लभ्यतेऽन्नं गृहे गृहे ॥ ५७ ॥
द्विजस्य वाञ्छितां देहि भिक्षां मे भस्मधारिणः । अथ प्रणम्य तं वैश्यो भिक्षां पप्रच्छ कामिताम् ॥

१. यमशासनं नेत्यर्थः ।

दीयते यदि वक्ष्यामि नो चेद्यास्ये यथागतम् । स विप्रेणैवमुक्तस्तु मा विलम्बोऽस्तु गृह्यताम् ॥
इत्युक्त्वा पादयोस्तस्य स नत्वासीत्कृताञ्जलिः । ययाचे तरुणीभिक्षां निर्विशङ्को द्विजो विटः॥६०॥
अविचार्य स भार्यां च प्रददौ तस्य शंभुधीः । प्रचोदिताथ सा भर्त्रा द्विजं प्राञ्जलिरन्वगात् ॥
बान्धवास्तस्य कुपिता ब्राह्मणं हन्तुमाययुः । विरोधकारिणो बन्धून् खड्गपाणिर्जघान सः ॥ ६२॥
स्वधर्मविद्विषो बन्धूनिहत्य स विलोकयन् । न ब्राह्मणं ददर्शाथ भार्यां पप्रच्छ विस्मितः ॥६३ ॥
तया न वेद्मीत्युदितः सस्मार हृदि शङ्करम् । ददर्श वृषभारूढः सह गौर्या महेश्वरः ॥ ६४ ॥
स्तूयमानः सुरगणैः सवाद्यैश्च गणैर्वृतः । दत्वा स वैश्यदम्पत्योर्मुक्तिं मुनिगणेप्सिताम् ॥ ६५ ॥
तत्खड्गाकृत्तबन्धूनामपि कैवल्यमीश्वरः । पश्यतां सिद्धसङ्घानां स्वधाम प्रत्यपद्यत ॥ ६६ ॥

किं कर्मणा बहुविधेन च दुष्करेण ज्ञानेन किं बहुषु जन्मसु दुर्लभेन ।
भक्त्या प्रसीदति परं भगवान् महेशस्तस्माद्विसृज्य सकलं भवताशु मुक्ताः ॥ ६७ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे जनेङ्गितप्रदापरनामधेयभक्तेङ्गितप्रदचरितं नामैकोनविंशोऽध्यायः ॥

॥ अथ विंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

शिवभक्तान्नपानीयप्रदानस्यान्वहं द्विजाः । न तुल्यं सुकृतं लोके शंभोः प्रीतिकरं भवेत् ॥ १ ॥
भूषणं भूतलस्यास्ति **कनिष्ठघुटिकापुरम्** । ब्राह्मणैः क्षत्रियैर्वैश्यैः स्वधर्मनिरतैः सदा ॥ २ ॥
शूद्रैरपि द्विजातीनां शुश्रूषणपरायणैः । संपूर्णं शिवभक्तैश्च शिवव्रतधृतादरैः ॥ ३ ॥
तत्र कश्चिदभूत्ख्यातो **मारो** नाम पदोद्भवः । शूद्राणां शिवभक्ताङ्घ्रिसेवयेशः प्रसीदति ॥ ४ ॥
एवं गुरूपदेशेन स्थिरबुद्धिः स जायया । सह नित्यान्नदानेन शिवभक्तानपूजयत् ॥ ५ ॥
तस्य न्यायार्जितं द्रव्यमवर्धत समुद्रवत् । सर्वं तद्भक्तपूजायै विनियोजयति स्म सः ॥ ६ ॥
आरभ्योदयमर्कस्य चाप्रभातं दिने दिने । ददाति शिवभक्तानामिष्टमन्नं चतुर्विधम् ॥ ७ ॥
तस्य भक्तिपरीक्षायै मतिं चक्रे महेश्वरः । अपुत्रस्य सभार्यस्य भक्तानामन्नदायिनः ॥ ८ ॥
धनजातमशेषेण तस्य सर्वेश्वराज्ञया । दिने दिने क्षयं प्राप कृष्णपक्षशशाङ्कवत् ॥ ९ ॥
मारः प्रक्षीणवित्तोऽपि क्षेत्रपात्रादिविक्रयात् । आगतानां ददावन्नं यथापूर्वमखिन्नधीः ॥ १० ॥
गृहोपकरणेष्वेवं विनष्टेष्वन्नदानतः । अवशिष्टमभूद्भार्याकण्ठमाङ्गल्यसूत्रकम् ॥ ११ ॥
अथ प्रावृषि कस्मिंश्चिद्दिवसे तमसावृते । निशीथे तापसः कश्चित्क्षुत्तृष्णापरिपीडितः ॥ १२ ॥
अन्विष्यान्विष्य शनकैर्मारस्य गृहमाययौ । आगत्य तद्गृहद्वारं मायातापसरूपभाक् ॥ १३ ॥
मारमाहूय भगवानिदमाह महेश्वरः । क्षुधा तृषा च श्रान्तोऽस्मि तपस्वी वचनाक्षमः ॥ १४ ॥
दूरे त्वामन्नदं श्रुत्वा तवास्मि गृहमागतः । देहि मह्यं क्षुधार्ताय प्राप्ताय सदनं निशि ॥ १५ ॥

अन्नमन्नप्रदश्चासि पिता माता तपस्विनाम् । इति तद्वाक्यमाकर्ण्य निर्गतः सह भार्यया ॥ १६ ॥
प्रणम्य प्राञ्जलिः पाद्यमासनं च प्रदाय सः । विषण्णहृदयो मारो भर्यानननमुदैक्षत ॥ १७ ॥
विनिश्वसन्नुवाचाथ मन्दंमन्दं कुटुम्बिनीम् । एहि साध्वि निशीथेऽसौ संप्राप्तस्तापसो महान् ॥१८॥
क्षुधितोऽन्नं प्रयच्छेति याचते दूयते मनः । नोपायमिह पश्यामि येनास्य क्षुत्प्रशाम्यति ॥ १९ ॥
वृथा जन्म ममेदं स्याद्यदीहोपवसेदयम् । मा जीवत्वधनः कश्चिन्मादृशो दुर्लभो भुवि ॥ २० ॥
यस्य मे गृहमासाद्य सक्षुत्तिष्ठति तापसः । गृहिणी शरणं भर्तुरिच्छतः परमां गतिम् ॥ २१ ॥
भार्यानुकूला न प्राप्ता येन तस्य वनं गतिः । अनुकूला च साध्वी च मम त्वं दयिते ननु ॥२२॥
चिरं त्वदानुकूल्येन भक्तानामन्नदोऽस्म्यहम् । आपदोऽस्यास्त्वमेवात्र मामुद्धर पतिव्रते ॥ २३ ॥
इति भर्तुर्वचः श्रुत्वा नाथं भार्या जगाविदम् । न कांचिदत्र पश्यामि नाथोपायं गृहे तव ॥ २४ ॥
लवणानामेकमुष्टिर्दिवसे त्ववशेषिता । अनेन निवसत्वेष दृष्टोपायास्म्यहं प्रभो ॥ २५ ॥
पूर्वेद्युरुप्तं केदारे बीजजातमदूरतः । अस्माकमस्ति मा दैन्यं भजैतद्विनियुज्यताम् ॥ २६ ॥
आनीयतां तद्भवता सम्पन्नं क्रियते मया । उप्ताः पल्लविता मुद्गाः सन्ति त्वत्सदनाङ्गणे ॥ २७ ॥
न किंचिन्न्यूनमत्रास्ति महादेवप्रसादतः । इति भार्यावचः श्रुत्वा हृष्टः प्रोवाच तापसम् ॥२८॥
मुहूर्तमात्रं शेष्वात्र स्वामिन् झटिति पच्यते । दिष्ट्या निशीथे प्राप्तोऽसि कृतार्थोऽस्मि च दर्शनात् ॥
इति मारोक्तिमाकर्ण्य संविवेश स तापसः । पश्चाद्यदायं बीजानि चाहर्तुं निर्गतो बहिः ॥३०॥
तदानीं दुर्दिनं चाभूत् ध्वान्ताच्छादितदिङ्मुखम् । मेघघर्घरनिर्घोषैरावृते चञ्चलान्विते ॥ ३१ ॥
निशीथे वर्षधाराभिरार्द्राङ्गवसनोऽपि च । विघ्ने जातेऽपि बहुधा धीरो मारो दृढव्रतः ॥ ३२ ॥
माहेश्वरान्नपानीयदानसंतुष्टमानसः । अन्धकारे पदा मन्दं विमृश्य पदवीमयम् ॥ ३३ ॥
यत्नादवाप्य केदारमुप्तबीजानि पङ्क्तयः । परामृश्य प्रयासेन गृहीत्वा पुटिकोदरे ॥ ३४ ॥
संक्षाल्य पङ्कं तोयेन यावदायाति मन्दिरम् । तावदेव च सा साध्वी नवैर्मुद्गलतादलैः ॥ ३५ ॥
अवशिष्टैश्च लवणैः शाकं स्वादु चकार ह । साङ्कुराणि च बीजानि संभर्ज्याश्ववहल्य च ॥ ३६ ॥
पक्वोदना पतिं प्राह निशीथे सा पतिव्रता । संपन्नमन्नं सपदि तापसो बोध्यतामिति ॥ ३७ ॥
मारोऽपि यावत्संहृष्टस्तापसोद्बोधनोद्यतः । उत्तिष्ठ शिवभक्त त्वमित्याहूय पदे पदे ॥ ३८ ॥
एतावान् कालमनघ श्रान्तोऽसि नितरामिव । भक्तं पक्वं च कृपया भोक्तुमागच्छ तापस ॥ ३९ ॥
इति ब्रुवन् गतस्तस्य निकटं न ददर्श तम् । तापसं शंकराकारं ददर्शेन्दुकलाधरम् ॥ ४० ॥
आरूढवृषभं देवं वरदाभयमुद्रितम् । वामाङ्कारूढया गौर्या पारिष्वक्तं महेश्वरम् ॥ ४१ ॥
नत्वा तुष्टो भृशं भीतस्तत्पदं शरणं ययौ । भार्या चास्मै प्रहृष्टात्मा नैवेद्यं समुपाहरत् ॥ ४२ ॥
ववर्षुः पुष्पवर्षाणि देवाश्च मुनयोऽस्तुवन् । अवादयन् गणाः सर्वे वाद्यानि विविधान्यपि ॥४३॥
अथ प्रसन्नो भगवानम्बिकापतिरीश्वरः । दत्वा कैवल्यमनयोः सह ताभ्यां तिरोदधे ॥ ४४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मारभक्तमुक्तिप्राप्तिर्नाम विंशोऽध्यायः ॥

॥ अथैकविंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

शिवभावनया भक्तान् पूजयन्तोऽपि नित्यशः । अपराधं सहन्ते ये भस्मरुद्राक्षधारिणाम् ॥ १ ॥
प्राप्तेऽपि प्राणसन्देहे शिवप्रीतिमभीप्सवः । शिवप्रसादपात्रं ते ह्यप्रतिद्रोहकारिणः ॥ २ ॥
स्वयंकृतापकारेऽपि भक्तैस्तान् पूजयन्ति ये । प्रीणातीशो यथा तेषां न तथा यज्ञकोटिभिः ॥ ३ ॥
अत्रेतिहासं प्रथितमाकर्णयत भूसुराः । यस्य श्रवणमात्रेण भक्तिः शम्भौ दृढा भवेत् ॥ ४ ॥
चेदिदेशे पुरं किंचिदस्ति गोपैरधिष्ठितम् । सत्यार्थो नाम राजाभूत्तत्र लोकेषु विश्रुतः ॥ ५ ॥
स एकः शिवभक्तानां नित्यमिष्टं प्रयच्छति । याचितः शिवभक्तेन स प्राणांश्च प्रयच्छति ॥ ६ ॥
स मण्डलपतिर्दृष्ट्वा दूरे भक्तान्नमस्यति । निरोधः शिवभक्तेषु नास्ति तद्द्वारि कस्यचित् ॥ ७ ॥
तस्यैवं वर्तमानस्य मुक्तिनाथो महीपतिः । प्रान्तदेश्योऽभवच्छत्रुस्तेनास्य तु रणोऽभवत् ॥ ८ ॥
तं विनिर्जित्य समरे सत्यार्थो रिपुमोजसा । बलं धनं पुरं चास्य सर्वं जग्राह पार्थिवः ॥ ९ ॥
मुक्तिनाथः स तेनाशु निरस्तो दुर्बलो रणे । दुद्राव त्यक्तसर्वस्वः क्वचिल्लीनो वनान्तरे ॥ १० ॥
समयं गमयामास शत्रो रन्ध्रं विलोकयन् । चिरायोपायमासाद्य जेतव्यश्छद्मना रिपुः ॥ ११ ॥
मया जय्योऽन्यथा नैव निश्चित्यैवमिति स्वयम् । तापसाकारयवनीं प्रविष्टो धृतपुस्तकः ॥ १२ ॥
सत्यार्थसदनद्वारं ययौ भस्मानुलेपनः । तदा शेते स्म नृपतिराखेटायासनिद्रया ॥ १३ ॥
छन्नस्तापसवेषेण रिपुश्चान्तर्न्यवीक्षत । निद्राणे नृपतौ कार्यं किं तवान्तर्बहिर्भव ॥ १४ ॥
इति द्वा स्थैर्निरुद्धोऽपि तानादृत्य तापसः । रहस्यागमतत्त्वार्थमुपदेष्टुं महीपतेः ॥ १५ ॥
गच्छामीति हठात्कृत्वा शय्यागृहमरेर्ययौ । आगतं पुस्तकधरं समुन्नतजटाभरम् ॥ १६ ॥
भस्मरुद्राक्षमालादिशैवलाञ्छनलाञ्छितम् । समीक्ष्य तापसं राज्ञी भर्तारं समबोधयत् ॥ १७ ॥
स च प्रबुद्धः सत्यार्थश्छद्मं वेषेण वैरिणम् । अजानन् प्रणमन् पादे महातापसशङ्कया ॥ १८ ॥
उवाच प्राञ्जलिश्चैनमुपवेश्योन्नतासने । धन्योऽस्म्यनुगृहीतोऽस्मि त्वत्पादाम्बुजदर्शनात् ॥ १९॥
पवित्रितमिदं वेश्म गुरूणां पादरेणुभिः । भवतां सेवया चित्तमिदमद्य प्रसीदति ॥ २० ॥
किङ्करोऽस्मि विधेयं किं नियुङ्क्ष्वानुगृहाण माम् । धनादिष्वेव मे स्वामिन् प्रभुता वो न केवलम्
प्राणेष्वपि मदीयेषु त्वद्विधाः सत्यमीशते । माहेश्वरैर्वाञ्छितार्थान् प्रयच्छामीति मे मतम् ॥ २२ ॥
इति ब्रुवाणे नृपतौ विनयाद्विहिताञ्जलौ । जगाद तापसश्छद्मः स्मयमानमुखोऽथ तम् ॥ २३ ॥
शृणु राजेन्द्र महद्वाक्यं भक्तानां प्रवरो ह्यसि । शिवतत्त्वरहस्यार्थान् वयं बोधयितुं तव ॥ २४ ॥
प्राप्ताः स्मस्त्वां त्वमेवैकः शृणु सत्यार्थ पार्थिव । गुरुं प्रकाशयेद्धीमान् मन्त्रं यत्नेन गोपयेत् ॥
अप्रकाशप्रकाशाभ्यां शिष्योऽयं नरकं व्रजेत् । इदं च शास्त्रं कैलासे गौर्या ईशेन वर्णितम् ॥
तत्त्वं रहसि वक्तव्यं तव भार्या बहिर्भवेत् । इत्याकर्ण्य नृपः पत्नीं बहिर्गच्छेत्यभाषत ॥ २७ ॥

तस्यां बहिर्गतायां च कवाटेनावृणोन्मुखम् । भस्म दत्त्वाग्रतस्तस्मै तं नमेत्याह तापसः ॥ २८ ॥
तथेत्युत्थाय तं पादे प्रणमन्तं महीपतिम् । पुस्तकान्तर्निगूढेन क्षुद्रखड्गेन मर्मणि ॥ २९ ॥
जघान पिठरे राज्ञो निश्शङ्कं निर्दयं रिपुः । हा हतोऽस्मीति चुक्रोश शंभो शिव शिवेति च ॥
खड्गप्रहाराभिहतो मुमोह धरणीपतिः । तस्याक्रोशवचः श्रुत्वा क्रुद्धो द्वाःस्थोऽभ्यगाद्द्रुतम् ॥
भित्त्वा कवाटं वेगेन गृहीत्वा तापसं करे । हन्तुं तेनैव खड्गेन जटासु च परामृशत् ॥ ३२ ॥
क्षणादुन्मील्य सत्यार्थी द्वाःस्थं दक्षाह्वय नृपः । शापितोऽसि मम प्राणैर्मा वधीरित्यवारयत् ॥ ३३ ॥
सङ्घीभूताश्च बहवस्तत्र क्रुद्धाश्च तद्भटाः । शपथाद्भर्तुरभवन्निरुद्धा रुषिता अपि ॥ ३४ ॥
राजा सोढ्वा प्रहारं तं मा भैषीरित्यभाषत । वेषच्छन्नं वेषमानं धृत्वा केचिन्नृपाज्ञया ॥ ३५ ॥
विषयान्तं नयन्ति स्म नाभ्यहिंसन् कृतागसम् । उपेक्षसे कथं शत्रुमिति पृष्टः सुहृज्जनैः ॥ ३६ ॥
कृतापराधोऽपि मम शत्रुश्चेच्छैवलाञ्छितः । पूजनीयो मया नित्यं भस्मरुद्राक्षभूषितः ॥ ३७ ॥
स शंभुरेव मे स्वामी नैष वैरीत्यभाषत । क्षेमं तपस्विनस्तस्य श्रुत्वा दूतमुखान्नृपः ॥ ३८ ॥
बहु मेने निजभटान्निजाज्ञापरिपालकान् । दध्यौ नटेशं मनसा सत्यार्थः पार्थिवोत्तमः ॥ ३९ ॥
सन्निधाय महेशोऽपि ददौ मुक्तिं महीपतेः ।

भक्तैर्हतोऽपि परुषोक्तिभिरर्दितोऽपि संप्रापितोऽप्यसुषु संशयमिन्दुमौलेः ।
यः प्रीतये हितममीषु तनोति तस्मै प्रीतः प्रयच्छति हरो न पुनर्भवार्तिम् ॥ ४० ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कपटभक्तारिकृतसत्यार्थमुक्तिप्राप्तिर्नामैकविंशोऽध्यायः ॥

॥ अथ द्वाविंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

सदाशिवपदाम्भोजे भक्तिः परमपावनी । पूर्वजन्मार्जितैः पुण्यैर्धन्यानामिह लभ्यते ॥ १ ॥
यद्यैष देही तरति दुस्तरं भवसागरम् । उच्छिन्नभवसंक्लेशव्याघ्रपञ्जरबन्धनः ॥ २ ॥
शिवभक्तिर्यथा मुक्तेर्मुख्यं भवति साधनम् । शिवभक्ताङ्घ्रिभक्तिश्च तथा मोक्षैकसाधनम् ॥ ३ ॥
सपर्यां भक्तरूपेण साक्षाद्गृह्णाति शंकरः । परोक्ष एव गृह्णाति लिङ्गादिषु समर्चितः ॥ ४ ॥
प्रत्यक्षेश्वररूपाणां भक्तानां पादसेवनम् । एतदेव प्रशंसन्ति न परोक्षेशसेवनम् ॥ ५ ॥
येषां संदर्शनात्सङ्गात्संलापात् पादसेवनात् । न शोचतीह संसारे सद्यः शोको विलीयते ॥ ६ ॥
विना यज्ञेन तपसा विना वेदान्तचिन्तया । मुक्ताः सहस्रं लोकेऽस्मिन् भक्तपादाब्जसेवया ॥ ७ ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् । वीरमिन्दस्य भक्तस्य भक्तिर्यत्रोपवर्ण्यते ॥ ८ ॥
अस्ति केरळभूभागे पुरं शोणाचलाह्वयम् । तत्रासीद्वीरमिन्द्राख्यश्चतुर्थान्वयजो महान् ॥ ९ ॥
आसीदाबाल्यमेतस्य भक्तिर्भक्तेषु भूयसी । न तथा भक्तिरभवन्महती परमेश्वरे ॥ १० ॥

ऋषय ऊचुः ॥

कथमर्पितवान्नेत्रं निषादो निन्द्यजन्मभाक् । कथं शम्भोः प्रसादेन विमुक्तभवबन्धनः ॥ ७ ॥
अवाप सिद्धिं परमां दुर्लभां योगिनामपि । चरितं तस्य धन्यस्य वद नः कुम्भसम्भव ॥ ८ ॥

श्रीअगस्त्यः ॥

काञ्चीपुरस्य महतः स्थानस्येशानकोणतः । सुवर्णमुखरीतीरे पर्वतोऽस्ति महत्तरः ॥ ९ ॥
नाम्ना वेणुगिरिः श्रीमान् कुञ्जराकारभूषितः । शरण्यो वन्यसत्त्वानां नानाधातुविचित्रितः ॥ १० ॥
कुन्दमन्दारहिन्तालतालसालचलच्छदाः । सप्तपर्णाम्रशम्याकशाल्मल्यशनशोणकाः ॥ ११ ॥
नागकेसरपुन्नागनालिकेरबिभीतकाः । वरणोदुम्बरारिष्टपारिभद्रादयो द्रुमाः ॥ १२ ॥
वेणुभिः सह वर्धन्ते वियत्पथनिरोधिनः । निकुञ्जनिलया यत्र वर्षातपनिरोधिनः ॥ १३ ॥
यत्तटेषु विशालेषु नानागुञ्जलतागृहैः । वर्धमानमहावेणुपर्वनिर्मुक्तमौक्तिकैः ॥ १४ ॥
हर्यक्षनखनिर्भिन्नहस्तिकुम्भच्युतैश्च तैः । रक्तगुञ्जान्तरासंगपरभागमनोहरैः ॥ १५ ॥
निशातशललीसूचीकृतरन्ध्रैः समुज्ज्वलैः । अन्वहं निर्मितैर्हारैः प्रत्यग्रं पतिभिः स्वकैः ॥ १६ ॥
भान्ति मत्ता निषादिन्यः समन्तात्समलंकृताः । छिन्धि भिन्धि न मुञ्चानुद्रव प्रहर मारय ॥ १७ ॥
इति यत्राभितः शब्दाः श्रूयन्ते शबरेरिताः । कलभा यत्र बध्यन्ते लताभिः शबरार्भकैः ॥ १८ ॥
भिल्लमल्लशुनो यत्र कर्षतो वीक्ष्य सूकरान् । तरक्षवश्च शार्दूलाः पलायन्ते वने वने ॥ १९ ॥
हरिकेसरदामान्तर्बद्धव्याघ्रनखाङ्कुराः । स्तनन्धया निषादानां यत्र क्रीडन्ति दंष्ट्रिभिः ॥ २० ॥
कापोतशौकमायूरमार्गकौक्कुटमांसभुक् । दुर्गतिं नैव जानाति यत्रत्या व्याधवाहिनी ॥ २१ ॥
तत्रास्ति गोधापुरमित्यनेकशबरास्पदम् । तत्पर्युषितमांसौघविस्रगन्धिदिगन्तरम् ॥ २२ ॥
नानापक्षणसाहस्रशतयूथोपसेवितम् । सिंहव्याघ्रवराहेभत्वगावृतमहातपम् ॥ २३ ॥
व्याधानामधिपस्तत्र निषादकुलवल्लभः । कुलाचलपुलिन्दौघदीयमानकरो महान् ॥ २४ ॥
महाधनश्च शूरश्च भूपालानां च सम्मतां । स दत्तः नाम शबरीं समानकुलसंपदम् ॥ २५ ॥
उद्वाह्य गृहवानासीद्वस्तिन्या गजराडिव । रूपयौवनसौजन्यशालिन्या च तया सह ॥ २६ ॥
रममाणो मुदं प्राप योगीव ब्रह्मविद्यया । तस्यैवं वर्तमानस्य नापत्यमभवद्द्विजाः ॥ २७ ॥
दत्तानपत्यभावेन खिन्ना शोचयति स्म तम् । अनुनीतापि बहुशो रत्नवस्त्रविभूषणैः ॥ २८ ॥
भर्त्रा प्रणयिना नित्यं बहुमेने न किंचन । पपौ न मधु मांसानि बुभुजे न च चन्दनम् ॥ २९ ॥
दधौ मृगमदं वापि न सस्नौ कुङ्कुमाम्भसि । नाळकोद्वर्तनं चक्रे न दुकूलं बभार सा ॥ ३० ॥
तामवेक्ष्य निषादानामनुशोचन्नधीश्वरः । नामन्यत सुखं गेहे रहिते पुत्रसंपदा ॥ ३१ ॥
धनाच्च महितां मेने महतीं पुत्रसंपदम् । एवं याते बहुतिथे काले स व्याधनायकः ॥ ३२ ॥
कदाचित्स्वजनान् सर्वानानीय प्राह संसदि । अनपत्योऽस्मि खिन्नोऽस्मि सदारो निन्दितः कुले ॥

न भूतपूर्वः कोऽप्यस्ति मादृशो भाग्यवर्जितः । यत्र कुत्रापि गच्छामि नाधिपत्येन मे फलम् ॥
यदि कश्चिदुपायोऽस्ति पुत्रसंपत्प्रदो मम । प्राणानपि परित्यज्य तस्य कर्तास्म्यसंशयम् ॥ ३५ ॥
व्याधास्तस्य वचः श्रुत्वा पप्रच्छुस्ते कुलोत्तमाम् । पक्कणस्य बहिर्वृद्धां जटिलां पर्णवेश्मगाम् ॥
प्रियङ्गुपिष्टमाण्डानां सहस्रं मधुसर्पिषाम् । प्राभृतप्रस्थसाहस्रं दत्वा प्राञ्जलयोऽन्तिके ॥ ३७ ॥
नागोऽपि मौक्तिकप्रस्थं प्रणामान्ते ददौ पुनः । माणिक्यवेत्रमतुलं भक्त्या पट्टाम्बरं त्वचम् ॥ ३८
प्रतिगृह्य च तत्सर्वं शबरी जरती क्षणम् । ध्यात्वा शक्तिधरं देवं सह वल्लथा मनोज्ञया ॥ ३९ ॥
चालयन्ती शिरः किञ्चिदिदमाह वनेचरान् । सह भर्त्रा प्रसन्नेव वल्लथस्मत्कुलदैवतम् ॥ ४० ॥
मौक्तिकप्रस्थशतकं यद्यनेन प्रदीयते । नागाधिको ध्रुवं पुत्रो भविता प्रतिभूरहम् ॥ ४१ ॥
इति तस्यां वदन्त्यां तु शकुनीनामभूद्ध्वनिः । प्रत्ययं प्रापितो व्याधः प्रत्यज्ञासीत्तथैव सः ॥ ४२ ॥
जाते पुत्रे द्वादशेऽह्नि मौक्तिकप्रस्थकोटिभिः । अभिषेचयिता वल्लीमस्मि मातः प्रसीद मे ॥ ४३ ॥
वृद्धा तद्वचनं श्रुत्वा नागमाह श्रुतौ मिथः । तथा विधेहि मातर्मे यथा वल्ली प्रसीदति ॥ ४४ ॥
तव दत्ता व्रतं मत्तो गृहीत्वा वत्सरं यदि । तिष्ठेन्मनोरथः पूर्णो भविता वल्लथनुग्रहात् ॥ ४५ ॥
अस्त्वित्युक्त्वाथ नागोऽपि तद्वाचातोषयद्वधूम् । सा प्रीता व्याधवचनाद्वृद्धां प्रातर्ननाम ताम् ॥
उपादिशद्व्रतं वृद्धा स्पृशन्ती भस्मनालिके । पाठयामास पद्यं च वल्लीप्रीतिकरं वरम् ॥ ४७ ॥

नमो नमः षण्मुखवल्लभायै नमो नमो नम्रजनार्तिहन्त्र्यै ।
नमो नमः सर्वसमृद्धिदायै नमो नमस्ते दिश वल्लि पुत्रम् ॥ ४८ ॥

एतत्पद्यं जपन्ती सा मधुमांसविवर्जनात् । दधार व्रतमच्छिद्रमसिधाराव्रतं यथा ॥ ४९ ॥
मासत्रयेऽप्यतिक्रान्ते नाभवल्लक्ष्म किंचन । पुनः सा पद्यमदिशत् षण्मुखस्तुतिसुन्दरम् ॥ ५० ॥

नमो नमः शैलसुतात्मजाय नमो नमो बर्हिणवाहनाय ।
नमो नमो वल्लिमनोहराय नमो नमस्ते गुह देहि पुत्रम् ॥ ५१ ॥

इति पद्यद्वयं वृद्धा पाठयित्वा च तां नताम् । बभूव परमप्रीता कृतार्थासीत्यभाषत ॥ ५२ ॥
अतीते सप्तरात्रे तु दत्ता निद्रावशं गता । स्वप्ने ददर्श स्वोत्सङ्गे स्थापितं पूर्णमण्डलम् ॥ ५३ ॥
निषादकन्यया व्योम्नः शारदं रजनीकरम् । अन्तर्गृहे प्रदीपं च प्रबुद्धास्यै व्यजिज्ञपत् ॥ ५४ ॥
मान्यत्र कथयेत्युक्त्वा सा प्रहृष्टतराभवत् । अथ मासेऽप्यतिक्रान्ते प्रास्फुरद्गर्भलक्षणम् ॥ ५५ ॥
व्याधाश्च मुदिता नेमुर्व्रतान्ते जरतीमपि । प्रागेव जन्मनः सूनोर्यथोक्तं शबराधिपः ॥ ५३ ॥
मौक्तिकप्रस्थकोटीं तां वल्लीदेवीमुदे ददौ । शुभे मुहूर्ते व्याधेन्द्रः सर्वाभरणभूषिताम् ॥ ५७ ॥
आसन्नप्रसवां दत्तामवलोक्य मुदं दधौ । बाहुभ्यामिव तीर्णाब्धिः पारं गत इव स्वयम् ॥ ५८ ॥
इयेष तनयं जातं कर्तुं शबरनायकम् । ततः शुभान्विते लग्ने शुभग्रहनिरीक्षिते ॥ ५९ ॥
दत्तासूतात्मजं प्राची हरिचन्द्रमसं यथा । नागः श्रुत्वात्मजं जातं बभूव मुदितान्तरः ॥ ६० ॥

नष्टदृष्टिः पुनर्दृष्टिलाभेन तनुमानिव । मधूनि दापयामास पक्वणेषु च सर्वतः ॥ ६१ ॥
निषादजरतीं साक्षादेवीं वल्लीममन्यत । काहलीशृङ्गहिक्कानां शब्दस्तत्पुत्रजन्मनि ॥ ६२ ॥
व्यजृम्भत वियद्व्यापी दिशो मुखरयन्निव । ववर्षुः पुष्पवर्षाणि खेचराः शबरालये ॥ ६३ ॥
यथाधिकारं व्याधेन्द्रा रत्नप्राभृतपाणयः । उपासतान्तिके नागं जयमङ्गलवादिनः ॥ ६४ ॥
जगुः कलं च गन्धर्वा ननृतुर्नाकयोषितः । उदभूदतनुर्वाणी सर्वेषां हृदयङ्गमा ॥ ६५ ॥
शिवे भक्तिपरीक्षार्थं प्रवृत्ते नयनार्पणात् । अच्युतादधिकां कीर्तिमवाप्य शबरान्वयम् ॥ ६६ ॥
अलङ्कर्तुमयं जातो दत्तायास्तनयो महान् । इति तां च समाकर्ण्य सिद्धाः श्लाघामतन्वत ॥ ६७
रोदनध्वनिमाकर्ण्य शिशोर्दत्ता कलाक्षरम् । अविन्दत परानन्दं योगसिद्धेव योगिनी ॥ ६८ ॥
क्रमेण ववृधे बालो मात्रा समुपलालितः । शुक्लपक्षमनुप्राप्य कलानिधिरिवोदितः ॥ ६९ ॥
शबरीशबराणां च तस्मिन्नयनपङ्क्तयः । तृषार्तानामिवोत्पेतुस्तटाकेऽमृतपूरिते ॥ ७० ॥
देहकाठिन्यसदृशं नाम चक्रे पिता शिशोः । घनसारतया धीरः प्रथितः पक्वणेष्वभूत् ॥ ७१ ॥
जानुभ्यामपि बाहुभ्यां चङ्क्रमन्तं कुमारकम् । पश्यतोर्व्योधदम्पत्योः प्रीतिं जानाति शङ्करः ॥
जातदन्तो यदा धीरो व्यक्ताव्यक्ताक्षरं तदा । छिन्धि दारय भिन्धीति नागः पाठयति स्म तम् ॥
धूलिकेल्यां निषादानां शिशूनाक्षिप्य खेलति । धीरं विलोकयन्नागो भोजनस्य न चास्मरत् ॥ ७४
व्याघ्रभल्लूकभूदारहर्यक्षगजपोतकैः । क्रीडन्तं बालकं दृष्ट्वा प्रहरेत्यब्रवीत्पिता ॥ ७५ ॥
श्वानौ बभूवतुस्तस्य किशोरकसमौ सदा । पार्श्वयोर्भोजने निद्रासमयेऽपि समीयतुः ॥ ७६ ॥
व्याधवृद्धानुदिवसं भस्मरक्षां वितन्वती । वल्ली षण्मुखकारुण्याच्चिरं जीवेत्युवाच ह ॥ ७७ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे धीरनिषादतनयोत्पत्तिर्नाम षड्विंशोऽध्यायः ॥

॥ अथ सप्तविंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

द्वादशे वत्सरे तस्य नूतनायुधसङ्ग्रहम् । कारयिष्यन् मुदा नागो व्याधान् सर्वानमेलयत् ॥ १ ॥
हिमालये महामेरौ निषदे गन्धमादने । विन्ध्ये महेन्द्रे मलये त्रिकूटे मल्लिकार्जुने ॥ २ ॥
गिरावन्यत्र ये व्याधास्ते च सर्वे समागताः । नानोपायनहस्तांस्तानागतानखिलानपि ॥ ३ ॥
संपूज्य मधुमांसादिजाल्याहारप्रदानतः । द्रव्यजातं च सङ्गृह्य निषादैरुपदीकृतम् ॥ ४ ॥
शुभे मुहूर्ते तनयं व्याघ्रचर्मणि नूतने । निवेश्य प्राङ्मुखं हस्ते नागः स्वां छुरिकामदात् ॥ ५ ॥
उल्लुध्वनिमातेनुः शबर्यश्च समन्ततः । अथ बद्धाङ्गुलित्रस्य सूनोर्वामकरे धनुः ॥ ६ ॥
दत्वा नागः शरं कंचिदिदं सदसि सोऽब्रवीत् । पुरः पुत्र शमीवृक्षे निबद्धः किटिपोतकः ॥ ७ ॥
शरेणाकर्णकृष्टेन शरव्यं तन्निपातय । इति नागेन संदिष्टो धीरः संधाय कार्मुके ॥ ८ ॥

सायकं तं प्रति तरुं विससर्ज कृतान्तवत् । स भूदाराभिकं लक्ष्यं विभिन्नं वीक्ष्य सङ्गशः ॥ ९ ॥
शबराः श्लाघयामासुः साधु साध्विति चाब्रुवन् । पुलिन्दकुलवृद्धानां कारयित्वा नतिं पदे ॥ १०
नागः पुत्रं समाश्लिष्य परां निर्वृतिमाप ह । अथ सर्वे समामन्त्र्य पुलिन्दास्तेन पूजिताः ॥ ११ ॥
युवराजस्य धीरस्य चाज्ञया स्वं पदं ययुः । बद्धकक्षस्ततो धीरः शबराचार्यशिक्षया ॥ १२ ॥
सर्वायुधेषु परमां शिक्षामध्यगमच्चिरम् । शर्कराभृगुकान्तारधावने हरिणद्विषाम् ॥ १३ ॥
निरोधे निर्भयामर्दे न तस्यासीत्समोऽपरः । आनायादिप्रयोगेषु युद्धे केसरिभिः सह ॥ १४ ॥
सत्त्वप्रहारमोक्षे च सदृशस्तस्य नापरः । आखेटकौतुकाक्रान्तचेतसोऽस्यानुवासरम् ॥ १५ ॥
न शेकुरनुयानेऽपि नागसूनोर्वनेचराः । सिंहव्याघ्रवराहेभशरभारण्यचारिणाम् ॥ १६ ॥
न तस्याविदितं किंचिद्वनमस्ति महीधरे । मार्गानुसारिणौ तस्य सुहृदौ द्वौ बभूवतुः ॥ १७ ॥
गाढाख्यश्चेति नाणुश्च व्याधयूथाधिपात्मजौ । सह ताभ्यां विनिर्गत्य प्रातरादिवसात्ययम् ॥ १८ ॥
चरित्वा सुमहारण्ये रात्रावायाति पक्कणम् । एवं विचरतस्तस्य पञ्च संवत्सरा ययुः ॥ १९ ॥
वर्षवातातपास्तस्य बभूवुर्नैव दुःखदाः । ततो वनेचराः प्राप्य नागं पक्कणवासिनः ॥ २० ॥
ऊचुर्दक्षिणतो बाधां महतीं दुष्टसत्त्वजाम् । निशम्य वचनं तेषां नागः प्रोवाच तानिदम् ॥ २१
न प्रागिव बलं मेऽस्ति मृगयायामहोऽधुना । वृद्धः करणमान्द्येन खिन्नोऽस्मि भवनेचरः ॥ २२ ॥
भवन्त एव दुष्टानि सत्त्वानि घ्नन्तु सायुधाः । तरुणा बलवन्तश्च बलिभिश्चान्विताः श्वभिः ॥ २३
श्रुत्वा तदुक्तिं प्रत्यूचुः पुलिन्दा मिलिताः शतम् । पुत्रं त्वदधिकं धीरं कुरु सेनाग्रयायिनम् ॥
नागोऽपि प्रीतये तेषां प्रेषयामास तैः सुतम् । प्रतस्थे व्याधसेनाभिर्दुष्टसत्त्वजिघांसया ॥ २५ ॥
धीरः सुहृद्भ्यां सहितो नीलमेघसमद्युतिः । धनुर्धरः कवचितो महद्वनमगाहत ॥ २६ ॥
विस्तार्य वागुरां व्याधास्तस्थुश्च परितो वनम् । छिन्धि भिन्धि गृहाणेति वदन्तः सत्त्वभीषणाः ॥
ततः श्वनादमुखरे वने सर्वत्र सङ्गशः । बभ्रमुर्मृगयूथानि गगने घनयूथवत् ॥ २८ ॥
जघ्नुर्व्याधाश्च लगुडैर्मृगानन्तिकचारिणः । धीरनाराचदलिता नष्टसंज्ञा महाबलाः ॥ २९ ॥
सिंहव्याघ्रवराहाश्च निपेतुस्त्यक्तजीविताः । नागसूनोः शराविद्धनानासत्त्वसमाकुलम् ॥ ३० ॥
आसीदरण्यं क्षुभितं मथितार्णववारिवत् । धीरो निकुञ्जाद्धावन्तं दक्षिणाशामुखं भयात् ॥ ३१ ॥
कृष्णसारमनुद्रुत्य प्रतस्थे धृतकर्मुकः । सखायौ गाढनाणूभौ सहानेनाभ्यधावताम् ॥ ३२ ॥
दृश्यादृश्यवपुर्धीरं कृष्णसारोऽपि दूरतः । विचकर्ष परिश्रान्तं मारीचो राघवं यथा ॥ ३३ ॥
धावतः कृष्णसारस्य मध्ये कश्चन सूकरः । विनिर्ययौ नागसूनुर्निजघान शरेण तम् ॥ ३४ ॥
उज्जहार शरं यावद्वपुषो वन्यदंष्ट्रिणः । स कृष्णसारः सहसा वने क्वापि तिरोदधे ॥ ३५ ॥
अथातपपरिश्रान्तः क्षुधितस्तृषितो वने । व्याधराजसुतः प्राह सुहृदौ च धृतश्रमौ ॥ ३६ ॥
गाढः प्राह च तं भूयः श्रूयतां मद्वचः सखे । क्रोशद्वयादितः शैलो दृश्यते कश्चिदुन्नतः ॥ ३७ ॥

सिद्धचारणगन्धर्वसेवितो देवभूषितः । फलभारानतैर्वृक्षैः सान्द्रसानुर्विलोक्यताम् ॥ ३८ ॥
सुवर्णमुखरी नाम तस्य चोत्तरतो नदी । कमलोत्पलकल्हारवनामोदाधिवासिता ॥ ३९ ॥
घृतपिण्डोपमा यत्र चरन्ति शफराः सखे । तत्र गत्वा महानद्यां स्नात्वा पीत्वा झषोत्तमम् ॥ ४० ॥
चर्वतस्ते पुनर्नाद्य निवृत्तौ धीर्भविष्यति । मया परिचिता पूर्वं सा नदी मृगयान्तरे ॥ ४१ ॥
उत्तिष्ठेत्युदितो धीरो नाणुं तं प्राह हे सखे । त्वया वनवराहोऽयं मया विद्धः प्रतीक्ष्यताम् ॥ ४२ ॥
अत्रैव जलमानीय तव दास्यावहे पुनः । तथेत्युक्तोऽथ सुहृदा प्रतस्थे सरितं प्रति ॥ ४३ ॥
नागसूनुः सगाढोऽयं निमित्तमभिनन्दयन् । मुहूर्तेनैव तं गत्वा पर्वतं तस्य चान्तिके ॥ ४४ ॥
ददर्श तटिनीं पुण्यां सुवर्णमुखरीं पराम् । स्वादुशीतलपानीयामतिस्वच्छमहाह्रदाम् ॥ ४५ ॥
तरङ्गमारुताधूतपान्थजातपरिश्रमाम् । नानातीरतरुव्रातनीडसाहस्रवर्तिनाम् ॥ ४६ ॥
विहङ्गमानां ध्वनिभिर्मुखरीकृतदिङ्मुखाम् । मज्जन्महामुनिस्तोमशीर्षकोटिविभूषिताम् ॥ ४७ ॥
कालहस्तीशनिर्माल्यपुष्पभासुरवेणिकाम् । मत्स्यकच्छपसंचारलीलोच्चलितपङ्कजाम् ॥ ४८ ॥
मकरन्दरसास्वादमत्तषट्पदसंकुलाम् । मरालचञ्चुसन्दष्टबिसलालसहंसिकाम् ॥ ४९ ॥
मज्जन्निर्झरवारस्त्रीस्तनकस्तूरिकाविलाम् । पानावतीर्णवन्येभदानचन्द्रकमण्डिताम् ॥ ५० ॥
हर्यक्षहतमत्तेभकुम्भमौक्तिकशर्कराम् । बालदूर्वादलग्राससरोमन्थमृगान्विताम् ॥ ५१ ॥
गन्धर्वगीतमाधुर्यद्रवदश्माम्बुवर्धिताम् । उपान्तकुञ्जसंशुष्यन्मुनिवार्धकवल्कलाम् ॥ ५२ ॥
इङ्गुदीफलसंक्षोदस्निग्धश्लक्ष्णशिलातलाम् । तटकीचकसन्दष्टवालाग्रचमरीमृगाम् ॥ ५३ ॥
खञ्जरीटविहारक्ष्माघातशंकुवनेचराम् । विकसत्पङ्कजमुखीं दीर्घशैवालकुन्तलाम् ॥ ५४ ॥
स्फुरदावर्तनाभीकां नीलोत्पलविलोचनाम् । पुलिनोन्नतिसंपूर्णजघनां फेनसांशुकाम् ॥ ५५ ॥
तरङ्गभुजमध्यस्थचक्रवाकपयोधराम् । जलस्थलस्थजन्तूद्यच्चारुकूजितहंसकाम् ॥ ५६ ॥
महिषीं सिन्धुराजस्य मण्डितामिव भूषणैः । सुवर्णमुखरीं दिव्यां सरितं शबरात्मजः ॥ ५७ ॥
संवीक्ष्य मुमुदे धीरः सख्या सह विगाह्य ताम् । अपहाय परिश्रान्तिमभवन्मोदनिर्भरः ॥ ५८ ॥

सद्यः सुवर्णमुखरीसलिलावगाहाद्वधाधस्य दग्धमखिलं दुरितं बभूव ।
चेतश्च निर्मलमहो बहुपुण्यभाग्यकल्पद्रुमोऽप्यथ फलोन्मुखतामवाप ॥ ॥ ५९ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे धीरस्य सुवर्णमुखरीस्नानकथनं नाम सप्तविंशोऽध्यायः ॥

॥ अथाष्टाविंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

तीरद्रुमफलं स्वादु भुक्त्वाथ सुहृदर्पितम् । बभूव तृप्तो मुदितो धीरः शान्तपरिश्रमः ॥ १ ॥

पश्यन्नभ्रंलिहान् वृक्षान् सुवर्णमुखरीतटे । बिभ्राणः सशरं चापं विचचार वनेचरः ॥ २ ॥
अथ श्रीकालहस्तीशसेवासंप्रीतचेतसाम् । आसीदप्सरसां तस्मिन् संभ्रमः शैलमूर्धनि ॥ ३ ॥
घनवीणारवोन्मिश्रो वेणुस्वरविचित्रितः । मन्द्रमर्दलनिर्ह्रादकृतमायूरकौतुकः ॥ ४ ॥
तानतारस्वरालापलीलाकोरकितद्रुमः । गण्डशैलशिलासारद्रवीकरणपण्डितः ॥ ५ ॥
कालहस्तीशभूषाहिराजराजानुमोदितः । संगीताडम्बरस्तासां व्यानशे दिक्षु सर्वशः ॥ ६ ॥
तेनाकृष्टमना धीरः सुहृदं प्राह सादरम् । परिमृष्टा मम श्रान्तिरपि शान्ता क्षुधा तृषा ॥ ७ ॥
सुवर्णमुखरीस्नानात्परिपूतोऽस्मि साम्प्रतम् । न्यस्तभारमिवाभाति प्रसन्न मम मानसम् ॥ ८ ॥
आपूरयति कोऽयं मे सुहृः शब्दोऽमृतैः श्रुतिम् । अवतीर्ण इव स्वर्गः शैलाग्रे किं न पश्यसि ॥
अथ तं प्राह गाढस्तु पितुस्ते मृगयान्तरे । मया सहागतेन प्रागिदमाकर्णितं तथा ॥ १० ॥
शिखरे शैलराजस्य दिव्या काचन देवता । शिखिन्यस्याः शिखी कश्चित्तनुधार्यस्ति पूजकः ॥ ११ ॥
सेचयित्वा जलैरेनां पत्राणि शिरसि क्षिपन् । दिशन्नास्येऽन्नकबलमस्या नित्यमतन्द्रितः ॥ १२ ॥
गच्छतीति श्रुतं ह्येषा किंवदन्ती महीयसी । इयमेकपदी तत्र सेवार्थं गच्छतां सखे ॥ १३ ॥
मधुमाक्षिकशब्दानुविधायी श्रूयते ध्वनिः । दिदृक्षा यदि तत्रापि गच्छावः प्रिय साम्प्रतम् ॥ १४ ॥
तथेति धीरस्त्वरितं प्रस्थितः सुहृदा सह । आरुरोह गिरिश्रेष्ठं सोपानैः क्षुल्लकाश्मभिः ॥ १५ ॥
समाधिमिव योगीन्द्रः शनकैस्तं यमादिभिः । पार्श्वे पारिणमद्वेणुपर्वान्तोद्वान्तमौक्तिकैः ॥ १६ ॥
समन्ततः शर्करिलामतिक्रम्य स वर्तनीम् । चरन्ति यत्र जीमूताः कलभा इव मेचकाः ॥ १७ ॥
अध्यारुरोह तां धीरः सुहृत्तदधिरूढकाम् । ददर्श शैलशृङ्गाग्रे नमेरुवनमद्भुतम् ॥ १८ ॥
कृतमालवनोन्मिश्रमपि श्रीफलसंभृतम् । बिल्ववृक्षं तमुद्दिश्य गच्छन् व्याधोत्तमात्मजः ॥ १९ ॥
ददर्श सत्त्वान्यभितः शान्तवैराणि सङ्घशः । गच्छतस्तस्य पदवीं सीमाबधिमगाहत ॥ २० ॥
मुनेः शिवप्रसदेन संसाराध्वाऽवधिं यथा । पदे पदेऽस्य पापानि कोटिजन्मार्जितान्यपि ॥ २१ ॥
प्रनष्टानि यतस्तस्मात्प्रससाद तरां मनः । ततो ददर्श फूत्कुर्वदुत्फणाहिफणाकृति ॥ २२ ॥
लिङ्गं माहेश्वरं दिव्यं प्रत्यङ्मुखमवस्थितम् । कृतोपहारं भक्तेन कृतमालस्रजाञ्चितम् ॥ २३ ॥
कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलम् । सकृद्दर्शनमात्रेण सर्वपापहरं परम् ॥ २४ ॥
सन्निधौ मुनिविन्यस्तपुष्पदूर्वातिलाक्षतम् । कपोलकषणासक्तमत्तेभमदवासितम् ॥ २५ ॥
वल्मीकाहिशिरोरत्नदीपाञ्चितदिगन्तरम् । दुकूलेनेव महता निर्मोकेण परीवृतम् ॥ २६ ॥
कस्तूरिकामृगीसङ्गकस्तूरीरसवासितम् । कालहस्तीश्वरं नाम कालमृत्युनिवारणम् ॥ २७ ॥
ऊर्णाफणीभराडाख्यमूर्णाहिस्तिफणाडितम् । बभूव मुदितो दृष्ट्वा योगीव ज्योतिरान्तरम् ॥ २८ ॥
ननाम दण्डवद्भूमौ प्रदक्षिणमथाचरन् । स्वामिन् मां रक्ष रक्षेति वदन्नञ्जलिमादधे ॥ २९ ॥
अभूद्रोमाञ्चिततनुरानन्दाश्रुपरिप्लुतः । भक्तिं दधार परमां शंभौ भवभयापहाम् ॥ ३० ॥
पश्यतो व्याधपुत्रस्य भगवन्तं महेश्वरम् । चक्रुश्चक्षुष्यवस्थानं सर्वाः करणवृत्तयः ॥ ३१ ॥

नवं नवमिवास्याभूल्लिङ्गं व्याधस्य शाङ्करम् । सिषेवे सादरं तस्माद्वथस्मरज्जातिमात्मनः ॥ ३२ ॥
पिबन्निव बहु प्रीत्या खादन्निव लिहन्निव । जिघ्रन्निव च संश्लिष्यन्नुक्तिमाकर्णयन्निव ॥ ३३ ॥
गृह्णन्निव करे शंभुं व्याधः स्ववशमानयत् । आलिलिङ्ग हरं वृत्तिर्व्याधपुत्रस्य मानसी ॥ ३४ ॥
जारिणीव दृढं भूयः प्रेयांसं प्रोषितागतम् । एतावन्तमहो देवमनिषेव्यातिवाहितम् ॥ ३५ ॥
कालं दुष्टमहं मन्ये वृथैवायुर्व्ययः कृतः । इतः प्रभृति नैवास्य त्यक्तव्यः सन्निधिर्मया ॥ ३६ ॥
कृतकृत्यो भविष्यामि कालहस्तीशसेवया । इति निश्चित्य मनसा सखायं प्रियमाह सः ॥ ३७ ॥
केन वा मूर्ध्नि देवस्य म्लानः पुष्पाञ्जलिः कृतः । उत्सार्याहं विधास्येऽस्य नवारग्वधमालिकाम् ॥
इमानि वन्यपुष्पाणि निपतन्ति कथं वृथा । इति धीरोक्तिमाकर्ण्य गाढस्तं प्राह विस्मितः ॥३९॥
पितुराखेटकाले ते दृष्टः कश्चिदिहागतः । तस्य मुष्टिमिताः केशा मौलिमध्ये दृढीकृताः ॥ ४० ॥
त्रिगुणैस्तन्तुभिः क्लृप्तं दामांसे वामतो वहन् । असावन्वहमभ्येत्य सुवर्णमुखरीजलैः ॥ ४१ ॥
आनीतैः कलशैनामूं मूर्ध्नि सिञ्चति देवताम् । नवानि बिल्वपत्राणि शम्याककुसुमानि च ॥४२॥
मौलौ पादे च निक्षिप्य मन्दं किमपि जल्पति । अग्रे स्थूलान्नकवलं कृत्वा हस्तं च दक्षिणम् ॥
दर्शयित्वा गृहीत्वाऽन्नं प्रत्यहं याति मन्दिरम् । हस्तस्पर्शं जलक्षेपं सहतेऽस्यैव देवता ॥ ४४ ॥
महतीयं न चास्माकं छायामपि सहिष्यते । तस्मात्त्वं दूरतस्तिष्ठ यदेकः स्वामिनः सुतः ॥४५॥
सख्युर्वाचं समाकर्ण्य धीरः प्राह स्मयन्निव । वनेचराणामस्माकमेतद्धि कुलदैवतम् ॥ ४६ ॥
अस्मद्विरिवने यस्माद्बलत्यातितमस्ततः । सुहृत्तमं विधास्यामि त्वामिवामुं महेश्वरम् ॥ ४७ ॥
द्वित्रैरेव दिनैः पश्य भक्त्या किं किं न सिध्यति । सुवर्णमुखरीवारि सुलभं कुसुमं वने ॥ ४८ ॥
बहूनि मृगमांसानि कथं नाराध्यते शिवः । जन्मकर्मादि देवस्य प्रसादे नैव कारणम् ॥ ४९ ॥
साधनं भक्तिरेवास्मिन् जात्या हीनोऽप्यहं प्रियः । रमते न मनस्तत्र सखे मे पितुरालये ॥ ५० ॥
यथात्रानन्दभरितं तस्मादत्र वसाम्यहम् । इत्युक्त्वा सन्निधिं प्राप्य साञ्जलिः स व्यजिज्ञपत् ॥ ५१
कथमेको निवससि वने दुष्टमृगान्विते । प्रभुस्त्वमसि लोकानां शैलाग्रे वर्तसे कथम् ॥ ५२ ॥
अप्यस्माकं परिजनो न ते कश्चिदिहापरः । अहमेव भविष्यामि दिवारात्रं च पार्श्वतः ॥ ५३ ॥
अङ्गीकुरुष्व मां देव दासमागः क्षमस्व मे । करोम्यञ्जलिमात्रं ते प्रसीद मयि शङ्कर ॥ ५४ ॥
एवमात्मार्पणं कृत्वा शबराधिपनन्दनः । सपर्यां शाङ्करीं कर्तुं तदारभ्योपचक्रमे ॥ ५५ ॥
शरैराच्छिद्य तस्यारात्तृणगुल्मलतादिकम् । दूरीचक्रे क्षणेनैव दुरितान्यपि भक्तितः ॥ ५६ ॥
मृगान्निहत्य बहुशो मृगयायामथानले । निष्टप्य चिन्तां महतीमवाप शबरात्मजः ॥ ५७ ॥
हन्त दूरे सारिद्वारि वने पुष्पाणि नान्तिके । कलशादि न मे किंचित्करिष्येऽर्चां कथं विभोः ॥
इति चिन्तयतस्तस्य प्रत्यभाद्बुद्धिरुत्तमा । एवमस्त्विति निश्चित्य स चक्रेऽयं महामनाः ॥ ५९ ॥
अनन्यसुकरं तद्धि श्रूयतां भक्तिसाहसम् । अभिषेकाम्बुकलशमतनोन्मुखमात्मनः ॥ ६० ॥
सोपानत्प्रपदं चापि व्यधान्निर्माल्यशोधनीम् । दूराहृतानां पुष्पाणां भाजनं कैशिकान्तरम् ॥६१॥

हस्तं च दक्षिणं मेने नैवेद्यपलभाजनम् । अथ संवीक्ष्य पिशितमनलोच्छिन्नशोणितम् ॥ ६२ ॥
उद्धृत्य हेतिना कृत्वा फूत्कारैः स्पृश्यमूष्मलम् । इदं युक्तं किमीशस्य स्वादु पक्वं न वा भवेत् ॥
परीक्ष्य दास्ये देवाय नो चेद्दोहो भविष्यति । दष्ट्वा दन्तैस्ततो मांसं संपरीक्ष्य च जिह्वया ॥ ६४ ॥
यद्यत्स्वादुतमं मांसं मधुसिक्तं वनेचरः । शैलरम्भादलपुटे तत्तत्संजगृहे पृथक् ॥ ६५ ॥
सुवर्णमुखरीतोये निमज्याग्रेऽथ कैशिके । पत्रपुष्पाणि संगृह्य मुखे सञ्जगृहे जलम् ॥ ६६ ॥
वामेन स शरं चापमादाय निजपाणिना । अन्येन मांसपुटिकामनुप्रातिष्ठतेश्वरम् ॥ ६७ ॥
यत्रास्ते कालहस्तीशस्त्वरयाभ्येत्य तत्र सः । सोपानत्प्रपदाग्रेण भक्त्या निश्शंकमैश्वरे ॥ ६८ ॥
मौलौ निरस्तनिर्माल्ये गण्डूषजलधारया । अभिषिच्य निधायाग्रे मांसपत्रपुटं विभोः ॥ ६९ ॥
प्राक्षिपत्केशभारस्थं नतास्यः कुसुमोत्करम् । निदधावग्रतो मांसपुटिकां व्याधनन्दनः ॥ ७० ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे धीरचरित्रे श्रीकालहस्तीशसेवाकथनं नाम
अष्टाविंशोऽध्यायः ॥

॥ अथैकोनत्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

निवेदितानि मांसानि नोपयुक्तानि किं मया । विचारयन्निति प्राह साञ्जलिः सन्निधौ हरम् ॥ १
भुङ्क्ष्व मांसमिदं स्वादु मार्गं मायूरमाप्लुतम् । मधुनेदं तु कापोतं गोधामांसमिदं प्रियम् ॥ २ ॥
ऐणेयं यदि वाराहं प्रियं चेदानयामि तत् । सुवर्णमुखरीमीनानिमान् पश्य घृतोपमान् ॥ ३ ॥
भुज्यतां कालहस्तीश शपे मयि दयां कुरु । यदि नाश्नासि देवेश नाश्नीयामप्यहं ध्रुवम् ॥ ४ ॥
ददामि वदने वा ते मधुसिक्तं महेश्वर । एवमस्विति तद्वक्त्रे मांसं किंचिदथार्पयत् ॥ ५ ॥
दयालुः कालहस्तीशस्तन्मांसं बुभुजे यदा । ददौ सर्वं तदा व्याधः स्वीचकार च शङ्करः ॥ ६ ॥
अथोत्थाय मुदा नृत्यन्निदमाह कृताञ्जलिः । प्रातर्भुक्तमिव स्वादु मांसं किं ते मयार्पितम् ॥ ७ ॥
व्याधवाक्यं निशम्याऽथ महाप्रासो महेश्वरः । ततोऽप्यधिकमेवेति शिरःकम्पादमोदत ॥ ८ ॥
विश्वक्षुर्व्याधवृत्तान्तमिव देवो दिवाकरः । वरुणस्यापराम्भोधौ ममज्ज ब्राह्मणोत्तमाः ॥ ९ ॥
बहिर्गतैरिवाघौघैस्तिमिरैर्विश्वमावृतम् । गृहीतस्तम्भिताहीन्द्रफणारत्नप्रदीपिते ॥ १० ॥
सन्निधौ निशि देवस्य तस्थौ निर्निद्र एव सः । चिकीर्षुरन्वहं पूजामेवमेव वनेचरः ॥ ११ ॥
अन्येद्युः प्रातरटवीं मृगयार्थमगाहत । शिवकोशाभिधस्तस्य शिवभक्तशिखामणिः ॥ १२ ॥
अर्चकोऽथ समागत्य मांसलिप्तं महेशितुः । पूतिगन्धि पुरारातेर्दृष्ट्वा लिङ्गं सवेदिकम् ॥ १३ ॥
दुःखेनैव विनिश्वस्य रुरोद पतितः क्षितौ । उच्चैःस्वरेण चुक्रोश व्याधैर्दुष्टैरिदं कृतम् ॥ १४ ॥
नरके निपतिष्यन्ति शिवद्रोहरता नराः । निरस्यामिषखण्डानि क्षालयित्वाऽसकृज्जलैः ॥ १५ ॥

पुण्याहप्रोक्षणं कृत्वा पूजयित्वा च पूर्ववत् । जगाम स्वालयं विप्रः शबरोऽथ समाययौ ॥ १६ ॥
अतीतः किं नु समयः क्षमस्व करुणानिधे । इति नत्वा यथापूर्वं कृत्वा निर्माल्यशोधनम् ॥ १७ ॥
स्वगण्डूषाभिषिक्तस्य मांसाहारं न्यवेदयत् । तथैव भोजयामास तच्छेषं बुभुजे पुनः ॥ १८ ॥
एवमर्चयतः शंभुं षड्रात्रं चात्यवर्तत । दूषितं प्रत्यहं मत्वा लिङ्गं संप्रोक्षणादिना ॥ १९ ॥
अर्चकः शोधयामास विचाराक्रान्तमानसः । वनदेवगृहीतं स्वं नागः श्रुत्वागतः सुतम् ॥ २० ॥
वैद्यैश्चकार भैषज्यं निराशः स्वालयं ययौ । प्रतिप्रायते शबरे ततः पितरि पक्षणम् ॥ २१ ॥
दीर्घरोगात्र नीरोगः स बभूव वनेचरः । प्रतिबन्धविनिर्मुक्तो मुमुक्षुरिव शङ्करे ॥ २२ ॥
दधार परमां भक्तिं प्रीतिं कामीव योषिति । गन्धोदकाभिषेकस्तद्गण्डूषजलसेचनम् ॥ २३ ॥
सपादत्राणतत्पादप्रहारो मूर्ध्नि चान्वहम् । स्कन्दस्येव शिशोर्लीलाविन्यासोऽङ्कस्थोरुमापतेः ॥
भक्त्या परीक्षितं स्वादु वन्यं मांसं यदर्पितम् । सहस्रांशतुलां तस्य नैवार्हत्याध्वरं हविः ॥
माल्यं तत्केशविभ्रष्टं निर्दोषं हेमपुष्पवत् । सत्त्वानि विपिने निघ्नन् चरन् जक्षन् श्वसन् पिबन् ॥
न किंचिदन्यत्सस्मार महादेवाद्वनेचरः । वारिपूरितगर्भास्यं मांसपात्रधरं तथा ॥ २७ ॥
दक्षिणेन च हस्तेन वामेनेषुधनुर्धरम् । प्रसूनानि च पत्राणि दधानं कैशिकेन च ॥ २८ ॥
शिवार्चनार्थमायान्तं खेचराः प्रशशंसिरे । शिवकोशः परं तस्मिन्नर्चको द्वेषमादधे ॥ २९ ॥
शंकरस्तु परां तस्मिन् शबरे प्रीतिमातनोत् । अथैकदा द्विजः प्रातः पूजार्थं प्रागिवागतः ॥
ददर्श लिङ्गमीशस्य शबरे मृगयां गते । मांसकीकससंकीर्णं वसामन्त्रितमक्षिकम् ॥ ३१ ॥
काकगृध्राकुलोपान्तं श्वापदैः परितो वृतम् । दृष्ट्वारोदीद्बहुविधं कराग्रप्रहतोदरः ॥ ३२ ॥
देवस्थानमिदं पुण्यं सूनास्थानमिवाधुना । पापेन द्रोहिणा केन कृतमेवं दुरात्मना ॥ ३३ ॥
अपराधं कथं नित्यं सहसे शबरैः कृतम् । द्रोहिणस्ते विभो नष्टास्त्रिपुरान्तकमन्मथाः ॥ ३४ ॥
यैर्दूषितमिदं लिङ्गं न तेषां निष्कृतिः क्वचित् । किं करिष्ये क्व गच्छामि शैलाग्रात्पतनं वरम् ॥
मयार्चितं न पश्यामि पुष्पमन्यदिदं कुतः । हा हतोऽस्मि न मे मृत्युः किं पश्यसि महेश्वर ॥
न पश्यामि दुरात्मानं शिवलिङ्गविदूषकम् । गते मयि प्रतिदिनं लिङ्गं दूषयते खलः ॥ ३७ ॥
अद्य क्षान्तमिदं सर्वं श्वो भवेयं मृतो ध्रुवम् । इत्युक्त्वास्थीनि मांसानि समुत्सार्य विदूरतः ॥ ३८ ॥
संप्रोक्षणविधिं कृत्वा गन्धतैलादिलेपनात् । सुवर्णमुखरीतोयकलशीशतसेचनात् ॥ ३९ ॥
शतरुद्रीयमन्त्रेण पूजयित्वा महेश्वरम् । यथापूर्वं ययौ वेश्म न मुक्तिं विदधे शुचा ॥ ४० ॥
अथ स्वप्ने तमाहेशः शिवकोशं शिवद्विजम् । त्वत्तोऽप्यतितरां भक्त्या पूजकः शबरोऽस्ति मे ॥
मयि व्यावस्य सुदृढा वर्तते भक्तिरुत्तमा । तस्मात्प्रियतरो नान्यस्तद्द्वेषी तु ममाहितः ॥ ४२ ॥
परीक्षणीया यदि ते भक्तिस्तस्य महात्मनः । श्वो निगूढस्त्वमेकस्मिन्नाराद्गुल्मे विलोकय ॥ ४३ ॥
इत्युक्त्वान्तर्धिमापाशु कालहस्तीश्वरो विभुः । अथार्चकः समुत्थाय भयात्पुलकितो निशि ॥ ४४ ॥
नैव निद्रामवापायं स्मारं स्मारं विभोर्वचः । शबरोऽपि यथापूर्वं पूजयामास जागरात् ॥ ४५ ॥

यदि भूयोऽपि योक्ष्यामि गमिष्याम्यन्तकालयम् । प्रागुत्थितः कथं भूयः करिष्येऽस्य पदानतिम् ।
त्राणोपायं न पश्यामि प्राणानां कथमप्यहम् । रणे विना प्रणामेन न विमोक्ष्यति मां रिपुः ॥
अप्ययुक्ततरं मन्ये मम रात्रौ पलायनम् । इति चिन्तापरस्याभादुपायः प्राणरक्षणे ॥ ४२ ॥
इति कर्तव्यमित्युक्त्वा सोऽतिशूरः स्वपन्निशि । प्रभातायां रजन्यां तु त्रिपुण्ड्रालङ्कृतालिकः ॥ ४३
चतुर्विंशतिरुद्राक्षभूषितात्मप्रकोष्ठवान् । खड्गखेटधरः प्रातरतिशूरो विनिर्ययौ ॥ ४४ ॥
प्रास्थादेनादिनाथोऽपि श्रुततद्विरुदावलिः । गच्छन्तमन्वयुः शिष्यास्ताराश्चन्द्रमसं यथा ॥ ४५ ॥
तत्र सर्वेषु पश्यत्सु तयोर्युद्धमवर्धत । वाञ्छतोः कीर्तिमतुलां शृङ्गिणोरिव मत्तयोः ॥ ४६ ॥
हस्ताधूतेन खड्गेन स जघान रणे रिपुम् । अतिशूरोऽपि खड्गेन तं प्रहारं न्यवारयत् ॥ ४७ ॥
एनादिनाथोऽथोत्कर्षन् लग्नं चर्मण्यसिं निजम् । फाले भस्म रिपोर्दृष्ट्वा सम्भ्रान्तहृदयोऽभवत् ॥ ४८
विचारं चागमत्तीव्रं शिवद्रोहभयेन सः । कथं मया शिवद्रोहमविचार्य दुरात्मना ॥ ४९ ॥
आहूतो भस्मरुद्राक्षधारी युधि रिपूकृतः । शिवभक्ताभिषङ्गांहोनिष्कृतिर्न मृतिं विना ॥ ५० ॥
यदि त्यक्तायुधोऽहं स्यामयशोऽद्य भवेन्मम । पराङ्मुखो वधात्तस्मादग्रे तिष्ठामि सायुधः ॥ ५१ ॥
छिन्नग्रीवोऽस्य खड्गेन प्राणांस्त्यक्ष्येऽघशुद्धये । नान्यथा निष्कृतिर्मेऽस्ति वर्षकोटिशतैरपि ॥ ५२
धृतासिरेवं निश्चित्य तस्थावुद्यमवानिव । भावज्ञोऽपि रिपुस्तस्य न जानन्निव तत्क्षणे ॥ ५३ ॥
अतिशूरः शिरश्छेत्तुं गर्जन् कैश्ये परामृशत् । निर्विकारो यदा तस्थौ प्राणानामत्ययेऽपि सः ॥ ५४
तदानीं वृषभारूढः शङ्करः प्रत्यदृश्यत । पार्वत्या च गणैः सार्धं विबुधेन्द्रैरभिष्टुतः ॥ ५५ ॥
स्थितिं दत्वास्य कैलासे चक्रे पारिषदोत्तमम् । किं वा न सुलभं पुंसां प्रसन्ने परमेश्वरे ॥ ५६
प्राप्याप्यापदमीशस्य प्रीतिं सम्पादयेत्ततः । हीनजातेरपि शिवो भक्त्या मुक्तिप्रदोऽभवत् ॥ ५७

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे एनादिनाथमुक्तिप्राप्तिर्नाम पञ्चविंशोऽध्यायः ॥

॥ अथ षड्विंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

शिवे जन्मादिसक्लेशध्वान्तार्काङ्घ्रिसरोरुहे । भक्तिं वितन्वते येऽत्र तेषां नास्ति पुनर्भवः ॥ १ ॥
न कुलं न श्रुतं नेज्या न व्रतं न तपो महत् । न स्वाध्यायो न देवार्चा न च तीर्थनिषेवणम् ॥
पुनर्भवक्लेशहरं भवन्ति ब्राह्मणा यथाः । शिवभक्तिर्यथा पुण्या जन्मदोषविनाशिनी ॥ ३ ॥
शमादिगुणसंपन्नो ब्राह्मणो विजितेन्द्रियः । अपि ब्रह्मविदीशाङ्घ्र्योर्विना भक्त्या न मुच्यते ॥ ४ ॥
शिवभक्त्यैकया सार्धं निषादश्वपचान्त्यजाः । छिन्नबन्धा विना योगैरनावृत्तिपदं गताः ॥ ५ ॥
मांसनेत्रार्पणैर्नित्यं चन्द्रमौलेः प्रसादतः । निषादसूनुः परमां गतिमाप द्विजोत्तमाः ॥ ६ ॥

ऋषय ऊचुः ॥

कथमर्पितवान्नेत्रं निषादो निन्द्यजन्मभाक् । कथं शम्भोः प्रसादेन विमुक्तभवबन्धनः ॥ ७ ॥
अवाप सिद्धिं परमां दुर्लभां योगिनामपि । चरितं तस्य धन्यस्य वद नः कुम्भसम्भव ॥ ८ ॥

श्रीअगस्त्यः ॥

काञ्चीपुरस्य महतः स्थानस्येशानकोणतः । सुवर्णमुखरीतीरे पर्वतोऽस्ति महत्तरः ॥ ९ ॥
नाम्ना वेणुगिरिः श्रीमान् कुञ्जराकारभूषितः । शरण्यो वन्यसत्त्वानां नानाधातुविचित्रितः ॥ १० ॥
कुन्दमन्दारहिन्तालतालसालचलच्छदाः । सप्तपर्णाम्रशम्याकशाल्मल्यशनशोणकाः ॥ ११ ॥
नागकेसरपुन्नागनालिकेरबिभीतकाः । वरणोदुम्बरारिष्टपारिभद्रादयो द्रुमाः ॥ १२ ॥
वेणुभिः सह वर्धन्ते वियत्पथनिरोधिनः । निकुञ्जनिलया यत्र वर्षातपनिरोधिनः ॥ १३ ॥
यत्तटेषु विशालेषु नानागुञ्जलतागृहैः । वर्धमानमहावेणुपर्वनिर्मुक्तमौक्तिकैः ॥ १४ ॥
हर्यक्षनखनिर्भिन्नहस्तिकुम्भच्युतैश्च तैः । रक्तगुञ्जान्तरासंगपरभागमनोहरैः ॥ १५ ॥
निशातशलली सूचीकृतरन्ध्रैः समुज्ज्वलैः । अन्वहं निर्मितैर्हारैः प्रत्यग्रं पतिभिः स्वकैः ॥ १६ ॥
भान्ति मत्ता निषादिन्यः समन्तात्समलंकृताः । छिन्धि भिन्धि न मुञ्चानुद्रव प्रहर मारय ॥ १७ ॥
इति यत्राभितः शब्दाः श्रूयन्ते शबरेरिताः । कलभा यत्र बध्यन्ते लताभिः शबरार्भकैः ॥ १८ ॥
भिल्लमल्लशुनो यत्र कर्षतो वीक्ष्य सूकरान् । तरक्षवश्च शार्दूलाः पलायन्ते वने वने ॥ १९ ॥
हरिकेसरदामान्तर्बद्धव्याघ्रनखाङ्कुराः । स्तनन्धया निषादानां यत्र क्रीडन्ति दंष्ट्रिभिः ॥ २० ॥
कापोतशौकमायूरमार्गकौक्कुटमांसभुक् । दुर्गतिं नैव जानाति यत्रस्था व्याधवाहिनी ॥ २१ ॥
तत्रास्ति गोधापुरमित्यनेकशबरास्पदम् । तत्पर्युषितमांसौघविस्रगन्धिदिगन्तरम् ॥ २२ ॥
नानापक्वणसाहस्रशतयूथोपसेवितम् । सिंहव्याघ्रवराहेभत्वगावृतमहातपम् ॥ २३ ॥
व्याधानामधिपस्तत्र निषादकुलवल्लभः । कुलाचलपुलिन्दौघदीयमानकरो महान् ॥ २४ ॥
महाधनश्च शूरश्च भूपालानां च सम्मतां । स दत्तः नाम शबरीं समानकुलसंपदम् ॥ २५ ॥
उद्वाह्य गृहवानासीद्वस्तिन्या गजराडिव । रूपयौवनसौजन्यशालिन्या च तया सह ॥ २६ ॥
रममाणो मुदं प्राप योगीव ब्रह्मविद्यया । तस्यैवं वर्तमानस्य नापत्यमभवद्द्विजाः ॥ २७ ॥
दत्तानपत्यभावेन खिन्ना शोचयति स्म तम् । अनुनीतापि बहुशो रत्नवस्त्रविभूषणैः ॥ २८ ॥
भर्त्रा प्रणयिना नित्यं बहुमेने न किंचन । पपौ न मधु मांसानि बुभुजे न च चन्दनम् ॥ २९ ॥
दधौ मृगमदं वापि न सस्नौ कुङ्कुमाम्भसि । नालकोद्वर्तनं चक्रे न दुकूलं बभार सा ॥ ३० ॥
तामवेक्ष्य निषादानामनुशोचन्नधीश्वरः । नामन्यत सुखं गेहे रहिते पुत्रसंपदा ॥ ३१ ॥
धनाच्च महितां मेने महतीं पुत्रसंपदम् । एवं याते बहुतिथे काले स व्याधनायकः ॥ ३२ ॥
कदाचित्स्वजनान् सर्वानानीय प्राह संसदि । अनपत्योऽस्मि खिन्नोऽस्मि सदारो निन्दितः कुले ॥

न भूतपूर्वः कोऽप्यस्ति मादृशो भाग्यवर्जितः । यत्र कुत्रापि गच्छामि नाधिपत्येन मे फलम् ॥
यदि कश्चिदुपायोऽस्ति पुत्रसंपत्प्रदो मम । प्राणानपि परित्यज्य तस्य कर्तास्म्यसंशयम् ॥ ३५ ॥
व्याधास्तस्य वचः श्रुत्वा पप्रच्छुस्ते कुलोत्तमाम् । पक्कणस्य बहिर्वृद्धां जटिलां पर्णवेश्मगाम् ॥
प्रियङ्गुपिष्टभाण्डानां सहस्रं मधुसर्पिषाम् । प्राभृतप्रस्थसाहस्रं दत्वा प्राञ्जलयोऽन्तिके ॥ ३७ ॥
नागोऽपि मौक्तिकप्रस्थं प्रणामान्ते ददौ पुनः । माणिक्यवेल्लमतुलं भक्त्या पट्टाम्बरं त्वचम् ॥ ३८
प्रतिगृह्य च तत्सर्वं शबरी जरती क्षणम् । ध्यात्वा शक्तिधरं देवं सह वल्लया मनोज्ञया ॥ ३९ ॥
चालयन्ती शिरः किञ्चिदिदमाह वनेचरान् । सह भर्त्रा प्रसन्नेव वल्लयस्मत्कुलदैवतम् ॥ ४० ॥
मौक्तिकप्रस्थशतकं यद्यनेन प्रदीयते । नागाधिको ध्रुवं पुत्रो भविता प्रतिभूरहम् ॥ ४१ ॥
इति तस्यां वदन्त्यां तु शकुनीनामभूद्ध्वनिः । प्रत्ययं प्रापितो व्याधः प्रत्यज्ञासीत्तथैव सः ॥४२ ॥
जाते पुत्रे द्वादशेऽह्नि मौक्तिकप्रस्थकोटिभिः । अभिषेचयिता वल्लीमस्मि मातः प्रसीद मे ॥ ४३ ॥
वृद्धा तद्वचनं श्रुत्वा नागमाह श्रुतौ मिथः । तथा विधेहि मातर्मे यथा वल्ली प्रसीदति ॥ ४४ ॥
तव दत्ता व्रतं मत्तो गृहीत्वा वत्सरं यदि । तिष्ठेन्मनोरथः पूर्णो भविता वल्लयनुग्रहात् ॥ ४५ ॥
अस्त्वित्युक्त्वाथ नागोऽपि तद्वाचातोषयद्बधूम् । सा प्रीता व्याधवचनाद्वृद्धां प्रातर्ननाम ताम् ॥
उपादिशद्व्रतं वृद्धा स्पृशन्ती भस्मनालिके । पाठयामास पद्यं च वल्लीप्रीतिकरं वरम् ॥ ४७ ॥

नमो नमः षण्मुखवल्लभायै नमो नमो नन्नजनार्तिहन्त्र्यै ।
नमो नमः सर्वसमृद्धिदायै नमो नमस्ते दिश वल्लि पुत्रम् ॥ ४८ ॥

एतत्पद्यं जपन्ती सा मधुमांसविवर्जनात् । दधार व्रतमच्छिद्रमसिधाराव्रतं यथा ॥ ४९ ॥
मासत्रयेऽप्यतिक्रान्ते नाभवल्लक्ष्म किंचन । पुनः सा पद्यमदिशत् षण्मुखस्तुतिसुन्दरम् ॥ ५० ॥

नमो नमः शैलसुतात्मजाय नमो नमो बर्हिणवाहनाय ।
नमो नमो वल्लिमनोहराय नमो नमस्ते गुह देहि पुत्रम् ॥ ५१ ॥

इति पद्यद्वयं वृद्धा पाठयित्वा च तां नताम् । बभूव परमप्रीता कृतार्थासील्यभाषत ॥ ५२ ॥
अतीते सप्तरात्रे तु दत्ता निद्रावशं गता । स्वप्ने ददर्श स्वोत्सङ्गे स्थापितं पूर्णमण्डलम् ॥ ५३ ॥
निषादकन्यया व्योम्नः शारदं रजनीकरम् । अन्तर्गृहे प्रदीपं च प्रबुद्धास्यै व्यजिज्ञपत् ॥ ५४ ॥
मान्यत्र कथयेत्युक्त्वा सा प्रहृष्टतराभवत् । अथ मासेऽप्यतिक्रान्ते प्रास्फुरद्गर्भलक्षणम् ॥ ५५ ॥
व्याधाश्च मुदिता नेमुर्व्रतान्ते जरतीमपि । प्रागेव जन्मनः सूनोर्यथोक्तं शबराधिपः ॥ ५३ ॥
मौक्तिकप्रस्थकोटीं तां वल्लीदेवीमुदे ददौ । शुभे मुहूर्ते व्याधेन्द्रः सर्वाभरणभूषिताम् ॥ ५७ ॥
आसन्नप्रसवां दत्तामवलोक्य मुदं दधौ । बाहुभ्यामिव तीर्णाब्धिः पारं गत इव स्वयम् ॥ ५८ ॥
इत्येष तनयं जातं कर्तुं शबरनायकम् । ततः शुभान्विते लग्ने शुभग्रहनिरीक्षिते ॥ ५९ ॥
दत्तासूतात्मजं प्राची हरिश्चन्द्रमसं यथा । नागः श्रुत्वात्मजं जातं बभूव मुदितान्तरः ॥ ६० ॥

नष्टदृष्टिः पुनर्दृष्टिलाभेन तनुमानिव । मधूनि दापयामास पक्कणेषु च सर्वतः ॥ ६१ ॥
निषादजरतीं साक्षादेवीं वल्लीममन्यत । काहलीशृङ्गहिक्कानां शब्दस्तत्पुत्रजन्मनि ॥ ६२ ॥
व्यजृम्भत वियद्व्यापी दिशो मुखरयन्निव । ववर्षुः पुष्पवर्षाणि खेचराः शबरालये ॥ ६३ ॥
यथाधिकारं व्याधेन्द्रा रत्नप्राभृतपाणयः । उपासतान्तिके नागं जयमङ्गलवादिनः ॥ ६४ ॥
जगुः कलं च गन्धर्वा ननृतुर्नाकयोषितः । उदभूदतनुर्वाणी सर्वेषां हृदयङ्गमा ॥ ६५ ॥
शिवे भक्तिपरीक्षार्थं प्रवृत्ते नयनार्पणात् । अच्युतादधिकां कीर्तिमवाप्य शबरान्वयम् ॥ ६६ ॥
अलङ्कर्तुमयं जातो दत्तायास्तनयो महान् । इति तां च समाकर्ण्य सिद्धाः श्लाघामतन्वत ॥ ६७
रोदनध्वनिमाकर्ण्य शिशोर्दत्ता कलाक्षरम् । अविन्दत परानन्दं योगसिद्धयेव योगिनी ॥ ६८ ॥
क्रमेण ववृधे बालो मात्रा समुपलालितः । शुक्लपक्षमनुप्राप्य कलानिधिरिवोदितः ॥ ६९ ॥
शबरीशबराणां च तस्मिन्नयनपङ्क्तयः । तृषार्तानामिवोत्पेतुस्तटाकेऽमृतपूरिते ॥ ७० ॥
देहकाठिन्यसदृशं नाम चक्रे पिता शिशोः । घनसारतया धीरः प्रथितः पक्कणेष्वभूत् ॥ ७१ ॥
जानुभ्यामपि बाहुभ्यां चङ्क्रमन्तं कुमारकम् । पश्यतोर्व्योधदम्पत्योः प्रीतिं जानाति शङ्करः ॥
जातदन्तो यदा धीरो व्यक्ताव्यक्ताक्षरं तदा । छिन्धि दारय भिन्धीति नागः पाठयति स्म तम् ॥
धूलिकेल्यां निषादानां शिशूनाक्षिप्य खेलति । धीरं विलोकयन्नागो भोजनस्य न चास्मरत् ॥ ७४
व्याघ्रभल्लूकभूदारहर्यक्षगजपोतकैः । क्रीडन्तं बालकं दृष्ट्वा प्रहरेत्यब्रवीत्पिता ॥ ७५ ॥
श्वानौ बभूवतुस्तस्य किशोरकसमौ सदा । पार्श्वयोर्भोजने निद्रासमयेऽपि समीयतुः ॥ ७६ ॥
व्याधवृद्धानुदिवसं भस्मरक्षां वितन्वती । वल्ली षण्मुखकारुण्याच्चिरं जीवेत्युवाच ह ॥ ७७ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे धीरनिषादतनयोत्पत्तिर्नाम षड्विंशोऽध्यायः ॥

॥ अथ सप्तविंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

द्वादशे वत्सरे तस्य नूतनायुधसङ्ग्रहम् । कारयिष्यन् मुदा नागो व्याधान् सर्वानमेलयत् ॥ १ ॥
हिमालये महामेरौ निषदे गन्धमादने । विन्ध्ये महेन्द्रे मलये त्रिकूटे मल्लिकार्जुने ॥ २ ॥
गिरावन्यत्र ये व्याधास्ते च सर्वे समागताः । नानोपायनहस्तांस्तानागतानखिलानपि ॥ ३ ॥
संपूज्य मधुमांसादिजात्याहारप्रदानतः । द्रव्यजातं च सङ्गृह्य निषादैरुपदीकृतम् ॥ ४ ॥
शुभे मुहूर्ते तनयं व्याघ्रचर्मणि नूतने । निवेश्य प्राङ्मुखं हस्ते नागः स्वां छुरिकामदात् ॥ ५ ॥
उल्लुलुध्वनिमातेनुः शबर्यश्च समन्ततः । अथ बद्धाङ्गुलित्रस्य सूनोर्वामकरे धनुः ॥ ६ ॥
दत्वा नागः शरं कंचिदिदं सदसि सोऽब्रवीत् । पुरः पुत्र शमीवृक्षे निबद्धः किटिपोतकः ॥ ७ ॥
शरेणाकर्णकृष्टेन शरव्यं तन्निपातय । इति नागेन संदिष्टो धीरः संधाय कार्मुके ॥ ८ ॥

सायकं तं प्रति तरुं विससर्ज कृताञ्जवत् । स भूदारार्भकं लक्ष्यं विभिन्नं वीक्ष्य सङ्गशः ॥ ९ ॥
शबराः श्लाघयामासुः साधु साध्विति चाब्रुवन् । पुलिन्दकुलवृद्धानां कारयित्वा नतिं पदे ॥ १०
नागः पुत्रं समाश्लिष्य परां निर्वृतिमाप ह । अथ सर्वे समामन्त्र्य पुलिन्दास्तेन पूजिताः ॥ ११ ॥
युवराजस्य धीरस्य चाज्ञया स्वं पदं ययुः । बद्धकक्षस्ततो धीरः शबराचार्यशिक्षया ॥ १२ ॥
सर्वायुधेषु परमां शिक्षामध्यगमच्चिरम् । शर्कराभृगुकान्तारधावने हरिणद्विषाम् ॥ १३ ॥
निरोधे निर्भयामर्दे न तस्यासीत्समोऽपरः । आनायादिप्रयोगेषु युद्धे केसरिभिः सह ॥ १४ ॥
सत्त्वप्रहारमोक्षे च सदृशस्तस्य नापरः । आखेटकौतुकाक्रान्तचेतसोऽस्यानुवासरम् ॥ १५ ॥
न शेकुरनुयानेऽपि नागसूनोर्वनेचराः । सिंहव्याघ्रवराहेभशरभारण्यचारिणाम् ॥ १६ ॥
न तस्याविदितं किंचिद्वनमस्ति महीधरे । मार्गानुसारिणौ तस्य सुहृदौ द्वौ बभूवतुः ॥ १७ ॥
गाढाख्यश्चेति नाणुश्च व्याधयूथाधिपात्मजौ । सह ताभ्यां विनिर्गत्य प्रातरादिवसात्ययम् ॥ १८॥
चरित्वा सुमहारण्ये रात्रावायाति पक्कणम् । एवं विचरतस्तस्य पञ्च संवत्सरा ययुः ॥ १९ ॥
वर्षवातातपास्तस्य बभूवुर्नैव दुःखदाः । ततो वनेचराः प्राप्य नागं पक्कणवासिनः ॥ २० ॥
ऊचुर्दक्षिणतो बाधां महतीं दुष्टसत्त्वजाम् । निशम्य वचनं तेषां नागः प्रोवाच तानिदम् ॥ २१
न प्रागिव बलं मेऽस्ति मृगयायामहोऽधुना । वृद्धः करणमान्द्येन खिन्नोऽस्मि भवनेचरः ॥ २२ ॥
भवन्त एव दुष्टानि सत्त्वानि घ्नन्तु सायुधाः । तरुणा बलवन्तश्च बलिभिश्चान्विताः श्वभिः ॥ २३
श्रुत्वा तदुक्तिं प्रत्यूचुः पुलिन्दा मिलिताः शतम् । पुत्रं त्वदधिकं धीरं कुरु सेनाग्रयायिनम् ॥
नागोऽपि प्रीतये तेषां प्रेषयामास तैः सुतम् । प्रतस्थे व्याधसेनाभिर्दुष्टसत्त्वजिघांसया ॥ २५ ॥
धीरः सुहृद्भ्यां सहितो नीलमेघसमद्युतिः । धनुर्धरः कवचितो महद्वनमगाहत ॥ २६ ॥
विस्तार्य वागुरां व्याधास्तस्थुश्च परितो वनम् । छिन्धि भिन्धि गृहाणेति वदन्तः सत्त्वभीषणाः ॥
ततः श्वनादमुखरे वने सर्वत्र सङ्गशः । बभ्रमुर्मृगयूथानि गगने घनयूथवत् ॥ २८ ॥
जघ्नुर्व्याधाश्च लगुडैर्मृगानन्तिकचारिणः । धीरनाराचदलिता नष्टसंज्ञा महाबलाः ॥ २९ ॥
सिंहव्याघ्रवराहाश्च निपेतुस्त्यक्तजीविताः । नागसूनोः शराविद्धनानासत्त्वसमाकुलम् ॥ ३० ॥
आसीदरण्यं क्षुभितं मथितार्णववारिवत् । धीरो निकुञ्जाद्धावन्तं दक्षिणाशामुखं भयात् ॥ ३१ ॥
कृष्णसारमनुद्रुत्य प्रतस्थे धृतकर्मुकः । सखायौ गाढनाणूभौ सहानेनाभ्यधावताम् ॥ ३२ ॥
दृश्यादृश्यवपुर्धीरं कृष्णसारोऽपि दूरतः । विचकर्ष परिश्रान्तं मारीचो राघवं यथा ॥ ३३ ॥
धावतः कृष्णसारस्य मध्ये कश्चन सूकरः । विनिर्ययौ नागसूनुर्निजघान शरेण तम् ॥ ३४ ॥
उज्जहार शरं यावद्वपुषो वन्यदंष्ट्रिणः । स कृष्णसारः सहसा वने क्वापि तिरोदधे ॥ ३५ ॥
अथातपपरिश्रान्तः क्षुधितस्तृषितो वने । व्याधराजसुतः प्राह सुहृदौ च धृतश्रमौ ॥ ३६ ॥
गाढः प्राह च तं भूयः श्रूयतां मद्वचः सखे । क्रोशद्वयादितः शैलो दृश्यते कश्चिदुन्नतः॥३७॥

सिद्धचारणगन्धर्वसेवितो देवभूषितः । फलभारानतैर्वृक्षैः सान्द्रसानुर्विलोक्यताम् ॥ ३८ ॥
सुवर्णमुखरी नाम तस्य चोत्तरतो नदी । कमलोत्पलकल्हारवनामोदाधिवासिता ॥ ३९ ॥
घृतपिण्डोपमा यत्र चरन्ति शफराः सखे । तत्र गत्वा महानद्यां स्नात्वा पीत्वा ऋषोत्तमम् ॥ ४० ॥
चर्वतस्ते पुनर्नाद्य निवृत्तौ धीर्भविष्यति । मया पारिचिता पूर्वं सा नदी मृगयान्तरे ॥ ४१ ॥
उत्तिष्ठेत्युदितो धीरो नाणुं तं प्राह हे सखे । त्वया वनवराहोऽयं मया विद्धः प्रतीक्ष्यताम् ॥ ४२ ॥
अत्रैव जलमानीय तव दास्यावहे पुनः । तथेत्युक्तोऽथ सुहृदा प्रतस्थे सरितं प्रति ॥ ४३ ॥
नागसूनुः सगाढोऽयं निमित्तमभिनन्दयन् । मुहूर्तेनैव तं गत्वा पर्वतं तस्य चान्तिके ॥ ४४ ॥
ददर्श तटिनीं पुण्यां सुवर्णमुखरीं पराम् । स्वादुशीतलपानीयामतिस्वच्छमहाह्रदाम् ॥ ४५ ॥
तरङ्गमारुताधूतपान्थजातपरिश्रमाम् । नानातीरतरुव्रातनीडसाहस्रवर्तिनाम् ॥ ४६ ॥
विहङ्गमानां ध्वनिभिर्मुखरीकृतदिङ्मुखाम् । मज्जन्महामुनिस्तोमशीर्षकोटिविभूषिताम् ॥ ४७ ॥
कालहस्तीशनिर्माल्यपुष्पभासुरवेणिकाम् । मत्स्यकच्छपसंचारलीलोच्चलितपङ्कजाम् ॥ ४८ ॥
मकरन्दरसास्वादमत्तषट्पदसंकुलाम् । मरालचञ्चुसन्दष्टबिसलालसहंसिकाम् ॥ ४९ ॥
मज्जन्निर्झरवारस्त्रीस्तनकस्तूरिकाविलाम् । पानावतीर्णवन्येभदानचन्द्रकमण्डिताम् ॥ ५० ॥
हर्यक्षहतमत्तेभकुम्भमौक्तिकशर्कराम् । बालदूर्वादलग्राससरोमन्थमृगान्विताम् ॥ ५१ ॥
गन्धर्वगीतमाधुर्यद्रवदश्माम्बुवर्धिताम् । उपान्तकुञ्जसंशुष्यन्मुनिवार्धकवल्कलाम् ॥ ५२ ॥
इङ्गुदीफलसंक्षोदस्निग्धश्लक्ष्णशिलातलाम् । तटकीचकसन्दष्टवालाग्रचमरीमृगाम् ॥ ५३ ॥
खञ्जरीटविहारक्ष्माघातशंकुवनेचराम् । विकसत्पङ्कजमुखीं दीर्घैर्वालकुन्तलाम् ॥ ५४ ॥
स्फुरदावर्तनाभीकां नीलोत्पलविलोचनाम् । पुलिनोन्नतिसंपूर्णजघनां फेनसांशुकाम् ॥ ५५ ॥
तरङ्गभुजमध्यस्थचक्रवाकपयोधराम् । जलस्थलस्थजन्तूद्यच्चारुकूजितहंसकाम् ॥ ५६ ॥
महिषीं सिन्धुराजस्य मण्डितामिव भूषणैः । सुवर्णमुखरीं दिव्यां सरितं शबरात्मजः ॥ ५७ ॥
संवीक्ष्य मुमुदे धीरः सख्या सह विगाह्य ताम् । अपहाय परिश्रान्तिमभवन्मोदनिर्भरः ॥ ५८ ॥

सद्यः सुवर्णमुखरीसलिलावगाहाद्व्याधस्य दग्धमखिलं दुरितं बभूव ।
चेतश्च निर्मलमहो बहुपुण्यभाग्यकल्पद्रुमोऽप्यथ फलोन्मुखतामवाप ॥ ॥ ५९ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे धीरस्य सुवर्णमुखरीस्नानकथनं नाम सप्तविंशोऽध्यायः ॥

॥ अथाष्टाविंशोऽध्यायः ॥

श्रीअगस्त्यः ॥
तीरद्रुमफलं स्वादु भुक्त्वाथ सुहृदर्पितम् । बभूव तृप्तो मुदितो धीरः शान्तपरिश्रमः ॥ १ ॥

पश्यन्नभ्रंलिहान् वृक्षान् सुवर्णमुखरीतटे । बिभ्राणः सशरं चापं विचचार वनेचरः ॥ २ ॥
अथ श्रीकालहस्तीशसेवासंप्रीतचेतसाम् । आसीदप्सरसां तस्मिन् संभ्रमः शैलमूर्धनि ॥ ३ ॥
घनवीणारवोन्मिश्रो वेणुस्वरविचित्रितः । मन्द्रमर्दलनिर्ह्रादकृतमायूरकौतुकः ॥ ४ ॥
तानतारवबालापलीलाकोरकितद्रुमः । गण्डशैलशिलासारद्रवीकरणपण्डितः ॥ ५ ॥
कालहस्तीशभूषाहिराजराजानुमोदितः । संगीताडम्बरस्तासां व्यानशे दिक्षु सर्वशः ॥ ६ ॥
तेनाकृष्टमना धीरः सुहृदं प्राह सादरम् । परिमृष्टा मम श्रान्तिरपि शान्ता क्षुधा तृषा ॥ ७ ॥
सुवर्णमुखरीस्नानात्परिपूतोऽस्मि साम्प्रतम् । न्यस्तभारमिवाभाति प्रसन्न मम मानसम् ॥ ८ ॥
आपूरयति कोऽयं मे मुहुः शब्दोऽमृतैः श्रुतिम् । अवतीर्ण इव स्वर्गः शैलाग्रे किं न पश्यसि ॥
अथ तं प्राह गाढस्तु पितुस्ते मृगयान्तरे । मया सहागतेन प्रागिदमाकर्णितं तथा ॥ १० ॥
शिखरे शैलराजस्य दिव्या काचन देवता । शिखिन्यस्याः शिखी कश्चित्तन्तुधार्यस्ति पूजकः ॥११॥
सेचयित्वा जलैरेनां पत्राणि शिरसि क्षिपन् । दिशन्नास्येऽन्नकवलमस्या नित्यमतन्द्रितः ॥ १२ ॥
गच्छतीति श्रुतं ह्येषा किंवदन्ती महीयसी । इयमेकपदी तत्र सेवार्थं गच्छतां सखे ॥ १३ ॥
मधुमाक्षिकशब्दानुविधायी श्रूयते ध्वनिः । दिदृक्षा यदि तत्रापि गच्छावः प्रिय साम्प्रतम् ॥१४॥
तथेति धीरस्त्वरितं प्रस्थितः सुहृदा सह । आरुरोह गिरिश्रेष्ठं सोपानैः क्षुल्लकाश्मभिः ॥ १५ ॥
समाधिमिव योगीन्द्रः शनकैस्तं यमादिभिः । पार्श्वे परिणमद्वेणुपर्वान्तोद्वान्तमौक्तिकैः ॥ १६ ॥
समन्ततः शर्करिलामतिक्रम्य स वर्तनीम् । चरन्ति यत्र जीमूताः कलभा इव भेचकाः ॥ १७ ॥
अध्यारुरोह तां धीरः सबृहत्तदधित्यकाम् । ददर्श शैलशृङ्गाग्रे नमेरुवनमद्भुतम् ॥ १८ ॥
कृतमालवनोन्मिश्रमपि श्रीफलसंभृतम् । बिल्ववृक्षं तमुद्दिश्य गच्छन् व्याधोत्तमात्मजः ॥ १९ ॥
ददर्श सत्त्वान्यभितः शान्तवैराणि सङ्घशः । गच्छतस्तस्य पदवी सीमाबधिमगाहत ॥ २० ॥
मुनेः शिवप्रसदेन संसाराध्वाऽवधिं यथा । पदे पदेऽस्य पापानि कोटिजन्मार्जितान्यपि ॥ २१ ॥
प्रनष्टानि यतस्तस्मात्प्रससाद तरां मनः । ततो ददर्श फूत्कुर्वदुत्फणाहिफणाकृति ॥ २२ ॥
लिङ्गं माहेश्वरं दिव्यं प्रत्यङ्मुखमवस्थितम् । कृतोपहारं भक्तेन कृतमालस्रजाञ्चितम् ॥ २३ ॥
कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलम् । सकृद्दर्शनमात्रेण सर्वपापहरं परम् ॥ २४ ॥
सन्निधौ मुनिविन्यस्तपुष्पदूर्वातिलाक्षतम् । कपोलकषणासक्तमत्तेभमदवासितम् ॥ २५ ॥
वल्मीकाहिशिरोरत्नदीपाञ्चितदिगन्तरम् । दुकूलेनेव महता निर्मोकेण परीवृतम् ॥ २६ ॥
कस्तूरिकामृगीसङ्गकस्तूरीरसवासितम् । कालहस्तीश्वरं नाम कालमृत्युनिवारणम् ॥ २७ ॥
ऊर्णाफणीभराडाख्यमूर्णाहिस्तिफणाडितम् । बभूव मुदितो दृष्ट्वा योगीव ज्योतिरान्तरम् ॥ २८ ॥
ननाम दण्डवद्भूमौ प्रदक्षिणमथाचरन् । स्वामिन् मां रक्ष रक्षेति वदन्नञ्जलिमादधे ॥ २९ ॥
अभूद्रोमाञ्चिततनुरानन्दाश्रुपरिप्लुतः । भक्तिं दधार परमां शंभौ भवभयापहाम् ॥ ३० ॥
पश्यतो व्याधपुत्रस्य भगवन्तं महेश्वरम् । चक्रुश्चक्षुष्यवस्थानं सर्वाः करणवृत्तयः ॥ ३१ ॥

नवं नवमिवास्याभूल्लिङ्गं व्याधस्य शाङ्करम् । सिषेवे सादरं तस्माद्वयस्मरजातिमात्मनः ॥ ३२ ॥
पिबन्निव बहु प्रीत्या खादन्निव लिहन्निव । जिघ्रन्निव च संश्लिष्यन्नुक्तिमाकर्णयन्निव ॥ ३३ ॥
गृह्णन्निव करे शंभुं व्याधः स्ववशमानयत् । आलिलिङ्ग हरं वृत्तिर्व्याधपुत्रस्य मानसी ॥ ३४ ॥
जारिणीव दृढं भूयः प्रेयांसं प्रोषितागतम् । एतावन्तमहो देवमनिषेव्यातिवाहितम् ॥ ३५ ॥
कालं दुष्टमहं मन्ये वृथैवायुर्व्ययः कृतः । इतः प्रभृति नैवास्य त्यक्तव्यः सन्निधिर्मया ॥ ३६ ॥
कृतकृत्यो भविष्यामि कालहस्तीशसेवया । इति निश्चित्य मनसा सखायं प्रियमाह सः ॥ ३७ ॥
केन वा मूर्ध्नि देवस्य म्लानः पुष्पाञ्जलिः कृतः । उत्सार्यार्हं विधास्येऽस्य नवारग्वधमालिकाम् ॥
इमानि वन्यपुष्पाणि निपतन्ति कथं वृथा । इति धीरोक्तिमाकर्ण्य गाढस्तं प्राह विस्मितः ॥३९॥
पितुराखेटकाले ते दृष्टः कश्चिदिहागतः । तस्य मुष्टिमिताः केशा मौलिमध्ये दृढीकृताः ॥ ४० ॥
त्रिगुणैस्तन्तुभिः क्लृप्तं दामांसे वामतो वहन् । असावन्वहमभ्येत्य सुवर्णमुखरीजलैः ॥ ४१ ॥
आनीतैः कलशेनामुं मूर्ध्नि सिञ्चति देवताम् । नवानि बिल्वपत्राणि शम्याककुसुमानि च ॥४२॥
मौलौ पादे च निक्षिप्य मन्दं किमपि जल्पति । अग्रे स्थूलान्नकवलं कृत्वा हस्तं च दक्षिणम् ॥
दर्शयित्वा गृहीत्वाऽन्नं प्रत्यहं याति मन्दिरम् । हस्तस्पर्शं जलक्षेपं सहतेऽस्यैव देवता ॥ ४४ ॥
महतीयं न चास्माकं छायामपि सहिष्यते । तस्मात्त्वं दूरतस्तिष्ठ यदेकः स्वामिनः सुतः ॥४५॥
सख्युर्वाचं समाकर्ण्य धीरः प्राह स्मयन्निव । वनेचराणामस्माकमेतद्धि कुलदैवतम् ॥ ४६ ॥
अस्मद्विरिवने यस्माद्बहुसत्त्वाततस्ततः । सुहृत्तमं विधास्यामि त्वामिवामुं महेश्वरम् ॥ ४७ ॥
द्वित्रैरेव दिनैः पश्य भक्त्या किं किं न सिध्यति । सुवर्णमुखरीवारि सुलभं कुसुमं वने ॥ ४८ ॥
बहूनि मृगमांसानि कथं नाराध्यते शिवः । जन्मकर्मादि देवस्य प्रसादे नैव कारणम् ॥ ४९ ॥
साधनं भक्तिरेवास्मिन् ज्ञात्वा हीनोऽप्यहं प्रियः । रमते न मनस्तत्र सखे मे पितुरालये ॥ ५० ॥
यथात्रानन्दभरितं तस्मादत्र वसाम्यहम् । इत्युक्त्वा सन्निधिं प्राप्य साञ्जलिः स व्यजिज्ञपत् ॥ ५१
कथमेको निवससि वने दुष्टमृगान्विते । प्रभुस्त्वमसि लोकानां शैलाग्रे वर्तसे कथम् ॥ ५२ ॥
अप्यस्माकं परिजनो न ते कश्चिदिहापरः । अहमेव भविष्यामि दिवारात्रं च पार्श्वतः ॥ ५३ ॥
अङ्गीकुरुष्व मां देव दासमागः क्षमस्व मे । करोम्यञ्जलिमात्रं ते प्रसीद मयि शङ्कर ॥ ५४ ॥
एवमात्मार्पणं कृत्वा शबराधिपनन्दनः । सपर्यां शाङ्करीं कर्तुं तदारभ्योपचक्रमे ॥ ५५ ॥
शरैराच्छिद्य तस्यारात्तृणगुल्मलतादिकम् । दूरीचक्रे क्षणेनैव दुरितान्यपि भक्तितः ॥ ५६ ॥
मृगान्निहत्य बहुशो मृगयायामथानले । निष्टप्य चिन्तां महतीमवाप शबरात्मजः ॥ ५७ ॥
हन्त दूरे सरिद्वारि वने पुष्पाणि नान्तिके । कलशादि न मे किंचित्करिष्येऽर्चां कथं विभोः ॥
इति चिन्तयतस्तस्य प्रत्यभाद्बुद्धिरुत्तमा । एवमस्त्विति निश्चित्य स चक्रेऽयं महामनाः ॥ ५९ ॥
अनन्यसुकरं तद्धि श्रूयतां भक्तिसाहसम् । अभिषेकाम्बुकलशमतनोन्मुखमात्मनः ॥ ६० ॥
सोपानःप्रपदं चापि व्यधान्निर्माल्यशोधनीम् । दूराहृतानां पुष्पाणां भाजनं कैशिकान्तरम् ॥६१॥

हस्तं च दक्षिणं मेने नैवेद्यपलभाजनम् । अथ संवीक्ष्य पिशितमनलोच्छिन्नशोणितम् ॥ ६२ ॥
उद्धृत्य हेतिना कृत्वा फूत्कारैः स्पृश्यमूष्मलम् । इदं युक्तं किमीशस्य स्वादु पक्वं न वा भवेत् ॥
परीक्ष्य दास्ये देवाय नो चेद्द्रोहो भविष्यति । दष्ट्वा दन्तैस्ततो मांसं संपरीक्ष्य च जिह्वया ॥ ६४ ॥
यद्यत्स्वादुतमं मांसं मधुसिक्तं वनेचरः । शैलरम्भादलपुटे तत्तत्संजगृहे पृथक् ॥ ६५ ॥
सुवर्णमुखरीतोये निमज्याग्रेऽथ कैशिके । पत्रपुष्पाणि संगृह्य मुखे सञ्जगृहे जलम् ॥ ६६ ॥
वामेन स शरं चापमादाय निजपाणिना । अन्येन मांसपुटिकामनुप्रातिष्ठतेश्वरम् ॥ ६७ ॥
यत्रास्ते कालहस्तीशस्त्वरयाभ्येत्य तत्र सः । सोपानत्प्रपदाग्रेण भक्त्या निश्शंकमैश्वरे ॥ ६८ ॥
मौलौ निरस्तनिर्माल्ये गण्डूषजलधारया । अभिषिच्य निधायाग्रे मांसपत्रपुटं विभोः ॥ ६९ ॥
प्राक्षिपत्केशभारस्थं नतास्यः कुसुमोत्करम् । निदधावग्रतो मांसपुटिकां व्याधनन्दनः ॥ ७० ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे धीरचरित्रे श्रीकालहस्तीशसेवाकथनं नाम अष्टाविंशोऽध्यायः ॥

॥ अथैकोनत्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

निवेदितानि मांसानि नोपयुक्तानि किं मया । विचारयन्निति प्राह साञ्जलिः सन्निधौ हरम् ॥ १
भुङ्क्ष्व मांसमिदं स्वादु मार्गं मायूरमाप्लुतम् । मधुनेदं तु कापोतं गोधामांसमिदं प्रियम् ॥ २ ॥
ऐणेयं यदि वाराहं प्रियं चेदानयामि तत् । सुवर्णमुखरीमीनानिमान् पश्य घृतोपमान् ॥ ३ ॥
भुज्यतां कालहस्तीश शपे मयि दयां कुरु । यदि नाश्नासि देवेश नाश्नीयामप्यहं ध्रुवम् ॥ ४ ॥
ददामि वदने वा ते मधुसिक्तं महेश्वर । एवमस्विति तद्वक्त्रे मांसं किंचिदथार्पयत् ॥ ५ ॥
दयालुः कालहस्तीशस्तन्मांसं बुभुजे यदा । ददौ सर्वं तदा व्याधः स्वीचकार च शङ्करः ॥ ६ ॥
अथोत्थाय मुदा नृत्यन्निदमाह कृताञ्जलिः । प्रातर्भुक्तमिव स्वादु मांसं किं ते मयार्पितम् ॥ ७ ॥
व्याधवाक्यं निशम्याऽथ महाप्रासो महेश्वरः । ततोऽप्यधिकमेवेति शिरःकम्पादमोदत ॥ ८ ॥
विवक्षुर्व्याधवृत्तान्तमिव देवो दिवाकरः । वरुणस्यापराम्भोधौ ममज्ज ब्राह्मणोत्तमाः ॥ ९ ॥
बहिर्गतैरिवाघौघैस्तिमिरैर्विश्वमावृतम् । गृहीतस्तम्भिताहीन्द्रफणारत्नप्रदीपिते ॥ १० ॥
सन्निधौ निशि देवस्य तस्थौ निर्निद्र एव सः । चिकीर्षुरन्वहं पूजामेवमेव वनेचरः ॥ ११ ॥
अन्येद्युः प्रातरटवीं मृगयार्थमगाहत । **शिवकोशाभिधस्तस्य** शिवभक्तशिखामणिः ॥ १२ ॥
अर्चकोऽथ समागत्य मांसलिप्तं महेशितुः । पूतिगन्धि पुरारातेर्दृष्ट्वा लिङ्गं सवेदिकम् ॥ १३ ॥
दुःखेनैव विनिश्वस्य रुरोद पतितः क्षितौ । उच्चैःस्वरेण चुक्रोश व्याधैर्दुष्टैरिदं कृतम् ॥ १४ ॥
नरके निपतिष्यन्ति शिवद्रोहरता नराः । निरस्यामिषखण्डानि क्षालयित्वाऽसकृज्जलैः ॥ १५ ॥

पुण्याहप्रोक्षणं कृत्वा पूजयित्वा च पूर्ववत् । जगाम स्वालयं विप्रः शबरोऽथ समाययौ ॥ १६ ॥
अतीतः किं नु समयः क्षमस्व करुणानिधे । इति नत्वा यथापूर्वं कृत्वा निर्माल्यशोधनम् ॥ १७ ॥
स्वगण्डूषाभिषिक्तस्य मांसाहारं न्यवेदयत् । तथैव भोजयामास तच्छेषं बुभुजे पुनः ॥ १८ ॥
एवमर्चयतः शंभुं षड्रात्रं चात्यवर्तत । दूषितं प्रत्यहं मत्वा लिङ्गं संप्रोक्षणादिना ॥ १९ ॥
अर्चकः शोधयामास विचाराक्रान्तमानसः । वनदेवगृहीतं स्वं नागः श्रुत्वागतः सुतम् ॥ २० ॥
वैद्यैश्चकार भैषज्यं निराशः स्वालयं ययौ । प्रतिप्रायते शबरे ततः पितरि पक्कणम् ॥ २१ ॥
दीर्घरोगीव नीरोगः स बभूव वनेचरः । प्रतिबन्धविनिर्मुक्तो मुमुक्षुरिव शङ्करे ॥ २२ ॥
दधार परमां भक्तिं प्रीतिं कामीव योषिति । गन्धोदकाभिषेकस्तद्गण्डूषजलसेचनम् ॥ २३ ॥
सपादत्राणतत्पादप्रहारो मूर्ध्नि चान्वहम् । स्कन्दस्येव शिशोर्लीलाविन्यासोऽङ्घ्रेरुमापतेः ॥
भक्त्या परीक्षितं स्वादु वन्यं मांसं यदर्पितम् । सहस्रांशतुलां तस्य नैवाहुत्याध्वरं हविः ॥
माल्यं तत्केशविभ्रष्टं निर्दोषं हेमपुष्पवत् । सत्त्वानि विपिने निघ्नन् चरन् जक्षन् श्वसन् पिबन् ॥
न किंचिदन्यत्सस्मार महादेवाद्वनेचरः । वारिपूरितगर्भास्यं मांसपात्रधरं तथा ॥ २७ ॥
दक्षिणेन च हस्तेन वामेनेषुधनुर्धरम् । प्रसूनानि च पत्राणि दधानं कैशिकेन च ॥ २८ ॥
शिवार्चनार्थमायान्तं खेचराः प्रशशंसिरे । शिवकोशः परं तस्मिन्नर्चको द्वेषमादधे ॥ २९ ॥
शंकरस्तु परां तस्मिन् शबरे प्रीतिमातनोत् । अथैकदा द्विजः प्रातः पूजार्थं प्रागिवागतः ॥
ददर्श लिङ्गमीशस्य शबरे मृगयां गते । मांसकीकससंकीर्णं वसामन्त्रितमक्षिकम् ॥ ३१ ॥
काकगृध्राकुलोपान्तं श्वापदैः परितो वृतम् । दृष्ट्वारोदीद्बहुविधं कराग्रप्रहतोदरः ॥ ३२ ॥
देवस्थानमिदं पुण्यं सूनास्थानमिवाधुना । पापेन द्रोहिणा केन कृतमेवं दुरात्मना ॥ ३३ ॥
अपराधं कथं नित्यं सहसे शबरैः कृतम् । द्रोहिणस्ते विभो नष्टास्त्रिपुरान्तकमन्मथाः ॥ ३४ ॥
यैर्दूषितमिदं लिङ्गं न तेषां निष्कृतिः क्वचित् । किं करिष्ये क्व गच्छामि शैलाग्रात्पतनं वरम् ॥
मयार्चितं न पश्यामि पुष्पमन्यदिदं कुतः । हा हतोऽस्मि न मे मृत्युः किं पश्यसि महेश्वर ॥
न पश्यामि दुरात्मानं शिवलिङ्गविदूषकम् । गते मयि प्रतिदिनं लिङ्गं दूषयते खलः ॥ ३७ ॥
अद्य क्षान्तमिदं सर्वं श्वो भवेयं मृतो ध्रुवम् । इत्युक्त्वास्थीनि मांसानि समुत्सार्य विदूरतः ॥ ३८ ॥
संप्रोक्षणविधिं कृत्वा गन्धतैलादिलेपनात् । सुवर्णमुखरीतोयकलशीशतसेचनात् ॥ ३९ ॥
शतरुद्रीयमन्त्रेण पूजयित्वा महेश्वरम् । यथापूर्वं ययौ वेश्म न भुक्तिं विदधे शुचा ॥ ४० ॥
अथ स्वप्ने तमाहेशः शिवकोशं शिवद्विजम् । त्वत्तोऽप्यतितरां भक्त्या पूजकः शबरोऽस्ति मे ॥
मयि व्यावस्य सुदृढा वर्तते भक्तिरुत्तमा । तस्मात्प्रियतरो नान्यस्तद्द्वेषी तु ममाहितः ॥ ४२ ॥
परीक्षणीया यदि ते भक्तिस्तस्य महात्मनः । श्वो निगूढस्त्वमेकस्मिन्नाद्रुल्मे विलोकय ॥ ४३ ॥
इत्युक्त्वान्तर्धिमापाशु कालहस्तीश्वरो विभुः । अथार्चकः समुत्थाय भयात्पुलकितो निशि ॥ ४४ ॥
नैव निद्रामवापायं स्मारं स्मारं विभोर्वचः । शबरोऽपि यथापूर्वं पूजयामास जागरात् ॥ ४५ ॥

नीत्वा रात्रिं ययौ वन्यामाखेटायारुणोदये । द्विजोऽप्याजन्तुसंचारदर्शनात्प्राक् समुत्थितः ॥ ४६ ॥
आगत्य कालहस्तीशमर्चयित्वा सविस्मयः । उपान्तवटवृक्षाग्रशाखामारुह्य संस्थितः ॥ ४७ ॥
अतिक्रान्तेऽथ मध्याह्ने लम्बमाने दिवाकरे । निहत्य प्राणिनोऽनेकानादाय पिशितं बहु ॥ ४८ ॥
स्नातः सुवर्णमुखरीवारिसंपूरिताननः । मांसायुधकरः शंभोरन्तिके समदृश्यत ॥ ४९ ॥
द्रुतमागत्य पादाग्रात्कृत्वा निर्माल्यशोधनम् । गण्डूषपयसा मौलावभिषेकं विधाय च ॥ ५० ॥
क्षिपन् केशस्थितं पुष्पं पिशितानि न्यवेदयत् । यथापूर्वमभुञ्जानमिदमाह महेश्वरम् ॥ ५१ ॥
बिलम्बसे कथं देव मांसं मधुरसाप्लुतम् । भुङ्क्ष्वाद्य द्रुतमेवास्मि श्रान्तो दूराद्वनं गतः ॥ ५२ ॥
इत्युक्त्वा चिकुरान् स्वस्य दृष्टिमार्गनिरोधिनः । सन्नह्येशं भोजयितुं मांसहस्तोऽन्तिकं ययौ ॥
वामनेत्रं स्रवद्रक्तं समालोक्य स शांभवम् । हा हतोऽस्मीति शबरः पतन्मूर्च्छामवाप सः ॥ ५४ ॥
क्षणादुत्थाय विरुदन् ममार्ज रुधिरं दृशः । पुनश्च रुधिरं तस्मान्नयनादपतद्बहु ॥ ५५ ॥
गजदन्ताभिघाताद्वा मृगाणां वा खुराहतम् । देवदेव स्रवद्रक्तं तव वामविलोचनम् ॥ ५६ ॥
अर्चकापशदस्यागो महदस्ति न संशयः । अस्तु येनापि वा केन दृग्रोगस्ते न शाम्यति ॥ ५७ ॥
यावत्तावन्न भोक्ष्येऽहं ज्ञातमस्त्यौषधं च मे । इत्यरण्यादुपादाय विशल्यकरणीरसम् ॥ ५८ ॥
असिञ्चन्नयने शंभोर्दृग्विकारस्तथैव सः । व्याधोऽपि शूलिनश्चक्रे भैषज्यं विविधौषधैः ॥ ५९ ॥
न शशाम यदा तावदेवं चक्रे स निश्चयम् । शान्तिर्नेत्रव्रणस्यास्य स्यादित्यन्यामिषापणात् ॥
मम नेत्रार्पणादक्षिविकारः शान्तिमेष्यति । करिष्यामि तथैवाहं नान्यत्सिद्धौषधं भवेत् ॥ ६१ ॥
इत्युत्कृत्य शरेणाक्षि निदधे भगवद्दृशि । विकारः शम्भुनेत्रस्य शशाम मुमुदे च सः ॥ ६२ ॥
उपाजहार पिशितं दक्षिणाद्रक्तमीक्षणात् । धाराऽभवच्छंभोर्व्याधश्चिन्तामवाप हि ॥ ६३ ॥
न ते रोगो महादेव मम भक्तिं परीक्षसे । तेऽन्यदप्यक्षि दत्तं चेत्सपर्या श्वः कथं भवेत् ॥ ६४ ॥
किं वा श्वः पूजया देव दक्षिणाक्षि गृहाण मे । यथा कथंचित्त्वन्नेत्ररोगः स्यादलं मम ॥ ६५ ॥
इत्यर्पयिष्यन् व्याधेन्द्रो द्वितीयमपि लोचनम् । क्षणं विचारमगमल्लक्ष्यज्ञानं कथं न्विति ॥ ६६ ॥
ततो बुद्धिः समुत्पन्ना व्याधवंशशिखामणेः । चरणाङ्गुष्ठमीशस्य कृत्वा दक्षिणदक्पदे ॥ ६७ ॥
उन्मूलयिष्यन्नयनं निदधे शस्त्रमक्षिणि सः । आविर्भूय तदा दोर्भ्यां न्यरुणत्तं महेश्वरः ॥ ६८ ॥
मम नेत्रार्पकेत्यक्षि दर्शयन्निजपाणिना । आलिलिङ्गातिसौहार्दात्कालहस्तीश्वरो यदा ॥ ६९ ॥
ववर्षुः पुष्पवृष्टिं च खेचराः शबरोपरि । ददर्श वृषभारूढं सोमास्कन्दं महेश्वरम् ॥ ७० ॥
सेव्यमानपदाम्भोजं गणेन्द्रैरष्टषष्टिभिः । प्रणम्य शंभुं व्याधोऽभूत्त्रिनेत्रस्तदनुग्रहात् ॥ ७१ ॥
तमाश्लिष्य महादेवः प्राह गम्भीरया गिरा । मद्भक्त्या परिपूतस्य न जातिर्विघ्नकारिणी ॥ ७२ ॥
भवेन्मद्भक्तिशून्यस्य सन्न्यासोऽपि न सिद्धिदः । दत्ता स्थितिस्ते कैलासे किमन्यद्वाञ्छितं तव ॥
मम नेत्रार्पक ब्रूहि तुभ्यं दास्याम्यहं ध्रुवम् । इति सादरमीशेन श्रुत्वोक्तं वचनं द्विजाः ॥ ७४ ॥
न किंचिच्चकमे व्याधः प्रसादाच्च परं विभोः । सह तेनैव भगवान् ययौ कैलासमीश्वरः ॥ ७५ ॥

दत्त्वा स्वमांसनयने शबरोऽपि यस्मै दूरीचकार महतीमपि कालभीतिम् ।
बन्दे समस्तसुलभार्चितपादपद्मं तं चन्द्रशेखरमपारदयाम्बुराशिम् ॥ ७६ ॥
व्याधेन विहितां भक्तिं सुदृढां वीक्ष्य विस्मितः । शिवकोशस्ततो व्याधमस्तुवच्छङ्कराकृतिम् ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे नेत्रार्पकधीरनिषादसारूप्यमुक्तिर्नामैकोनत्रिंशोऽध्यायः ॥

॥ अथ त्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥
येन केनापि नियामात्पूजयन्ति महेश्वरम् । ते धन्याः शङ्करस्तेषामचिरेण प्रसीदति ॥ १ ॥
अस्मिन्नर्थे पुरावृत्तमितिहासं ब्रवीमि वः । यस्य श्रवणमात्रेण शिवे भक्तिः प्रजायते ॥ २ ॥
दक्षिणापथमध्येऽस्ति चोळभूमिविभूषणम् । **कलशीपुर**मित्याहुर्यदिह ब्राह्मणोत्तमाः ॥ ३ ॥
यत्र प्रीतो महादेवो मृकण्डुसुतपूजया । निहत्य कालं पादेन चक्रे तं चिरजीविनम् ॥ ४ ॥
चतुर्वेदविदां स्थानं तदासीदग्रजन्मनाम् । शिवार्चनारतातोद्यघण्टाध्वनिपवित्रितम् ॥ ५ ॥
तत्रासीद्ब्राह्मणः कश्चित्**कालनाथ** इतीरितः । वेदशास्त्रागमाम्भोधिपारदृश्वा गुरुः सताम् ॥ ६ ॥
स शास्त्रं सर्वमालोच्य कर्मब्रह्मविवित्सया । कथंचिन्निश्चयं चक्रे यथा न स्यात्पुनर्भवः ॥ ७ ॥
अविधाय विभोः पूजां न मे मुक्तिर्भविष्यति । शिवभक्त्या विना जन्तुर्मृत्युं नातितरिष्यति ॥ ८ ॥
तस्माद्बन्धनिवृत्त्यर्थं विधेयं गिरिशार्चनम् । नियतद्रव्यसंपत्त्या कया पूज्यो मया शिवः ॥ ९ ॥
केन सातिशयं भूयाच्छिवार्चनमिति द्विजः । परीक्ष्यागममर्माणि शिवे भक्तिं दृढां दधौ ॥ १० ॥
तस्य भार्या **वसुमती** नाम्नेन्दोरिव चन्द्रिका । तया सह द्विजः शंभोः पूजायां नियमं दधौ ॥ ११ ॥
द्रोणगुग्गुलुधूळीभिर्धूपं देवाय शंभवे । दिशामि प्रत्यहमिति यावज्जीवं व्रतं दधौ ॥ १२ ॥
तत्र तत्रार्जितैर्द्रव्यैर्धूपसाधनसंचयम् । कुर्वतो ब्रह्मपत्यस्य धूपैरगरुगन्धिभिः ॥ १३ ॥
शिवमर्चयतो नित्यमल्पगुर्वत्सरा दश । कलानाथवितीर्णेन धूपजालेन भूयसा ॥ १४ ॥
पूजाकाले पुरारातेः सर्वाश्चामोदिता दिशः । परीक्षितुमनास्तस्य भक्तिं परमपावनीम् ॥ १५ ॥
विघ्नं चकार सर्वत्र तस्य द्रव्यागमे शिवः । धनेष्वलभ्यमानेषु कलानाथो महामतिः ॥ १६ ॥
स्वभूषणानि विक्रीय नियमं पर्यपालयत् । कण्ठसूत्रस्थितं हेम विना भार्याविभूषणम् ॥ १७ ॥
विक्रीय प्रीणयामास शिवं गुग्गुलुधूपतः । धान्यक्षेत्रगृहादीनां विक्रयादपि गुग्गुलु ॥ १८ ॥
संपाद्य धूपयामास सन्निधिं चान्द्रशेखरम् । भार्या ह्यनशनात्पुत्राः कृशाङ्गास्तस्य जज्ञिरे ॥ १९ ॥
हसन्ति स्म जनाः शंभोः प्रसादः सुमहानिति । तथापि नात्यजद्धूपदानं धीरशिवाग्रतः ॥ २० ॥
अथैकस्मिन् दिने सर्वं नष्टं गुग्गुलु सञ्चितत् । नास्ति प्रसृतिमात्रं वा धान्यं तण्डुलमालये ॥ २१ ॥
यदा तदा कलानाथः प्राह भार्यां पतिव्रताम् । तवाहं साध्वि साहाय्यात्पूजानियमतत्परः ॥ २२ ॥

अस्म्येतत्क्षणपर्यन्तं केन स्यादद्य पूजनम् । इति भर्तृवचश्श्रुत्वा सती साप्युत्तरं ददौ ॥ २३ ॥
किमस्ति भवदज्ञातं भक्तिमीशः परीक्षते । अस्ति चेद्भविता धूपो नेदानीं कर्तुमर्हसि ॥ २४ ॥
पुत्रा द्वित्र्युपवासेन कृशाङ्गाश्चौदनार्थिनः । पाहीमांस्तण्डुलं क्रीत्वा माङ्गल्यमणिविक्रयात् ॥२५॥
स एव धर्मः परमोऽप्युपधर्माः परे स्मृताः । इति भर्तुर्ददौ हस्ते सूत्रमात्रधरा सती ॥ २६ ॥
माङ्गल्यहेम साध्वीनां भर्ता हि परदैवतम् । कलानाथस्तदादाय प्रीतोऽस्तु तव शङ्करः ॥ २७ ॥
इत्युक्त्वापणमासाद्य पत्न्या माङ्गल्यभूषणम् । विक्रीय तण्डुलं क्रेतुमुदयुङ्क द्विजो यदा ॥ २८ ॥
ददर्शापणमार्गेऽथ गुग्गुलुद्रोणिकागतिम् । विक्रीतं तद्गृहीत्वायमगत्वा स्वगृहं द्रुतम् ॥ २९ ॥
शंभोरालयमासाद्य नियमेनार्चनं व्यधात् । अतिक्रान्तेऽथ मध्याह्ने नापणादागतः पतिः ॥ ३० ॥
इति चिन्तापरा साध्वी सार्धं पुत्रैर्बुभुक्षुभिः । प्रतीक्षमाणाऽऽगमनं भर्तुरासायमङ्गना ॥ ३१ ॥
पश्येयं क्षुधितान् बालान् कथं वेति स नागतः । अर्धयामावधीशस्य स्थित्वा गुग्गुलुधूलिभिः ॥
आलयं सुरभीकुर्वन्नवर्तत नमन् भजन् । तदा दयालुनेशेन कालनाथो निरीक्षितः ॥ ३३ ॥
हर्षादनुगृहीतस्तद्भक्तिसन्तुष्टचेतसा । कुबेरः शिवसन्दिष्टः प्रदोषे तस्य वेश्मनि ॥ ३४ ॥
ववर्ष काञ्चनीं धारां मेरुतुल्यां समन्ततः । प्रत्यदृश्यन्त गोष्ठेषु भूयस्यः कामधेनवः ॥ ३५ ॥
महामूल्यानि पात्राणि दासीदासाः सहस्रशः । क्षौमाभरणकोट्यश्च धान्यकोशाः परश्शतम् ॥ ३६॥
पयःफेनोज्ज्वलाः शय्याश्चोद्यानं नन्दनोपमम् । आसीत्स्वप्ने तु तद्भार्यामाहैतानि तवेति च॥ ३७॥
बोधयित्वा स्वयं शंभुस्तत्रैवान्तरधीयत । अथ स्तुत्वा कलानाथस्त्रियामाप्राहरावधि ॥ ३८ ॥
महेश्वरं प्रणम्याशु प्रतस्थे मन्दिरं निजम् । स्वमिन्द्रभवनप्रख्यं वेश्म दृष्ट्वातिविस्मितः ॥ ३९ ॥
किमेतदिति पप्रच्छ दासीदासाभिवन्दितः । प्रत्याह सा भवत्पूजाप्रसन्नेन पिनाकिना ॥ ४० ॥
दत्तानि भुङ्क्ष्व भोग्यानि दुर्लभान्यपि दैवतैः । श्रीमाङ्गल्यमणिक्रीतगुग्गुल्वर्पणतोषितात् ॥४१॥
शंभोः प्राप्तं तवैश्वर्यं पश्य शंभोरनुग्रहम् । इति भार्यां वदन् धीरः सोऽन्नदानपरोऽभवत् ॥ ४२ ॥
अर्चयामास हरवच्छिवभक्तान् समागतान् । गृहक्षेत्रान्नवसनवाहनाभरणादिभिः ॥ ४३ ॥
द्विगुणं धूपमीशस्य चक्रे गुग्गुलुधूलिभिः । शृणुतान्यत्प्रवक्ष्यामि कलशीपुरपश्चिमे ॥ ४४ ॥
श्रीतालमूलनगरे लिङ्गमस्ति महेशितुः । अत्युन्नतमतिस्थूलमर्चयामास ताटका ॥ ४५ ॥
पूजामध्येऽपराह्णेति यद्यदङ्गं मम क्षणात् । छिनद्मि तत्तदसिनेत्येव नियमसंयुता ॥ ४६ ॥
कुर्वन्त्याः प्रत्यहं पूजां राक्षस्या भक्तिशोधनम् । कुर्वन् शंभुर्ध्यधादेनां अर्चयन्तीं कदाचन॥४७॥
स्रस्तावलम्बसन्नद्धनीवीबन्धाम्बराञ्चलाम् । पुष्पहस्ताथ सा बाहुजानुभ्यां परिगृह्य तत् ॥ ४८ ॥
कथमुन्नतलिङ्गस्य भुजावुद्धृत्य पूजनम् । करिष्ये यदि वस्त्रं मे पूजामध्ये पतिष्यति ॥ ४९ ॥
छिन्ने मध्येऽथ वा पश्चात्कथं पुष्पाञ्जलिर्भवेत् । इति चिन्तान्वितायां तु खिन्नायां राक्षसस्त्रियाम् ॥
आत्मार्चनोत्सुकायां च ताटकायां सदाशिवः । कृपयामीयमानस्रमकरोल्लिङ्गमीश्वरः ॥ ५१ ॥

तल्लिङ्गोन्नमनं कर्तुं चोलराट् कश्चिदेकदा । समुद्योगं व्यधात्सद्यस्तेनानीताश्च सैनिकाः ॥ ५२ ॥
बहवो मिळितास्तत्र नानादेशान्तरागताः । जना राजान्वहं विप्रान् भोजयामास लक्षशः ॥५३॥
आकृष्योन्नमनं मर्त्यैर्यत्नात्कर्तुं न शक्यते । यदा तदापरं यत्नं चोळेन्द्रः स चकार ह ॥ ५४ ॥
गजद्वादशसाहस्रहस्ताग्राकृष्टदामभिः । अप्याकृष्टमिदं लिङ्गं नासीदुन्नमितं यदा ॥ ५५ ॥
उपोषितश्चोळनृपश्चिरं चिन्तामवाप हि । अथ विप्रा नृपं प्रोचुः कलानाथस्त्वयार्चितः ॥ ५६ ॥
यद्याहूतस्तदा नूनमुपायं स विधास्यति । स्वयमागत्य चोळेन्द्रः प्रार्थयामास तं द्विजम् ॥ ५७ ॥
स तथेति समाहूतः स्थानं तत्प्राप शांभवम् । आभुग्नं लिङ्गमालोक्य बहुधा विहितस्तवः ॥५८॥
स्नातः कृतजपः शुद्धो भस्मरुद्राक्षभूषितः । वक्रत्वं परिहृत्य त्वमवक्रत्वं भजेति तम् ॥ ५९ ॥
प्रार्थयामास देवेशं न ययावुन्नतिं यदा । निवार्य लौकिकोपायानुत्सार्य च बहिर्जनान् ॥ ६० ॥
स्वकण्ठे शिवलिङ्गे च कृत्वैकं दाम साञ्जलिः । समीकरिष्यन्नित्याह वक्रतेयं कुतस्तव ॥ ६१ ॥
समो भव महादेव नो चेन्मे मरणं ध्रुवम् । इति ब्रुवन् शिवस्याग्रे स्वप्राणेषु निराशयः ॥ ६२ ॥
वक्त्रक्रकचमूलाग्रे प्रोतमार्दवतन्तुना । आवेष्टय लिङ्गं कण्ठं स्वमवकुण्ठयायुधास्यतः ॥ ६३ ॥
चकर्ष भक्त्या बलवान् भावयन् शङ्करं हृदि । तदा कृत्तगळार्धोऽभूत्तल्लिङ्गं न समीकृतम् ॥ ६४ ॥
तदा गौरी शिवं प्राह दयाळो भक्तवत्सल । त्यक्त्वा त्वमेतद्वक्रत्वं पालयैनं न चेदयम् ॥ ६५ ॥
मरिष्यति महादेवेत्युक्तः प्राह भयं न हि । अस्यायुधस्य धारेयं न गतान्तर्गळावधि ॥ ६६ ॥
इति ब्रुवन् चकार स्वं लिङ्गमुन्नमितं शिवः । कण्ठस्थं क्रकचच्छेदव्रणं तत्क्षणतो गतम् ॥ ६७ ॥
एतदद्भुतमालोक्य सर्वे मुमुदिरे जनाः । चोळेन्द्रः प्रणमन् पादे लिङ्गं वीक्ष्य समीकृतम् ॥ ६८ ॥
काङ्क्षितं किं वदेत्याह कलानाथं द्विजोत्तमम् । अभिषेकजलाधारघटानयनकारिणः ॥ ६९ ॥
गजद्वादशसाहस्रैर्ब्राह्मणांस्तस्य शासनात् । विदधे देवदेवस्य चोळेन्द्रश्चातिविस्मितः ॥ ७० ॥
दिवि दुन्दुभयो नेदुः पुष्पाणि ववृषुः सुराः । प्रशशंसुश्च तत्कर्म खेचराश्चारणैः सह ॥ ७१ ॥
यथापूर्वं कलानाथः स्वपदं प्राप्य पूजयन् । शंभुं गुग्गुलुधूपेन देहान्ते मुक्तिमाप्तवान् ॥ ७२ ॥

श्रीमत्कलानाथचरित्रमेतत्पठन्ति शृण्वन्ति च ये मुनीन्द्राः ।
आयुः श्रियं भुक्तिमपीह शंभुर्मुक्तिं च तेषां भगवान् ददाति ॥ ७३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कलानाथमुक्तिप्राप्तिर्नाम त्रिंशोऽध्यायः ॥

॥ अथैकत्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

सन्ति लोके महाभागा भक्तापेक्षितदानतः । अवाप्ता दुर्लभां मुक्तिं प्रसन्नात्पार्वतीपतेः ॥ १ ॥

माहेश्वरा वदन्तीममितिहासं महाद्भुतम् । श्रवणाद्यस्य पापानि विलयं यान्ति देहिनाम् ॥ २ ॥
आस्पदं संपदामस्ति श्रीमत्कञ्चनदीपुरम् । षडङ्गवेदविदुषामास्पदं तद्द्विजन्मनाम् ॥ ३ ॥
बालार्ककरसंफुल्लपद्मकल्हारवासितैः । सरःसमुद्भवैरभितः संवृतं कुसुमाकरैः ॥ ४ ॥
उद्यानैरुन्मिषन्मत्तमधुव्रतकळस्वनैः । वीथीविहारविश्रान्तदन्तिदानाधिवासितम् ॥ ५ ॥
नृत्यज्जातितुरङ्गाङ्घ्रिसंक्षुण्णोदरमन्दुरम् । कृशाङ्गीजनसङ्गीतद्रुतसोपानवापिकम् ॥ ६ ॥
यायजूकमखारब्धशालाशतसमुज्ज्वलम् । प्रशान्तहरिणोपान्तमठार्चितमुनिव्रजम् ॥ ७ ॥
शिवभक्तद्विजाधीतशतरुद्रीयनादितम् । कर्मकाण्डब्रह्मकाण्डवादिमन्दिरशारिकम् ॥ ८ ॥
दिवः प्रतिनिधीभूतं चतुर्वर्णनिषेवितम् । यत्र संपूजितो भक्तैः सन्निधत्ते सदा शिवः ॥ ९ ॥
तत्रासीदुत्तमो राजा महेन्द्रसमविक्रमः । यस्य न्यायार्जितं द्रव्यं स्पर्धते मेरुणा समम् ॥ १० ॥
नित्यान्नदाननिरतो विख्यातो दिक्षु सर्वतः । मानविक्रमशालित्वान्मानविक्रमनामतः ॥ ११ ॥
प्रजाः स पालयामास पिता पुत्रानिवौरसान् । प्रतिजज्ञे स भूपालः शिवभक्तेष्टपूरणम् ॥ १२ ॥
अपि प्राणान् परित्यज्य करोमीति व्रतं तथा । प्राणपर्यन्तदानेऽपि भक्तेभ्यस्तन्मतिः स्थिरा ॥
को वानेनार्चितो राज्ञा शिवभक्तो न भूतले । भार्या कलावती तस्य भानोरिव सुवर्चला ॥१४॥
तयोर्बभूव दाम्पत्यं रतिमन्मथयोरिव । ऐश्वर्ये वर्तमानेऽपि महति स्मयवर्जितः ॥ १५ ॥
न बभूव तयोः पुत्रः ततश्चिन्तापरो नृपः । भार्यया सह देवेशमपत्यार्थं महेश्वरम् ॥ १६ ॥
उपास्त तेन सन्तुष्टः प्राह तं चन्द्रशेखरः । नास्मिन् जन्मनि ते पुत्रः कन्या काचिद्भविष्यति॥१७॥
इत्युक्त्वान्तर्हिते शम्भौ मुदितौ तौ बभूवतुः । गते नातिचिरे काले कन्या काचिदजायत ॥१८॥
नष्टेव दृष्टिरन्धस्य जाता शंभोरनुग्रहात् । जातकर्म चकारास्या मुदितो मानविक्रमः ॥ १९ ॥
षोडशे दिवसे नाम सुकेशीति व्यधत्त सः । माणिक्यमञ्चमध्यस्थशयनोत्तमशायिनी ॥ २० ॥
दिने दिने सा ववृधे चान्द्री रेखा यथोदिता । कुटिलालकसंवीतं निटिलात्तललन्तिकम् ॥२१॥
चटुलेक्षणमुन्मीलदन्तमालोक्य तन्मुखम् । अभ्यनन्दन्महीपालो निधिं दृष्ट्वेव निर्धनः ॥ २२ ॥
घनसाररजस्सान्द्रे स्वाङ्गणे कृतचङ्क्रमाम् । जानुभ्यामपि बाहुभ्यां निर्निमेषमुदैक्षत ॥ २३ ॥
धूलीकेलिपरा बाला धूसरालकजालका । स्फुरदेकावळीशिञ्जत्काञ्चीनूपुरकिङ्किणिः ॥ २४ ॥
सूक्ष्मवस्त्रद्वयधरा तरलायतलोचना । विस्मृताहारमवहद्विहाररसिकं मनः ॥ २५ ॥
कुबेराक्षिभिरप्येषा पाञ्चालीद्वन्द्वकन्दुकैः । चिक्रीड सायं च सखी नयनाच्छादनोद्यता ॥ २६ ॥
पुनः पुनरपि स्रस्तकबरीसंवृताननम् । क्रीडान्तरेषु बालायाः स्रस्तमुद्वान्तहल्लकम् ॥ २७ ॥
हिन्तालस्तबकाकारं कुटिलं कबरीभरम् । जना विलोक्य नगरे विस्मयं परमं ययुः ॥ २८ ॥
मुकुरान्तरमात्रं तदावृत्योर्ध्वं मुखाम्बुजम् । प्रवृद्धः कबरीभारश्चन्द्रोपरि घनो यथा ॥ २९ ॥
वर्धमाना गृहे तस्य मेरौ हेमलतेव सा । अतीतबाल्यावस्थां तामासन्नकुसुमोदयाम् ॥ ३० ॥

अलंचक्रेऽथ तारुण्यं बालामव्याजसुन्दरीम् । यथा मणिं महामूल्यं शाणोपलनिघर्षणम् ॥ ३१ ॥
मरालमहिलाध्येयसौकुमार्यगतिश्रियम् । नखप्रभासमासक्तपरभागाङ्घ्रिपङ्कजाम् ॥ ३२ ॥
शालिगर्भसमोद्वृत्तजङ्घां निस्तुलजानुकाम् । रम्भाप्रकाण्डस्निग्धोरूं पत्रावलिविभूषिताम् ॥ ३३ ॥
मेरुकान्तारतटिनीपुलिनारोहमन्थराम् । मनोभवरथाश्लिष्टचक्रचारुनितम्बिनीम् ॥ ३४ ॥
सदसत्संशयाधारमध्यां वटदलोदरीम् । स्तनाद्रिचरतारुण्यद्विपान्धूरोमराजिकाम् ॥ ३५ ॥
वलित्रयप्रभाधूतनिकषस्वर्णरेखिकाम् । अहिनिर्मोकधवलसंव्यानस्थगितोरसम् ॥ ३६ ॥
स्निग्धपल्लवकल्पद्रुशाखासमभुजद्वयाम् । कण्ठनालपराभूतपाञ्चजन्यमदश्रियम् ॥ ३७ ॥
उन्नमन्नासिकाधूततिलपुष्पमदोदयाम् । बिम्बाधरान्तविश्रान्तमन्दस्मितमनोहराम् ॥ ३८ ॥
लावण्यलहरीचारुविहरन्मीनलोचनाम् । लावण्यामृतसन्दोहसमानरदनत्विषम् ॥ ३९ ॥
कपोलश्रीजितानङ्गरतिविभ्रमदर्पणाम् । विश्रान्तयमुनावीचीभ्रूविभ्रमविमोहिनीम् ॥ ४० ॥
चतुर्थीचन्द्रसश्रीकललाटतिलकोज्ज्वलाम् । कर्णाभरणमाणिक्यमयूखालंकृताळकाम् ॥ ४१ ॥
अंशुकाडम्बराक्षिप्तकिंशुकप्रसवप्रभाम् । मञ्जीरमेखलाहारग्रैवेयकटकाङ्गदैः ॥ ४२ ॥
नासामौक्तिकताटङ्कचूडामणिविभूषणैः । भूषितां मान्मथीं मूर्तामिन्द्रजालकलामिव ॥ ४३ ॥
कलालापसुधाधूतगन्धर्वातोद्यतन्त्रिकाम् । तां दातुं चक्रमे कन्यां कलिकामाय भूपतिः ॥ ४४ ॥
लग्नं शुभं विनिश्चित्य नगरीं समघोषयत् । आहूता बान्धवास्तेन समवेतास्तदालये ॥ ४५ ॥
राजानश्चाययुः सर्वे नानोपायनपाणयः । व्याप्तशे नगरं सर्वं धूपः कालागरूद्भवः ॥ ४६ ॥
दिशो मुखरयांचक्रुर्वादित्राणि समन्ततः । तोरणैर्भूषिता वीथ्यः सिन्धुगाङ्गैरिवोर्मिभिः ॥ ४७ ॥
अभ्यनन्दन् परिजनास्तदुद्वाहमहोत्सवम् । ततः सन्निहिते लग्ने कलिकामो विभूषितः ॥ ४८ ॥
स्वबन्धुभिर्गजारूढो ययौ राजनिवेशनम् । प्रत्युज्जगाम राजापि कन्यामादाय भूषिताम् ॥ ४९ ॥
जनान् स पूजयामास वस्त्राभरणचन्दनैः । शङ्खतूर्यमृदङ्गानां नादो व्योम्नि व्यजृंभत ॥ ५० ॥
कुलाङ्गनाकरोन्मुक्तलाजपुष्पनिरन्तराम् । विवाहवेदिकां तत्र कलिकामो विवेश ह ॥ ५१ ॥
एकासनस्थितौ वीक्ष्य बान्धवास्तौ वधूवरौ । दाम्पत्यमेतयोरासीद्रतिमन्मथयोरिव ॥ ५२ ॥
एवं संभाषमाणास्ते चक्षुःप्रीतिं परां दधुः । तदा माहेश्वरः कश्चित्प्रत्यदृश्यत संसदि ॥ ५३ ॥
आपादमस्तकं शुभ्रभस्मनालिप्तविग्रहः । केशदामपरिष्वक्तवराटीशतसंवृतः ॥ ५४ ॥
कर्णद्वितयसंस्यूतशुद्धस्फटिककुण्डलः । कपालपात्रीं बिभ्राणः परशुं च करे परे ॥ ५५ ॥
किञ्चिदापूरणीयान्तां बिभ्रत्पञ्चवटीमपि । कटिसूत्रफणिप्रोतकन्थाकौपीनभीषणः ॥ ५६ ॥
आपीनांसो महाबाहुर्मांसलो रक्तलोचनः । भाषया भीषयन् सर्वानुपागान्मानविक्रमम् ॥ ५७ ॥
अथ संपूजितस्तेन राज्ञा दत्तासने स्थितः । जनानां संभ्रमः कोऽयमिति पप्रच्छ भूपतिम् ॥ ५८ ॥
सुप्रीतश्च महीपालस्तापसं प्राह साञ्जलिः । सुकेशी मम कन्येयं कलिकामाय दीयते ॥ ५९ ॥

दिष्ट्या मुहूर्तसमये संप्राप्तः किमपेक्षितम् । अथ राजवचः श्रुत्वा कम्पयन् मौलिमात्मनः ॥ ६० ॥
माहेश्वरस्तं प्रत्याह दीयते चेदथोच्यते । प्रतिज्ञाते नृपतिना तथेत्याह स तापसः ॥ ६१ ॥
मद्वाक्यं शृणु मा कार्षीरमर्षं मानविक्रम । असंपूर्णामिमां पश्य प्रियां पञ्चवटीं मम ॥ ६२ ॥
विलूय कन्याकबरी दीयतामविलम्बितम् । कोपो भवति मे नूनं यदीह त्वं विलम्बसे ॥ ६३ ॥
तदाकर्ण्य जनाः सर्वे कर्णविन्यस्तपाणयः । हन्त हन्तेति जगदुश्चुक्षुभे न महीपतिः ॥ ६४ ॥
माहेश्वरः पुनः प्राह दीयते कबरी न चेत् । त्वत्सुतायास्त्वया राजन्नधुना गम्यते मया ॥ ६५ ॥
इत्युत्थातुं कृतोद्योगमुपवेश्य वरासने । वन्दस्व तापसमिति प्राह कन्यां निजां नृपः ॥ ६६ ॥
वदनं चापि भार्यायाः कथमित्यवलोकयन् । उत्तिष्ठन्त्या नमस्कृत्य सुकेश्याः कबरीभरम् ॥ ६७ ॥
विलूयामूलमुत्फुल्लहल्लकामोदवासितम् । निजक्षुरिकया धीरो निश्शङ्कं शांकरप्रियः ॥ ६८ ॥
मायामाहेश्वरायादात्सकेशः स तिरोदधे । कलिकामस्य वदने यावत्कार्ष्ण्यं न दृश्यते ॥ ६९ ॥
तावत्स एव धर्म्मिष्ठो राजपुत्र्या व्यवर्धत । देवोऽपि वृषभारूढो नृपतेरग्रतोऽभवत् ॥ ७० ॥
शतशः प्रणनामेशं भीतिमान् स महीपतिः । कलिकामोऽपि तां कन्यामुद्वाह्येश्वरशासनात् ॥
प्रीतिमाप परामिन्द्रः पुलोमतनयामिव । परीक्षितोऽसि राजंस्त्वं दृढभक्तिर्यतो मयि ॥ ७२ ॥
दत्त्वा मुक्तिरितीशोऽपि तेनाप रजताचलम् ॥

स्वकालपाशेन सहावधूय भक्त्या तनूजाघनकेशपाशम् ।
राज्ञे ददानाय पिनाकपाणिर्दत्ताभयः पातु भवापदो नः ॥ ७३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मानविक्रमभूपालमुक्तिदानं नाम एकत्रिंशोऽध्यायः ॥

॥ अथ द्वात्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

मुक्त्युपायेऽतिसुलभे विना यत्नेन देहिनः । यतन्ते दुर्लभेऽन्यत्र साहसं किमतः परम् ॥ १ ॥
द्रव्यदेशक्रियाकालमन्त्रकर्त्रादिशुद्धयः । क्व यज्ञहेतवः क्वायं विषयव्यापृतो जनः ॥ २ ॥
क्व नु वैराग्यनिष्ठायाः सीमा ब्रह्मादिदुर्लभा । क्व नु वेदान्तविज्ञानं तत्साध्यं क्वायमल्पधीः ॥ ३ ॥
तस्मादन्यत्परित्यज्य विशिष्य च कलौ युगे । भक्तिरेव महादेवे कर्तव्या मुक्तिमिच्छता ॥ ४ ॥
पूजनीयः सदा शंभुः कालकर्मभयापहः । अल्पेशलब्धद्रव्येण प्रसीदत्यर्चितो विभुः ॥ ५ ॥
लिङ्गार्थं सुलभं नद्यां सिकतादिसुनिर्मलम् । जलदूर्वादिविपिने कर्तव्यः सकृदञ्जलिः ॥ ६ ॥
एतत्कर्तुमशक्तस्य ज्ञानं चेत्सुलभं भवेत् । आकाशचन्द्रग्रहणं शिशोश्च सुकरं भवेत् ॥ ७ ॥
अपि शाकान्नियमतो भक्त्या शंभोः समर्पयन् । यो वा को वा विमुच्येत संसारात्सत्यमुच्यते ॥ ८ ॥
अस्मिन्नर्थे पुरा वृत्तमितिहासं ब्रवीमि वः । शृणुत श्रद्धया विप्रा भक्तमाहात्म्यमुत्तमम् ॥ ९ ॥

अस्ति शालिसहोद्भूतैरपि कान्तारकोद्भवैः । मौक्तिकैः सान्द्रकेदारो देशश्चोळेन्द्रपालितः ॥ १० ॥
सूर्याश्वखुरनिर्भिन्ननालिकेरफलाम्भसाम् । निःष्यन्दैर्यस्त्वविच्छिन्नैर्नदीमातृकतां गतः ॥ ११ ॥
कावेरीतीरपर्यन्ते तत्रास्ति च पुरं महत् । चतुर्वर्णाश्रमयुतं नामतः कर्णमङ्गलम् ॥ १२ ॥
अस्त्येकः शङ्कुकुलायनामा गाङ्गेयवंशभूः । हालिको दिक्षु विख्यातः शिवभक्तार्चने रतः ॥१३॥
एतदीयगृहस्यारादस्ति किंचिच्छिवस्थलम् । तत्क्रोशद्वयमानस्थं तन्निवासिनि शंकरे ॥ १४ ॥
उवाहैव परां भक्तिं स बाल्येऽनन्यदुर्लभाम् । तस्य भक्तिमती नाम्ना भार्या तुल्यान्वयाभवत् ॥
तया सह प्रतिदिनं तमेव हि महेश्वरम् । नत्वा नियमनैवेद्यं दत्वा भुङ्क्ते निशामुखे ॥ १६ ॥

ऋषयः ॥

किं वा नियमनैवेद्यं शकुलादायकल्पितम् । वदैतत्कुम्भयोने नः प्रीतो येन महेश्वरः ॥ १७ ॥

श्रीअगस्त्यः ॥

नवीनं शालिसंभूतं शुभ्रं तण्डुलमक्षतम् । संपाद्य स्वादु शाकेन सह चूतशलाटुकम् ॥ १८ ॥
महानसस्थितैः पाकं कारयित्वा द्विजोत्तमैः । शूद्रत्वात्प्रच्छदपटाद्बहिः स्थित्वा महेशितुः ॥ १९ ॥
निवेदयित्वा नैवेद्यं सशाकाम्रशलाटुकम् । भुक्तं चेद्याति नो चेत्स्वं हेत्वा कण्ठं छिनत्ति सः ॥२०॥
तत्प्राणभीत्या देवोऽपि तेन दत्तोपदंशकम् । खादत्याम्रशलाटुं स विवृण्वन् खादनध्वनिम् ॥२१॥
सोऽपि ज्ञात्वा तदारभ्य शङ्कुलादायकोऽन्वहम् । यावत्तच्छाकिनीमिश्रमन्नमत्ति सदाशिवः ॥
यावदाश्रूयते चूतशलाट्वास्वादनध्वनिः । तावत्स्थित्वा भुक्तशेषं गृहीत्वा याति मन्दिरम् ॥ २३ ॥
प्रयच्छति शिवायेति कृत्वा नित्यं यथा व्रतम् । कारयत्यभिषेकं च विशेषदिवसे सति ॥ २४ ॥
तस्यैवं वर्तमानस्य गताः षोडश वत्सराः । तस्य भक्तिपरीक्षार्थमासीत्कौतुकवान् हरः ॥ २५ ॥
महामारीप्रकोपेन नष्टं गोधनमुत्तमम् । सस्यानि तस्य नष्टानि ह्यनावृष्ट्या च मन्दिरम् ॥ २६ ॥
सधान्यकोशं सधनं वह्निदग्धं क्षणादभूत् । तथापि चुक्षुभे नैव स भक्तः सह भार्यया ॥ २७ ॥
वेतनात्तेन धान्येन पूजां शंभोरचीकरत् । तस्याप्यभावे क्षामत्वात्कृत्वा कूपमगाधकम् ॥ २८ ॥
जलयन्त्रोद्धृतोत्सृष्टतोयैरपि दिने दिने । वर्धयामास कलमं केदारेष्वाफलोदयात् ॥ २९ ॥
कोद्रवैश्चापि गोधूमैः श्यामाकैश्च कुलुत्थकैः । कुल्माषैर्जीवनोपायं विधाय सह भार्यया ॥ ३० ॥
वर्तमानस्य भक्तस्य गौरीरमणशासनात् । कर्तुं नियमनैवेद्यं सुलभाः शालयोऽभवन् ॥ ३१ ॥
तेन तौ दंपती वृत्तिं कृत्वा कृष्यन्तरार्जितैः । शालिभिः शङ्करस्यैवं नियमार्चां वितेनतुः ॥ ३२ ॥
सोमवारे दिने कापि शङ्कुलादायनामकः । गव्यानि पञ्चतैलं च नारिकेलफलानि ॥ ३३ ॥
कृत्वाभिषेकद्रव्याणि भार्यायाः शिरसि स्वयम् । शालितण्डुलमुद्वृक्तशाकं चूतशलाटुकम् ॥ ३४ ॥
वहन् मूर्ध्नि महेशस्य पूजार्थं सायुधो ययौ । भक्तिमत्यक्षमा वोढुं पश्चान्मन्दमुपागमत् ॥ ३५ ॥

झडिल्यायाहि हे भद्रे दृश्यते गोपुरं विभोः । इति किंचिद्विवृत्तास्यो भूत्वाहूय कुटुम्बिनीम् ॥३६॥
गन्तुमैच्छत्तदा ग्राव्णि पुरस्तादस्खलत्पदम् । मृत्पात्रपुटिका मूर्ध्नो न्यपतद्भुवि तण्डुलाः ॥ ३७ ॥
सरक्तशाका विविशुः सहचूतशलाटुकाः । निदाघातपसंशुष्यान्निर्भिन्नावनिरन्ध्रके ॥ ३८ ॥
मरुभूमौ च कान्तौर क्वापि मार्गे महीसुराः । खिन्नस्तदा विनिश्चस्य व्रतभङ्गं विचिन्तयन् ॥ ३९ ॥
स्मृत्वेशं शङ्कुलादायः स्वयं निश्चयमाददे । ममास्तु मरणं श्रेयो नन्वस्माद्व्रतभङ्गतः ॥ ४० ॥
क्षणं ध्यात्वा शिवं कण्ठे शङ्कुलां तां निवेश्य सः । न्यकृन्तत यदा कण्ठं शंभुराविरभूत्तदा ॥ ४१ ॥
तस्माद्रन्ध्रात्क्षणेनैव चन्द्रकोटिसमप्रभः । तावन्तस्तण्डुलाः शाकस्फूर्जच्चूतशलाटुकाः ॥ ४२ ॥
दर्शिताः शंभुना वक्त्रे कुर्वतास्वादनध्वनिम् । कृपावता महेशेन तद्गलाद्गृहतायुधम् ॥ ४३ ॥
वृषभारूढमीशानं दंपत्योः सेवमानयोः । असकृन्न्यपतन्मौळौ दिव्याः कुसुमवृष्टयः ॥ ४४ ॥
सायुज्यमुक्तिं दम्पत्योर्दत्वा देवो महेश्वरः । पश्यतां सर्वदेवानां कैलासशिखरं ययौ ॥ ४५ ॥
यत्राविरासीद्भगवान् जटाबद्धार्धचन्द्रमाः । यत्र श्वभ्रे लिङ्गरूपी मूर्तिमानभयप्रदः ॥ ४६ ॥
तण्डुलश्रेणिका यत्र सशाकाम्रशलाटुकाः । यत्र गर्तेऽपतंस्तत्र तन्नामाभून्महीसुराः ॥ ४७ ॥
तदा प्रभृति तत्क्षेत्रं तण्डुलश्रेणिकापुरम् । अद्याप्यत्यन्नमन्नीशः सशाकाम्रशलाटुकम् ॥ ४८ ॥
तस्मादेतस्य महिमा वक्तुं वाचामगोचरः ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शङ्कुलादायमुक्तिप्राप्तिर्नाम द्वात्रिंशोऽध्यायः ॥

॥ अथ त्रयस्त्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥
सपर्यां शाङ्करीं कर्तुमशक्ता ये मुमुक्षवः । नामसङ्कीर्तनं शंभोस्तेषां मोक्षैकसाधनम् ॥ १ ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् । सनकाद्या महापुण्यमयत्वान्मुक्तिसिद्धिदम् ॥ २ ॥
अस्ति श्रीचोळराजेन्द्रकोशवृद्धिकरो महान् । श्रीमान् जनपदः शंभोः स्थानैर्दीक्षु विभूषितः॥ ३ ॥
कवेरकन्यका यत्र बालकानिव पादपान् । पुष्णाति पयसा नित्यं पुष्पारामशतैः सह ॥ ४ ॥
कदळीदळगर्भेषु वान्तं वारि बलाहकैः । घनीभावं गतं याति दिव्यकर्पूरसारताम् ॥ ५ ॥
यत्र क्रमुकराजद्रुस्तबकामोदवीचिषु । क्रीडतां मत्तभृङ्गानां झङ्कारैर्मुखरा दिशः ॥ ६ ॥
खपन्ति वापीनळिनीषु हंसाश्चूतप्रवाळेषु पिकाश्च यत्र ।
विलासिनीकुन्तळगर्भशय्यामध्येषु मत्तभ्रमरा रमन्ते ॥ ७ ॥
मङ्गळाख्यपुरं तत्र पुण्डरीकपुरान्तिके । अस्ति यत्र सदैवास्ते देवी मङ्गळदेवता ॥ ८ ॥
गोनाथ इत्यभूत्कश्चित्तत्र गोपकुलोद्भवः । कुलक्रमागतं यस्य देशे गोकुलरक्षणम् ॥ ९ ॥

स बाल्य एव गा रक्षन् ब्रह्मण्यो विजितेन्द्रियः । घृतैः पयोभिर्दधिभिर्द्विजान् शुश्रूषतेऽन्वहम् ॥
तस्य प्रीतो मुनिः कश्चित्संजातो भार्गवान्वये । प्रार्थितः प्रददौ तेन पञ्चाक्षरमनुत्तमम् ॥ ११ ॥
स द्वात्रिंशत्सहस्राणि जजापानुदिनं सुधीः । महामन्त्रजपस्तस्य महिमानमवर्धयत् ॥ १२ ॥
पालकस्य गवामन्तः सर्वं शिवमयं जगत् । व्रजंस्तिष्ठन् शयानश्च भुञ्जानश्च पिबन्नपि ॥ १३ ॥
न विसस्मार तं मन्त्रं तद्दातारं च देशिकम् । शिव शंकर गौरीश नीलकण्ठ त्रिलोचन ॥ १४ ॥
महेश्वर महादेव त्रिपुरान्तक धूर्जटे । कालशासन कामारे कालकण्ठ कलाधर ॥ १५ ॥
करुणालय पाहीति सदा भक्त्या प्रजल्पति । जिह्वा जल्पति नैवान्यद्गोनाथस्य महात्मनः ॥ १६ ॥
प्रीतस्तस्मिन् महादेवो भारतीं समचोदयत् । सा स्वप्नेऽस्य समागत्य ददौ वेणुमनुत्तमम् ॥ १७ ॥
उत्थितः सहसा हृष्टो वेणुमालोक्य गोपतिः । गातुमेव समारेभे पञ्चाक्षरमहामनुम् ॥ १८ ॥
प्रथमं चाष्टरन्ध्रस्य मणिवेणोर्महार्यशाः । आधरन्ध्रेऽवरं न्यस्य रन्ध्रेष्वन्येषु चाङ्गुलीः ॥ १९ ॥
व्यापारयन् यथास्थानं जगौ सप्तस्वरान्वितम् । अपदानं महेशस्य यूथं पुलकयन् गवाम् ॥२० ॥
भावावेशवशं विश्वं कृत्वा स्थावरजङ्गमम् । तोषयामास देवेशं वेणुनादामृतेन सः ॥ २१ ॥
दिने दिने च गोनाथवेणुगानरसद्रुताः । प्राषाणस्तनुतां याताः शुष्यद्वृक्षाः सुपुष्पिताः ॥ २२ ॥
अथैकस्मिन् दिने प्रातश्चारयित्वा स गोकुलम् । प्रातिष्ठत प्रतिवनं गोपालशतसंवृतः ॥ २३ ॥
संचारयित्वा गास्तत्र तृणसौहित्यमन्थराः । छायान्तरेषु वृक्षाणां कुटुम्बं स्वं न्यधाद्भुवि ॥ २४ ॥
पिञ्छोत्तंसितचूलीकः कटीकलितकम्बलः । नमेरुतरुसंसक्तापराङ्को भुग्नकन्धरः ॥ २५ ॥
विन्यस्तवेणुरधरे त्रिभङ्गीललिताकृतिः । निषादर्षभगान्धारान् षड्जमध्यमवैवतान् ॥ २६ ॥
त्रिषु त्रिष्वपि रन्ध्रेषु चालयन् पञ्चमं पुनः । मध्यमे मूर्च्छयामास संक्षिपन् सकलं जगत् ॥२७॥
अग्रतःस्थितमीशानं ध्यात्वा पञ्चाक्षरीमनुम् । कलं जगौ कलालापान् मुद्रयन्नपि कोकिलान् ॥ २८ ॥
अमन्दतारमच्छिद्रमविलम्बितमद्रुतम् । पयोहीना बद्धवत्सा गौर्धृष्टिर्गर्भवत्यपि ॥ २९ ॥
यथा दोग्ध्री भवेत्सद्यो रागवित्स तथा जगौ । वेणुनादामृतैर्विश्वं चराचरमरञ्जयत् ॥ ३० ॥
तस्य गीतिरसाकृष्टैर्वियद्वैमानिकैर्वृतम् । विस्मृतान्योन्यवैरैश्च महाव्याघ्रगवादिभिः ॥ ३१ ॥
गजसिंहैररण्यानी नकुलाशीविषैरपि । आसीत्सपदि नीरन्ध्रा तस्मिन् गायति वेणुना ॥ ३२ ॥
स्वरयोगः समं वेणोर्ववृधे तस्य सप्तधा । कपर्दादिव निर्यान्ती महादेवस्य जाह्नवी ॥ ३३ ॥
वशीकृत्य जगत्सर्वं गीतमात्रब्रह्मकीटकम् । नृत्यतो निपपाताद्रा कर्णे हेमसभापतेः ॥ ३४ ॥

अथ कनकसभेशः सार्धमागत्य देव्या श्रुतिमधुरमुदारं गीतमाकर्ण्य तस्य ।
प्रमदभरितचेता मुक्तिमस्मै वितीर्य श्रुतिभिरभिनुताङ्घ्रिः संसदं प्राप भूयः ॥ ३५ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे गोनाथमुक्तिप्राप्तिर्नाम त्रयस्त्रिंशोऽध्यायः ॥

॥ अथ चतुस्त्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

चन्द्रचूडार्चने नित्यं चन्दनादिप्रदानतः । इहैव श्रियमासाद्य प्राप्ता मुक्तिं च केचन ॥ १ ॥
अत्रायमितिहासोऽस्ति शिवभक्तैरभिष्टुतः । श्रीमतो मुक्तिनाथस्य चरित्रं यत्र गीयते ॥ २ ॥
अस्त्यागस्त्यदिगब्जाक्षिमुखश्रीतिलकायितम् । प्रथितं त्रिषु लोकेषु नगरं मथुराह्वयम् ॥ ३ ॥
यत्र मौक्तिकताटङ्कमण्डिता शफरेक्षणा । ममतां सततं धत्ते माता त्रिजगतामपि ॥ ४ ॥
यत्र पाण्ड्यमहाराजपूजितः परमेश्वरः । विराजते चतुष्षष्टिलीलारत्नाकरः सदा ॥ ५ ॥
यत्र लीलाशुकालापरसिकां परदेवताम् । विरिञ्चिविष्ण्वीशपदवदान्यापाङ्गवीक्षणाम् ॥ ६ ॥
कदम्बवनसंचारक्षणञ्जणितनूपुराम् । अच्युताद्यावतारश्रीनेत्रां नीलोत्पलाकृतिम् ॥ ७ ॥
अंशुकद्युतिनिर्धूतकिंशुकस्तबकप्रभाम् । नखनादितमाणिक्यवीणाकोरकितद्रुमाम् ॥ ८ ॥
महानीलमणिश्यामां मलयध्वजकन्यकाम् । ताम्रासंभेदसंभूतमौक्तिकैरर्चयन्ति ताम् ॥ ९ ॥
नित्यमप्यमराधीशायानानमितमौळयः । दक्षिणाशाधनाधीशाः पाण्ड्यवंशभवा नृपाः ॥ १० ॥
सर्वसंपत्समृद्धा सा समृद्धविपणापणा । चतुर्वर्णाश्रमपदा मधुरा मथुरापुरी ॥ ११ ॥
बभूव भूषणं भूमेर्द्यौरिव प्रतिबिम्बिता । तत्रास्ति **मूर्तिनाथा**ख्यो वैश्यवंश्यो महाधनः ॥ १२ ॥
किङ्करः शिवभक्तानां शङ्करे दृढभक्तिमान् । न जातिभेदस्तस्यास्ति शूद्रेष्वन्येषु वा पुनः ॥ १३ ॥
दृष्ट्वा भस्म च रुद्राक्षं प्रणमत्याहिताञ्जलिः । न तदस्त्यन्यतः क्वापि रत्नाद्यस्य न यद्गृहे ॥ १४ ॥
सोऽन्तरीपान्तरानीतदिव्यचन्दनलेपनम् । नित्यं हालास्यनाथस्य कारयामास भक्तिमान् ॥१५॥
एवं नियमशीलस्य ययुर्विंशतिवत्सराः । तदा पाण्डयपतिस्त्रैणो नैव किंचिद्व्यचारयत् ॥ १६ ॥
रन्ध्रान्वेष्यान्ध्रनृपतिर्मथुरामभ्यवर्तत । स निष्कास्य पुरात्पाण्ड्यं राजाभूज्जिनसेवितः ॥ १७ ॥
तस्य प्राग्जन्मपापेन जैनतन्त्रेऽभवन्मतिः । वेदनापञ्चकं यत्र मूढैरात्मेति गीयते ॥ १८ ॥
अवतीर्णे मते तत्र वेदविद्वेषवानभूत् । ततोऽभूद्वैदिकद्वेषी वेदान्ताध्वरदूषकः ॥ १९ ॥
क्रमेण द्विजदेवानां स पूजां न्यरुणत्तदा । स्वमतानुसृतानेव पूजयामास नेतरान् ॥ २० ॥
मूर्तिनाथं विना तत्र बभूवुस्तन्मतानुगाः । मथुरानगरे सर्वे यथा राजा तथा प्रजाः ॥ २१ ॥
तन्मतानुप्रवेशस्य मूर्तिनाथो विरोध्यभूत् । आज्ञातिलङ्घने राज्ञां कोपः खलु सुदारुणः ॥ २२ ॥
स पञ्चपरमेष्ठिश्रीचरणाम्भोरुहार्चकः । सप्तभङ्गीः प्रयुञ्जानो वञ्चयामास वैदिकान् ॥ २३ ॥
शब्दादिविषयज्ञानपञ्चस्कन्धेषु कोविदाः । येऽभवन् क्षपणाचार्यास्ते पञ्चपरमेष्ठिनः ॥ २४ ॥
कुण्डिकाधारणं पिच्छाधारणं यागदूषणम् । भवेच्छरीरमेवात्मा कैवल्यं भोग एव हि ॥ २५ ॥
अहिंसा परमो धर्मः स्त्रीपुंजात्येकता तथा । एवं हि क्रमतः सप्तजैनभङ्गयः प्रकीर्तिताः ॥ २६ ॥
अप्रत्यक्षं कथं वा स्यात्प्रमाणमिति चालपन् । खिलीचकार पाषण्डो वैदिकं मार्गमुत्तमम् ॥२७॥

हरिशङ्करपूजायामन्तरायपरम्पराम् । आविष्कुर्वंस्त्रयीबाह्यानर्चयामास दुर्मतिः ॥ २८ ॥
यदा हालास्यनाथस्य सपर्या तेन विघ्निता । मूर्तिनाथस्तदा स्वीयैः पूजां प्रावर्तयद्धनैः ॥ २९ ॥
पूजां हालास्यनाथस्य मूर्तिनाथप्रवर्तिताम् । निजाज्ञालङ्घनं चापि दृष्ट्वा तं हन्तुमैहत ॥ ३० ॥
विना मदनुमत्या यो विक्रेता चन्दनस्य सः । वध्यः स्यादित्यापणेषु वाचं नित्यमघोषयत् ॥ ३१ ॥
मूर्तिनाथस्तदारभ्य संगृहीतैस्तु चन्दनैः । नित्यालेपनमीशस्य निर्विघ्नमकरोच्चिरम् ॥ ३२ ॥
यदा न लभ्यते क्वापि चन्दनं वणिजां वरः । विचारमगमद्धोरं हालास्येशं विचिन्तयन् ॥ ३३ ॥
अद्यास्ति चन्दनं शंभो तवालेपनसाधनम् । श्वः करिष्यामि किं वाहं हालास्येश्वर रक्ष माम् ॥ ३४ ॥
इत्युक्त्वा दत्तपाटीरो वणिक् तामनयन्निशाम् । अथ प्रातः समुत्थाय यावदर्कोऽस्तमृच्छति ॥ ३५ ॥
पर्यटन्नगरे तावद्वणिग्लेभे न चन्दनम् । अथ हेमाब्जिनीतोये स्नात्वा भसितलाञ्छितः ॥ ३६ ॥
अदत्तचन्दनस्याद्य मम हस्तेन किं भवेत् । इति प्रकोष्ठमापेष्टुं धिया निश्चित्य तत्क्षणात् ॥ ३७ ॥
शुद्धे शाणोपले स्थाप्य प्रकोष्ठं क्षालितं जलैः । यावद्रक्तप्रवाहः स्याद्यावदालक्ष्यतेऽस्थि च ॥ ३८ ॥
तावत्प्रकोष्ठमात्मीयमापिपेष मुहुर्मुहुः । तदा तं वारयामास शैवी वागशरीरिणी ॥ ३९ ॥
मैवं कुरु भवानेव भूत्वा पाण्ड्यमहीपतिः । वेदबाह्यान्निराकृत्य वैदिकान् स्थापयिष्यति ॥ ४० ॥
अद्यायं शत्रुणा युद्धे निहतो मृत्युमेष्यति । पश्येत्याकर्ण्य हालास्यनाथसन्निधिमाप सः ॥ ४१ ॥
अथान्ये मथुरामेत्य रुरुधुर्जिनशत्रवः । आन्ध्रनाथोऽपि युयुधे निर्गतो नगरात्स तैः ॥ ४२ ॥
रणेऽन्योन्यं प्रहरणात्स च ते च लयं ययुः । हतावशिष्टा जैनास्तु दूरे दुद्रुविरे दिशः ॥ ४३ ॥
ततस्तु सचिवाः सर्वे संभूयेश्वरशासनात् । दुकूलबद्धनयनं नगरेऽचालयन् गजम् ॥ ४४ ॥
सोऽन्तश्शिवालयं गत्वा गृहीत्वा मूर्तिनाथकम् । निजस्कन्धे तमारोप्य प्रतस्थे विशिखान्तरे ॥ ४५ ॥
ववर्षुः पुष्पवर्षाणि खेचरा नागरैः सह । अस्तुवन् वन्दिनश्चापि दिवि भेर्यश्च दध्वनुः ॥ ४६ ॥
सिंहासने प्रतिष्ठाप्य मूर्तिनाथं गजेश्वरः । अभ्यषिञ्चत्स्वहस्ताग्रकलशामृतधारया ॥ ४७ ॥
अथाभिषिक्तः साम्राज्ये मूर्तिनाथो महीपतिः । वेदबाह्यान् स शूलाग्रे चक्रे वैदिकसंमतः ॥ ४८ ॥
चन्दनालेपनं शंभोः सान्द्रं कालत्रये व्यधात् । वैदिकान् स्थापयामास पाण्ड्यभूमिमवर्धयत् ॥ ४९ ॥
शतसंवत्सरं राज्यं कृत्वा वैदिकसम्मतः । मुक्तिं हालास्यनाथस्य प्रसादादगमत्ततः ॥ ५० ॥
मूर्तिनाथस्य चरितं शृण्वन्ति च पठन्ति ये । तेषां शिवप्रसादेन कैवल्यं सुलभं भवेत् ॥ ५१ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मूर्तिनाथमुक्तिप्राप्तिर्नाम चतुस्त्रिंशोऽध्यायः ॥

॥ अथ पञ्चत्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

पञ्चाक्षरादिभिर्मन्त्रैर्दिव्यपुष्पैर्महेश्वरम् । नित्यं पूजयतां पुंसां पुनर्जन्म न विद्यते ॥ १ ॥

अत्रैवोदाहरन्तीदं नन्दिकेशाच्युतादयः । चरितं स्कन्दनाथस्य शिवभक्तशिखामणेः ॥ २ ॥
अस्ति कावेरिकावारिप्ररोहत्सस्यसंपदि । देशे दिव्यपुरे रम्ये देवद्विजविभूषिते ॥ ३ ॥
अग्रहारो महानस्ति श्वेतद्वीप इवार्णवे । आश्रयः सर्वभूतानामावासो ब्रह्मवादिनाम् ॥ ४ ॥
दीनान्धपङ्गुबधिरमूकानाथरुजापहः । शरण्यभूतः सर्वेषां प्रख्यातः शरणार्थिनाम् ॥ ५ ॥
अग्निहोत्राग्निसुहुतहविराज्यकुशैधसाम् । धूमेनामोदसान्द्रेण समाक्रान्तदिगन्तरः ॥ ६ ॥
वट्टधीतर्ग्यजुस्सामध्वनिध्वनितमण्टपः । पदवाक्यप्रमाणज्ञैः शोभितो ब्राह्मणोत्तमैः ॥ ७ ॥
तटाकोपवनोद्यानपुष्पाढ्यधिवासितः । यूपालंकृतपर्यन्तवेदिकाशतसंवृतः ॥ ८ ॥
अष्टादशपुराणर्थवेदनानिकषोपलः । तत्रासीद्ब्राह्मणः कश्चिच्छिवधर्माह्वयो महान् ॥ ९ ॥
प्रतिग्रहे स शक्तोऽपि प्रतिगृह्णाति न क्वचित् । तत्रोञ्छवृत्त्या निवसन्नानर्च शशिशेखरम् ॥ १० ॥
तस्यैवं वर्तमानस्य महादेवप्रसादतः । तनयः स्कन्दनाथाख्यः कश्चिदासीन्महामतिः ॥ ११ ॥
नित्यं पूजयतः शंभुं स पितुः सन्निधे वसन् । स्वयं स्निग्धोपले क्वापि पत्रैरर्चयतीश्वरम् ॥ १२ ॥
पिता संवत्सरे षष्ठे ददौ व्रतमनुत्तमम् । वेदानध्यापयामास षट् च शास्त्राण्यपाठयत् ॥ १३ ॥
व्याकरोदथ मीमांसां पुराणार्थानबोधयत् । पञ्चाक्षरं महामन्त्रं ददौ लग्ने शुभे सुधीः ॥ १४ ॥
पूजाविधिं महेशस्य पाठयामास सूनवे ।

स परीक्षितसच्छास्त्रतत्त्वः स विकल्पं सकलं निरस्य दूरे ।
गिरिशार्चनमेव निर्विकल्पं निरपायार्थकरं स्म निश्चिनोति ॥ १५ ॥

अथ काले गते तस्मिञ्शिवधर्मे दिवं गते । गतिं कालस्य महतीं स जानन्न स्म शोचति ॥ १६ ॥
कृत्वौर्ध्वदैहिकं तस्य वेदोक्तेनैव वर्त्मना । दधार परमां भक्तिं परमात्मनि शङ्करे ॥ १७ ॥
पुष्पारामं स्वयं कृत्वा सुपुष्पाणि समर्पयन् । तत्रत्यैरेव कुसुमैरर्चयामास धूर्जटिम् ॥ १८ ॥
जटावांश्चीरवसनो भस्मरुद्राक्षभूषितः । पञ्चाक्षरेण महता मन्त्रेण कुसुमैर्हरम् ॥ १९ ॥
अर्चयन् गमयामास समयं न वृथा क्वचित् । जपन् द्वादश साहस्रसंख्यं पञ्चाक्षरीमनुम् ॥ २० ॥
पुष्पैर्द्वादशसाहस्रसंख्यैरानर्च शङ्करम् । अवकाशे सति क्वापि महेशं हृदि भावयन् । ॥ २१ ॥
वाग्जन्म सफलीकुर्वन्नभिष्टौति स्म सादरम् ॥ २२ ॥

नमः शिवाय त्रिगुणात्मकाय नमः शिवाय त्रिविधात्मनेत्रे ।
नमः शिवाय त्रिजगद्विधात्रे नमः शिवाय त्रिदशैकधाम्ने ॥ २३ ॥

इति स्तुवन् महादेवं शिवभक्तैर्द्विजोत्तमैः । पूजितश्च यथा शंभुर्विरक्तः सर्वतोऽभवत् ॥ २४ ॥
गौरीस्तन्यामृतास्वादधन्यो भक्ताग्रणीश्च यः । तस्य सौहार्दलाभेन कृतार्थं स्वममन्यत ॥ २५ ॥

इत्थं समभ्यर्च्य महेश्वरं सदा महामनुं च प्रजपन् वितन्वन् ।
स्तुतिं महेशस्य विभोः प्रसादादावृत्तिशून्यां च गतिं प्रपेदे ॥ २६ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे स्कन्दनाथमुक्तिप्राप्तिर्नाम पञ्चत्रिंशोऽध्यायः ॥

॥ अथ षट्त्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

वेदसारेण ये देवं महान्तं समुपासते । न गर्भवाससंक्लेशस्तेषां भूयो द्विजोत्तमाः ॥ १ ॥
दुर्लभं ब्राह्मणकुले जन्म प्राप्यापि केचन । नयन्त्यहो वृथा कालं रुद्राध्यायपराङ्मुखाः ॥ २ ॥
अजप्त्वा शतरुद्रीयमन्यत्रापि कृतश्रमाः । विन्दन्ति यदि कैवल्यं तृप्तिः स्यादप्यनश्नतः ॥ ३ ॥
इष्ट्वापि हयमेधेन पुनरावर्तते मखी । शतरुद्रीयजपकृन्न हि भूयो निवर्तते ॥ ४ ॥
स्तेयं कृत्वा सुरां पीत्वा भ्रूत्वापि गुरुदारगः । यदि प्रमाणमाम्नायो रुद्राध्यायी विमुच्यते ॥ ५ ॥
श्रीरुद्रसूक्तं प्रजपन्नियमेन द्विजोत्तमः । दर्शनाल्लोकपापानि हरत्यर्को यथा तमः ॥ ६ ॥
अपि गोघ्नः कृतघ्नो वा शतरुद्रीयमन्त्रतः । लिङ्गे शिवं समभ्यर्च्य लिप्यते नाब्जपत्रवत् ॥ ७ ॥

आद्यन्तयोर्यः प्रणवेन युक्तं श्रीरुद्रसूक्तं प्रजपत्यघघ्नम् ।
तस्याङ्घ्रिरेणुं शिरसा वहन्ति ब्रह्मादयः स्वाघविशुद्धिकामाः ॥ ८ ॥

यथा सर्वेषु तेजस्सु ज्योतिस्सौरं महत्तमम् । तथैव मन्त्रकोटीषु शतरुद्रीयमुत्तमम् ॥ ९ ॥
सद्यो जातादिभिर्मन्त्रैर्धृत्वा भस्माभिमन्त्रितम् । यो जपञ्छतरुद्रीयं धृतरुद्राक्षमालिकः ॥ १० ॥
अभिषिञ्चन्महाभागो महादेवं महेश्वरम् । त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते ॥ ११ ॥

यतः कुतश्चिद्धितान्नभक्षणो यतः कुतश्चापि कृतप्रतिग्रहः ।
श्रीरुद्रजापी दुरितानि सर्वतो विहाय मुक्तः स भवेच्छुतिर्यथा ॥ १२ ॥

इतिहासं वदानीह शृणुत श्रद्धया द्विजाः । श्रुत्वा यच्छतरुद्रीये पुमान् भवति भक्तिमान् ॥ १३ ॥
अस्ति श्रीसह्यजातीरे **श्रीकलाख्यं** महत्पुरम् । वेदशास्त्रार्थतत्त्वज्ञैर्यज्वभिः समलङ्कृतम् ॥ १४ ॥
तत्र कश्चिदभूद्विप्रः शास्त्रवेदागमार्थवित् । स नित्यं सह्यजातीरे स्नात्वा हुतहुताशनः ॥ १५ ॥
कण्ठदघ्नजले स्थित्वा रुद्राध्यायं जपत्यसौ । पुष्पैः श्रीरुद्रमन्त्रेण समर्चयति शङ्करम् ॥ १६ ॥
जपतः शतरुद्रीयं तस्य श्रुत्वा त्रियोजनम् । विमुक्तशापा अभवन् पैशाचीं तनुमाश्रिताः ॥ १७ ॥
तस्य श्रीशतरुद्रीयजपमाहात्म्यवेदिभिः । श्रीरुद्रपशुपत्याख्या दत्ता व्यासादितापसैः ॥ १८ ॥
द्रोणपुष्पैः स निर्दोषैर्बिल्वपत्रैरखण्डितैः । तिलाक्षतैश्च दूर्वाभिः शम्याकैरुत्पलैरपि ॥ १९ ॥
शतरुद्रीयमन्त्रेण शङ्करार्चनतत्परः । जिगाय सकलाँल्लोकान् ब्रह्माद्यैरपि पूजितः ॥ २० ॥
अणिमादिविभूतीश्च तृणीचक्रे महामतिः । श्रीरुद्रपशुपत्यर्चितं पुष्पं शिवमूर्धनि ॥ २१ ॥

शैलादिप्रमुखाः सर्वे दृष्ट्वा तं प्रशशंसिरे ॥

श्रीरुद्रमाहात्म्यविदः स्वपुत्रान् शिष्यांश्च शैवार्चनजागरूकान् ॥ २२ ॥
भुवि प्रतिष्ठाप्य शिवप्रसादाद्द्विजोत्तमो धाम जगाम शम्भोः ॥ २३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीरुद्रपशुपतिमुक्तिप्राप्तिर्नाम षट्त्रिंशोऽध्यायः ॥

॥ अथ सप्तत्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

सन्निधौ प्रणतिं शम्भोर्नियमेन दिने दिने । कुर्वन्ति ये हरस्तेषां जन्मदुःखं निरस्यति ॥ १ ॥
अस्त्यासनाख्यं श्रीचोलविषयाभरणं पुरम् । वेदवेदाङ्गतत्त्वज्ञैः क्रतुप्रवरदीक्षितैः ॥ २ ॥
निष्ठाविशेषनिर्धूतवसिष्ठादियशोभरैः । आतिथ्यकारिभिः शान्तैर्दान्तैरग्न्याहितैरपि ॥ ३ ॥
अधिष्ठितं सदा सद्भिर्ब्रह्मघोषाभिनादितम् । तस्य पर्यन्तकेदारकुल्यारोधसि काचन ॥ ४ ॥
श्रेण्यन्त्यजानां महती रुधिरैः पङ्किलान्तरा । पुराणमांसखण्डासृग्वासनाहूतवायसा ॥ ५ ॥
कुक्कुटाश्वमहारावसन्नादितदिगन्तरा । पर्यन्तशुष्यद्गोचर्मपर्यस्तव्रीहिसंचया ॥ ६ ॥
मद्यास्वादमदोन्मत्तचण्डालकुलसंकुला । तत्रास्ति नगरे ख्यातः कश्चिन्नन्दाह्वयोऽन्त्यजः ॥ ७ ॥
स दिष्टया बाल्यमारभ्य दृढभक्तिः शिवेऽभवत् । स शिवालयवाद्यानां जीर्णानां मुखबन्धनम् ॥८॥
विदधाति त्वचा नित्यं दत्ते गोरोचनामपि । कदाचिच्चर्मणा वाद्यं कृत्वा चण्डालसत्तमः ॥ ९ ॥
करंजपुरनाथस्य सन्निधौ न्यस्य दूरतः । स लिङ्गदर्शनाकाङ्क्षी मूहूर्तं तस्थिवानथ ॥ १० ॥
महावृषभसञ्छन्नं तल्लिङ्गं द्रष्टुमक्षमः । विषसाद स्वकं जन्म निन्द्यजातौ किमागतम् ॥ ११ ॥
इति स्मरन् शिवं दध्यौ भक्तिपूतमनाः क्षणम् । शशास देवस्तद्भक्त्या प्रीतः सन्निति शाङ्करम् ॥
हे शाङ्कर महाभाग! मदाज्ञापरिपालक। नन्दस्यामुष्य नीचस्य भक्तस्यासेवितुं च माम् ॥ १३ ॥
मत्सन्निधितिरोधानं हित्वा त्वं दक्षिणं द्रुतम् । पार्श्वं किञ्चिद्व्रजेत्याह तथैवेशाज्ञया तदा ॥ १४ ॥
मध्यस्थो वृषभः किञ्चिन्नम्रास्यो दक्षिणेऽभवत् । ततो ज्योतिर्मयं लिङ्गं दृष्ट्वा दूरे स्थितोऽभवत् ॥
प्रणनाम मुहुः प्रीत्या ननर्त करतालवान् । गतं देवाग्रभागस्थं विदधे नलिनाकरम् ॥ १६ ॥
स स्मरन् सर्वदा शम्भुं जातिनैच्यभयातुरः । शिव मां रक्ष रक्षेति मनसा व्याजहार ह ॥ १७ ॥
सेवां नटेश्वरस्याथ करिष्यन् गन्तुमुद्यतः । यज्वसान्द्रं पुरं तत्त्वं न गच्छेति स्वजातिभिः ॥ १८ ॥
निवारितोऽसौ श्वो गन्तास्मीत्याहान्येद्युरप्ययम् । प्रस्थितस्तैर्निरुद्धश्च तथैवाहानुवासरम् ॥ १९ ॥
पुण्डरीकपुरेशानसेवासादरचेतसः । श्वो गन्तेति तदारभ्य नन्दस्याख्याऽभवत्किल ॥ २० ॥
तस्यैवं वर्तमानस्य नन्दस्यैवानुवासरम् । वदतश्चैवमेवागान्मासेनोनश्च वत्सरः ॥ २१ ॥
अथैकस्मिन् दिने प्रातः प्रस्थानपरिपन्थिनः । शपन् भार्यामपि बलात्समाश्वास्य निरुन्धतीम् ॥ २२

निमज्य सह्यजातोये धृत्वा भस्म निजालिके । गव्यूतिमात्रे संवीक्ष्य गोपुराग्रं सभापतेः ॥ २३ ॥
प्रणतिं विदधे हृष्टः प्रपेदे च पुरान्तिकम् । प्राचीनगोपुरद्वारक्रोशमात्रे पुरःस्थितः ॥ २४ ॥
शालाशतं द्विजेन्द्राणां नानाध्वरविधायिनाम् । नादितं ब्रह्मघोषेण पुण्यधूमाञ्चिताम्बरम् ॥ २५ ॥
दृष्ट्वा भीतो न मे युक्ता जातिहीनस्य हि स्थिति. । विधास्ये चान्यतो यत्नमिति दक्षिणतोऽगमत् ॥
ददर्श गोपुरस्याग्रे दक्षिणस्य मठायुतम् । सनकप्रख्यसन्यासिवेदवादाभिनादितम् ॥ २७ ॥
महावाक्यपदव्याख्यापरकीराञ्चितं द्रुतम् । पुरं तेन पथा गन्तुमयुक्तमिति सोऽन्यजः ॥ २८ ॥
क्रोशमात्रे गोपुरस्य प्रत्यग्भागे स्थितस्य च । स्थित्वा ददर्श तत्रापि योगीन्द्रान् सिद्धपूरुषान् ॥
उदीच्यां गोपुरद्वारि राजर्षीनपरानपि । शैवान् सदाचारपरान् दृष्ट्वा निन्दन् स्वकां जनिम् ॥ ३० ॥
हीनजातेः कथं भावि दर्शनं मे सभापतेः । अनिषेव्य सभानाथं नाहं गन्तेत्यवस्थितः ॥ ३१ ॥
ततस्तद्भक्तिमुदितः पुण्डरीकपुरेश्वरः । स्वप्ने तमाह श्वो वह्निं प्रविश्यायाहि मत्सभाम् ॥ ३२ ॥
इत्यादिश्य तमेकैकं त्रिसहस्रद्विजोत्तमान् । नन्दस्य शुद्धये वह्निर्दीयतामित्यचोदयत् ॥ ३३ ॥
प्रातः प्रबुद्धास्ते सर्वे स्वप्नसंवादविस्मिताः । प्रार्थयन्तं च तं वह्निमालोक्यैधांस्यथानयन् ॥ ३४ ॥
वर्धयामासुरनलं दक्षिणद्वारसन्निधौ । नन्दः स्नात्वा तु मध्याह्ने कृतभस्मानुलेपनः ॥ ३५ ॥
नत्वा द्विजान् विवेशाग्निं भृङ्गः पद्मवनं यथा । वह्निना दह्यमानात्मा देहं त्यक्त्वान्त्यजः पुनः ॥ ३६
अयोऽपि रसवादेन यथा याति सुवर्णताम् । श्वोगन्तापि तथा नीचो बभूव ब्राह्मणाकृतिः ॥ ३७ ॥
भस्मत्रिपुण्ड्रुद्राक्षमालाभूषितविग्रहः । वामे दण्डं करेऽन्यस्मिन् पाणौ बिभ्रत्कमण्डलुम् ॥ ३८ ॥
शिखाबन्धोल्लसन्मौलिर्दिव्याम्बरपरीवृतः । उत्तस्थौ पश्यतां तेषां वामदेवो यथा मुनिः ॥ ३९ ॥

तदा ववर्षुः कुसुमानि मौळौ वैमानिका दुन्दुभयश्च नेदुः ।
तमस्तुवंश्चारणयूथमुख्या एहीत इत्यूचुरमुं गणेन्द्राः ॥ ४० ॥
स यज्वभिस्तैः प्रतिदर्शिताध्वा चिदम्बरेशस्य सभां प्रविश्य
देवं चिदाकाशमयं निषेव्य पश्यत्सु सर्वेषु न दृश्यते स्म ॥ ४१ ॥

इति नन्दस्य चरितं श्वोगन्तुर्हेमसंसदि । मुक्तस्य भक्त्या कथितं भक्तेर्मुक्तेश्च साधनम् ॥ ४२ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीनन्दमुक्तिप्राप्तिर्नाम सप्तत्रिंशोऽध्यायः ॥

॥ अथाष्टत्रिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

शिवस्य शिवभक्तानां कैङ्कर्यं ये वितन्वते । विनैव ज्ञानयोगाभ्यां तेषां मुक्तिर्न दुर्लभा ॥ १ ॥
एतदर्थे पुरावृत्तं कथयामि मुनीश्वराः । विस्मयन्ते यदाकर्ण्य ज्ञानिनो विगतैषिणः ॥ २ ॥

काञ्चीपुरीति विख्याता भुवः काञ्चीवदास्थिता । ब्रह्मक्षत्रियविट्शूद्रचतुर्वर्णविशोभिता ॥ ३ ॥
ऋग्यजुस्सामवेदानां ध्वनिध्वनितदिङ्मुखा । वेदशास्त्रपुराणज्ञैरागमज्ञैरभिष्टुता ॥ ४ ॥
ज्ञानयोगक्रियाचर्यावादनिष्णातमानसैः । शैवाचार्यैश्च नितरां भ्राजमाना दिवानिशम् ॥ ५ ॥
नानाजनसमाकीर्णा नानाश्चर्यसमन्विता । ब्रह्मणा स्वाध्वराहूतवपायागोत्सुकाच्युता ॥ ६ ॥
सूर्याश्वदूर्वाभ्रमकृत्सोधश्यामोपलप्रभा । सूर्याश्वश्रमहार्युच्चसौधबद्धपताकिका ॥ ७ ॥
वीथ्यम्भोनिधिविभ्राजत्तरङ्गितनुरङ्गमा । विशिखार्णवपाठीनभ्रमदप्रमदाक्षिका ॥ ८ ॥
आपणार्णवविद्योतनवरत्नविराजिता । पूगपुन्नागकदळीचम्पकार्जुनकेतकैः ॥ ९ ॥
चूताशोकवटाश्वत्थकपित्थकरमर्दकैः । लाङ्गलीपनसाश्मन्तमाङ्क्षरामलकद्रुमैः ॥ १० ॥
द्राक्षाखर्जूरशम्याकतिन्त्रिणीप्लक्षदाडिमैः । जम्बीरपाटलीजम्बूसहकारादिपादपैः ॥ ११ ॥
अजस्रफलपुष्पाढ्यैः स्वच्छदाच्छादितातपैः । स्रवन्मरन्दनिष्यन्दतृप्तेन्दिन्दिरसारसैः ॥ १२ ॥
सरस्समुद्रैरभितः शोभिता तु पदे पदे । तस्यां पुर्यां महेशेन कृतलीलास्थलं महत् ॥ १३ ॥
अहंकुर्वति कैलासे स्वावासेन महीभृति । तन्निग्रहाय देवेन शंभुना सृष्टमद्भुतम् ॥ १४ ॥
दैनन्दिनलये यस्य लयो नास्ति शिवाज्ञया । यदवाङ्मुखनिक्षिप्तकुम्भवत्प्रलयार्णवे ॥ १५ ॥
अस्पृष्टमन्तस्सलिले विभाति शिवयोः पदम् । कामाक्ष्येकाम्रनाथाम्भःकेळिमज्जनसंगतैः ॥ १६ ॥
हरिद्राभस्मकस्तूरीलेपैः पीतसितासितैः । कंपानदी महापुण्या यत्र लिपथगायते ॥ १७ ॥
अस्ति तच्छांभवं स्थानं त्रिषु लोकेषु विश्रुतम् । विन्ध्यस्य दक्षिणे देशे स्वर्गस्य प्रतिबिम्बवत् ॥
उपागतानां समये गैरीसेवार्थमन्वहम् । विमानैरिव सिद्धानामाभाति भवनोत्तमैः ॥ १९ ॥
आक्रीडवाटीरम्भाग्रस्पृष्टमन्दाकिनीझरम् । सुरासिन्धुनिमग्नस्वस्त्रैणाभरणभृद्गृहम् ॥ २० ॥
उद्याननालिकेराग्रविश्रान्तार्काश्वमण्डलम् । क्रमुकस्तबकाहूतदेवोद्यानमधुव्रतम् ॥ २१ ॥
कृशाङ्गीजनसङ्गीतद्रुतरत्नाग्रगोपुरम् । रमणीवेणिकामोदवेणीवासितवीथिकम् ॥ २२ ॥
तरुणीरत्नताटङ्कसूर्यपीततमोनिशम् । मुग्धमन्दस्मितज्योत्स्नातृप्तकेळीचकोरकम् ॥ २३ ॥
क्वचिन्मत्तेभदानाम्भोजम्बालितनृपाङ्गणम् । क्वचिदश्वखुरक्षुण्णक्ष्मारजःस्थगिताम्बरम् ॥ २४ ॥
क्वचित्सुभटखड्गाग्रासहोत्कम्पितभास्करम् । गौरीसेवागतोपेन्द्रश्रकिटाक्षसमृद्धिमत् ॥ २५ ॥
कूले कम्पामहानद्या मूले चैकाम्रभूरुहः । द्वात्रिंशद्धर्मचारिण्या शिवो यत्रोमयार्चितः ॥ २६ ॥
पराकाशबिलं यत्र मुक्तिद्वारमपावृतम् । महायूथपमुख्येन गणयूथेन पाल्यते ॥ २७ ॥
सर्वैस्तीर्थैश्च देवैश्च सेविते परमाद्भुतम् । अद्यापि यत्र कामाक्ष्याः सन्निधौ तिष्ठता दिशः॥२८॥
न ज्ञायन्ते चिरेणापि ब्रह्मणापि मुनीश्वरैः । छायाग्राहि प्रतिस्पर्धि यत्र दिव्यं सुधासरः ॥२९॥
कृतोपहारैः सिद्धेशैः सकुतूहलमीक्ष्यते । वैतानवह्निधूमेन यज्वनामनुमन्दिरम् ॥ ३० ॥
वर्धितैः समये मेघैः पयस्समभिवृष्यते । कामाक्षीकुन्तलामोदकल्हारोत्तमवासितः ॥ ३१ ॥

सेवागतानां यत्रार्तिशमनश्चानिलोऽन्वहम् । कामाक्ष्यालिङ्गितो यत्र भगवान् परमेश्वरः ॥ ३२ ॥
कामी बालेकृतोऽद्यापि स्तनकङ्कणमुद्रया । देवीगर्भगृहे यत्र लिखितानि शिलान्तरे ॥ ३३ ॥
लोके यत्र रहस्यानि न ज्ञायन्तेऽपि योगिभिः । तत्रास्ति कश्चिद्रजकः शिवभक्तशिखामणिः॥३४॥
आसीदेकाम्रनाथस्य स तु वस्त्रावनेजकः । श्रीभक्तेङ्गितवेत्तेति नाम्नाहुस्तं मुनीश्वराः ॥ ३५ ॥
भक्तिं करोति गिरिशे तद्भक्तेष्वपि भक्तिमान् । स शिवानुग्रहादासीच्छैवानां वस्त्रशोधकः ॥३६ ॥
विशिष्य शिवभक्तानां भस्मरुद्राक्षधारिणाम् । शुद्धानां कृतदीक्षाणां मलिनाञ्चितवाससाम्॥ ३७ ॥
वसतां सेवितुं नित्यं काञ्चीपुरमुपेयुषाम् । आसन् वासांसि शुद्धानि भक्त्या तस्य मनो यथा ॥३८॥
नैवादत्ते भृतिं तेभ्यो रजकान्वयसंभवः । आलोक्य वसनं दूरे शैवानां कच्चरं स्वयम् ॥ ३९ ॥
प्रार्थयत्येत्य तान्नत्वा क्षाळयित्वा तदम्बरम् । आतपे तापयित्वा तत्स्वयमेव प्रयच्छति ॥ ४० ॥
नोऽवनेजत्यथान्यस्य राज्ञोऽपि रजकोत्तमः । एवं निवसतस्तस्य द्वात्रिंशद्वत्सरा ययुः ॥ ४१ ॥
तस्यैवंवर्तमानस्य भक्तिशोधनकाङ्क्षया । एकाम्रनाथो भगवान् वृद्धब्राह्मणवेषवान् ॥ ४२ ॥
भस्मत्रिपुण्ड्रविभ्राजत्फालांसोरोविराजितः । सहस्ररुद्राक्षधरः कम्पयन् गात्रमङ्गुळीः ॥ ४३ ॥
निजं गजाजिनं कृत्वा कच्चरं च पटच्चरम् । कच्चरामुद्वहन् कन्थां तन्वानः शिवकीर्तनम्॥ ४४ ॥
पलिताङ्गो दधद्यष्टिं रजकस्याग्रतोऽभवत् । तं दृष्ट्वेङ्गितवेत्तायं नत्वा साञ्जलिरब्रवीत् ॥ ४५ ॥
प्रवयास्त्वमसि ब्रह्मन् महतामस्मि किङ्करः । स्वामिन् कुतोऽभ्यागतस्त्वमत्र कार्यं किमुच्यताम् ॥४६॥
शिवभक्तस्य शुश्रूषा ममेदं व्रतमन्वहम् । वस्त्रसंक्षाळनं चापि भक्तानां मे व्रतं महत् ॥ ४७॥
तस्मात्त्वद्वस्त्रमधुना देहि प्रक्षाळ्य दीयते । मालिन्यमम्बरस्थं ते मा भूयान्मयि तिष्ठति ॥ ४८ ॥
इत्युक्तो रजकेनाथ शिवः प्राह पुनर्वचः । कामाक्षीदर्शनाकाङ्क्षी दूरादस्मि समागतः ॥ ४९ ॥
पुरी न दृष्टपूर्वेयं नैव जानामि कंचन । कालोऽयं हिमभूयिष्ठो भूयसी मिहिका निशि ॥ ५० ॥
शीतवातासहिष्णुत्वाद्वार्धकात्पुनरक्षमः । सोढुं शक्यं मया किंचिन्नापि कन्थामृते क्षणम् ॥ ५१ ॥
न वस्त्रान्तरमप्यस्ति कच्चराच्च पटच्चरात् । विशिष्य वृद्धः शीताळुर्न जाने त्वां गृहं च ते॥५२॥
परकीयं न वसनं धार्यमाहुर्मनीषिणः । आचारशीलाजानीषे भक्तस्त्वं साधुसंमतः ॥ ५३ ॥
कन्थां संशोधयित्वेमां तापयित्वा महातपे । सायं दातुं समर्थश्चेद्गृहाण न मृषा वद ॥ ५४ ॥
इति वृद्धोक्तिमाकर्ण्य भूयः प्राह शिवं प्रति । न मे कार्यान्तरं किंचित्त्वद्वस्त्रक्षाळनादृते ॥ ५५ ॥
चन्द्रिकाधवळं कृत्वा तापयित्वातपे तव । वासः सायं प्रदास्यामि भगवन् मातुरालये ॥ ५६ ॥
आस्त्वेत्युक्त्वाग्रहीत्कन्थां वृद्धस्य रजकोत्तमः । मिश्रीकृत्योषरमृदा कुम्भीपाकं विधाय च ॥५७॥
स्वजन्मशतपापौघैः सह तां समशोधयत् । आस्फाल्यास्फाल्य बहुधा क्षाळयित्वा श्रमं गतः॥ ५८ ॥
क्षाळितोऽपि पटः शंभोर्मालिन्यं न जहौ यदा । तदा पुनः पुनर्वेगात्क्षाळितं च तदम्बरैः ॥५९ ॥
गतो मध्याह्नसमयो ह्यपराह्णः समागतः । प्रतिज्ञाभङ्गभीत्यायं तदा बहु विचारयन् ॥ ६० ॥
बहिः प्रसारयामास पुळिने तां धृतातपे । एतस्मिन् समये शंभुर्वर्षतेति घनानशात् ॥ ६१ ॥

शिवाज्ञां शिरसा धृत्वा समाहृत्य बलाहकाः । लोलविद्युल्लताचण्डवातस्तनितजृम्भणैः ॥ ६२ ॥
प्रलयाम्भोदसदृशा ववर्षुश्चावृता दिशः । सा कन्था चण्डवातेन क्वापि नीता दिगन्तरम् ॥ ६३ ॥
सत्यासायमविच्छिन्नासारे स तु विचारवान् । प्रतिज्ञाभङ्गतः प्राणत्याग एव महत्तरः ॥ ६४ ॥
इत्यात्मानं विनिश्चित्य वृद्धे तस्मिन् कृतागसम् । त्यक्तुकामोऽन्तिकं प्राप वस्त्रनिर्णेजनाश्मनः॥६५
तस्मिन् समय आगत्य स तु कैतववेषवान् । कम्पयन् गात्रमतुलं वर्षधारार्द्रमङ्गुलीः ॥ ६६ ॥
कम्पमानो वचः प्राह रजकं ब्रह्मणोत्तमः । भवाम्यत्यन्तशीताळुर्वसनं देहि मामकम् ॥ ६७ ॥
नो चेत्क्षणान्महाभाग प्राणा गच्छन्ति वर्षतः । वातेन कम्पते मेऽङ्गं दयया रक्ष रक्ष माम्॥६८॥
इति तद्वाक्यमाकर्ण्य कर्णनाराचसन्निभम् । विचिन्तयन् महाशोकात्किं करिष्याम्यतः परम् ॥ ६९ ॥
सर्वत्र मृगयन् कन्थां दृष्ट्वा तां कुत्रचित्स्थले । आदाय सहसाभ्येत्य संतोषेण शुचान्वितः ॥७० ॥
वीक्ष्यास्तीर्य क्वचिद्वृक्षे वातेनानाहृतं भवेत् । इति न्यधात्पुनर्वस्त्रं वात्ययाऽदर्शनं गतम् ॥ ७१ ॥
गाढान्धकारमाकाशमनादित्यमनातपम् । वर्षोन्मुखघनच्छन्नं विद्युत्स्तनितजृम्भितम् ॥ ७२ ॥
वीक्ष्यैतद्विषसादेत्थं कन्थां पृच्छत्यथ किल । अन्यद्वस्त्रं प्रदत्ते चेन्न गृह्णाति द्विजोत्तमः ॥ ७३ ॥
किं करोमि क्व गच्छामि क्षणाद्वृद्धो मरिष्यति । वृद्धस्य मरणात्पूर्वं ममास्तु मरणं त्विति ॥ ७४ ॥
वस्त्राघातशिलापृष्ठे वल्गन्नास्फालयच्छिरः यदा पस्फाल स पुनस्तदैवैतच्छिलातलात् ॥ ८५ ॥
तयैव कन्थया सार्धमाविर्भूय वृषोपरि । कामाक्ष्यालिङ्गनोद्भूतकरकङ्कणमुद्रितात् ॥ ७६ ॥
हस्ताद्गृहीत्वा वृष्टिं च प्राणाघातान्निवार्य तम् । त्वद्भक्तिं ज्ञातवानस्मि ज्ञापनाय जनावळेः ॥ ७७ ॥
एवं कृतं मयेत्युक्त्वा कृपां तस्मिन् विधाय च । सालोक्यमुक्तिं दत्वास्मै रजकाय महेश्वरः ॥ ७८॥
कैलासमनयच्छंभुर्योगीन्द्राणां सुदुर्लभम् । तदा दुन्दुभयो नेदुः पुष्पवृष्टिरभूद्दिवः ॥ ७९ ॥
आश्चर्यमिदमालोक्य साधुवादः सतामभूत् । निवार्य साहसोद्युक्तं रजकं वृषभध्वजः ॥ ८० ॥
नित्यं स्वसन्निधौ वासं कैलासे तस्य दत्तवान् ।
कन्थां वहन् ब्राह्मणवेषधारी संशोधयंस्तद्रजकस्य भक्तिम् ।
गृह्णन्निवागत्य पटच्चरांशुकं यश्चानुगृह्णाति नमः परस्मै ॥ ८१ ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे भक्तेङ्गितवेत्तृमुक्तिप्राप्तिर्नाम अष्टत्रिंशोऽध्यायः ॥

॥ अथैकोनचत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥
क्षीराभिषेकमीशस्य गवां येऽत्र वितन्वते । ते विमुक्ता महापापैर्मुक्ता स्युः सत्यमुच्यते ॥ १ ॥
इतिहासमिह प्राहुः प्राचीना ब्रह्मवादिनः । यस्य श्रवणमात्रेण ब्रह्महत्या विनश्यति ॥ २ ॥
अस्ति स्कन्दपुरं नाम ख्यातं स्कन्दप्रतिष्ठितम् । माणिनिर्झरणीतीरे धौरिवाभ्रसरित्तटे ॥ ३ ॥
अप्रमत्ताधियो धर्मे नित्यं हुतमखाग्नयः । अधीतचतुरान्नायाः सर्वत्र ब्रह्मदृष्टयः ॥ ४ ॥
षट्कर्मनिरता नित्यं सप्तर्षिसमतेजसः । अष्टमूर्तिस्तुतिपरा नवद्वयकलाधराः ॥ ५ ॥

दशेन्द्रियनिरोद्धार एकादशधृतेश्वराः । द्वादशादित्यसंकाशा यत्र ब्राह्मणसत्तमाः ॥ ६ ॥
त्रयोदशस्वरार्थज्ञाश्चतुर्दशसु देशिकाः । यत्र यज्ञविशेषेषु मरुतां यज्वनामपि ॥ ७ ॥
रथाश्च व्योमयानानि दृश्यन्ते राजवीथिषु । यत्र श्रीशतरुद्रीयमहामन्त्रजपोन्मुखान् ॥ ८ ॥
तेजोऽधिकान् विलोक्यार्को नारिकेळेषु लीयते । यत्र यूथगता गावो दुर्ग्रहा अपि योषिताम् ॥ ९ ॥
वटूनां सामगानेन दोहेषु सुकरग्रहाः । तत्रासीद् यज्ञसिद्धाख्यो[1] विप्रः काश्यपवंशजः ॥ १० ॥
विद्यासाम्राज्यलक्ष्मीर्यं वव्रे श्रीरिव केशवम् । तस्य काचिदभूत्पत्नी भक्तिः श्रद्धेव रूपिणी ॥ ११ ॥

सभापतेः शिष्यवरार्पितेन स्वदक्षिणाद्रव्यभरेण सत्तमः ।
सभां वितेने धृतहेमपट्टां यस्तस्य भार्याजनि सा पवित्रा ॥ १२ ॥

तयोरर्चयतोः शम्भुं नियमेन महीयसा । भाग्योदयेन पुत्रोऽभूत् षण्मुखः शिवयोरिव ॥ १३ ॥
ववृधे लालितो मात्रा राकयेव निशाकरः । सतां पन्थानमासाद्य बाल्य एव द्विजार्भकः ॥ १४ ॥
स पञ्चमाब्दात्प्रागेव वटुर्गुरुमुखात्कलाः । विनैव वेदाङ्गगृहे सकृदाकर्णनात्सुधीः ॥ १५ ॥
व्रतं ददौ च गायत्रं पञ्चमेऽब्दे पिता ततः । उपनीतः स गुरुणा सकृदेवोपदेशतः ॥ १६ ॥
अधीत्य वेदान्निखिलान् साङ्गोपाङ्गपदक्रमान् । अध्यगीष्ट च शास्त्राणि सर्वाण्यष्टमवर्षतः ॥ १७ ॥
अष्टादशपुराणानां वेदानामपि तत्त्वतः । तात्पर्यं शिव एवेति निरचैषीत्स्वबुद्धितः ॥ १८ ॥
परित्यज्याखिलं कार्यं भक्तिं चक्रे महेश्वरे । उपदेशक्रमाल्लब्ध्वा पञ्चाक्षरमनुत्तमम् ॥ १९ ॥
नित्यं द्वादशसाहस्रमेतन्मन्त्रं जपन् सुधीः । जजापैकादशावृत्ति रुद्राध्यायं दिनान्तरे ॥ २० ॥
आदधे समिधो वह्नौ सायं प्रातरतन्द्रितः । सहस्रकृत्वो गायत्रीं जपत्यर्धोदिते रवौ ॥ २१ ॥
भस्मावकुण्ठितो मौञ्जीदण्डकृष्णाजिनाञ्चितः । रक्षयालङ्कृतः फाले ज्वलन्नग्निरिवाबभौ ॥ २२ ॥
आमध्याह्नं मठे स्थित्वा शिवलिङ्गार्चनं व्यधात् । भैक्षं च पञ्चमे काले भुञ्जानो गुर्वनुज्ञया ॥ २३ ॥
धर्मं विचारयन् कालं गमयामास भूसुराः । कदाचिल्लम्बमानेऽर्के कृतलिङ्गार्चनाजपः ॥ २४ ॥
प्रत्यग्रहारं भैक्षार्थी प्रातिष्ठत गृणन् मनुम् । निवृत्ता वत्सवात्सल्याद्धेनुः काचिन्नवप्रसूः ॥ २५ ॥
गोपो न्यवारयत्तां गां कोपाच्छृङ्गेण सानुदत् । स तां कोपात्स्वदण्डेन मुहुर्मुहुरताडयत् ॥ २६ ॥
वनाद्व्रजन्तीं गां वेश्म वत्सवात्सल्यतः पथि । घ्नन्तं ददर्श दण्डेन तद्ग्रामपशुपालकम् ॥ २७ ॥
तं न्यषेधद्दुरात्मानं महात्मा धेनुघातिनम् । स्वप्रहारभयाच्छीघ्रं विप्रसूनोर्दुराशयः ॥ २८ ॥
दर्शनाद्वर्णिनो गोपः पलायनमशिश्रयत् । अथ धेनोर्ददौ ग्रासं शाद्वलादाहृतैस्तृणैः ॥ २९ ॥
कमण्डलुजलैस्तस्याः पिपासामप्यपाकरोत् । महिमानं च तस्मार गवां वाचामगोचरम् ॥ ३० ॥
सर्वदेवमयी धेनुः सर्वतीर्थमयी तथा । सर्वयज्ञमयी प्रोक्ता सर्वस्यामृतसाधनम् ॥ ३१ ॥
शकृदप्यग्निनिष्टप्तं यस्या भस्म प्रशस्यते । पञ्चगव्यं यदुत्पन्नं सर्वपापहरं विदुः ॥ ३२ ॥

---

१. यज्ञदत्तेति पाठान्तरम् ।

यस्याः क्षीराभिषेकेण प्रीणाति परमेश्वरः । स्तुवन्ति यज्ञतत्त्वज्ञाः सर्वधर्मदुघां च याम् ॥ ३३ ॥
यत्पादधूलिर्गङ्गेव पुनाति शिरसा धृता । वृषभेन्द्रो यदुत्पन्नो महादेवस्य वाहनम् ॥ ३४ ॥
दर्शनादेव पापघ्नी सेयं धेनुर्जगत्प्रसूः । ब्राह्मण्यसाधनं यस्या होमेषु घृतमुच्यते ॥ ३५ ॥
दण्डेन हन्ति तामेव दुरात्मा पशुपालकः । अद्यारभ्य करिष्येऽहमग्निहोत्रगवां सताम् ॥ ३६ ॥
परिचर्यां किमन्येन कर्मणा भविता मम । इति निश्चित्य गोपालं निष्कास्य स्वयमेव सः ॥ ३७ ॥
स्वकर्मासङ्गवात्कृत्वा ब्राह्मणानेत्य शीघ्रतः । युष्मद्गाः पालयामीति पृष्ट्वा तांस्तदनुज्ञया ॥ ३८ ॥
गोपो भूत्वा द्विजसुतश्चारयामास तास्तृणम् । नीत्वायं शाद्वले धेनूर्दत्वोत्पाट्य स्वयं तृणम् ॥
विश्रामयित्वा छायासु पाययित्वा जलान्यपि । ररक्ष शाद्वले सर्वाः पीतोदाश्छाययान्विते ॥ ४० ॥
सुहितासु तृणैस्तासु नित्यमर्चयतीश्वरम् । स्निग्धा शुश्रूषया तस्य पुष्टगात्राश्च धेनवः ॥ ४१ ॥
द्विगुणं दुदुहुः क्षीरं समयो नातिवर्तते । यदा कण्डूयते तास्तु ददुस्तावत्पयः स्वयम् ॥ ४२ ॥
दुग्ध्वा पयः स्वयं दुग्धं वर्णी निजकमण्डलौ । तेनाभिषिञ्चति शिवं सिकतालिङ्गपूजितम् ॥ ४३ ॥
एवं दिने दिने चक्रे श्लाघितः सकलैर्द्विजैः । क्षीरबाहुल्यमुदिता नेर्ष्या तत्र वितन्वते ॥ ४४ ॥
प्रीतौ च मातापितरौ तन्निष्ठां वीक्ष्य तस्थतुः । गवां शुश्रूषणं नित्यमेवमेव वितन्वतः ॥ ४५ ॥
विचारधर्मणस्तस्य ययुः संवत्सरास्त्रयः । अथैकस्मिन् दिने कश्चित्खलकर्मा महात्मनः ॥ ४६ ॥
गत्वा ग्रामे द्विजान् सर्वाञ्श्रावयामास दुर्मतिः । विचारधर्मपितरावाहूयोचुश्च ते द्विजाः ॥ ४७ ॥
सुतस्ते पालनव्याजान्मध्याह्ने चारयन् पशून् । निरुध्य शाद्वले धूर्तो दुग्ध्वा स्वैरं पयो गवाम् ॥
दौष्ठ्यात्पिण्डीकृते सिञ्चन् सैकते विहरत्यसौ । तत्सूनुः शिक्षणीयोऽसौ तद्भूयो न सहामहे ॥ ४९ ॥
इति तद्वाक्यमाकर्ण्य पितरौ खेदमापतुः । यज्ञदत्तः परेद्युस्तत्कृत्यं शोधयितुं क्वचित् ॥ ५० ॥
तस्थौ तु विटपे लीनो भूयो विप्रवचः स्मरन् । अथोदिते दिवानाथे कृतकृत्यो हुतानलः ॥ ५१ ॥
स मांसमीना गृष्टीश्च घटोष्ट्रीर्नैचिकीस्तथा । धेनूः शिवदुघा द्रोणदुघाः कुम्भदुघास्तथा ॥ ५२ ॥
अपि बष्कयणीस्ता गाश्चारयित्वा तृणं बहु । प्रच्छाये तरुमूले ता निरुध्यात्मकमण्डलुम् ॥ ५३ ॥
अधस्तादूधसां कृत्वा मन्दं कण्डूयते स्म सः । तत्कण्डूयनमात्रेण स्वैरमस्रावयन् पयः ॥ ५४ ॥
पयःपूर्णं समादाय कमण्डलुमथात्मनः । न्यस्य सैकतलिङ्गस्य समीपे शिवमर्चितुम् ॥ ५५ ॥
आसाद्य कोविदारस्य मूलं तत्पत्रपुष्पकैः । वर्णी प्रवृते चान्यैः पत्रैः पुष्पैरुपार्जितैः ॥ ५६ ॥
विधाय सैकतं लिङ्गमालयं सिकतामयम् । पृथक्पृथक् समाहूय दुग्ध्वा दुग्ध्वा च नैचिकीः ॥ ५७ ॥
सायमीशाभिषेकार्थं क्षीरैः पूर्णा इमे घटाः । इमे प्रातर्निवेद्यार्थं इमे सायं भवन्त्विति ॥ ५८ ॥
शंभोर्मध्याह्नपूजार्थं क्षीरैः पूर्णा इमे घटाः । तिष्ठन्त्विति निवेश्येशसविधे स पुनस्तु गाः ॥ ५९ ॥
अन्याः सर्वाः समाहूय दुग्ध्वा दुग्ध्वा कमण्डलौ । अभिषिच्याथ तत्क्षीरैः पूजां कृत्वा विधानतः ॥
तुवन् जपन्नमन् गायन् शिवं ध्यायन्नवस्थितः । दृष्ट्वागत्य पिता कोपादण्डमादाय वैणवम् ॥ ६१ ॥

तत्पृष्ठे ताडयामास ध्यानारूढो न वेत्ति तत् । पुनः पुनश्च संताड्य त्यक्त्वा तं कोपविह्वलः
तत्र स्थितान् क्षीरघटान् पादेनास्य कमण्डलुम् । चिक्षेप किं किं दुष्टात्मन्नित्युक्त्वाभर्त्सयत्सुतम् ॥
पादप्रहारविध्वस्तात्तस्य दुग्धकमण्डलोः । स्थापितक्षीरकुम्भेभ्यो निर्गतं क्षीरमावृतम् ॥ ६४ ॥
विशीर्णमपतन्मूर्ध्नि शंभोः सैकतरूपिणः । उन्मील्यालोक्य तत्कोपाद्वीक्ष्य क्षीरघटच्छिदम् ॥ ६५ ॥
शिक्षादण्डं गवां पाणौ गृहीत्वा द्रोहकारिणः । जघान पादे कोपेन चण्डेन पितुरव्ययम् ॥ ६६ ॥
दण्डः शिवाज्ञया भूत्वा परशुः सोऽच्छिनत्पदे । ॥ ६७ ॥

स कृत्तपादो निपपात भूमौ हा हेति मूर्च्छां सहसा प्रपन्नः ।
तावत्प्रसन्नः पतिरम्बिकायाः प्रादुर्बभूवास्य वृषाधिरूढः ॥ ६८ ॥

कैलासशिखराकारे वृषभे गिरिजासखम् । अवलोक्य महादेवं अस्तौषीत्प्रणिपत्य सः ॥ ६९ ॥

अवरुह्य हरस्तदा वृषेन्द्राद्बटुमाश्लिष्य सुराग्रतो जगाद ।
मयि भक्तिमता जिता त्रिलोकी भवमुक्तः सततं भवान्तिके मे ॥ ७० ॥

इत्युक्त्वाघ्राय तं मूर्ध्नि ते पितास्म्यसि मे सुतः । मया भुक्तं तु यत्किंचिल्लिप्तं निर्माल्यमस्तुते ॥७१॥
द्विजोच्छिष्टं शिवोच्छिष्टं परेषां नार्हमेव हि । भुक्तं यदि पैर्नूनं प्राप्य ते पातकं तु तैः ॥ ७२ ॥
अमलं मम निर्माल्यं योऽश्नं चक्रे स्वयं मलम् । स मलात्मा मलान्तःस्थो नरके मलमश्नुते ॥ ७३ ॥
तथापि मम निर्माल्यं निर्मलात्मा मदात्मकः । भुङ्क्ते यदि न दोषः स्याद्भवेत्पाशनिकृन्तनम् ॥
निर्माल्यं निर्मलैर्भोज्यं निर्मलत्वादनिन्दितम् । तस्मादभोज्यं निर्माल्यं प्राकृतैरशिवात्मभिः ॥
बुभुक्षुर्योऽस्ति निर्माल्यं भुञ्जीयान्मदनुज्ञया । त्वां चानुज्ञाप्य चण्डेश भुञ्जीयान्मलनुत्तये ॥ ७६ ॥
आवयोरननुज्ञाप्य भुङ्क्ते यस्तु क्षधातुरः । पुनर्भवाब्धावुन्मज्जन् मद्भक्तोऽपि पतिष्यति ॥ ७७ ॥
निर्मलं मम निर्माल्यं मलत्रयहरं नृणाम् । विष्वादीनां तु नैवेद्यं मलत्रयकरं सदा ॥ ७८ ॥
जन्ममृत्युकरं तत्तु न तु कैवल्यसाधनम् । तस्मादवश्यं निर्माल्यं मदीयं महितं बुधैः ॥ ७९ ॥
स्वीकर्तव्यं प्रयत्नेन भक्तैः स्कन्दसमैरिदम् । यः पूजयति मां नित्यं पूजान्ते त्वां तु नार्चयेत् ॥
निवेदितं तु निर्माल्यं तुभ्यं यो न निवेदयेत् । मदर्चनारतस्यापि न स्यात्तस्यार्चनाफलम् ॥
इत्युक्त्वा निजमौलिस्थां शम्याकस्रजमर्पयन् । पितुः पदस्य छेत्तासि यस्मात्त्वं चण्डकोपतः ॥
चण्डेश्वर इति ख्यातिर्द्वितीयावरणेशता । दत्ताधिपत्यं मद्वारि शाश्वतं तेऽस्तु मा रुद ॥ ८३ ॥
कैलासे त्वत्पितुर्भूयान्मुक्तिः सालोक्यरूपिणी । इत्युक्त्वा भगवाञ्शंभुः सह चण्डेश्वरेण च ॥ ८४ ॥
आससाद निजं लोकं कैलासमुमया सह । प्रसादादथ देवस्य यज्ञदत्तोऽपि तत्क्षणात् ॥ ८५ ॥
स्वबन्धुवर्गैः सहितः कैलासं पदमाप्तवान् ॥ ८६ ॥

॥ इति श्रीस्कन्दोपपुराणे शिवभक्तविलासे चण्डेश्वरमुक्तिप्राप्तिर्नामैकोनचत्वारिंशोऽध्यायः ॥

॥ अथ चत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

शिवकैङ्कर्यमात्रेण भक्तिमल्लियोऽपि वा । विमुक्ताः कर्मबन्धेभ्यो भक्त्या स्वाङ्घ्रिद्वय जनम् ॥१॥
नमन्तं दर्शनादेव तारयन्ति भवाम्बुधेः । अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ २ ॥
शंभोः प्रसादः प्रत्यक्षो यत्र हि श्रूयते जनैः । अस्ति किंचित्पुरं रम्यं **आमूर्** इति भुवि श्रुतम् ॥
यत्र हालिककेदारसञ्चितो व्रीहिसञ्चयः । वर्धमानोन्नतिः स्पर्धां भजते हेमभूभृता ॥ ४ ॥
यत्रोद्यानतरुस्तोमच्छायासु मखकारिणाम् । अग्निहोत्राग्निधूमौघो धत्ते पारावताश्रियम् ॥ ५ ॥
तारुणीवदनाम्भोजसौरभ्योर्मिषु मज्जताम् । मधुव्रतानां विरुतैर्दिशो यत्र निरन्तराः ॥ ६ ॥
यत्रावतीर्णौ देशे तौ भक्तौ वागीशसुन्दरौ । तत्राभूत् **कीर्तिमान्नाम** शूद्रवंशसमुद्भवः ॥ ७ ॥
हलसंभूतया भक्तान् श्रिया यः समपूजयत् । धर्मश्रद्धेव तस्यासीत् **मादनी** नाम वल्लभा ॥ ८ ॥
कुलसौन्दर्यसौजन्यविनयादिगुणान्विता । कौमुदीव शशाङ्कस्य प्रेयसी तस्य सादरा ॥ ९ ॥
कालेनाथ तयोरासीत्कन्यैका **तिलकावती** । सा वर्धमाना बालापि मनोनयनकर्षिणी ॥ १० ॥
शारदीव शशाङ्कस्य कला प्राप्तनवोदया । अथ पुत्रार्थिनस्तस्य जातः कीर्तिमतः सुतः ॥ ११ ॥
लक्षण्योऽज्ञानभिन्नाम निशाकर इवाम्बुधेः । कृतनामादिसंस्कारोऽज्ञानभित्पञ्चवार्षिकः ॥ १२ ॥
विनीयमानो गुरुभिस्तानमोघश्रमान् व्यधात् । स्वातन्त्र्यं सर्वविद्यासु दृष्ट्वा तस्याखिला जनाः ॥
कुलस्थितिं कीर्तिमतो मेनिरे सुप्रतिष्ठिताम् । कीर्तिमानपि कन्याया वयसि द्वादशे सति ॥
वरमन्वेषयामास समानकुलसंभवम् । एतस्मिन् समये तस्य पूर्वसंबन्धिवंशजः ॥ १५ ॥
कलिशत्रुरिति ख्यातो मन्त्री राज्ञः शिवार्चकः । उद्वोढुकामः स्वान् बन्धून् प्राहिणोत्कन्यकार्थिनः ॥
कीर्तिमन्तं च ते प्रोचुर्मानिताः स्वजनान्तरे । कलिशत्रोरियं भार्या कन्या ते तिलकावती ॥ १७ ॥
भूयादनन्यसामान्यं तयोर्दाम्पत्यमद्भुतम् । इत्युक्तः कीर्तिमानाह तथास्त्विति स बान्धवान् ॥१८॥
अतीत्य चैत्रं वैशाखे मुहूर्तोऽस्त्विति मानिताः । निश्चित्य वस्त्रताम्बूलहरिद्राद्यर्पणादमी ॥ १९ ॥
कलिशत्रुं पुनः प्राप्ताः बान्धवास्तदचक्षत । कलिशत्रुरभूत्प्रीतो वार्तामाकर्ण्य मङ्गलाम् ॥ २० ॥
अप्यभूत्तिलाकावल्या मनःप्रीतिर्महीयसी । अथ राजाज्ञया शत्रून् पुरीमावृत्य तिष्ठतः ॥ २१ ॥
विजेतुं नगरात्तूर्णं समरं प्रति निर्गतः । कलिशत्रुर्बलैः सार्धं वीरो मन्त्री रणस्थलीम् ॥ २२ ॥
प्राप्तो विद्विषतां सैन्यैर्हन्यमानैर्वृतो निशि । मारयित्वा बहून् योधानभवद्वैरिणा हतः ॥ २३ ॥
दिवसैः पञ्चभिरेव कीर्तिमान् ज्वररोगतः । पीडितोऽपि जहौ देहं मातापितरमन्वगात् ॥ २४ ॥
अज्ञानभिद्यधात्पित्रोः सकलं चौर्ध्वदैहिकम् । कलिशत्रुं हतं श्रुत्वा शुशोच परमातुरः ॥ २५ ॥
पतिरन्यो युवास्याः स्यादनूढाया मम स्वसुः । इति ब्रुवन्तमनुजं निवार्याथ प्रतिव्रता ॥ २६ ॥
वचः पित्रोः करिष्यन्ती दधाना व्रतमुत्तमम् । पितृभ्यां मनसा दत्ता पुराहं कलिशत्रवे ॥ २७ ॥
स चेद्विनिहतो युद्धे मम भाग्यविपर्ययात् । प्रवेक्ष्याम्यग्निमस्विष्टः पतिर्भाविनि जन्मनि ॥ २८ ॥

इति तां विहितोद्योगां प्रत्यषेधन् द्विजातयः । अनुजोऽस्या न्यषेधत्तां नमन्नज्ञानभित्पदे ॥ २९ ॥
अनूढानुमृतिः शास्त्रैर्विहिता नेति बोधिता । ततः सा त्यक्तभोगैव विरक्ता विषयेषु च ॥ ३० ॥
स्वकीयैर्बान्धवैर्वृद्धैः स्थापितानुजरक्षणे । काषायवसना भूत्वा पञ्चाक्षरजपोत्सुका ॥ ३१ ॥
भस्मोद्धूलितसर्वाङ्गी धृतरुद्राक्षमालिका । जन्मभूमिं परित्यज्य त्रिपुरासुरमारकम् ॥ ३२ ॥
वीराष्टशालयं गत्वा मार्जनालेपनादिकम् । कुर्वती शिवनामानि कीर्तयन्ती जितेन्द्रिया ॥ ३३ ॥
ददाना शिवभक्तेभ्यो वासश्चान्नं यथेप्सितम् । मितभुङ्मौनवत्यासील्लोकवार्तासु मूकवत् ॥ ३४ ॥
शिवस्य तिलकावत्याः कथाश्रवणतोऽचिरात् । प्रससाद मनः शंभोः प्रसादेन गुरोरपि ॥ ३५ ॥
शिक्षितोऽप्रजया बालो विप्रशुश्रूषणे रतः । अष्टादशपुराणार्थानशृणोद्गुरुसन्निधौ ॥ ३६ ॥
चकारोच्चावचान् धर्मान् मत्वा सर्वं विनश्वरम् । वापीकूपतटाकांश्च पुण्यभूरुहवाटिकाः ॥ ३७ ॥
प्रतिश्रयांश्च गोशालाः पुष्पारामाननेकशः । आर्तौषधप्रदानं च दीनान्धपरिपालनम् ॥ ३८ ॥
क्षीरं तैलं शिशूनां च दानं धर्मे जलान्नयोः । चक्रे किं बहुनोक्तेन नास्य नास्तीति वागभूत् ॥
तस्यैवं वर्तमानस्य पापैः प्राग्जन्मसञ्चितैः । मूर्तिमद्भिरभूत्सङ्गः पाषण्डापशदैर्जिनैः ॥ ४० ॥
एकदा ते समागत्य वेदबाह्यमते स्थिताः । अहिंसयोचुः प्राधान्यं हिंसयान्यत्र दुष्टताम् ॥ ४१ ॥
अप्रत्यक्षं श्रुतं यद्यदप्रमाणमुपादिशन् । विहितः क्षणिकः शब्दैर्धर्मः किं साधयिष्यति ॥ ४२ ॥
नष्टे कर्तरि नान्येति स्वर्गादौ यत्फलं भवेत् । उपचारं च बिम्बेषु पूर्णस्य ज्योतिषः कथम् ॥
ऐक्ये जीवात्मयोः किन्नु स्यात्सुखादिविचित्रता । कर्मणा चेत्समुत्कर्षो न योगी ब्रह्मविद्भवेत् ॥
देवालयो विहारः स्यात्तस्मात्तन्न नमेद्बुधः । न वर्णे चाश्रमे भेदो दृश्यते क्वचिदात्मनः ॥ ४५ ॥
बुद्धिमानसि किं वाचां विस्तरेणानुचिन्तय । युक्तं चेदार्हतमतं गृहाणान्यत्र किं श्रमैः ॥ ४६ ॥
इत्यादिवचसां गुम्फैरार्हतानां स वञ्चितः । वैदिकाध्वश्रमश्रद्धामत्यजद्दुष्टसङ्गतः ॥ ४७ ॥
किमत्रेति प्रलोभ्यैनमनयन् स्वपदं जिनाः । स तन्मतप्रवेशेन जिनान् सर्वानतोषयत् ॥ ४८ ॥
तत्याजाऽज्ञानभित्स्नानं दानं देवद्विजार्चनम् । वर्णान्ववायधर्मं च वेदबाह्योऽचिरादभूत् ॥ ४९ ॥
चैत्यप्रणामं विदधे धत्ते स्म कटमम्बरम् । देवतासन्निधौ क्वापि नाञ्जलिं विदधे सकृत् ॥ ५० ॥
अभ्यासपाटवादासीज्जैनसिद्धान्तदेशिकः । इति प्रापार्हतमतमप्रसादादुमापतेः ॥ ५१ ॥
पुरे पाटलिपुत्राख्ये ह्यभिषिक्तो जिनैरभूत् । पूर्वनाम परित्यज्य पित्राहूतं कृतं च यत् ॥ ५२ ॥
स्वयं जैनगुरुर्भूत्वा धर्मसेनाह्वयोऽभवत् । तमार्हतमताध्वन्यास्तस्थुरावृत्य सर्वदा ॥ ५३ ॥
नेमुश्चिह्नं दर्शयन्त्यः सन्ध्ययोरार्हतस्त्रियः । दृष्टतच्चिह्नसाहस्रः सोऽभवत्पुरुषार्थवान् ॥ ५४ ॥
जैनशास्त्रप्रसङ्गेन धृतेन पटवाससा । स तु जैनमताचार्यः प्रवृत्तः सर्वसंमतः ॥ ५५ ॥
जिनतन्त्राध्वगं श्रुत्वा भ्रातरं तिलकावती । विदीर्णहृदया शोकाच्छरणं प्राप शङ्करम् ॥ ५६ ॥
सा तार्क्ष्यसरिति स्नात्वा सायं प्रातर्दिने दिने । जलार्द्रवसना देवं भेजे भस्मावकुण्ठिता ॥ ५७ ॥
स्वहस्तापचितैः पुष्पैर्निर्माय विविधाः स्रजः । ददाना प्रत्यहं भेजे विद्रुमाधीश्वरं विभुम् ॥ ५८ ॥

नमः शिवाय त्रिदशार्चिताय नमः शिवाय त्रिपुरान्तकाय ।
नमः शिवायाधिविमोचनाय नमः शिवाय प्रणतार्तिहर्त्रे ॥ ५९ ॥

पतितं दुर्मताब्धौ मे भ्रातरं करुणानिधे । स्वामिन्नुद्धर देवेश दया मयि विधीयताम् ॥ ६० ॥
एवं संप्रार्थयन्ती सा कृत्तिवाससमीश्वरम् । उपवासपरा काश्यं जगाम तिलकावती ॥ ६१ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे तिलकावतीविषादो नाम चत्वारिंशोऽध्यायः ॥

॥ अथैकचत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

तपसा तिलकावत्याः प्रसन्नः परमेश्वरः । इमां स्वप्ने समागत्य जगाद हृदयङ्गमम् ॥ १ ॥
तिलकावति मा शोकं कृथा मनसि ते व्रतैः । प्रीतोऽस्मि मयि सुप्रीते सति जन्तुर्न शोचति ॥ २ ॥
शृणु चाप्यपरं वाक्यं तिलकावति येन ते । तदार्हतमतं प्राप्तो भ्रातायमिति शोचसि ॥ ३ ॥
आर्यावृत्तेऽभवत्कश्चित्सुतपा नाम सर्ववित् । मुनिरासीन्महाप्रज्ञः सर्वशास्त्रविशारदः ॥ ४ ॥
भक्तिमान् मयि धर्मार्थं विद्यामुपदिदेश च । अज्ञानिनोऽनेन पुरा बहवः सुधियोऽभवन् ॥ ५ ॥
तदा कश्चित्समागत्य शान्तिमान्नाम मस्करी । ब्राह्मणैर्विहितातिथ्यः शिष्याणां नर्मदातटे ॥ ६ ॥
व्याकरोद्वेदसारार्थं जीवात्मैक्यं यतो भवेत् । तदा तस्य परीक्षायै प्रवृत्तः सुतपा मुनिः ॥ ७ ॥
तदार्हतमतालम्बी व्याजहारात्मनो भिदाम् । नैष वेदान्तसमयस्त्वं यदात्थेति सोऽब्रवीत् ॥ ८ ॥
प्रामाण्यं नैव वेदानामित्याह सुतपाः पुनः । शशाप शान्तिमानेनं तदानीं वेदनिन्दया ॥ ९ ॥
कुपितो वेदबाह्यानां अस्त्वेकोऽयं कुलेष्विति । पुनर्नत्वा क्षमस्वेति शापान्तं तमयाचत ॥ १० ॥
दयया स पुनः प्राह शिवभक्त्यास्तु धीरिति । मद्वक्तस्य वचो भूयान्न मिथ्या मद्वचो यथा ॥११॥
तव भ्रातार्हतमतं तस्मादेष प्रवेशितः । पश्य मे शक्तिमतुलां त्याजयिष्यामि तन्मतम् ॥ १२ ॥
इत्युक्त्वान्तर्हितः शंभुरसह्यमतिबाधकम् । धर्मसेनोदरे शूलं प्राहिणोदीश्वरो गदम् ॥ १३ ॥
प्रीता तदद्भुतं स्वप्ने दृष्ट्वासीत्तिलकावती । अथैकदापिबद्दुग्धं धर्मसेनो निशान्तरे ॥ १४ ॥
अजीर्णमभवत्क्षीरं ततश्चाभूद्रदो महान् । उदरेऽवर्धत व्याधिः काळकूटाग्निसन्निभः ॥ १५ ॥
दावाग्निरिव जज्वाल तेन मूर्छाभवन्मुहुः । चछर्द पीतमशितं यदल्पमपि तद्बहु ॥ १६ ॥
विह्वलः शूलरोगेण धर्मसेनो जिनालये । निपतन्नुत्पतन्निद्रां नान्वभून्न मृतिं ययौ ॥ १७ ॥
तस्य रोगं विनेष्यन्तः संभूय कटवाससः । प्रायुञ्जतामयघ्नीस्ते विद्या नानाविधाः पृथक् ॥ १८ ॥
औषधानि च दत्तानि सिद्धानि स्थलकोटिषु । सर्वाणि तानि नष्टानि रोगे वह्नौ तृणं यथा ॥ १९ ॥
व्यजृम्भतोदरे तस्य भूयः शूलो महाभयः । धर्मसेनः प्रवृत्तः स्यात्प्राणत्यागे यथा स्वयम् ॥ २० ॥
अथ देशान्तरात्केचिद्भिषजो जिनसंमताः । आपादकेशं पिछाग्रैरामृशन्तोऽजपन् मन्त्रान् ॥ २१ ॥

द्विगुणः स च तन्मन्त्रैः समुद्रवदवर्धत । निराशाश्चार्हताः सर्वे मुक्त्वा तं निशि निर्ययुः ॥२२॥
धर्मसेनोऽसहायः सन् रुरोद भृशमातुरः । नान्नं किंचित्कचिल्लेभे पीड्यमानः क्षुधा तृषा ॥ २३ ॥
प्रत्युत्पन्ना मतिस्तस्य द्वित्रैरेव दिनैः स्वसा । रक्षां विधास्यतीत्येकां तस्यै धात्रीमचोदयत् ॥२४॥
तिलकावत्यथ प्राह धात्रीं भ्रात्रा प्रचोदिताम् । जिनालयप्रवेशो मे धात्र्ययुक्तः स चेत्स्वयम् ॥२५॥
अत्रागतः स्वयं रक्षां करिष्यामीति साब्रवीत् । धर्मसेनाय तत्सर्वमुक्त्वा तं स्वयमानयत् ॥ २६ ॥
निर्धूय जैनसमयं दीनदीनस्तथातुरः । स नत्वा पादयोः प्राप शरणं तिलकावतीम् ॥ २७ ॥
पादयोः पतितं रुग्णं चिबुकश्मश्रुधारिणम् । कटं वसानं करयोः पिछिकाकुण्डिकाधरम् ॥ २८ ॥
महोदरं जीर्णकण्ठं स्वरजात्यैव सानुजम् । ज्ञात्वा प्रसादमीशस्य स्मरन्ती च विसिष्मिये ॥ २९ ॥
किमेतदिति पृष्टस्तां धर्मसेनोऽब्रवीत्सतीम् । आर्ये दुष्टार्हतैरस्मि वञ्चितो वेददूषकैः ॥ ३० ॥
व्यध्वभाजं जिनाश्चक्रुर्मां निवर्त्यागमाध्वनः । यदा मे शूलरोगोऽभूत्तदा ते कटवाससः ॥ ३१ ॥
रोगापनयनं कर्तुमशक्ता दुद्रुवुः खलाः । त्वामस्मि शरणं प्राप्तो रक्ष मामात्मजं यथा ॥ ३२ ॥
नास्त्यौषधं मे रोगस्य न प्रयान्त्यसवो मम । निद्रा नैव क्षुधा बह्वी भक्तं किंचिन्न जीर्यते ॥३३॥
कुक्षौ शूलामयः सोऽयं हालाहलमिवैधते । स्पृश त्वमुदरं किंचित्कृतार्थः स्यां न संशयः ॥ ३४ ॥
अथाह भ्रातरं साध्वी दयालुस्तिलकावती । कृतस्य सहसा काले कर्मणः फलभाग्जनः ॥ ३५ ॥
अकृत्वा कोऽप्यविहितं न दुःखी स्यात्कदाचन । प्राग्जन्मनि कृतं तावत्त्वया वेददूषणम् ॥ ३६ ॥
फलं तस्यैव पापस्य प्रवेशो जिनवर्त्मनि । दूरे तथागतं दृष्ट्वा धीमांश्चक्षुर्निमीलयेत् ॥ ३७ ॥
स दृष्टश्चेत्प्रमादेन पश्यन्नर्कं शिवं स्मरेत् । असंभाष्योऽसि मे तस्मान्न स्पृशाम्युदरं करैः ॥ ३८ ॥
बन्धुस्त्वमसि जीवन् वा मृतो वापि जिनो ह्यसि । इत्युक्त्वा गन्तुमिच्छन्तीं स रुदंस्तिलकावतीम् ॥
उच्चैःस्वरेण चुक्रोश पाहि पाहीति दीनवाक् । दयावती तमाहाथ निवृत्यार्तं निजानुजम् ॥ ४० ॥

तिलकावती ॥

यदि रक्षा विधेया ते मया तावत्तथागत । जिनचिह्नानि संत्यज्य स्नाहि तार्क्ष्यसरिज्जले ॥ ४१ ॥
इत्युक्तः स तया सर्वं संत्यज्यार्हतलक्षणम् । स्नौ तार्क्ष्यसरित्तोये सादात्तस्मै नवांशुकम् ॥४२॥
दत्ते च विमलं भस्म भक्त्या धत्तेऽलिके च सः । तया संप्रार्थितो दीक्षां कुरुष्वास्मै कनीयसे ॥
शान्तं नतं गुरुरथो दीक्षया संस्कृतं व्यधात् । प्रणतस्तिलकावत्या तस्मै पञ्चाक्षरं गुरुः ॥ ४४ ॥
उपदिश्य ददौ भस्म वीराट्टेश्वरसन्निधौ । जठरात्तस्य रोगोऽपि काकरूपेण निर्गतः ॥ ४५ ॥
समुड्डीयाम्बरेऽगच्छत्सद्यः सर्वेऽपि विस्मिताः । नीरोगोऽज्ञानभिच्चासीन्निर्मुक्त इव पन्नगः ॥ ४६ ॥
भस्मलेपनमात्रेण दिव्यरूपं वपुर्दधौ । रोगापनयनात्सद्यस्तस्य भक्तिः शिवेऽभवत् ॥ ४७ ॥
नापरं मन्यते दैवं महादेवान्महेश्वरात् । स्नात्वा भस्माङ्कितः कुर्वन् पञ्चाक्षरजपं सदा ॥ ४८ ॥
व्यतनोत्तिलकावत्या शिवकैङ्कर्यमुत्तमम् । अज्ञानभिच्च कैङ्कर्यं शंभोरामाससप्तकम् ॥ ४९ ॥

तदा म्लेच्छाधिपः कश्चित्पल्वलो नाम भूपतिः । तद्देशस्य विजित्यासीदशेषधरणीपतिः ॥ ५० ॥
कृत्वा रात्रौ पुरः शंभोः स्तोत्रं कर्तुं मनो दधे ॥ ५१ ॥

अथ महेश्वरशासनचोदिता भगवतीवचसामधिदेवता ।
व्यधित बोधवतो रसनाग्रतः स्थितिमभूत्स यतो रसनापतिः ॥ ५२ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे अज्ञानभिदः स्तोतृत्वप्राप्तिर्नामैकचत्वारिंशोऽध्यायः ॥

॥ अथ द्विचत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

महादेवप्रसादेन प्राप्तसारस्वतामृतः । जिह्वारामः स्ववाक्पुष्पैरानर्च परमेश्वरम् ॥ १ ॥

श्रीवागीशः ॥

तार्क्ष्यापगातटस्थाय विद्रुमाद्रिनिवासिने । वीक्षणध्वस्तरोगाय वीराद्रेश्वर ते नमः ॥ २ ॥
अचिकित्सामयव्यूहध्वान्तविध्वंसभानवे । अनाथजननाथाय नमस्ते कृत्तिवाससे ॥ ३ ॥
अज्ञानरोगवैद्याय विज्ञानामृतदायिने । विश्वाधिकाय विष्ण्वाद्यैरस्तु वन्द्याय ते नमः ॥ ४ ॥
जगन्मङ्गळमूलाय जन्ममृत्युभयच्छिदे । जटामण्डलसंरुद्धजाह्नवीकाय ते नमः ॥ ५ ॥
दुर्मतेः सन्मतिं दत्वा विनीय च रुजं मम । स्वभक्तं विदधे यो मां नमस्तस्मै दयाब्धये ॥ ६ ॥

समुन्नतिं नाणुरवैति मेरोः खद्योतपोतश्च न सूर्यतेजः ।
गाम्भीर्यमब्धेर्न तुषारलेशस्तथा विभूतिं तव वेद्मि नाहम् ॥ ७ ॥

मन्दस्मितप्लुष्टपुरत्रयाय मनोभवाडम्बरघस्मराय ।
महाभयत्रस्तकृताभयाय महानुभावाय नमः शिवाय ॥ ८ ॥

यन्मे प्राग्जन्मकोटौ क्वचिदपि न मया पादपद्मं स्मृतं ते
तेनाभूज्जन्म दुष्टं मम जिनमतभाग्यत्र जाताधिका धीः ।
भक्तायास्ते प्रसादात्स्वसुरपि जनिता सन्मतिर्नौमि यत्त्वां
भूयः शंभो न जन्मास्त्वथ यदि भविता त्वत्पदे भक्तिरस्तु ॥ ९ ॥

इति स्तुत्वा महादेवं भक्त्या प्रणतमग्रतः । बभाषे भारती दिव्या विना तम्बा तमोरिपुम् ॥ १० ॥

आकाशवाणी ॥

अज्ञानभिस्त्वं कृतार्थो भक्तिमानसि यन्मयि । पूतोऽसि जिनसङ्गाधात्स्तुहि मां सर्वतः कविः ॥ ११ ॥
जन्मनः फलमेतद्धि यन्मम स्तोत्रमुक्तिभिः । दिवानिशं च जिह्वाग्रे वर्ततां नवभारती ॥ १२ ॥
वागीश इति ते नाम मत्तस्तत्प्रथतां भुवि । यदा स्मरसि मां त्वं त्वां रक्षितास्मि न संशयः ॥

इत्युक्त्वा विरता वाणी मुमुदे वागधीश्वरः । अथ स्वसारमामन्त्र्य वागीशस्तिलकावतीम् ॥ १४ ॥
प्रातिष्ठत स यावत्तन्नाम लोकेषु पप्रथे । स्वभ्रातरं प्रतिष्ठासुमुवाच तिलकावती ॥ १५ ॥
निवृत्तः शूलरोगस्ते शंभोरत्रैव सन्निधौ । सिद्धिक्षेत्रे तदत्रैव कुरु कैङ्कर्यमीशितुः ॥ १६ ॥
इति स्वस्रा तया प्रोक्तस्तृणखण्डनिकाधरः । तत्र देवालयस्थाने दूरोचक्रे तृणानि सः ॥ १७ ॥
सायं प्रातश्च तुष्टाव यदा शंभुं तदा सुराः । ववर्षुः पुष्पवर्षाणि लोकस्तद्वीक्ष्य विस्मितः ॥ १८ ॥
आब्रह्मभवनं तस्य ववृधे कीर्तिरुज्ज्वला । ब्राह्मणा यतयश्चैनं यथा शंभुमपूजयन् ॥ १९ ॥
व्याकरोदौपनिषदीं विद्यामेष महामतिः । प्रसादं शाङ्करं तस्मिन्नथाकर्ण्यार्हता गणाः ॥ २० ॥
ईर्ष्यावन्तो नृपद्वारं प्रापुस्तच्छासनोद्यताः । पाटलीपुत्रविख्याते पुरे पल्लवसंज्ञितः ॥ २१ ॥
तदेशनायको यत्र वर्तते जैनभूपतिः । पृष्टाः पल्लवभूपेन पूजिताश्च प्रतिष्ठिताः ॥ २२ ॥
ईर्ष्यानिर्दग्धहृदया दुर्बुद्धिं तमबोधयन् । ॥ २३ ॥

आर्हताः ॥

प्रविष्टश्छद्मनास्माकं धर्मसेनो मतं महत् । गृहीतमतसर्वस्वो व्यपदिश्य मृषामयम् ॥ २४ ॥
व्याधेर्निरोधे चाशक्तिमारोप्यास्मासु वैदिकैः । दूषयामास तैः सार्धं शैवपाषण्डतां गतैः ॥ २५ ॥
सर्वथा शिक्षणीयोऽयं न चेत्स्याद्दूषितं मतम् । गृहीत्वा यान्तु योधास्तमालप्याचैव किङ्कराः ॥ २६ ॥
इत्युक्तः प्रेषयामास भटानार्हतभूपतिः । वीराष्टेशालयस्थं तं बद्ध्वा संजगृहुश्च ते ॥ २७ ॥
निबद्धथ नीयमानं तमालोक्य तिलकावती । शोकार्ता शरणं प्राप शङ्करं शरणं सताम् ॥ २८ ॥
नानाविधायुधैस्तत्र छिन्धि भिन्धीति वादिभिः । निन्ये भटैर्नृपद्वारि भस्मरुद्राक्षभूषितः ॥ २९ ॥
तमानीतं भटैः श्रुत्वा जगादार्हतदेशिकान् । राजास्य दण्डः को वेति ते चूर्णाश्मसुपूरिते ॥ ३० ॥
गेहे बद्धारे स्थाप्य जलैः संसिच्य शीघ्रतः । क्रथिते चूर्णजालेऽस्य मृतिरस्त्विति ते जगुः ॥ ३१ ॥
जिनदासः स भूपालः कुरुतैवमिति स्वकान् । जगादाकण्ठपूर्णे ते चूर्णेऽवस्थाप्य सद्मनि ॥ ३२ ॥
वागीशमम्भःप्रदरात्सिषिचुश्चूर्णमण्डलम् । बद्धारे क्रथच्चूर्णे वागीशस्तद्गृहे स्थितः ॥ ३३ ॥
नवकर्पूरपाटीरपङ्कमध्ये प्रतिष्ठितम् । मौलिस्थचन्द्रबिम्बान्तः सुधारसमाप्लुतम् ॥ ३४ ॥
अजरामरमत्यच्छमाकाशमिव निश्चलम् । आत्मानं भावयामास शिवोऽहमिति वाक्पतिः ॥ ३५ ॥
चूर्णाश्मजालं क्रथितं न बबाधे शिलामिव । चन्द्रचूडं तदास्तौषीद्दशद्राविडसूक्तिभिः ॥ ३६ ॥
संतुष्टेशाज्ञयास्यैतदूष्मा मन्दानिलायते । तच्चूर्णपङ्कस्तस्यातिशीतळश्चन्दनायते ॥ ३७ ॥
चन्द्रबिम्बवदाह्लादकरोऽभूत्क्षुण्णवारकः । एवं दृष्ट्वा बभूवायं तृप्तिमान् वागधीश्वरः ॥ ३८ ॥
अतीते सप्तरात्रे तु दृष्ट्वा वागीशमक्षतम् । आनन्दामृतकल्लोलमालाशीतळविग्रहम् ॥ ३९ ॥
अम्लानाम्भोजवदनं विजितक्षुत्तृषं नृपः । अभूत्सपरिवारः स तत्र चित्रार्पितो यथा ॥ ४० ॥
बभाषे चार्हतगुरून् शुष्यद्वक्त्रान् स पल्लवः । किं विद्ययौषधैर्वायं न मृतिं प्राप तत्र सः ॥ ४१ ॥

अथाहुरार्हता भूयः संभूय वचनं नृपम् । अस्मद्गाद्धान्तशिक्षेयमत्रत्या मनवो धृताः ॥ ४२ ॥
तादृक्मन्त्रप्रभावेण मृतिरस्य न चूर्णतः । क्रियते पायसं चान्नं देयमस्मै गरान्वितम् ॥ ४३ ॥
इत्युक्तोऽभोजयद्भूपः पायसं गरळान्वितम् । क्षुधितोऽसि चिरं भुङ्क्ष्व विद्यया त्वं महानिति ॥

श्रीवागीशः ॥

आपश्च पृथिवी चान्नमत्तारौ वह्निमारुतौ । अवकाशोऽयमाकाशो भुज्यते किं पिनाकिना ॥ ४५ ॥
स एवाहमिति ध्यायन्नन्तस्तद्बुभुजेतराम् । यथा हालाहलं भुक्तं जीर्णमासीत्पिनाकिनः ॥ ४६ ॥
भुक्तं तत्पायसं तेन जीर्णमासीद्द्विजोत्तमाः । अथामर्षवशादेते मृतो न स्यादिति क्रुधा ॥ ४७ ॥
आर्हता प्राप्य राजानमुपायान्तरमूचिरे । हस्तिना वध्य एवासौ नान्यैर्वध्यो भविष्यति ॥ ४८ ॥
इति श्रुत्वा वचस्तेषां प्राहिणोद्गजयूथपान् । ते राजाज्ञामवाप्याथ गजशालामुपेत्य च ॥ ४९ ॥
शतेषु हस्तिषु क्रुद्धो सदा बद्धो मदोद्धतः । यस्तिष्ठति महाभीमो महाकायो महागजः ॥ ५० ॥
आळानेभ्यः समुच्छिद्य शृङ्खलास्तस्य सत्वरम् । चकिताशाश्च चकिता अनीकपममोचयन् ॥ ५१ ॥
अथ तत्प्रहितो हस्ती निर्गतो विशिखान्तरे । शुण्डागृहीतदण्डेन चूर्णीचक्रे पुरस्थितान् ॥ ५२ ॥
गृहांस्तरुनिभाभ्यक्षान् मारयामास वै भटान् । पृष्ठगान् पार्श्वगान् सर्वानागतान्क्षिनदेशिकान् ॥
निहत्य शृङ्खलाघातात्पादाघातात्पराङ्मनान् । निहत्य सर्वान् मत्तेभश्चागतस्तत्समीपतः ॥ ५४ ॥
आधोरणप्रेरितोऽपि क्रुद्धः सौम्यो मदावलः । शिवध्यानपरं दृष्ट्वा शिवस्तोत्रपरायणम् ॥ ५५ ॥
शान्तमन्युरभूत्सद्यः प्रणनाम पुनः पुनः । पुनः प्रदक्षिणीकृत्य तं स्वावासं गजो ययौ ॥ ५६ ॥
अथार्हतगिरा भूयो निबद्धयाश्मनि तं नृपः । नौभिः संप्रापयामास वार्यगाधे महाम्बुधेः ॥ ५७ ॥
तदा शभुं हृदि ध्यायन्नस्तौषीद्रसनापतिः ।

समस्तदेवतासु मुख्य एव शंकरो यदि समस्तवेदशास्त्रगीतवैभवो यदीश्वरः ।
ध्रुवो भवेदियं शिलाममार्हतौघचोदिता नमः शिवाय मन्त्र एष नः सहायतां व्रजेत् ॥ ५८ ॥

इत्यादि दशभिर्गेयैरस्तौषीद्द्राविडोक्तिभिः । तदा शिवाज्ञयाश्मापि प्लवते स्म तटं प्रति ॥ ५९ ॥
तदाम्बुधिर्यथा रामं त्रस्तस्तं शरणं गतः । नवरत्नैस्तमभ्यर्च्य सागरः सरितां पतिः ॥ ६० ॥
प्रीतोऽस्मि चरणस्पर्शादहं तीर्थीकृतस्त्वया ॥ ६१ ॥

भिन्दन्ति शैलानुदधीन् पिबन्ति व्यत्यासयन्ति क्षितिमन्तरिक्षम् ।
तृणीकृतब्रह्मपुरन्दराणां किं दुष्करं शङ्करकिङ्कराणाम् ॥ ६२ ॥

इति स्तुत्वाज्ञया तस्य ययावब्धिर्यथागतम् । प्राप्य वागीश्वरस्तीरमवतीर्य शिलाप्लवात् ॥ ६३ ॥
छिन्नबन्धशतः प्राप यत्र क्षेत्रे स्वसावसत् । वीराट्टेश्वरमासाद्य स्वस्रा समुपलालितः ॥ ६४ ॥
अभिष्टुष्टाव मुदितः सुधाभिरिव सूक्तिभिः । तन्माहात्म्यमवेक्ष्याथ स्वयमागत्य पल्लवः ॥ ६५ ॥
भूपतिः प्रणनामास्य पादयो रक्ष मामिति । अथ तस्माद्भयात्तस्य ज्वरोऽभूज्जिनभूपतेः ॥ ६६ ॥

(1) इत्युक्त्वा (2) इत्युक्त्वा

तत्पादस्पर्शमात्रेण प्रशशाम पुनर्ज्वरः । तव दास्येन धन्योऽस्मि कर्तव्यं किं मयाधुना ॥ ६७ ॥
इत्युक्त्वा स जिनान् सर्वान् स्वदेशान्निरकासयत् । देशे स्थितस्य शाक्यस्य शूलारोपो भविष्यति ॥
इति तद्घोषितं श्रुत्वा सौगतास्ते पलायिताः । पल्लवोऽपि महीपालः संत्यक्तार्हतदुर्मतः ॥ ६९ ॥
वैदिकं मतमास्थाय श्रियमाप शिवार्चनात् ।

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे वागीशचरितं नाम द्विचत्वारिंशोऽध्यायः ॥

॥ अथ त्रिचत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

अथाज्ञया महेशस्य शिवस्थलदिदृक्षया । शिवभक्ताग्रणीः श्रीमान् वागीशो निर्जगाम ह ॥ १ ॥
दृष्ट्वा स्थलान्यनेकानि गीत्वा द्राविडसूक्तिभिः । मध्यार्जुने च मायूरे कुम्भघोणे घृतस्थले ॥ २ ॥
छायावने श्वेतवने वटारण्येऽघनाशने[1] । श्रीमद्वटवने दिव्ये श्रीवाञ्छेऽपि महास्थले ॥ ३ ॥
स्तुवन् महेश्वरं वाग्भिस्तत्रत्यैश्च समर्चितः । चचार सद्यजातीरे यथा घनपथे रविः ॥ ४ ॥
तत्र पिण्याघटस्थाने भक्त्या नत्वा चिरं वसन् । गीत्वा गानैर्द्राविडैस्तमप्रीणयदुमापतिम् ॥ ५ ॥
तेन गानेन सुप्रीतस्त्वाविर्भूयावदच्छिवः । वरं वृणीष्व वागीश यत्ते मनसि काङ्क्षितम् ॥ ६ ॥
तदा प्रत्युत्तरं प्राह वागीशो भक्तिपूर्वकम् । स्वामिन् गत्वा जिनमते भवद्द्रोहमकारिषम् ॥ ७ ॥
तद्दोषपरिहारार्थं देहं त्यक्ष्यामि सन्निधौ । नो चेत्त्वदीयचिह्नेन शुद्धिं कुरु ममाधुना ॥ ८ ॥
इति विज्ञापितः शंभुः प्राहिणोत्कृपयान्वितः । भूतेष्वेकं स्वकीयं स बहिर्निर्गत्य लिङ्गतः ॥ ९ ॥
वहन् हस्तद्वये शूलं वृषमुद्रां सुतापिताम् । वागीशस्यान्तिकं प्राप्य ताभ्यामंसेऽङ्कितं व्यधात् ॥ १० ॥
ततः प्रीतश्चिरं स्थित्वा प्राप्य नल्मूरिति श्रुतम् । तत्र स्थित्वा चिरं स्तुत्वा पञ्चवर्णेश्वरं शिवम् ॥
तद्दत्तेन प्रसन्नेन स्थापिताङ्घ्रिः स्वमूर्धनि । पुनः सोमपुरं प्राप्तः शिवभक्तैरधिष्ठितम् ॥ १२ ॥
तत्र तत्स्थलवासोत्कं द्रष्टुकामो द्विजोत्तमम् । स्वनामाङ्कितसूनौघमद्भुतीति भुवि श्रुतम् ॥ १३ ॥
तदा सोऽप्यद्भुती गेहान्निर्गत्याह्वयदादरात् । प्रार्थितो द्विजवर्येण ह्यग्रहारं ययौ मुदा ॥ १४ ॥
तत्र तद्गृहमाविश्य पूजितस्तेन वाक्पतिः । विश्रम्य क्षणमात्रं तु स्थिते तस्मिन् द्विजोत्तमः ॥ १५ ॥
वागीशाभ्यवहारार्थं सम्यक्पाकमुपाकरोत् । सूपापूपव्यञ्जनौघैर्घृतक्षीरफलादिभिः ॥ १६ ॥
षड्सैस्तं भोजयितुं पुत्रं वागीशनामकम् । अमत्रमानयेत्याह सोऽपि रम्भावनं ययौ ॥ १७ ॥
गृहीते कदलीपत्रे सन्दष्टोऽभूत्स भोगिना । ज्ञाततद्भवो विप्रः सुतं प्रच्छाद्य तं मृतम् ॥ १८ ॥
भोजयामास वागीशमिङ्गितैरधिगम्य तत् । ज्ञानदृष्ट्या स्वयं गत्वा दृष्ट्वा पस्पर्श भस्मना ॥ १९ ॥
नीलकण्ठं क्षणं दध्यावुत्थितोऽभूद्द्विजात्मजः । सर्वाश्चर्यमये तस्मिन्नैतच्चित्रं विदुर्जनाः ॥ २० ॥

---

१. पापविनाशक्षेत्रे इत्यर्थः ।

अथैकस्मिन् दिने भानौ लम्बमाने स वाक्पतिः । दक्षिणावर्तनगरे स्तुत्वा श्वेतविनायकम् ॥ २१ ॥
अम्बरं चाधिगत्याथ स्तुत्वामृतघटेश्वरम् । श्रीकाषनगरं प्राप्य तुष्टाव परमेश्वरम् ॥ २२ ॥
अभ्युत्थितोऽभूत्कविना पार्वतीस्तन्यपायिना । सह निर्गत्य सर्वत्र स्तुत्वा क्षेत्रे महेश्वरम् ॥ २३ ॥
तेजिनीवनमापाथ शिष्यसङ्घैरनेकधा । अनावृष्टिपरिक्लिष्टं जगदेतच्चराचरम् ॥ २४ ॥
तदा श्रीज्ञानसंबन्धस्तत्क्षेत्रं चागतः किल । आस्तां तदा तावुद्विग्नौ तत्क्षामविनिवृत्तये ॥ २५ ॥
गातुमीशं समुद्युक्तावभूतां तदवेक्ष्य सः । अमोघवाचाविस्याह शम्भुराकाशरूपवान् ॥ २६ ॥
खल्वलङ्घ्या दैवगतिर्वृष्टयै गीतिस्तु मास्त्विति । ग्रहाश्च कतिचित्कालं वक्रा गच्छन्त्यवक्रता ॥ २७ ॥
भविष्यति सुवृष्टिश्च तावत्स्तुत्वात्र मामिह । युवां संवसतं नित्यं दीनारशतदायकम् ॥ २८ ॥
सौवर्णकाचं सोपाने दास्यामि युवयोः पृथक् । इति तद्गिरमाकर्ण्य तत्र स्थित्वा तु तावुभौ ॥ २९ ॥
सायं प्रातश्च वाक्पुष्पैरर्चयामासतुः शिवम् । स्तोत्रान्ते तु तयोर्नित्यं सोपाने शूलपाणिना ॥ ३० ॥
तयोर्दुर्भिक्षरक्षार्थं दीनारशतकं हरः । प्रायच्छदन्वहं ताभ्यां श्रीसङ्घातिथिरक्षणात् ॥ ३१ ॥
दुर्भिक्षे तु क्षयं याते सुभिक्षे समुपस्थिते । तस्मात्क्षेत्राद्विनिष्क्रान्तौ वेदारण्यदिदृक्षया ॥ ३२ ॥
शङ्करश्चतुरास्यैर्मूर्तिमद्भिरुपासितः । तदा गतं पुरा तैस्तु पिधाय द्वारमीशितुः ॥ ३३ ॥
तदैवैर्वा मनुष्यैर्वा गन्धर्वासुरराक्षसैः । कवाटमुद्घाटयितुमशक्यं स्याद्यदा तदा ॥ ३४ ॥
चोलोऽन्यद्द्वारमुत्पाद्य शम्भोः पूजामकारयत् । तादृशं स्थलमभ्येत्य तौ परस्परमूचतुः ॥ ३५ ॥
आवाभ्यां सेवनीयोऽयं प्रधानद्वारमार्गतः । तमाह ज्ञानसंबन्धो वागीश त्वं महानसि ॥ ३६ ॥
पश्ये महत्त्वं त्वद्गीत्याः कवाटोद्घाटनं कुरु । इत्युक्तस्तेन वागीशस्त्वगायद्द्राविडोक्तिभिः ॥ ३७ ॥
गाने च दशमे प्रोक्ते कवाटं बिभिदे क्षणात् । तदा वागीश्वरः प्राह द्वारमुद्घाटितं मया ॥ ३८ ॥
श्रीमद्भिरपि कर्तव्यमत्रारपिधानकम् । इत्युक्तोऽगायदेकेन गानेन पिहितं व्यधात् ॥ ३९ ॥
तदालोक्य ह्रिया युक्तः श्रीवक्त्रपुरमेत्य सः । अस्तौषीज्ज्ञानपूर्णेन सह तत्रत्यमीश्वरम् ॥ ४० ॥
तत्स्तोत्रमुदितः शंभुराविर्भूय वृषोपरि । आहूय दर्शयामास वागीशाय निजाकृतिम् ॥ ४१ ॥
नापश्यत्पृष्ठतो गच्छन् संबन्धः खिन्नमानसः । आत्मरूपतिरोधानं कृत्वा वागीश्वराय च ॥ ४२ ॥
पुनश्च दर्शयामास संबन्धाय महात्मने । तदा प्रतस्थे संबन्ध आहूतः पाण्डयमन्त्रिणा ॥ ४३ ॥
अथ श्रीज्ञानसंबन्धे मथुरामभ्युपेयुषि । एकाकी स तु वागीशः शिवक्षेत्राण्यसेवत ॥ ४४ ॥
गत्वा चिदम्बरस्थानं दृष्ट्वा तत्र नटेश्वरम् । वाग्भिरग्र्याभिरस्तौषीत्स्थलस्थैरपि पूजितः ॥ ४५ ॥
अनेकैः श्लाघितो देवैरभूद्घाटकसंसदि । नागपत्तनमभ्येत्य दृष्ट्वा स्तुत्वा महेश्वरम् ॥ ४६ ॥
श्रीपुराणसरिन्नाम्नि नगरे चेश्वरद्विषः । विजित्य सौगतान् शाक्यान् वागीशो निरकासयत् ॥ ४७ ॥
गजारण्यस्थलं प्राप्य जम्बूनाथं निषेव्य च । पिपीलिकेश्वरं दृष्ट्वा मातृभूतेश्वरं तथा ॥ ४८ ॥
शिलागृहपुरं प्राप्य खरेशं संप्रणम्य च । क्रान्तनीलीपुरेशानं स्तोतुं गच्छन् स वाक्पतिः ॥ ४९ ॥

---

१. शूलपाणिनामकभूताधिपद्वारेणेत्यर्थः ।

(1) Refrence to अरुणाचलम्

मध्येमार्गं परिश्रान्तः क्षुधार्तः शिवमस्मरत् । तदानीमीश्वरस्तत्र वहन् पाथेयमुत्तमम् ॥ ५० ॥
आगत्य विप्रवेषेण दर्शयित्वा प्रपामपि । रम्यं तटाकमारामं दर्शयित्वा श्रमापहम् ॥ ५१ ॥
भोजयित्वा व्रजंस्तेन मध्येमार्गं तिरोदधे । किं न दृष्टः शिव इति ज्ञात्वा तत्क्षेत्रमेत्य च ॥ ५२ ॥
स्थित्वा नीलीपुरेशानं पश्चादापारुणाचलम् । सेवितं ब्रह्मविष्णुभ्यामीशं तुष्टाव वाक्पतिः ॥ ५३ ॥
अथ काञ्चीपुरे देवं कामाक्षीरमणं विभुम् । स्तुत्वा स्थलानि वागीशः काश्यपेश्वरमेत्य च ॥५४ ॥
वृद्धाचलं देवगिरिं गृध्राचलमुपेत्य सः । ऊर्ध्वताण्डवमस्तौषीद्वटारण्यस्थले महान् ॥ ५५ ॥
श्रीमद्दक्षिणकैलासे काळहस्तीश्वरं गिरा । महेश्वरमभिष्टूय श्रीशैलं चाप वाक्पतिः ॥५६॥
मल्लिकार्जुननाथं च सिद्धसङ्घनिषेवितम् । अभिष्टूय पुरारातिं ततो वाराणसीं ययौ ॥ ५७ ॥
नित्यं गङ्गाम्भसि स्नातो विशालाक्षीसखं शिवम् । अस्तुवद्वर्षमात्रं तु तिष्ठंस्तत्रैव वाक्पतिः ॥५८॥
केदारे च महाक्षेत्रे स्तुत्वा देवं त्रियम्बकम् । अथ कैलासशैलाग्रे सोमास्कन्दमवस्थितम्॥ ५९ ॥
द्रष्टुकामो ययौ काष्ठामुत्तरामेव योगवान् । सिंहशार्दूलशरभभल्लूकमृगभीषणे ॥ ६० ॥
अहोरात्रं मृगैः सर्वैश्चचार विजने वने । निशायामन्धतमसि भोगिनां पथियायिनाम् ॥ ६१ ॥
फणामणिप्रदीपार्चिःप्रकाशेन प्रयात्यसौ । पाषाणैरिव नीहारैः पिण्डीभूतैरुपद्रुतः ॥ ६२ ॥
व्यषीदत्पथि वागीशो विशीर्णपदबन्धनः । सोऽथ पादद्वये शीर्णे पाणिभ्यामपि वक्षसा ॥ ६३ ॥
पार्श्वाभ्यामपि यत्नेन पथि गच्छन् लुठन् लुठन् । विगतत्वङ्मांसरक्तोऽप्यस्थिमात्रावशेषितः ॥६४॥
गच्छन्ध्वनि नोत्कण्ठां विजहौ हरदर्शने । यदा गन्तुमशक्तोऽभूत्तथापि पथि वाक्पतिः ॥ ६५ ॥
उच्चैःस्वरेण चुक्रोश पाहि शङ्कर मामिति । तदा तापसवेषेण भगवान् परमेश्वरः ॥ ६६ ॥
आगतो वाक्पतिं प्राह कस्त्वं यासि क्व वेति तम् । कैलासे द्रष्टुमीशानं प्रस्थितोऽस्मीति तद्गिरम् ॥
श्रुत्वा प्राह हसन् वृद्धस्त्वमसाध्यमनोरथः । अस्ति कैलासशैलस्तु दुर्दर्शो विबुधैरपि ६८॥
बितरामि करौ पादौ निवृत्य यदि गच्छसि । न यास्यामीति तेनोक्तो महादेवो दयानिधिः॥६९॥
दर्शयित्वा सरः स्वच्छमुद्यानमपि शोभितम् । योगिनामपि दुर्दर्शं तस्मै रूपमदर्शयत् ॥ ७० ॥
भीतः प्रणम्य पाहीति यदोवाच स वाक्पतिः । तदा जगाद तं देवो वागीशं चन्द्रशेखरः ॥७१॥
निमग्नो यद्यसि त्वं हि पूर्णाङ्गोऽस्मिन् सरोजले । भूत्वा पञ्चनदक्षेत्रे चोत्थितोऽसि क्षणात्पुनः ॥७२
तत्र ते दर्शयिष्यामि कैलासं च गणैः सह । इत्युक्त्वान्तर्हिते शंभौ हर्षविस्मयसंयुतः ॥ ७३ ॥
मग्नस्तत्रोन्मज्जाशु श्रीमत्पञ्चनदीपतेः । सन्निधौ सद्यजातोये विस्मयाविष्टमानसः ॥ ७४ ॥
शिवालयं विशन्नेव ददर्श रजताचलम् । क्षीरसागरकल्लोलमालाशिखरभासुरम् ॥ ७५ ॥
सिद्धचारणगन्धर्वमुनीन्द्रगणसेवितम् । नन्दिभृङ्गिमहाकालप्रमथौघपरीवृतम् ॥ ७६ ॥
कल्पद्रुमशतोद्याननदत्पारावतोज्ज्वलम् । परितश्चाष्टदिङ्नागैर्ध्रियमाणं प्रयत्नतः ॥ ७७ ॥
चन्द्रकोटिप्रतीकाशं जाह्नवीविलसत्तटम् । तत्र सर्वोन्नते शृङ्गे नानारत्नप्रभाञ्चिते ॥ ७८ ॥
दिव्यसिंहासने देवं सोमास्कन्दमवस्थितम् । चतुर्भिः स्तुतमाम्नायैश्चन्द्रार्धकृतशेखरम् ॥ ७९ ॥

(1) न्दा (2) द्राविडैस्तवैः
(3) तृणीचक्रे

चतुर्भुजमुदाराङ्गं सच्चिदानन्दविग्रहम् । कपालमालिकाबद्धकपर्दोज्ज्वलमस्तकम् ॥ ८० ॥
व्याघ्रचर्मपरीधानं व्याळराजविभूषणम् । विलोक्य विस्मयाविष्टः प्रणनाम पुनः पुनः ॥ ८१ ॥
उत्पपात पपातोच्चैर्जगावग्रे ननर्त ह । अवहत्प्रीतिमतुलामानन्दाश्रुपरिप्लुताः ॥ ८२ ॥
भगवन् पाहि पाहीति बद्धाञ्जलिरभूत्पुरः । अथ तस्मै महादेवः स्वां मूर्तिं सुमनोहराम् ॥ ८३ ॥
प्रसन्नवदनाम्भोजां भूषितां भूषणोत्तमैः । प्रवहत्करुणासारशीतळापाङ्गविभ्रमाम् ॥ ८४ ॥
चिदानन्दमयीं दिव्यां दर्शयित्वा जगद्गुरुः । तस्मिन् पञ्चनदस्थाने पांसूनद्रीन् लतास्तरून् ॥ ८५
गुल्मानि लिङ्गरूपाणि दर्शमामास शङ्करः । वागीशाय पुरस्तस्मै पशुपक्षिमृगादिकान् ॥ ८६ ॥
मनुष्यान् कृमिकीटादीन् मण्डूकमशकादिकान् । चतुर्भुजांस्त्रिनेत्रांश्च गङ्गाचन्द्रकलाधरान् ॥ ८७ ॥
परश्वथधरान् सर्वान् शिवाकारानदर्शयत् । एवमत्यद्भुतं शंभुर्दर्शयित्वात्मलीलया ॥ ८८ ॥
सद्यस्तिरोदधे श्रीमानवाङ्मानसगोचरः । तिरोहिते महादेवे वागीशश्च तदाज्ञया ॥ ८९ ॥
प्रविश्यागस्त्यदिग्देशं मथुरामधिगम्य च । स्तुत्वा श्रीसुन्दरेशानं पुनः पुष्पवनं गतः ॥ ९० ॥
स्तुत्वा रामेश्वरं गत्वा रामनाथं निषेव्य च । पश्चाद्वेणुवनेशानमस्तौषीद्द्राविडैस्तवैः ॥ ९१ ॥
अनङ्वत्पुरमभ्येत्य स्थित्वा तत्रत्यमीश्वरम् । स्तुत्वा स्थलेष्वगायत्स भूयश्चाग्नीश्वरं गतः ॥ ९२ ॥
यदा चकार कैङ्कर्यमिन्दुमौळेर्महात्मनः । तिलकावत्यपि तदा शिवकैङ्कर्यवैभवात् ॥ ९३ ॥
त्यक्त्वा भूतमयीं मूर्तिमवाप गतिमुत्तमाम् । अथ स्वसुर्वियोगेन खिन्नं वागीशमीश्वरः ॥ ९४ ॥
द्विजरूपी समागत्य वेदान्तार्थानवेदयत् । विदितेशजगज्जीवः शिवभक्त्या च वाक्पतिः ॥ ९५ ॥
अणिमादींस्तृणीचक्रे विभूतीः किं पुनः श्रियम् । देवास्तस्य परीक्षार्थमुद्युक्ता विस्मितान्तराः ॥ ९६ ॥
पदे पदे च माणिक्यं वैदूर्यं मौक्तिकं धनम् । प्रसार्य परितस्तत्र चेरुस्तेऽदृश्यमूर्तयः ॥ ९७ ॥
तत्सर्वमीक्ष्य तृणवद्वागीशो निरकासयत् । चचारोल्लङ्घ्य स पुनर्दृष्ट्वा चाप्सरसां गणान् ॥ ९८ ॥
गानलोलान् निजाश्लेषकारिणोऽपि स वाक्पतिः । कुणपानिव मन्वानो नाभ्युदैक्षत शुद्धधीः ९९ ॥
शिवाकारं जगत्सर्वं पश्यतस्तस्य शङ्करः । पश्यतां सर्वलोकानां लिङ्गमुद्भिद्य चेश्वरः ॥ १०० ॥
आयाहि लिङ्गे वागीश तृणखण्डनिकाधर । इत्युवाच तदा लिङ्गं नत्वा कृत्वा प्रदक्षिणम् ॥ १०१ ॥
सशरीरं च सायुज्यं मूललिङ्गे प्रविश्य च । शिवाज्ञया प्रपेदे स तृणखण्डनिकान्वितः ॥ १०२ ॥
अवाप्तवान् परां मुक्तिं योगिनामपि दुर्लभाम् । वागीश्वरांसविधृततृणखण्डनिकान्वितम् ॥ १०३ ॥
तत्र क्षेत्रे महालिङ्गमद्यापि परिदृश्यते । इति वागीशचरितं ये शृण्वन्ति पठन्ति च ॥ १०४ ॥
तेषामपि च कैवल्यं भविष्यति न संशयः ॥ १०५ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे वागीशमुक्तिप्राप्तिर्नाम त्रिचत्वारिंशोऽध्यायः ॥

॥ अथ चतुश्चत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

अशक्तोऽपि स्वयं यस्तु पूजयित्वा महात्मनः । वेदागमपुराणानां सिद्धान्तं स्थापयत्यसौ ॥ १ ॥
विमुक्तसकलाघौघः प्रसादात्सोऽपि शाङ्करात् । कालकर्मभयान्मुक्तः कैवल्यं स्वयमश्नुते ॥ २ ॥
इतिहासमिमं प्राहुरस्मिन्नर्थे महत्तमाः । यस्य स्मरणमात्रेण सद्बुद्धिरुजपायते ॥ ३ ॥
अस्ति त्रैलोक्यविख्यातं विषयान्तरमुत्तमम् । इन्द्रस्पर्धाजुषो यत्र राजानः पाण्ड्यवंशजाः ॥ ४ ॥
रजतस्वर्णनीलाश्मवैदूर्याकारसीरया । ताम्रपर्ण्या महानद्याः श्रीमद्दक्षिणगङ्गया ॥ ५ ॥
कान्ताधररसस्वादुस्वच्छशीतलपूरया । सिन्धुर्भवति संभिन्नो यत्र मुक्ताकरोत्तमः ॥ ६ ॥
यत्र क्रमुकहिन्तालकुन्दमाकन्दचन्दनैः । निरन्तरा मही भानोरातपार्तिं न विन्दति ॥ ७ ॥
मितंपचानां गेहेऽपि कालागरुतरूद्भवाः । सुरभीकुर्वते काष्ठाः पाकार्थे हीन्धनीकृताः ॥ ८ ॥
यत्र निश्रेणिकारूढैरातिथेयैर्महात्मभिः । पत्राणि राजरम्भाणामाह्रियन्ते दिनान्तरे ॥ ९ ॥
यत्र श्रीचन्दनाद्यन्तस्तरलैर्मन्दमारुतैः । तरुकोरकविश्रान्तैरासन्नामोदिनो जनाः ॥ १० ॥
पाण्डयदेशे परे यत्र मथुरान्तिकसंस्थितम् । **कल्याणपुर**मित्याख्यं पुरमस्ति महत्तरम् ॥ ११ ॥
बालकाध्यापितशुकाकीर्णकर्मठवीथिकम् । **कुब्जपाण्ड्य** इति ख्यातो राजाभूज्जितशात्रवः ॥ १२ ॥
महिळेशीति विख्याता पत्न्यस्य गुणशालिनी । शिवभक्ताग्रणीर्नाम्ना मन्त्र्यभूत्कुलबन्धनः ॥१३॥
पाण्डयोऽपि महिळेश्वर्या कुलबन्धनमन्त्रिणा । पालयामास मनुवत्पृथ्वीशः पृथिवीं तदा ॥ १४ ॥
क्रतुस्पर्धाजुषा राजा कदाचिद्वज्रपाणिना । अभूद्युद्धाय सन्नद्धश्चतुरङ्गबलान्वितः ॥ १५ ॥
निवारितश्चागस्त्येन मुनेः शासनमन्वगात् । अथेन्द्रः कुपितो मेघानन्वशात्स्ववशंवदान् ॥ १६ ॥
पाण्डये मा वर्षयन्त्वेते तथा चक्रुर्बलाहकाः । अनावृष्टौ प्रवृत्तायां पाण्डयदेशे स्थिता जनाः ॥
वृष्टिमत्सह्यजातीरमवापुर्वेदवित्तमाः । ज्वरेणेन्द्रप्रयुक्तेन सैन्यं राज्ञो विनाशितम् ॥ १८ ॥
तदा रन्ध्रविदः शाक्या बहवः सेनयान्विताः । तं कुब्जपाण्डयमाक्रम्य क्षपणा वेदनिन्दकाः ॥ १९ ॥
विद्याभिरैन्द्रजालाभिर्मोहयित्वा वशंवदम् । कृत्वा चाकस्मिकोद्भूतवस्तुभिः प्रीतचेतसम् ॥ २० ॥
नानाविधं करं दत्त्वा नग्नसिद्धान्तिनं व्यधुः । देशेऽथ सौगताक्रान्ते भस्मरुद्राक्षधारिणः ॥ २१ ॥
पञ्चाक्षरीजपपरान् ब्राह्मणान् वेदपारगान् । शिवभक्तांस्तापसांश्च प्रणम्य कुलबन्धनः ॥ २२ ॥
महिळेशीकरप्राप्तैः स्वकीयैर्द्विजैरपि । तत्र तत्र स्थिताञ्शैवान् भक्तिमानभ्यपालयत् ॥ २३ ॥
गते तु कतिचित्काले पाण्डयदेशे महत्तरे । स्वाहास्वधावषट्कारवेदाध्ययनवर्जिते ॥ २४ ॥
अनावृष्टितया शेषा दीना दुर्भिक्षपीडिताः । वृष्टिमत्सह्यजातीरमवापुर्वेदवित्तमाः ॥ २५ ॥
तदानीं नग्नभूयिष्ठमासीत्तन्मथुरापुरम् । शाक्यराजः समभ्येत्य शिष्यं स्वमतवर्तिनम् ॥ २६ ॥
बोधयित्वा तु दुर्बुद्धिं तत्रत्यांस्तेन भूभुजा । निर्बन्धेन द्विजाञ्शैवान् भूतिरुद्राक्षवर्जितान्॥२७॥
बुद्धपाषण्डिनश्चक्रे तदानीं तावुभावपि । निरुध्य सचिवं शाक्यो राज्ञीमपि पतिव्रताम् ॥ २८ ॥

बलात्कारेण चानीय भूपतेस्तस्य सन्निधिम् । बाधन्ते स्म स्वसिद्धान्तप्रवेशाय जगद्द्रुहः ॥२९॥
शिवपूजारतौ नित्यं शिवभक्तार्चनोत्सुकौ । त्यक्त्वा विभूतिरुद्राक्षौ सदा दुःखितमानसौ ॥ ३० ॥
भावयन्तश्च मनसा शंभुं नृपभयात्पुनः । तोयेनैव त्रिपुण्ड्रं च दधाते भक्तिपूर्वकम् ॥ ३१ ॥
महिळेशीकरादात्तवित्तेन कुलबन्धनः । कारयित्वा रहःपूजां सुन्दरेशस्य धूर्जटेः ॥ ३२ ॥
आपन्नार्तिहरं शंभुं प्राप्तवाञ्शरणं तदा । स्वप्ने भगवतादिष्टमाकर्ण्योपायमादरात् ॥ ३३ ॥
अन्येद्युरुषसि प्राह यूयं दुष्टमता इति । अथार्हताश्च तं प्रोचुर्वादं कुर्मो द्विजोत्तमैः ॥ ३४ ॥
जयेऽस्माकं मतं सत्स्यात्प्रवेशोऽस्मन्मतेऽस्तु वः । जये सति तु युष्माकं मते वो नस्तथास्त्विति॥३५
स्वदूतैर्ज्ञानसंबन्धं कुलबन्धः समाह्वयत् । सर्वोपचारैरभ्यर्च्य कटाम्बरजयोत्सुकः ॥ ३६ ॥
सर्वं विज्ञापयामास तस्मै प्रत्यक्षशंभवे । सर्वमस्तु श्व इत्युक्त्वा स हालास्येशमभ्यगात् ॥ ३७ ॥
अथापरेद्युः प्रत्यूषे वैदिकाः सौगता अपि । वादायैवोद्यमं चक्रुर्हालास्येश्वरसन्निधौ ॥ ३८ ॥
वैदिकास्तु कृशा भीता द्विजाः पञ्चाशदासत । आसीदेको ज्ञानपूर्णस्तेषां मध्ये यथा रविः ॥ ३९ ॥
अथ प्रसङ्गस्यारम्भे संबन्धः प्राह सौगतान् । षट्त्रिंशद्दासाहस्रसंख्यातान् नृपसन्निधौ ॥ ४० ॥
पराजितस्य शूलाग्रारोपणं तु पणोऽस्त्विति । तथेति तैरनुज्ञाते वादः प्रववृते महान् ॥ ४१ ॥
विद्यामयः परं ज्योतिर्हालास्यपतिरीश्वरः । संबन्धवदने स्थित्वा जिगाय सकलार्हतान् ॥ ४२ ॥
शूलोष्वारोपिताः सर्वे वेदबाह्याः सहानुगाः । तदा सुवृष्टिरभवत्सुभिक्षं चाभवत्पुरम् ॥ ४३ ॥
अथागता द्विजाः सर्वे वेदोक्तं कर्म चक्रिरे । राजा च कुलबन्धश्च ज्ञानसंबन्धमीश्वरम् ॥ ४४ ॥
विभाव्य पूजयामास वस्त्राङ्गदविभूषणैः । सिंहासनं प्रदायास्मै नेमतुस्तस्य पादयोः ॥ ४५ ॥
राज्येऽभिषिच्य राजानं संबन्धः स्वपुरं ययौ । कुब्जपाण्डयो यथापूर्वं शशास वलयं भुवः॥ ४६ ॥
शिवभक्ताङ्घ्रिशुश्रूषां कुर्वाणः कुलबन्धनः । शिवप्रसादात्कालेन कैलासं पदमाप्तवान् ॥ ४७ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कुलबन्धनमुक्तिप्राप्तिर्नाम चतुश्चत्वारिंशोऽध्यायः ॥

॥ अथ पञ्चचत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

यस्तु पञ्चाक्षराचार्यपादाब्जध्यानतत्परः । प्रीतस्तस्मै महादेवः प्रयच्छति निजं पदम् ॥ १ ॥
प्रथितात्र कथा काचिच्छ्रूयतां वर्ण्यते मया । यस्य श्रवणमात्रेण सद्गुरौ भक्तिरुत्तमा ॥ २ ॥
तेजिनीनगरे कश्चिदङ्घ्रिजः शिवभक्तिमान् । गुणानां निकुरुम्बत्वात् कुरुम्ब इति विश्रुतः॥ ३ ॥
स पर्यालोच्य सकलान् वेदान् शास्त्राणि बुद्धिमान् । चतुर्थाध्ययनानार्हवेदशास्त्रैस्तु किं फलम् ॥४॥
नाधीतव्या मया वेदाः शास्त्राण्यपि तथा किल । कलहः कण्ठशोषश्च गर्वश्चापि फलन्त्यमी ॥ ५ ॥
विरक्तः सर्वभोगेभ्यः प्रवृत्तो मुक्तिसाधने । शब्दब्रह्मार्णवे तावदगाधे चरतो मम ॥ ६ ॥

पञ्चाक्षरमहामन्त्रः सारत्रानि नरद्वृथा । इन्द्रजालकलैवान्यन्मिथ्याफलदमीरितम् ॥ ७ ॥
आचार्येणोपदिष्टोऽयं मुक्तिदः स्यान्महामनुः । अन्यूनाधिकगात्रो या दृष्टलोकपरावरः ॥ ८ ॥
शिवभक्ताग्रणीः शान्तः सर्वसंशयभेदनः । वेदोक्तसमयाचारसंपन्नो ब्रह्मविद्द्विजः ॥ ९ ॥
आचार्यो यदि लभ्येत तस्य किं बहुसेवया । उदिते दिवसाधीशे दीपयत्नो निरर्थकः ॥ १० ॥
यथोपचरणं तस्य शिष्यो न विसृजेद्यदि । त्रयो भवन्ति तस्यामी दासा ब्रह्महरीश्वराः ॥ ११ ॥
तथाविधो मे कुत्र स्यादाचार्य इति बुद्धिमान् । भुवं प्रदक्षिणीकृत्य तस्थे शूद्रसत्तमः ॥ १२ ॥
स ब्राह्मणेषु बहुशः सञ्चरन्नात्मसंमतम् । नोपलेभे गुरुं कंचिन्निर्दोषं सर्वतो गुणम् ॥ १३ ॥
ततः क्रमेणाभ्यगमन्नगरं कमलालयम् । रुद्रपादमहातीर्थे स्नात्वा त्यागेश्वरं विभुम् ॥ १४ ॥
सेवमानस्त्रिसंध्यं च मासमात्रमवर्तत । प्रार्थयामास देवेशं सर्वलक्षणलक्षितम् ॥ १५ ॥
भवानिव गुरुः कश्चिद्भूयादित्यन्वहं हरम् । अथार्धरात्रे भक्तो मे कश्चिदत्रागमिष्यति ॥ १६ ॥
स प्रार्थितस्ते भविता गुरुः सुन्दरनामभृत् । तं कुरुम्बमिति प्राह स्वप्ने त्यागेश्वरो विभुः ॥ १७ ॥
उत्थितः स तदैवाशु स्नात्वागस्त्येशसन्निधौ । प्रदक्षिणनमस्कारस्तोत्रैस्तुष्टाव शंकरम् ॥ १८ ॥
अथादित्ये पराम्मोधौ निमग्ने नागरे जने । संसुप्ते त्यागराजस्य धन्यमेकान्तसेवया ॥ १९ ॥
प्रेयसीशयनोल्लासवेषवारिणमागतम् । प्रतिबिम्बं महेशस्य दिव्यलक्षणलक्षितम् ॥ २० ॥
सुन्दरं वीक्ष्य सहसा कुरुम्बो विस्मितोऽभवत् । गृहीत्वा पादयोस्तस्य प्रणामशतमातनोत् ॥ २१ ॥
कस्त्वं किं ते कुत इति पृष्टस्तेनात्मनोऽखिलम् । तस्मै निवेद्य वृत्तान्तं ययाचे मनुमुत्तमम् ॥२२॥
प्रयान्तं प्रेयसीवेश्मन्यनुक्त्वा किञ्चिदुत्तरम् । अन्वयात्सुन्दरं धीमाञ्छायेव सह देहिनम् ॥ २३ ॥
सुन्दरेऽन्तर्गते वेश्याबहिःकक्ष्यान्तरे स्थितः । पृष्टः कस्त्वं किमत्रेति कुरुम्बो गणिकाश्रितैः ॥ २४ ॥
ऊचे सुन्दरदासं स्वं मुमुक्षुं शरणागतम् । ते च तस्यै वदन्ति स्म तद्वृत्तान्तमशेषतः ॥ २५ ॥
सुन्दरं प्राह वेश्या सा हसन्ती शयनान्तरे । कथं गुरुस्त्वं धूर्तोऽसि मुमुक्षोरङ्घ्रिजन्मनः ॥ २६ ॥
त्वयोपदिष्टं किं वास्य बन्धमुक्तौ भविष्यति । स सुन्दरः प्रियामाह परिहासोऽत्र नोचितः ॥२७॥
निदेशादुपदेक्ष्यामि सद्गुरुं मनुमुत्तमम् । पुनर्न जन्म तस्यास्ति न मे चावां हसन्ति ये ॥ २८ ॥
तेषामेव महाघोरे संसारे भ्रमणं भवेत् । इत्युक्त्वा तां समाश्लिष्य सुष्वाप निशि सुन्दरः ॥ २९ ॥
अथ स्वप्ने तमागत्य प्राह श्रीत्यागनायकः । हे सुन्दर सखे वाचं मदीयां श्रोतुमर्हसि ॥ ३० ॥
भक्तश्चैव विरक्तश्च कृपापात्रं त्वाङ्घ्रिजः । पञ्चाक्षरोपदेशेन कृतार्थीक्रियतामिति ॥ ३१ ॥
अथ प्रातः समुत्थाय गच्छन्तं सुन्दरं स तु । नमस्कृत्वानुवव्राज भावयन् भवमेव तम् ॥ ३२ ॥
प्रीतश्च सुन्दरस्तस्मै स्नाताय कमलालये । उपादिशन्महामन्त्रं पञ्चार्णं पापनाशनम् ॥ ३३ ॥
तदर्थं बोधयामास भक्त्या पृष्टः स सुन्दरः । मलत्रितयवानर्थो नमःशब्दस्य मोचक ॥ ३४ ॥
तस्यार्थः शिवशब्दस्य परोः पारनिवृत्तितः । मन्त्रेणानेन सततं तमुपास्स्व महेश्वरम् ॥ ३५ ॥
तदैक्यं सप्रदायार्थः संप्रदायार्थ एष ते । वर्णितस्त्वं कृतार्थोऽसि कामक्रोधौ सदा त्यज ॥ ३६ ॥

---

१. मलत्रितयवतो जीवस्य मोचक इत्यन्वयः।

समुद्रः स्वविकारेषु यथा सततमन्वितः । तथायं कारणं कार्ये दृश्ये भाति महेश्वरः ॥ ३७ ॥
मन्त्रोऽयं गुर्वभक्तानां प्रदेयो नैव कर्हिचित् । गुरौ माहेश्वरी बुद्धिर्वेदबुद्धिस्तदुक्तिषु ॥ ३८ ॥
यस्य धन्यस्य तस्यास्ति कर्मणीश्वरकृत्यधीः । तस्यायं मुक्तिदः सद्यो नात्र कार्या विचारणा ॥३९॥
शिववत्पूजनीयास्ते शिवभक्तास्तु सर्वतः । गुरुर्यथा तथा पूज्याः सर्वत्र ब्रह्मवादिनः ॥ ४० ॥
दिव्यं चक्षुश्च ते दत्तं स्वैरं सञ्चर मा भयम् । इत्यादिष्टः स्वगुरुणा स्वपदं प्राप्य पद्भवः ॥ ४१॥
ध्यायन् सुन्दरपादाब्जं नाम चास्य क्षुधादिषु । वस्त्रान्नगन्धपुष्पाद्यैः शिवभक्तान् समर्चयन् ॥४२॥
नित्यं द्वादशसाहस्रं जपन् पञ्चाक्षरीं मनुम् । मलत्रितयनिर्मुक्तो जीवन्मुक्तो बभूव ह ॥ ४३ ॥
कदाचिद्दुज्जुलपुरे निजं गत्वा स्थितं गुरुम् । ध्यायंस्तं सततं धीमान् सुन्दरं ज्ञानचक्षुषा ॥ ४४ ॥
परेद्युरेष कैलासयात्रां स्वगुरुवाञ्छिताम् । विज्ञाय हृदि सन्दध्यौ कर्तव्यं शैवसत्तमः ॥ ४५ ॥
गते प्राणे शरीरस्य ज्योतिष्यपि च चक्षुषः । विज्ञानदे तिरोभूते भविता मे कथं स्थितिः ॥ ४६ ॥
योगाभ्यासेन मत्प्राणांस्त्यक्ष्यामि ब्रह्मरन्ध्रतः । इति निश्चित्य मनसा प्राणानायम्य योगतः ॥ ४७ ॥
पूरकं कुम्भकं कृत्वा रेचकं च यथाक्रमम् । सुषुम्नेलापिङ्गलाभिर्नाडीभिस्तिसृभिस्तदा ॥ ४८ ॥
षडाधाराब्जनिलयान् गणेशब्रह्मपूर्वकान् । योगाभ्यासवशात्तत्तत्कारणेषु लयं गतान् ॥ ४९ ॥
विधाय ब्रह्मरन्ध्रं स्वं भित्त्वा प्राणान् विहाय च । त्यक्त्वा भूतमयीं मूर्तिं पूर्वमेव गुरोरयम् ॥ ५० ॥
पश्यतां सर्वलोकानां शिवसारूप्यमाप्तवान् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कुरुम्बभक्तमुक्तिप्राप्तिर्नाम पञ्चचत्वारिंशोऽध्यायः ॥

॥ अथ षट्चत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥
अन्नं क्षीरं फलं वापि यो दद्याच्छिवयोगिने । भवानीशंकराभ्यां च पूजितो मुक्तिमेति सः ॥ १ ॥
इतिहासोऽत्र लोकेषु प्रथितः पूजितः सुरैः । मुच्यते श्रवणाद्यस्य ज्ञायते भक्तिवैभवः ॥ २ ॥
कावेरतनयापूरसदावर्धितसंपदि । शाल्मलीवननामास्ति पुरं सुरपुरोपमम् ॥ ३ ॥
यत्र रम्येषु हर्म्येषु पूरिता रत्नराशयः । स्पर्धन्ते मेरुणा सार्धं वर्धमाना दिने दिने ॥ ४ ॥
तत्राभूद् धनदत्ताख्यो वणिजां प्रवरो वणिक् । नित्यान्नदानाद्भक्तानां किंकरीकृतशङ्करः ॥ ५ ॥
अनपत्यतया सर्वमपूतं स्वममन्यत । उपास्ते स्म व्रतैः शम्भुमपत्यार्थं महाधनः ॥ ६ ॥
तस्य शम्भुप्रसादेन कन्या काचिदजायत । यथा हिमवतो गङ्गा लक्ष्मीर्दुग्धाम्बुधेर्यथा ॥ ७ ॥
वणिग्विलोक्य तां कन्यां कलामिव कलानिधेः । मुमुदे चात्मनो वंशं तया पूलममन्यत ॥ ८ ॥
ततस्तया पुनीतं स्यात्स्वकुलं तत्पिता ततः । चक्रे पुनीतवत्याख्यां तनयां तां महाधनः ॥ ९ ॥
सह पित्रोर्मुदा बाला ववृधे रूपशालिनी । धनदत्तगृहे यद्वन्नन्दने कल्पवल्लरी ॥ १० ॥
आपादकेशं विविधरत्नाभरणजालकैः । भूषिता मोहयामास बाल्य एव निधिः श्रियाम् ॥ ११ ॥

शिवभक्तवितीर्णेन भस्मना वणिजां पतिः । दीर्घायुष्याभिवृद्ध्यर्थमलंचक्रे स तां सदा ॥ १२ ॥
काले समानं निश्चित्य रूपद्रविणसंपदा । सुतं परमदत्ताख्यं नागपूर्वणिजो वणिक् ॥ १३ ॥
आहूय प्रददौ कन्यां धनदत्तः स बन्धुमान् । वणिग्वधूवरौ युक्तौ रतिपञ्चशराविव ॥ १४ ॥
वित्तेनतुर्मनःप्रीतिं बन्धूनां पश्यतां पुरः । प्रार्थयित्वास्य पितरौ वरस्य निजमन्दिरे ॥ १५ ॥
स्थापयामास सुतया सार्धं परमदत्तकम् । अर्धं विभज्य स्वधनं जामात्रे स ददौ मुदा ॥ १६ ॥
निर्माय हर्म्यमपरं वणिक् परमदत्तकम् । तत्र प्रवेशयामास कन्यां जामातरं तथा ॥ १७ ॥
सर्वसंपत्समृद्धं तद्दम्पत्योर्मन्दिरं तयोः । अन्तःपुरोत्तमं सिन्धौ लक्ष्मीमाधवयोरिव ॥ १८ ॥
संपन्नोऽपि च जामाता लुब्धः परमदत्तकः । काचमेकं न कस्मैचिद्दत्तेऽन्नं तण्डुलादि वा ॥ १९ ॥
गृहे पुनीतवत्यास्तु स्वयं भुङ्क्ते ह्यसाक्षिकम् । आबाल्यं शिवभक्ता सा भक्तानभ्यागतान् गृहम् ॥
सक्षीराज्येन चान्नेन रस्यैश्च पितृचोदिता । फलापूपदधिक्षीरैस्तर्पयन्ती च सर्वदा ॥ २१ ॥
भक्तान् रक्षति मातेव वाञ्छितान्नप्रदानतः । सा भर्तुरिङ्गितं ज्ञात्वा गृहकृत्याय यद्धनम् ॥ २२ ॥
धान्यं तण्डुलमाज्यादि कथंचिदवशेषितम् । शिवभक्ता यदायान्ति तदा यत्सुलभं स्थितम् ॥२३॥
यवागूमारनाळं वा शुष्कान्नं वा पुरातनम् । उष्णं पर्युषितं वापि केवलान्नमथापि वा ॥ २४ ॥
शाकव्यञ्जनयुक्तं वा दधिक्षीराज्यसंयुतम् । यत्काले यत्स्थितं लब्धं तत्तदादाय सत्वरम् ॥ २५ ॥
भर्तुरागमनात्पूर्वं भक्तेभ्यो भयकम्पिता । दत्ते पुनीतवत्यन्नमेवं नित्यमतन्द्रिता ॥ २६ ॥
भुक्तवत्येव पत्यौ सा भुङ्क्ते नित्यं पतिव्रता । बुभुजे युवतिः काले भोगाञ्शय्याश्च दुर्लभान् ॥
पयःफेननिभा शय्या नवरत्नमयं गृहम् । आनुकूल्यं तथा भर्तुः पुपुषुर्मुदमुत्तमाम् ॥ २८ ॥
उपचारेषु भक्तानां नालस्यं क्वचिदाश्रयत् । गमयामास समयं भक्तिर्मूर्तेव शाम्भवी ॥ २९ ॥
वैश्यजामातृसख्येन दारिद्र्यं नाशयन्निव । सख्यं लिप्सुरमुष्यैको द्विजो नित्योपहारतः ॥ ३० ॥
षण्मासं वत्सरं साग्रं चाटुवाक्यैरतोषयत् । तथापि काचं नोऽदत्त जामातास्मै स लुब्धधीः ॥ ३१ ॥
अथैकस्मिन् दिने विप्रो भक्तः शम्भोरुपायनम् । ददौ परमदत्ताय जामात्रे प्रीतिहेतवे ॥ ३२ ॥
एकनाळमतिस्थूलं रम्यं चूतफलद्वयम् । हस्ते पुनीतवत्यास्तदादायादादिति ब्रुवन् ॥ ३३ ॥
भाण्डान्तरे त्वया सुभ्रूः स्थापनीयमिदं फलम् । अथापरेद्युस्तद्गेहं गौरीशो भक्तवेषभृत् ॥ ३४ ॥
आगत्य क्षुधितोऽस्मीति त्वरयामास तां जरन् । तं पुनीतवती नत्वा जगाद विनयान्विता ॥ ३५ ॥
हे भक्त भक्तमात्रं तु पक्वं सोष्णं च वर्तते । शाकपाकश्च भविता कथं भोज्यं भविष्यति ॥३६॥
क्षणादायाति मे भर्ता किं कर्तव्यमिहाधुना । इत्युक्तः स तया शंभुरन्नमात्रमलं मम ॥ ३७ ॥
क्षुन्निवृत्तिर्भवेत्सद्यो यथा मे त्वं तथा कुरु । इत्युवाच तदा साध्वी देयमन्नं न केवलम् ॥ ३८ ॥
शिक्ये स्थितेन पयसा मदंशान्नफलेन च । दातव्यमिति निश्चित्य भक्तमाहूय तं सती ॥ ३९ ॥
भुज्यतामिति सक्षीरं फलमेकं तयोर्द्वयोः । दत्वास्मै भोजयामास तृप्तः सोऽपि तिरोदधे ॥ ४० ॥

पत्युर्वृत्तमिदं गोप्यमिति सा हृदये दधौ । आपणात्कृतवाणिज्यः स्नातो गृहमुपेत्य च ॥ ४१ ॥
सायं परमदत्तोऽथ भोक्तुमन्तर्गृहं ययौ । भर्त्रे परमदत्ताय हितमन्नं पयोयुतम् ॥ ४२ ॥
दत्वा तं भोजयामास शिष्टमान्नफलं च तत् । अमृतोस्वादसदृशं फलं भुक्त्वातिहृष्टधीः ॥ ४३ ॥
अन्यत् केति मुखं तस्या वीक्षते स्म वणिग्वरः । अथ सा स्वकृतं वक्तुमशक्ता भयपीडिता ॥ ४४ ॥
महानसमनुप्राप्य विधूतकरपल्लवा । रक्षेति मनसा ध्यात्वा शङ्करं शरणं गता ॥ ४५ ॥
शिवाज्ञया तत्सदृशं फलं तस्याः पुरोऽपतत् । मुदिता तददाद्भर्त्रे भुभुजे सोऽपि तत्फलम् ॥ ४६ ॥
पूर्वभुक्तफलात्स्वादुतरमास्वाद्य तत् फलम् । इदं कुतस्त्वेत्याह भार्यां करुणया विभोः ॥ ४७ ॥
इति सा पूतवत्याह प्रहसन्नाह तां वणिक् । कारुण्यं त्वयि चेच्छंभोरन्यदानीयतां फलम् ॥ ४८ ॥
इत्युक्तान्तः प्रविश्याथ चतुर्वर्गफलप्रदम् । तं पूनीतवती शंभुं सस्मार फलकाङ्क्षया ॥ ४९ ॥
शिवाज्ञया तत्सदृशं फलमभ्रात्पुरोऽपतत् । तदादायातिरुचिरं प्रददौ स शिवार्पितम् ॥ ५० ॥
भर्त्रे तदपि सा दत्त्वा प्रहर्षमतुलं ययौ । वैश्यहस्तात्तिरोभूतं फलं सद्यः शिवाज्ञया ॥ ५१ ॥
भीतः परमदत्तोऽभूद्दृष्ट्वा पत्न्याः स वैभवम् । वशीकृतोऽनया शंभुर्ब्रह्मादीनामगोचरः ॥ ५२ ॥
शिवद्रोहो मया प्राप्तो यदियं दास्यकारिणी । पार्वती नूनमेषा स्यान्नो चेच्छक्तिः क वेदृशी ॥ ५३ ॥
अस्याः पुनीतवत्या हि मद्भार्यायाः अनागसः । त्यागे तु पापो भविता सहवासे महद्भयम् ॥ ५४ ॥
कथं नु खलु कर्तव्यमिति चिन्तां दधौ हृदि । वाणिज्यव्यपदेशेन गच्छाम्यहमितोऽन्यतः ॥ ५५ ॥
इति निश्चित्य मनसा स तामाह निजां वधूम् । यावद्द्वीपान्तरं गत्वा समायास्यामि तेऽन्तिकम् ॥
तावत्षड्ससंयुक्तं सोपदंशं घृताप्लुतम् । मृष्टान्नं शिवभक्तेभ्यो दीयतामनिवारितम् ॥ ५७ ॥
अन्यथाच्छिवभक्तेष्टप्रदामेवं सतीं प्रियाम् । पश्चान्निर्गत्य तरसा महत्यां नाव्यसौ वणिक् ॥ ५८ ॥
वस्तून्यारोप्य विविधान्यगाद्द्वीपान्तरं प्रति । तां पुनीतवतीं भक्तिमद्भुतां हृदये स्मरन् ॥ ५९ ॥
सा पुनीतवती नाथे द्वीपान्तरगतेऽन्वहम् । दत्वान्नं शिवभक्तेभ्य एकभुक्तान्यवर्तत ॥ ६० ॥
ततः परमदत्तोऽपि गृहीतधनसंग्रहः । देशं समुद्रमार्गेण प्राप्य पाण्ड्यस्य भूसुराः ॥ ६१ ॥
अन्यां वणिग्वरसुतामुद्वाह्य न्यवसच्चिरम् । तस्यां काचिदभूत्कन्या तां नाम्ना वणिजां वरः ॥ ६२
स पुनीतवतीं चक्रे स्वापराधविशुद्धये । धनदत्तश्चिरगतमथ जामातरं जनैः ॥ ६३ ॥
ज्ञात्वाप्तैः पाण्डयदेशस्थं तत्र प्रैरयदात्मजाम् । सा बन्धुभिः परिवृता वृता परिजनैरपि ॥ ६४ ॥
जगाम भर्तुर्निकटमारूढा विकोत्तमा । श्रुत्वा परमदत्तस्तामागतामन्तिकं ततः ॥ ६५ ॥
ननाम पादयोस्तस्याः सह पुत्र्या च भार्यया । देवतातुल्यरूपत्वाद्भवतीं न स्पृशाम्यहम् ॥ ६६ ॥
इत्यभिप्रायमात्मीयमशेषेण न्यवेदयत् । तयापराधशुद्ध्यर्थं कन्या त्वन्नामचि हृता ॥ ६७ ॥
त्वामस्मि देवताबुद्ध्या शरणं प्राप्तवानहम् । यद्यत्रप्यागता सा त्वमहं गच्छामि चान्यतः ॥ ६८ ॥
इति तेनोदिता साध्वी भर्तारं प्रत्यभाषत । त्वदर्थं रक्षितमिदं वपुर्मे नाथ नान्यथा ॥ ६९ ॥
यदि त्वया परित्यक्ता गच्छाम्येषा शिवान्तिकम् । सन्त्यक्तभर्तृभोगायाः किं मे यौवनसंपदा ॥ ७० ॥

वपुषा सौकुमार्येण प्रेक्षणीयेन्द्रियेण किम् । इति सा ब्राह्मणांस्तत्र मेलयित्वा महाधनैः ॥ ७१ ॥
संपूज्य शङ्करं ध्यात्वा वाचा प्राहेति साञ्जलिः । रूपं केनापि दुष्प्रेक्षं पैशाचं स्यान्महेश्वर ॥ ७२ ॥
इत्युक्त्वोच्चैर्दुधावाङ्गाद्रक्तमांसानि योगतः । पैशाचं रूपमस्मार्षीद्भवतिति शिवाज्ञया ॥ ७३ ॥
तस्या रूपं तथैवासीद्ययुर्लोकाश्च विस्मयम् । तदा तेनैव रूपेण प्रस्थितान्तादिपूर्वकैः ॥ ७४ ॥
स्तुत्वा कवित्वैरीशानं सा पुनीतवती मुदा । त्वगस्थिमात्रावयवामष्टवक्राङ्गयष्टिकाम् ॥ ७५ ॥
भयानकां पूतनावत्प्रलम्बस्तनभस्त्रिकाम् । तामालोक्य जनाः सर्वे भयं विस्मयमाययुः ॥ ७६ ॥
शिवक्षेत्राण्यतीत्यागात्कैलासादेरुपत्यकाम् । अयुक्तश्चरणस्पर्शः कैलासस्येति मौलिना ॥ ७७ ॥
तपसारुह्य शैलेन्द्रमागच्छन्तीं हरान्तिकम् । दृष्ट्वा देवी गिरिसुता पप्रच्छेशं तदुन्मुखा ॥ ७८ ॥
पिशाची केयमायाति चरन्ती मौलिनान्तिकम् । अस्यास्तु विकृतं रूपं तपःशक्तिर्महत्तरा ॥ ७९ ॥
योजनानां चतुर्विंशत्सहस्राणि महीतलात् । मूर्ध्नातीत्योपरि गिरेर्यत्प्राप्तेयं तवान्तिकम् ॥ ८० ॥
अथ गौरी जगादेशः स्मयमानमुखाम्बुजः । माता ममेयं कल्याणी भक्ता मे पोषिता यया ॥ ८१ ॥
पूजनीया तवेत्युक्त्वा स तां गिरिजया सह । प्रत्युद्गम्य जगादेशो मातस्ते किमनामयम् ॥ ८२ ॥
इत एहीत्युदीर्यार्यां प्रणमेति शशास च । नमस्तवार्ये देवाय सर्वान्तर्यामिणेऽस्त्विति ॥ ८३ ॥
गौरीमाभाष्य जरती जगाद परमेश्वरम् ॥ ८४ ॥

कैलासशृङ्ग गिरिजासमेतो दृष्टो मया त्वं यदतोऽस्मि धन्या ।
त्वद्वाञ्छितं किं नु वदेति पृष्टा पुनीतवत्याह पुनश्च शंभुम् ॥ ८५ ॥

जन्ममृत्यू निवार्येतां स्याच्चेत्त्वद्भक्तिरस्तु मे । आनन्दनृत्तं भवतो द्रष्टुकामास्मि शंकर ॥ ८६ ॥
सकृद्दर्शय मे तात नान्यदिच्छामि वाञ्छितम् । उक्तः पुनीतवत्यैवं पुनः प्राह महेश्वरः ॥ ८७ ॥
दर्शयिष्ये वटारण्ये नृत्तं तत्रैव गम्यताम् । इत्युक्ता न ह्यहं शक्ता गन्तुमित्यभिधाय सा ॥ ८८ ॥
गृहीतुं पदमीशस्य प्रवृत्तान्तर्दधे हरः । अथ तामाज्ञया शंभोर्हस्ताग्रेण विनायकः ॥ ८९ ॥
स्थापयामास सदसि वटारण्ये हरालये । श्रान्तोन्मील्य दृशौ वृद्धा परितः समवैक्षत ॥ ९० ॥
सभां ददर्श महतीं नवरत्नविचित्रिताम् । यत्र वेत्रधरो नन्दी मायायवनिकांशुकम् ॥ ९१ ॥
वल्लकीवादिनी वाणी वेणुगानपरेन्दिरा । मर्दलाघातको विष्णुस्ताळहस्तश्चतुर्मुखः ॥ ९२ ॥
चत्वारो दीपिका वेदा सनकाद्या सदःस्थिताः । कक्ष्यात्रयं भगवती प्रसवित्री च छन्दसाम् ॥
वितानक्षौमवलयो दर्शनान्यखिलान्यपि । सप्तकोटिमहामन्त्राः कीर्णानि कुसुमान्यपि ॥ ९४ ॥
पञ्चाक्षरी भद्रपीठं चन्द्रादित्यौ च दर्पणे । साक्षिणी सा परा शक्तिः शाङ्करी परदेवता ॥ ९५ ॥
सा पुनीतवती दृष्ट्वा सभां रत्नमयीं शुभाम् । अत्यन्तं प्रीतहृदया कैलासालोककौतुकम् ॥ ९६ ॥
सन्त्यज्य सहसोत्थाय किमेतदिति विस्मिता । अस्तौषीद्द्राविडैस्तोत्रैर्भक्तवश्यं परात्परम् ॥ ९७ ॥
अथ तस्यै महादेवो दर्शयित्वा स्वताण्डवम् । सदेहमुक्तां तां कृत्वा स्थापयामास चान्तिके ॥ ९८ ॥

ताळोद्दिक्तकरा भूत्वा नृत्ततालळयानुगा । शिवस्य सन्निधौ स्थित्वा गायन्ती शंभुवैभवम् ॥ ९९ ॥
जीवन्मुक्तावसद्ब्रह्मविष्णोरयुतमीक्ष्य सा । अद्यापि वर्तते तस्या भक्तिः केनाशु पठ्यते ॥ १०० ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे पुनीतवतीमुक्तिर्नाम षट्चत्वारिंशोऽध्यायः ॥

॥ अथ सप्तचत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

सेवया शिवभक्तानां नामसंकीर्तनेन च । सपर्यया च स्यान्मुक्तिरपमृत्योर्निवारणम् ॥ १ ॥
इतिहासो महानत्र महद्भिः समुदाहृतः । यमाकर्ण्य नरो भक्त्या कर्मबन्धात्प्रमुच्यते ॥ २ ॥
अस्ति चन्द्रपुरं नाम चन्द्रमण्डलपाण्डुरैः । महाधनानां प्रासादैः परितः परिमण्डितम् ॥ ३ ॥
स्वधर्मनिरतैर्वर्णैः सर्वतः समलङ्कृतम् । तत्राभूद्ब्राह्मणः कश्चित् अद्भुतीति भुवि श्रुतः ॥ ४ ॥
इष्टापूर्तयशो यस्य विमलीकुरुते जगत् । अग्रणीर्वेदविदुषां शिवभक्तो जितेन्द्रियः ॥ ५ ॥
येन वैदिकसिद्धान्तो जिनाक्षित्वा प्रतिष्ठितः । भक्ताग्रगण्ये वागीशे स दधौ भक्तिमुत्तमाम् ॥ ६ ॥
स्वेनालयेषु सर्वत्र निर्मितेषु पिनाकिनः । वापीकूपतटाकानामन्तिके च शिलान्तरे ॥ ७ ॥
धर्मोऽस्मदीयः सर्वोऽपि वागीशस्येत्यघोषयत् । विलिख्य स्थापयामास प्रपासु च विशेषतः ॥ ८ ॥
कवाटकुटुपप्रस्थशिवशूर्पादिवस्तुषु । वत्सधेनुसुतानां च वागीशाख्यां चकार ह ॥ ९ ॥
वागीशोऽपि तदा शम्भोः स्थानेषु भुवि पर्यटन् । धर्मे कदाचिन्मध्याह्ने स्वेच्छया प्राप तत्प्रपाम् ॥
पयः सुरभिळं तत्र पीत्वा शीतं गतश्रमः । लिखितामुपलस्तम्भे ददर्शाक्षरमालिकाम् ॥ ११ ॥
जिताईतस्य धर्मोऽयं वागीशस्येति निर्मलाम् । विस्मितः प्रीतिमानाह तत्रत्यानधिकारिणः ॥ १२ ॥
प्रपाधर्मोऽत्र कस्यायमिति तेऽप्यवदन्नमुम् । अद्भुतीति द्विजवरः कश्चिद्वागीशकिंकरः ॥ १३ ॥
तेनार्येण कृता सेयं प्रपा तत्सेवका वयम् । तेन पृष्टाः स कुत्रेति ते तद्गृहमदर्शयन् ॥ १४ ॥
वागीशस्तद्गृहद्वारं यदा प्राप द्विजोऽपि सः । कर्तुं माध्याह्निकस्नान निर्जगाम गृहात्स्वयम् ॥ १५ ॥
नासाहतं शिरस्तस्य तदा वेगेन निर्यतः । वागीश्वरो मे शरणमित्याह स बहिः स्थितम् ॥ १६ ॥
साक्षादिव महादेवं गृहद्वारमुपागतम् । भस्मावकुण्ठिततनुं मनसा प्रणनाम च ॥ १७ ॥
अद्भुती मुदितः प्राह धनं लब्ध्वेव निर्धनः । दर्शनाद्वोः कृतार्थोऽस्मि देवस्येव पिनाकिनः ॥
पादरेणुपवित्रं ते भूयादस्मद्गृहं वरम् । कर्तुमातिथ्यमिच्छामि क्रियतां मय्यनुग्रहः ॥ १९ ॥
इति प्रवेशितो वेश्म कृतासनपरिग्रहः । प्रसङ्गादेव पप्रच्छ वागीशः पृथिवीसुरम् ॥ २० ॥
नाम किं ते द्विज ब्रूहि शिवभक्त्या महानसि । इति वागीशसंपृष्टस्तमाह विहिताञ्जलिः ॥ २१ ॥
अहं वागीशदासोऽस्मि नाम्ना स्यामद्भुतीति च । ऐहिकामुष्मिकं यन्मे सर्वं वागीशधर्मतः ॥ २२ ॥
इत्याकर्ण्य स तं प्राह किमिदं क्रियते त्वया । दासा यस्य विरिञ्चाद्या य एको जगतां प्रभुः ॥ २३ ॥

यन्नामस्मरणं जन्तोर्महापातकनिष्कृतिः । विहाय तं महादेवं नाम तस्यातिपावनम् ॥ २४ ॥
शाल्मलीपुष्पसंकाशं शिवान्यं शरणं गतः । वागीशः कुत्र वा कोऽयं देवो वाथ स मानुषः । २५॥
शिवदेवा वयं कापि नैवान्यत्र तु भुञ्ज्महे । चिह्नमात्रेण शैवोऽसि हन्त भक्तिस्तवान्यतः ॥२६॥
इति तद्वाक्यमाकर्ण्य पुनस्तं प्राह भूसुरः । मैवं भो वद मे वाचमिमामाकर्णयामृषा ॥ २७ ॥
शंभोः स्थिरं चरं चेति रूपद्वयमुदीरितम् । असतां निग्रहस्तद्वल्लोकेऽस्मिन् सदनुग्रहः ॥ २८ ॥
स्थिरे परोक्षो विज्ञेयश्चरे प्रत्यक्ष एव सः । स्थिरं तु लिङ्गं शैलादि चररूपं भवादृशः ॥ २९ ॥
चरेणैव स्वरूपेण निग्रहानुग्रहौ विभुः । करोति जगतां शम्भुर्ददाति नमतां फलम् ॥ ३० ॥
यथा शिवस्तथा भक्तस्तयोर्भेदो न हि क्वचित् । वागीशमूर्तिमास्थाय जित्वेशः कटवाससः॥३१॥
प्रतिष्ठापितवाँल्लोके वैदिकाध्वानमुत्तमम् । स शम्भुरेव यस्यास्मिन् मर्त्यधीः स विनश्यति ॥ ३२ ॥
तस्मादस्मत्कृतं सर्वं तस्यैवेति मतिर्मम । इत्युक्तोऽसावदभ्रुविना वागीशोऽस्मीत्युवाच तम् ॥३३॥
मुमुदे भूसुरोन्द्रोऽपि निधिं प्राप्येव निर्धनः । अतिथ्योद्योगसमये कदलीदलहारिणम् ॥ ३४ ॥
तत्पुत्रमदशत्सर्पः स बभूवाशु मूर्च्छितः । प्रच्छाद्य मूर्च्छितं पुत्रं तं भोजयितुमुद्यते ॥ ३५ ॥
अदभ्रुत्याख्ये द्विजे प्राह वागीशो भोक्तुमुद्यतः । भोक्तुमद्य सपुत्रेण त्वयापि स्थीयतां सुतम् ॥
भोजनायाह्वयस्वेति त्वरयामास दम्पती । विचाराक्रान्तमनसावुक्तं नैवानृतं भवेत् ॥ ३७ ॥
आतिथ्यविघ्नो भविता यथार्थकथने ध्रुवम् । इति संचित्य तौ सत्यं पुत्रवृत्तान्तमूचतुः ॥ ३८ ॥
मा भैष्टमिति तावुक्त्वा स्वसेवाऋणमुक्तये । मृतस्य निटिले भस्म तत्पुत्रस्य निधाय सः ॥ ३९ ॥
नीललोहितमस्तौषीद्वागीशः शूलधारिणम् । ॥ ४० ॥

जलधिमथनजातं यः पुरा कालकूटं प्रतिभयममराणां विष्टपानां च शंभुः ।
अपिबदभयदाता दैवतैः स्तूयमानो विघटयतु विषार्तिं चेतसा संस्मृतो नः ॥४१॥

इति वागीशवाक्येन द्विजपुत्रः स जीवितः । विस्मयं परमं जग्मुरपि देवाः सवासवाः ॥ ४२ ॥
अथ तस्य गृहे भुक्त्वा वागीशः स्वेच्छया ययौ । पुनरुज्जीवनात्सूनोर्मुमुदाते च दम्पती ॥ ४३ ॥
चिरं ध्यायंस्तमेवासावदभ्रुती तु महेश्वरम् । अवाप शिवसायुज्यं दुर्लभं योगिनामपि ॥ ४४ ॥

॥ इति श्रीस्कन्दोपपुराणे शिवभक्तविलासे वागीशचरिते अदभ्रुतिमुक्तिर्नाम सप्तचत्वारिंशोऽध्यायः ॥

॥ अथ अष्टचत्वारिंशोऽध्यायः ॥

श्रीअगस्त्यः ॥

संगमाच्छिवभक्तानां सर्वपापनिबर्हणात् । दुस्तरं जन्मदुःखाब्धिं जन्तुरत्येति लीलया ॥ १ ॥
अतो मोदाहरन्तीममितिहासं पुरातनम् । चारितं नीलनग्नस्य श्रूयते यत्र पावनम् ॥ २ ॥

मरुद्वृधासरित्तीरे मङ्गळाख्यं महत्पुरम् । सदा धर्मरतैः सद्भिः साग्निहोत्रैरधिष्ठितम् ॥ ३ ॥
तत्राभूत् नीलनम्राख्यो ब्राह्मणो वेदपारगः । ब्रह्मदृष्टिर्जितक्रोधो भक्तिमान् परमेश्वरे ॥ ४ ॥
नीलं कर्मफलं प्रोक्तं तन्न पश्यति नम्रवत् । यतस्ततोऽभूल्लोकेषु नीलनम्राह्वयो द्विजः ॥ ५ ॥
त्रिपदार्थविवेकाम्भःप्रक्षालितमलत्रयः । वाजपेयादिभिर्यज्ञैरारराध महेश्वरम् ॥ ६ ॥
नीलकण्ठस्य देवस्य नीलनम्रः प्रसादतः । दृश्ये जगति सर्वत्र व्यधत्त शिवदर्शनम् ॥ ७ ॥
शिवध्यानेन विशदं नीलनम्रस्य मानसम् । कतकक्षोदयोगेनानाविलं सलिलं यथा ॥ ८ ॥

अथैकदार्द्रादिवसे महेशं फलैश्च दुग्धैर्मधुनाभिषिच्य ।
निवेद्य चान्नं दधिदुग्धपूर्णं हृष्टः स तुष्टाव शिवान्तिकस्थः ॥ ९ ॥

हरं स्तुवन्तं भर्तारं समया पतिदेवता । तिष्ठन्ती साञ्जलिस्तस्य भार्यासेवत शङ्करम् ॥ १० ॥
मौळौ शम्भोस्तदा लूता निपत्य लघुभिर्गुभिः । घनैः प्रच्छादयामास सा तूर्णं निममार्ज ताम् ॥ ११ ॥
तदोषशान्त्यै त्वनया बुद्ध्या निष्ठीवनं कृतम् । लूतानखक्षते मौळौ शम्भोरसृगदृश्यत ॥ १२ ॥
साध्वीभक्तिपरीक्षार्थं दर्शिते शम्भुनासृजि । लिलेह जिह्वया भीता सा लालौषधया द्रुतम् ॥ १३ ॥
शशाम सद्यो रुधिरं प्रीतश्चाभून्महेश्वरः । भार्यारसनयालीढं शिरः शम्भोरवेक्ष्य सः ॥ १४ ॥
कर्णार्पितकरः शोचन्नीलनम्रो जगाद ताम् । त्वया किमर्थमुच्छिष्टं कृतं लिङ्गं मयार्चितम् ॥ १५ ॥
दुष्टे कृतः शिवद्रोहस्त्यक्त्या त्वमशिक्षिता । न मे त्वयास्ति संबन्धो गच्छ क्वापि यथेच्छया ॥ १६ ॥
इति भर्तुर्निशम्योक्तिं सा कृताञ्जलिरब्रवीत् । गतिस्त्वमेव मे शम्भोर्नैव द्रोहः कृतो मया ॥ १७ ॥
सर्वं वेद शुभं वान्यत्सर्वसाक्षी महेश्वरः । अथ तां नीलनम्रोऽपि कम्पयन् मौळिमात्मनः ॥ १८ ॥
विधाय साहसं पूर्वं प्रच्छादयितुमिच्छसि । स्त्रियो हि साहसपरा इत्युक्त्वा स्वगृहं ययौ ॥ १९ ॥
गते भर्तरि साध्वी सा शंकरं शरणं ययौ । उपोषितानयद्रात्रिं तत्र पञ्चाक्षरीपरा ॥ २० ॥
नीलनम्रमथ स्वप्ने प्राह वाचं महेश्वरः । मूर्ख त्वं न विजानीषे तस्या भक्तिं मयि स्थिराम् ॥ २१ ॥
महाभिषेके विहिते न सम्यङ्मार्जनं कृतम् । पञ्चामृतकणे लग्ने मौळौ लूता क्षुधार्दिता ॥ २२ ॥
न्यपतत्तदिमानखरा भक्षितुं तं नखक्षतात् । उत्पन्नं सविषं रक्तं दृष्ट्वा त्वद्भार्यया मम ॥ २३ ॥
तदौषधं तु लाला स्यादित्यालीढं शिरस्तया । तज्जिह्वालालया मौळौ ममाशाम्यद्विषव्रणम् ॥ २४ ॥
यत्रालीढं तया तत्र स्वर्णवर्णं शिरोऽभवत् । त्वद्भीत्या विरता नो चेत्सर्वं स्वर्णं भवेन्नु तत् ॥
आलीढं यदि मल्लिङ्गे यत्र यत्र व्रणो महान् । यदि त्यक्ता त्वया सेयं त्यजामि त्वमहं ध्रुवम् ॥
नीलनम्रमुदीर्यैवं नीलकण्ठस्तिरोदधे । अथोत्थाय भयाविष्टो नीलनम्रः शिवालयम् ॥ २७ ॥
गत्वा नत्वा क्षमस्वागो मदीयं शंकरेति च । क्षम्यतामिति भार्यां स्वामानीय च निजं गृहम् ॥
शिरः स्वर्णमयं लीढं दृष्ट्वा शम्भोः समिस्मयः । तामेव गिरिशं ध्यायन् न कदाचन रुष्यति ॥
तया सह निवासेन स्वं कृतार्थममन्यत । अथ कालेन महता संबन्धेन समागतान् ॥ ३० ॥

नीलनम्नो महाभागाञ्शिवभक्तान् दृढव्रतान् । संपूज्य वासयामास स्वमठान्तर्महामतिः ॥ ३१ ॥
अथ तेषु प्रयातेषु शिवस्तोत्रपरायणः । नीलनम्नो महाभक्तो भार्यया सहितस्तया ॥ ३२ ॥
निर्धूतबन्धनः प्राप गतिमावृत्तिवर्जिताम् ॥ ३३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे नीलनम्नमुक्तिप्रतिर्नाम अष्टचत्वारिंशोऽध्यायः ॥

॥ अथैकोनपञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ॥

कर्मजातानि संगृह्य पुण्यस्थलनिषेवया । उपास्ते शंकरं भक्त्या सोऽपि मुक्तो भवेद्द्विजाः ॥ १ ॥
श्रूयतामितिहासोऽत्र विश्रुतो विदुषां प्रियः । श्रवणाद्यस्य कैङ्कर्ये शाङ्करे भविता मतिः ॥ २ ॥
वागीशज्ञानसंबन्धनीलनम्नान् रिरक्षिषुः । दीनारानन्वहं प्रादात्सोपाने यत्र शङ्करः ॥ ३ ॥
हेमलामपुरं नाम्ना तदानीं प्रथितं च यत् । द्विजः कश्चिदभूत्तत्र शिवभक्तगणाग्रणीः ॥ ४ ॥
अध्यैष्ट वेदानखिलानन्वतिष्ठत्क्रतूञ्शतम् । त्रेताग्नौ मण्डले भानोः शिवलिङ्गे च देशिके ॥ ५ ॥
भावयन्नित्यमीशानं भक्त्या नन्दिसमोऽभवत् । अतस्तमाह विप्रेन्द्रा नाम्ना तु नवनन्दिनम् ॥ ६ ॥
स फाल्गुनोत्सवे शंभोः पूर्णिमायां द्विजोत्तमाः । करिष्यंस्त्यागराजस्य दीपारोपणमुत्तमम् ॥ ७ ॥
घृतग्रहणमुद्दिश्य ययावापणवीथिकाम् । घृतविक्रयिणं तत्र नवनन्द्याह सौगतम् ॥ ८ ॥
गृहाण निष्कशतकं घृतायाज्यं प्रदेहिनः । इत्युक्तश्चार्हतः प्राह घृतं ते कस्य बह्विति ॥ ९ ॥
नवनन्द्यपि तं प्रीत्या प्राह देहि घृतं नवम् । भक्तोऽस्मि त्यागराजस्य प्रीतये लक्षवर्तिका ॥ १० ॥
कर्तव्याद्येति किं तेनेत्युक्तः शंभोरनुग्रहः । फलमित्याह कः शंभुरिति पप्रच्छ तं पुनः ॥ ११ ॥
तमाह विप्रो देवानां नियन्ताष्टतनुः शिवः । स्वयं प्रकाशस्त्यागेशस्तद्भक्त्या मुच्यते नरः ॥ १२ ॥
ततः ग्रहस्य तं प्राह वेदबाह्यो द्विजोत्तमम् । पृथिवी वायुराकाशश्चन्द्रादित्यौ च पावकः ॥ १३ ॥
अम्भश्च यजमानश्चेत्येते शंभौ हि सङ्गताः । मूर्तत्वं यान्त्यमी कुत्र सङ्गच्छन्ते विरोधिनः ॥ १४ ॥
शिवाज्ञयाविरोधश्चेद्द्विर्दीपो विधीयताम् । इत्युक्तः स शिवद्रोही न संभाष्य इति क्रुधा ॥ १५ ॥
व्यथमानश्च तद्वाक्यैस्त्यागेशं शरणं गतः । हतोऽस्मि सौगतगिरा देव मर्मभिदा चिरम् ॥ १६ ॥
रक्ष रक्षेति निश्वस्य नवनन्दी रुदन् स्थितः । जलदीपान् विधेहीति दयालुः प्राह तं हरः ॥ १७ ॥
संमेळयित्वा सकलान् कमलालयवासिनः । सायं स लक्षपात्रेषु दत्वा विमलवर्तिकाः ॥ १८ ॥
पूरयामास सर्वाणि कमलालयवारिभिः । वर्तिकाग्रहणोद्युक्तो गृहं प्रति पुनर्गतः ॥ १९ ॥
गच्छन् स मार्गमध्येऽतिसंमर्दे तु शिवोत्सवे । सति शंभोः सन्निधाने नीचस्पर्शविशङ्कितः ॥ २० ॥
उष्णोदकं कुरुष्वेति स्नातुं सुष्वाप मन्दिरे । सुप्तमुत्थाप्य देवेशः कमलालयमागतान् ॥ २१ ॥
दर्शयामास सकलान्नीलग्रीवांश्चतुर्भुजान् । खण्डेन्दुमण्डितांस्त्र्यक्षान् करास्तैणपरश्वधान् ॥ २२ ॥

शिवरूपान् द्विजः सर्वानाचण्डालान् ददर्श सः । सर्वांश्शिवाकारतया दृष्ट्वा भीतः समुत्थितः॥२३॥
गृहीत्वा वर्तिकाः सर्वास्त्यक्तरूपशाम्भुमज्जनः । प्राप्य त्यागेशभवनं पात्रेष्वप्यूरितेषु च ॥ २४ ॥
ताश्च प्राज्वालयद्विप्रः तदद्भुतमभून्महत् । महावातेऽपि चलिते जज्वलुस्ताः शिवाज्ञया ॥ २५ ॥
भीताः पलायिताः सर्वे शाक्त्या द्वीपान्तरं गताः । ववर्षुः पुष्पवर्षाणि देवाः सर्वे च विस्मिताः ॥
आप्रभातं च तान् दृष्ट्वा नवनन्दी ज्वलच्छिखान् । भक्त्या प्रहृष्टहृदयस्तुष्टाव परमेश्वरम् ॥ २७ ॥
यस्याज्ञया नवच्छिद्रे स्तब्धस्तिष्ठति मारुतः । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥ २८ ॥
शासनात्पावको यस्य सर्वेषामन्तरे स्थितः । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥ २९ ॥
बडवामुखवह्निश्च ज्वलत्यब्धौ यदाज्ञया । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥ ३० ॥
भूतान्यपि विरुद्धानि मिळितानि यदाज्ञया । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥ ३१ ॥
फलमन्वेति कर्तारं कर्मणां यस्य शासनात् । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥ ३२ ॥
औषधे च मणौ मन्त्रे भाति शक्तिर्यदाज्ञया । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥ ३३ ॥
विनाधारं जगद्येन साधारमिव निश्चलम् । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥ ३४ ॥
नात्येति समयं ज्योतिः सिन्धुः कालश्च यद्भयात् । तं नमामि महादेवं त्यागेशं भक्तवत्सलम् ॥
ब्रह्माच्युताद्यविदितं च शिरःपदन्ते नासाशिलाविदितमाप्तसुहृत्प्रियायाः ॥ ३६ ॥
तस्मै नमोऽस्तु भवते प्रणतार्तिहर्त्रे त्यागेश्वराद्य मयि धेहि दयावलोकम् ॥ ३७ ॥
नवनन्दी स्तुवन्नेवं त्रिसन्ध्यं त्यागनायकम् । तत्रैव तदनुज्ञातः सभार्यो न्यवसच्चिरम् ॥ ३८ ॥
कर्माखिलं च संगृह्य कुर्वते भक्तिमुत्तमाम् । त्यागेश्वरो ददौ तस्मै कैवल्यं नवनन्दिने ॥ ३९ ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे नवनन्दिमुक्तिप्राप्तिर्नामैकोनपञ्चाशोऽध्यायः ॥

॥ अथ पञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ॥
अथ वक्ष्ये कथां ज्ञानसंबन्धस्य मुनीश्वराः । स्तन्यामृतप्रदानेन यस्य धात्री हिमाद्रिजा ॥ १ ॥
कावेरीहेमसभयोरन्तरास्ति पुरं महत् । किंचिद् ब्रह्मपुरं नाम ब्रह्मलोक इवापरः ॥ २ ॥
संवर्तसलिलाक्रान्ते त्रैलोक्ये यां महेश्वरः । द्रोणीं विधाय त्रिगुणां तत्रत्यानभ्यपालयत् ॥ ३ ॥
वृषध्वजपुरी ब्रह्मपुरी वेणुपुरी तथा । काळीपुरी मलपुरीत्युच्यते या मुनीश्वरैः ॥ ४ ॥
यत्रोद्यानेषु माकन्दास्तटाककमलोदरे । मुञ्चन्ति मधु विप्रेन्द्रा वह्नावाज्याहुतिं यथा ॥ ५ ॥
अभ्रिच्छोद्घर्तने क्षीणां घनभ्रान्तिजुषां भृशम् । नृत्यतां बर्हिणां यत्र लासकीनाट्यवद्भुवौ ॥ ६ ॥
बालयूथकरास्फोटो मन्द्रस्ताळध्वनिर्यथा । तत्रास्ति ब्राह्मणः कश्चिन्नित्यानुष्ठानतत्परः ॥ ७ ॥
आम्नायशास्त्रवेत्ता नाम्ना शिवपादहृदय एवासौ ।
कौण्डिन्यगोत्रजातो जितारिषट्को विशेषसम्पूज्यः ॥ ॥ ८ ॥

शिवभक्तो जितक्रोधः सर्वसंपत्समृद्धिमान् । विवर्त इव धर्मस्य विधानां वासभूरयम् ॥ ९ ॥
शान्तेरिव परीपाको दान्तेरिव परिक्रमः । उल्लास इव बोधस्य मोक्षस्येव महापथः ॥ १० ॥
वेदान्तार्थोपदेशेन पवित्रितजगत्त्रयः । विनयाभरणा तस्य करुणेव शरीरिणी ॥ ११ ॥
आसीद् भगवती नाम्ना धर्मपत्नी यथाम्बिका । अरुन्धती वसिष्ठस्य यथा स्वाहेव बर्हिषः ॥ १२ ॥
तथा प्रतिष्ठामगमदातिथ्येषु द्विजन्मनाम् । तस्य केळिवनाक्रीडपर्वताग्राश्रिता मृगी ॥ १३ ॥
चर्वितार्धतृणं दत्ते मृगाय शशलक्ष्मणः । तस्य संपत्समृद्धस्य सत्कलत्रानुकूलता ॥ १४ ॥
भाग्येन स्वर्णपुष्पस्य सौरभश्रीरिवाभवत् । षट्कर्मनिरतस्यास्य सभार्यस्य महात्मनः ॥ १५ ॥
अनपत्यतया दुःखमन्तर्व्याधिरिवाभवत् । तस्यैवं वर्तमानस्य शेमुषी काचिदाबभौ ॥ १६ ॥
लोकेऽद्य क्षपणाक्रान्ते शून्ये यागादिकर्मभिः । शैवानां वैदिकानां च सुखायेशाज्ञया मम ॥ १७ ॥
पुत्रो जनिष्यति यदि ध्वस्तं स्यादार्हतं मतम् । इति द्रोणीपुरेशाग्रे सपत्नीकस्ततापसः ॥ १८ ॥
अलब्धपुत्रावीशानादचिरेणार्चनादिभिः । अथ तौ दम्पती खिन्नावपूरितमनोरथौ ॥ १९ ॥
अपत्यार्थे महादेवं तोषयामासतुर्व्रतैः । क्षीराभिषेकं विदधे धारया लिङ्गमूर्धनि ॥ २० ॥
यावदेकादशावृत्ती रुद्राध्यायस्य मन्त्रवित् । पारेणो रुद्रमन्त्रेण पार्वतीपतिमीश्वरम् ॥ २१ ॥
द्रोणप्रसूनैरानर्च त्रिसहस्रैर्दिने दिने । प्रदक्षिणशतं शंभोस्तैलाभ्यङ्गविवर्जितः ॥ २२ ॥
करोत्यलवणं भुङ्क्ते बिल्वानामभिषेककृत् । तैलं क्षीरं शिशूनां च प्रददात्यनिवारितम् ॥ २३ ॥
एवं वर्षत्रयं तस्य पत्नी च व्रतमादधे । तथापि दृश्यते न स्म प्रसादः पारमेश्वरः ॥ २४ ॥
अथ सा चिरनिर्विण्णा द्वादशाहमुपोषिता । द्रोणीपुरेश्वरस्याग्रे रुदन्ती वाक्यमब्रवीत् ॥ २५ ॥
वेदविद्याविहीनो यो ब्राह्मणः स्त्री ह्यनात्मजा । तावन्नघातिनौ भूमेर्भारभूतौ न संशयः ॥ २६ ॥
ददासि चेन्न पुत्रं मे प्राणाः सन्त्वर्पितास्त्वयि । इति निश्चित्य सा साध्वी तत्र प्रायमुपाविशत् ॥
तस्यां रात्रौ हरः स्वप्ने पायसान्नेन पूरिताम् । पात्रीं हेममयीं दत्वा भगवत्यै तिरोदधे ॥ २८ ॥
अथ साकथयत्स्वप्ने हरेणानुग्रहं कृतम् । भर्त्रे शिवाङ्घ्रिचित्तोऽयाभूत्तुष्टोऽन्धो यथा दृशा ॥ २९ ॥
ततः सा गर्भचिह्नेन प्रचकाशे पतिव्रता । अचिरोदयशीतांशुर्माहेन्द्रीव हरिद्वरा ॥ ३० ॥
तान्तं वपुस्तदीयं च दौहृदव्यथयोज्ज्वलम् । अतीतहिमबाधेव शिशिरात्ययपद्मिनी ॥ ३१ ॥
सुषमाचारुसर्वाङ्गीं सर्वाभरणभूषिताम् । शिवाङ्घ्रिचित्तो दयितां ददर्श हृदयंगमाम् ॥ ३२ ॥
विद्यामिवोत्तमां विद्वाञ्जन्ममृत्युविनाशिनीम् । ततो लग्ने शुभे तस्याश्चक्रे पुंसवनक्रियाम् ॥ ३३ ॥
मासे षष्ठे स सीमन्तोन्नयनं च विशेषतः । अथ वैजनने प्राप्ते पञ्चसूच्चस्थितेषु च ॥ ३४ ॥
ग्रहेषु लग्ने सुशुभे वाक्पताविन्दुनान्विते । नक्षत्रे रुद्रदैवत्ये साध्वी भगवती सुतम् ॥ ३५ ॥
असूतान्यमिव स्कन्दं सर्वेक्षपणकान्तकम् । दिवि दुन्दुभयो नेदुः प्रसन्नानि पयांसि च ॥ ३६ ॥
अवर्षि कुसुमं देवैरस्पन्दि मरुता सुखम् । अनर्ति सुरकान्ताभिरगाय्यपि च किन्नरैः ॥ ३७ ॥
अभ्रंशि गर्भैः शाक्यानामनलैर्जज्वले तदा । पाषण्डानां समस्पन्दि तदा वामेन चक्षुषा ॥ ३८ ॥

शैववैदिकधुर्याणां दक्षिणेन च चक्षुषा । तदा नग्नाटनिकटे पपातोल्का दिवश्च्युता ॥ ३९ ॥
अरिष्टमभवत्तेषां ज्योतिषा चातिभास्वता । प्रदीपाः सन्निधौ तेषां मध्याह्नारोपिता इव ॥ ४० ॥
तदङ्किताङ्का सा साध्वी बभौ भगवती तदा । उत्पन्नकौस्तुभमणिर्वेलेव क्षीरवारिधेः ॥ ४१ ॥
जातकर्म विधायास्य ब्राह्मणेभ्यो धनं ददौ । गवां द्वादशसाहस्रं विप्रेभ्योऽदाच्छिवाङ्कितम्॥४२॥
भोजयामास विप्रौघान् द्वादशेऽह्नि शिवाङ्कितम् । चकार नामकरणं ज्ञानसंबन्ध इत्यथ ॥ ४३ ॥
बबृधे रक्षितो बालः शैलादिरपरो यथा । क्व वा क्व वेति पाषण्डान् रोदनच्छद्मना शिशुः॥४४॥
उच्चैः संतर्जयामास वेदबाह्यान् दुरात्मनः । घातयिष्यन्निव रिपूंश्चरणावुदनीनयत् ॥ ४५ ॥
बबन्ध मुष्टिमसकृत्कुट्टयिष्यन्निवार्हतान् । यदोन्ननाम मूर्धास्य बाल्ये भगवतीशिशोः ॥ ४६ ॥
शिवागमैश्च वेदान्तैर्दृष्टिरुन्मीलिता तदा । अङ्गुष्ठपुरुषस्तोत्रं मम वाग्जन्मनः फलम् ॥ ४७ ॥
इति ब्रुवन्निवाङ्गुष्ठं स्वमुखे विदधे सदा । बहिर्निष्क्रमणं तस्य चतुर्थे मास्यधापिता ॥ ४८ ॥
दुर्मतध्वान्तभेदाय भानोरिव समुद्यतः । आशितश्चान्नमब्दार्धे व्यवर्धत दिने दिने ॥ ४९ ॥
शिवापदानमधुरैर्गीतैः समुपलालितः । जनन्याः स्तन्यपायी तद्वदने दत्तलोचनः ॥ ५० ॥
अङ्कुरदशनो बालः पित्रोः प्रीतिमवर्धयत् । अर्धमङ्कुरिता रेजुर्दन्तास्तस्य मुखाम्बुजे ॥ ५१ ॥
प्ररोहा इव विद्यानां विमलाः शुभजन्मनः । जानुभ्यामपि बाहुभ्यां यदा संचरति स्म सः॥५२॥
तदा प्रतिष्ठिता वेदाश्चत्वारो भुवि निर्भयम् । वत्सरान्ते नदीस्नानं कारयित्वार्भकस्य सः ॥ ५३ ॥
ब्राह्मणान् भोजयामास बन्धूनपि समागतान् ।

मात्रा त्रिपुण्ड्राङ्कितफालदेशो पूजासु शंभोः पितुरन्तिकस्थः ।
स्निग्धां प्रतिष्ठाप्य शिलां पुरस्तादानर्च शंभुं स विडम्बनेन ॥ ५४ ॥

स स्नानजपकालेषु बभूव पितुरन्तिके । उरःस्फुरद्व्याघ्रनखः क्वणन्नूपुरकिङ्किणिः ॥ ५५ ॥
कर्णिकाविलसत्कर्णो बालोऽयं तु त्रिवार्षिकः । अथैकदा धनुर्मासे भानोः प्रागुदयाद्द्विजः॥५६॥
समर्चयिष्यन्नीशानं प्रस्थितः स्नातुमुद्यतः । अन्तिके नीयतां बालो निद्राण इति चोदिता ॥ ५७ ॥
श्रुत्वापि भर्तुर्वचनं निद्रान्धा भगवत्यभूत् । अथाग्रे पितरं यान्तमनुद्रुत्य समुत्थितः ॥ ५८ ॥
अर्भकः प्रययौ तीर्थं पिता यत्र निमज्जति । शिवाङ्घ्रिद्वन्द्वमायान्तं वीक्ष्य चोरः समुत्थितः ॥५९॥
इत्याश्लिष्य शिरो जिघ्रन् शिवतीर्थतटं ययौ । तीरे शिशुमवस्थाप्य वक्षोदघ्ने जले स्थितः॥ ६०॥
मन्त्रैः संप्रोक्षणं कुर्वन्नघमर्षणपूर्वकैः । पञ्चब्रह्म च पञ्चार्णं ममज्जान्तर्जले जपन् ॥ ६१ ॥
अन्तर्निरुद्धनिश्वासः सूक्तं पौरुषमस्मरत् । अदृष्ट्वा जनकं बालः खिन्नो धून्वन् करं पदम्॥ ६२ ॥
अरोदीत्तात हे मातरित्याक्रोशन् मुहुर्मुहुः । तदाविर्भूय भगवानम्बयेशो वृषोपरि ॥ ६३ ॥
अम्बिकामाह गौरीशो गौरीं द्रोणपुरीश्वरः । अर्भकोऽयं प्रकोष्ठेन नेत्रमज्जनचिह्नितम् ॥ ६४ ॥

---

१. नग्नाः सन्त्योऽदन्तीति नग्नादाः ।

प्रमृजन् यच्छ मे स्तन्यं रोदित्यम्बेत्यनुक्षणम् । पश्येमं बालमगजे कृपादृष्टया च सत्वरम् ॥ ६५ ॥
अम्बेत्याहूय भवतीमयं रोदिति बालकः । देहि स्तन्यामृतं तस्मै मल्लियायेत्यवोचत ॥ ६६ ॥
अथ मूर्तिमती देवी जगतां जननी शिवा । आगत्यास्यान्तिकं बालमङ्के कृत्वा शुचिस्मिता ॥६७॥
दुग्ध्वा स्तन्यामृतं तूर्णं चषकं हेमनिर्मितम् । ददौ गृहीत्वा तद्वक्त्रे क्षुधितः स च तत्पपौ ॥ ६८ ॥

वेदान्तबोधमयमम्बिकया वितीर्णं स्तन्यामृतं तदनुपीतवतोऽर्भकस्य ॥
गङ्गाप्रपूर इव सूक्तिसुधाप्रवाहो वक्त्रादजायत जगत्त्रयतापहारी ॥ ६९ ॥

भगवती अथ गौरी भगवती रुदितस्य प्रशान्तये । तस्य दर्शिततादङ्का सद्य एव तिरोदधे ॥ ७० ॥
सुप्रभातं ततो जज्ञे द्रोणीपुरनिवासिनाम् । क्व बाल इति चिन्तावान् स्नातोत्तीर्णः शिवाङ्घ्रिहृत् ॥
जपन् सावित्रमर्काय दत्वार्घ्यं समुदैक्षत । क्षणात्कृतजपो बालं मृगयञ्छिशुमैक्षत ॥ ७२ ॥
स हेमचषकं हस्ते बालस्यालोक्य विस्मितः । कस्योच्छिष्टं स्तन्यमिदं त्यज बालेत्यतर्जयत् ॥७३॥
स्तन्यदात्री तव केति पृष्टः सोमं वृषोपरि । खेऽङ्गुल्या दर्शयामास तर्जन्या तर्जितोऽर्भकः ॥७४ ॥
नापश्यत्तं पिता साम्बं वृषस्थं किं तु खाच्च्युता । पुष्पवृष्टिर्दृष्टिगता श्रुतोऽभूद्दुन्दुभिध्वनिः ॥७५ ॥
? तदा प्रदर्शयन् गच्छन्नङ्गुल्येशालायावधि । जगादेदं शिशुः पद्यमतिहृद्यं मनीषिणाम् ॥ ७६ ॥

अस्माकमज्ञानतमः प्रमृष्टं संविद्दृशा संसृतिभीतिशान्त्यै ।
पुरः प्रबोधाय कृतो मृडान्या माणिक्यताटङ्करविः समिन्धे ॥ ७७ ॥

अहो बालो ग्रहग्रस्तो निर्गतो निशि चत्वरे । भस्मरक्षां पिता कृत्वापृच्छत्किं किं तवेति तम् ॥
तदानीं मिळिताः शंभोः सन्निधौ नागरा जनाः । अमृतानीव विकिरन्नस्तौषीदीशमर्भकः ॥ ७९ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे ज्ञानसंबन्धोत्पत्त्यादिकथनं नाम पञ्चाशोऽध्यायः ॥

॥ अथैकपञ्चाशोऽध्यायः ॥

श्री अगस्त्य उवाच—अर्भकः

गौरीसुतोऽहं देवेश स्तन्यपानेन शङ्कर । क्षमस्व वाचा विहितमपराधं विभो मम ॥ १ ॥

एणीदृशालंकृतविग्रहाय वाणीशमुख्यामरसेविताय ।
वेणीजटाबद्धसरिद्वराय द्रोणीपुरेशाय नमः शिवाय ॥ २ ॥
ब्रह्मात्मभेदामयभेषजाङ्घ्रये ब्रह्माण्डसृष्टिस्थितिनाशसाक्षिणे ।
ब्रह्मस्तुतिप्रीतिमते बृहन्महस्तनो नमो ब्रह्मपुरीश्वराय ॥ ३ ॥
विद्यानवद्या विमला च कीर्तिर्वेदागमोक्ते च विधौ चिकीर्षा ।
विश्वासभाग्यं यदनुग्रहेण तस्मै नमो वेणुपुरीश्वराय ॥ ४ ॥

नालीकनेत्रार्पितचारुचक्षुषे नीलीकसम्पूज्यपदाम्बुजाय ।
केळीस्मितप्लुष्टपुरत्रयाय काळीपुरेशाय नमः शिवाय ॥ ५ ॥
जम्भारिलोकद्रुमपुण्यमालासंभावनीयाङ्घ्रिसरोरुहाय ।
अम्बामहासेनसमन्विताय चम्पापुरीशाय नमः शिवाय ॥ ६ ॥
पञ्चपातकहन्त्रे ते पञ्चब्रह्मस्वरूपिणे । पञ्चभूताधिपतये पञ्चार्णतनवे नमः ॥ ७ ॥
त्रयीनुताय त्रिपुरान्तकाय त्रिवर्गदाय त्रिगुणातिगाय ।
त्रिमूर्तयेऽस्तु त्रिपुटीनियन्त्रे त्रैलोक्यनाथाय नमः शिवाय ॥ ८ ॥
त्वामेव वाग्वदतु पश्यतु लोचनं मे त्वामेव सन्नमतु मौलिरपि श्रुतिर्मे ।
नित्यं शृणोतु चरितं तव चन्द्रमौले स्वामिन् मनः स्मरतु तावकमङ्घ्रिपद्मम् ॥

इति स्तुत्वा महादेवं साम्बं वत्सस्त्रिहायनः । कुञ्चितैकपदो हस्ते ननर्त चषकं वहन् ॥ १० ॥
नेदुर्दुन्दुभयो दिव्या निपेतुः पुष्पवृष्टयः । जगुः कलं च गन्धर्वा जगत्तरळितं मुदा ॥ ११ ॥
शिवप्रसादमालोक्य शिशौ तस्मिन् प्रकाशितम् । सिद्धा विस्मयमाजग्मुः प्रणेमुः सकलाश्च तम् ॥
अथ गौरीपदाम्भोजनिर्माल्यस्रगलंकृतम् । शिबिकां बालमारोप्य निन्युः शैवगणा गृहम् ॥ १३ ॥
गौरीस्तन्यामृतामोदवासितं च तदाननम् । जिघ्रन्ती जननी मेने करे कैवल्यसंपदम् ॥ १४ ॥
अथ रात्र्यां व्यतीतायामारूढपितृकन्धरः । निर्गत्य शिवसेवार्थं गत्वा कोलवनेश्वरम् ॥ १५ ॥
नत्वागायद्द्रविडोक्त्या शम्भुं पीयूषतुल्यया । तद्गानानुगुणं सम्यक्करतालं विधाय च ॥ १६ ॥
गायत्यस्मिञ्ज्ञानपूर्णे बालके कृपयेशितुः । शिशोर्मृदुतरः कृष्णो मा भूदास्फालनात्करः ॥ १७ ॥
इत्यकाण्डादस्य हस्ते ह्यभूच्छंकरवैभवात् । विस्फुरत्तालयुगळं पश्यतां विस्मयावहम् ॥ १८ ॥
सनादं प्रणवाकारं हैमं पञ्चाक्षराङ्कितम् । हेमतालकरश्चक्रे ताळबन्धमनोहरैः ॥ १९ ॥
वचोभिः स्तुतिमीशस्य तेन प्रीतोऽभवद्धरः । एतच्छ्रुत्वा जनाः सर्वे विस्मयं परमं गताः ॥ २० ॥

पितुः स्कन्धं समारुह्य तत्रत्यानि स्थलानि च । निषेव्य गीत्वा क्रमशः प्रत्यागच्छत्पथीक्ष्य तम् ॥
लक्ष्मीवासपुरस्थाने श्रुत्वा वैभवमस्य तु । गौरीस्तन्यार्पणं स्वर्णताळप्राप्तिं च बान्धवाः ॥ २२ ॥
आह्वयन् स्वपुरेशानं गातुं मातामहादयः । तैर्वन्दितपदो गत्वा गीत्वा तत्रत्यमीश्वरम् ॥ २३ ॥
गानान्ते ये वदन्तीदं पद्यं हृद्यं ममाधुना । तेषां कैलासलोकः स्यादित्यात्मनि शपञ्जगौ ॥ २४ ॥
पश्चाच्छायावने स्तुत्वा तत्रत्यानि स्थलान्यपि । स्तुत्वा श्वेतवनेशं तु प्रत्यागच्छन्निजं पुरम् ॥ २५ ॥
मार्गमध्ये ददर्शाथ नीलकण्ठं कुशीलवम् । सोऽभूज्जात्या निकृष्टोऽपि सर्वेषां मानभाजनम् ॥ २६ ॥
गायतां शिवनामानि न कर्मकुलदूषणम् । मतङ्गचूडामणिमप्यस्य भार्यां च गायिकाम् ॥ २७ ॥
सभार्यः प्रणनामामुमयमाहूय तं पुनः । तदीशगोपुरद्वारि सेवयित्वा तु तं शिवम् ॥ २८ ॥
वीणया स्वक्रवित्वानि गापयन्नमुना सदा । अविहाय कदाप्येनं कृत्वा स्वस्य सुहृत्तमम् ॥ २९ ॥

गायन् सन् गापयन्नेवं सर्वक्षेत्राण्यसेवत । सभार्यस्तस्य दास्येन नीलकण्ठोऽभवत्कृती ॥ ३० ॥
पश्चाद्ब्रह्मपुरं गत्वा सेवयित्वामुना शिवम् । दत्वावसथमन्नं च तेन तत्रावसच्चिरम् ॥ ३१ ॥
कुशीलवं पथि प्राप्य नीलकण्ठममोदत । कृतचौलोऽम्बिकासूनुः श्रीमद्व्याघ्रपुरं गतः ॥ ३२ ॥
स्तुत्वा शम्भुं तदाद्राक्षीन्मुक्तिदं नृत्तमैश्वरम् । सुहृदेऽदर्शयत्तिल्लवनविप्रान् गणाकृतीन् ॥ ३३ ॥
सहागतः पिताप्यस्य नापश्यत्तान् गणाकृतीन् । क्षेत्राणि सेवितुं तेन प्रार्थितो गायकेन तु ॥३४॥
अर्कव्याघ्रपुरं गत्वा स्तुत्वा तत्रत्यमीश्वरम् । वृद्धाचलेश्वरं स्तुत्वा गीत्वा पिण्याघटेश्वरम् ॥ ३५ ॥
शिवस्थलदिदृक्षूणां भक्तानां पादचारिणाम् । भविता मुक्तिरित्येवं मनसा चिन्तयन् स्वयम् । ३६ ॥
पादचारी पितुरुत्कन्धादवरुह्य व्रजञ्छिशुः । शर्कराकण्टकात्युष्णवालुकापांसुसैकतैः ॥ ३७ ॥
उपद्रुतपदो गच्छन् क्लेशाच्छम्भुं स्मरन्नयम् । वरदानपुरेशानं स्तोष्यन् मारपुरं गतः ॥ ३८ ॥
तत्पुरं ज्ञानसंबन्धे प्राप्तेऽर्कोऽस्तं गतोऽभवत् । तच्छ्रान्तिखेदमालोक्य वरदानपुरेश्वरः ॥ ३९ ॥
उत्पाद्य मुक्ताशिबिकां छत्रं मुक्तामयं तदा । मौक्तिकं चिह्नवाद्यं च बालव्यजनमुत्तमम् ॥ ४० ॥
उत्पाद्य स्वालयद्वारि संस्थाप्यैतानि शंकरः । तत्क्षेत्रवासिनामात्मभक्तानां तु द्विजन्मनाम् ॥ ४१ ॥
स्वप्ने गत्वाब्रवीद्भूयं भक्ता ब्राह्मणसत्तमाः । मौक्तिकान्दोलिकाचिह्नवाद्यच्छत्राणि चामरम् ॥ ४२ ॥
मदाज्ञयाविर्भूतानि वर्तन्ते गोपुराग्रतः । प्रातः श्रीज्ञानसंबन्धो ह्यायात्यध्वपरिश्रमात् ॥ ४३ ॥
तस्मै यूयं समादाय दिशतैतान्यशादिति । दृष्टेति विस्मिता विप्राः प्रातर्दृष्ट्वाथ तानि च ॥ ४४ ॥
गृहीत्वा दातुमुद्युक्तास्तत्पुरान्निर्गता बहिः । संबन्धस्यावदत्स्वप्ने तद्वृत्तान्तवेत्ता शङ्करः ॥४५॥
शिशो मा सञ्चर पदा कदाचिदपि कानने । त्वन्निमित्तं मया दत्तान्यादाय ब्रह्मसङ्गतः ॥ ४६ ॥
मुक्तामयानि शिबिकाचिह्नछत्राणि चामरम् । आरूढशिबिकश्छत्रचिह्नचामररञ्जितः ॥ ४७ ॥
सुखं भज व्रज क्लेशमिति दृष्ट्वा स तूत्थितः । उक्त्वा पितुः स्वप्नवृत्तं हृष्टः शीघ्राद्विनिर्गतः ॥४८॥
मार्गमध्ये समायातानद्राक्षीद्ब्राह्मणोत्तमान् । ते नत्वा शिबिकादीनि ददुस्तस्मै महात्मने ॥४९ ॥
शिवप्रसादतः स्वप्ने प्रातः प्रातां सुमौक्तिकाम् । दत्तां ब्राह्मणयूथेन शिबिकां छत्रमुत्तमम् ॥५० ॥
चिह्नं वाद्यं च जग्राह बालव्यजनमुत्तमम् । नत्वा तु शिबिकां तस्याः कृत्वायं त्रिः प्रदक्षिणम् ॥
अनुज्ञाप्य द्विजांस्तातमारुरोह शिवाज्ञया । राजराजं स्तुवन् वाग्मी वरदानपुरेश्वरम् ॥ ५२ ॥
स्तुत्वा गायंश्चिरं स्थित्वा स्वपुरं प्रति निर्गतः । मार्गे स्थलानि संसेव्य गायकेन महात्मना ॥५३॥
आवासमाप संबन्धः पित्रा द्रोणीपुरं महत् । यदापि शिबिकारूढो जन्मधाम महाकविः ॥ ५४ ॥
तदोपनीतो गुरुणा ब्रह्मचर्यव्रतान्वितः । स्वाध्यायाध्ययनायासौ स्थापितो गुरुसन्निधौ ॥ ५५ ॥
अनन्तवेदवित्सोऽसावृग्यजुःसामपूर्वकान् । आम्नयांश्चतुरोऽध्यैष्ट चतुष्षष्टिकला अपि ॥ ५६ ॥
सदास्य वाचि वर्तन्ते सर्वज्ञस्यानने यथा । अध्यापयितुमाम्नायं गुरवो ये समागताः ॥ ५७ ॥
तेऽस्य वक्त्रोदिताम्नायैरभवंश्छिन्नसंशयाः । ज्ञाताम्नायागमश्रौतशास्त्राखिलकलोऽर्भकः ॥ ५८ ॥

अथ विद्यासु सर्वासु सारांशः को भवेदिति । विचार्य त्यक्तसर्वांशः पञ्चाक्षरपरोऽभवत् ॥ ५९ ॥
वेदशास्त्रपुराणानि मत्वा पञ्चाक्षरात्मना । पञ्चाक्षरस्वरूपीश इति मत्वा स्वया धिया ॥ ६० ॥
पञ्चाक्षरमयं गेयमगायद्दशसूक्तिभिः । अस्याद्भुतं समाकर्ण्य वागीशो द्रष्टुमागतः ॥ ६१ ॥
तदागमनमाकर्ण्य प्रत्युद्गम्याभिवन्दितः । नमन्तमागतं वाचा विरुध्योत्थाप्य पाणिना ॥ ६२ ॥
कृताञ्जलिं समाश्लिष्य नीत्वात्मीयं गृहं ततः । भोजयित्वा सहैतेन नत्वा द्रोणीपुरेश्वरम् ॥ ६३ ॥
उवास तत्र संबन्धः सुखं द्रोणीश्वरं स्तुवन् । गते तु कतिचित्काले वागीशस्तत्पुरे स्तुवन् ॥६४ ॥
आमन्त्र्य ज्ञानसंबन्धं शिवक्षेत्रदिदृक्षया । अनुव्रज्य कियद्दूरं ययौ प्रस्थापितस्तदा ॥ ६५ ॥
तदा श्रीज्ञानसंबन्धो द्रष्टुं शैवस्थलानि तु । गायता स्वकवित्वानि गायकेनानुयायिना ॥ ६६ ॥
निर्गतोऽनुद्रुतः पित्रा सोमयागचिकीर्षुणा । रुद्धः पितात्र तिष्ठेति शिवाङ्घ्रिहृदयोऽब्रवीत् ॥ ६७ ॥
यागारम्भो मनस्यस्ति त्वां विना स्थातुमक्षमः । त्वया सहागमिष्यामि यत्र गच्छसि नन्दन॥६८॥
इति ब्रुवन्तं जनकमनिवार्य इति स्मरन् । सहैवानेन निरगादात्मानुगमनेच्छुना ॥ ६९ ॥

॥ इति श्रीस्कोन्दापपुराणे शिवभक्तविलासे श्रीज्ञानसंबन्धोपनयनादिवर्णनं नाम एकपञ्चाशोऽध्यायः ॥

॥ अथ द्विपञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ॥

आदाय निरगात्तातं स स्वानुगमनोत्सुकम् । सार्धं भक्तैर्विनिर्गत्य जटायुपुरमेत्य सः ॥ १ ॥
नत्वा गीत्वा वैद्यनाथं निषेव्यान्यस्थलान्यपि । गत्वा पञ्चनदस्थानं तत्रत्यानि स्थलानि च ॥ २ ॥
नत्वा स्तुत्वाथ संसेव्य प्राक्शिलाश्रममागतः । तत्र राजाभवत्कश्चिद् वृष्टिमानिति नामतः ॥ ३ ॥
तत्पुत्री काप्यपस्मारपीडिता सा चिकित्सिता । रक्षाभिर्बन्धिता वैद्यैर्मन्त्रिता मन्त्रवादिभिः ॥ ४ ॥
तथापि न गता व्याधिरपस्मारोऽतिदारुणः । तां नीत्वा सन्निधिं शंभोः स्वयमागत्य दुःखितः ॥५॥
प्रार्थयन् दुहितू रोगनिवर्तनमवर्तत । सेवितुं तत्स्थलं प्राप सम्बन्धः शिवसन्निधिम् ॥ ६ ॥
तदा राजा तमालोक्य श्रुत्वा चास्य तु वैभवम् । प्रत्युद्गम्याथ साष्टाङ्गं प्रणिपत्य पुरः स्थितः ॥७॥

श्रीसम्बन्धः ॥

केयं शेते शिवस्याग्रे देयं किं शंभुनेति च । इति पृष्टोऽब्रवीदेनं सम्बन्धं विनयान्वितः ॥ ८ ॥
मत्पुत्रीयमपस्मारपीडिता प्रत्यहं गुरो । युष्मत्कटाक्षलक्ष्म्यास्याः पुत्र्या आरोग्यमस्तु मे ॥ ९ ॥
नत्वा संप्रार्थयामास स्वारोग्ये दुहितू रुदन् । कृपादृष्ट्या विलोक्यैनां ज्ञानविज्ञानशेवधिः ॥ १० ॥
ध्यात्वा चित्ते तमीशानमगायद्द्राविडोक्तिभिः । अस्यास्तु राज्ञो दुहितुरपस्मारो गदो महान् ॥ ११ ॥
सद्यः शिवकटाक्षेण शाम्यतीति जगौ दश । एवं गीते त्वपस्मारः स्मरन्नीश्वरवैभवम् ॥ १२ ॥
तदङ्गस्थामयैः सर्वैः सहान्यैर्निर्गतो बहिः । दुहित्रा सह संतुष्टो राजा रत्नाम्बरादिभिः ॥ १३ ॥

अभ्यर्च्य नत्वा मुदितो बभूव तदनुग्रहात् । दुर्निवारमपस्मारं राजपुत्र्या निवार्य सः ॥ १४ ॥
कोङ्कदेशमनुप्राप्य तत्रत्यानि स्थलानि च । निषेव्य गीत्वा क्रमशो गीत्यामृतसमानया ॥ १५ ॥
श्रीशोणशिखरं प्राप यत्रास्ते पार्वतीपतिः । अर्धनारीश्वराकारवपुषा कृष्णपिङ्गलः ॥ १६ ॥
तमिन्दुशेखरं दृष्ट्वा गीत्वा तत्र चिरं स्थितः । अस्यानुचारिणामीशभक्तानां तत्र पर्वते ॥ १७ ॥
तापाधिक्येन सर्वेषां बभूवातिमहान् ज्वरः । तेषां तज्ज्वरशान्त्यर्थमर्धनारीश्वरं शिवम् ॥ १८ ॥
अगायद्दशभिर्गेयैस्तत्क्षणाच्छमितो ज्वरः । पुनर्निर्गत्य तत्क्षेत्राच्छ्रीपाण्ड्यशिखरं गतः ॥ १९ ॥
स्तुत्वा नीलपुरे गीत्वा कावेरीतीरगाणि च । स्थलानि क्रमशो नत्वा गीत्वा स्तुत्वा निषेव्य च ॥
मातृभूतेश्वरं स्तुत्वा गीत्वा जम्बूवनेश्वरम् । पिपीलिकेश्वरं चापि स्तुत्वा गीत्वा खरेश्वरम् ॥ २१ ॥
सर्वस्थलानि संसेव्य चोळदेशस्थितानि सः । स्तोष्यन् पशुपतीशानं गच्छन् मार्गे श्रमातुरः ॥ २२ ॥
बभूव ग्रीष्मकालत्वात्परिश्रान्तो महातपैः । कविः सस्मार मनसा चन्द्रार्धकृतशेखरम् ॥ २३ ॥
शिवाज्ञया तदा भूतैर्धृतं मौक्तिकनिर्मितम् । कायमानमथास्याभूदूर्ध्वं छायातिशीतलम् ॥ २४ ॥
अनुयान्तमरण्येऽपि छायां कृत्वानुचारिणाम् । दृष्ट्वा देवास्तु तत्सर्वे विस्मिताः किं पुनर्नराः ॥२५॥
गत्वा पशुपतिक्षेत्रं तन्मुक्ताकायमानदम् । नत्वा गीत्वा जगामायं मध्यार्जुनपुरेश्वरम् ॥ २६ ॥
गोमुक्तिदानघट्टेशक्षेत्रं प्राप्य महत्तरम् । स्तुत्वा शंभुं महालिङ्गं त्रिरात्रं तत्र सोऽवसत् ॥ २७ ॥
पित्रा गोमुक्तिदाख्ये स्वं प्रार्थितो यष्टुमिच्छता । अगायच्छङ्करं तत्र गानेन प्रीतिमेयुषा ॥ २८ ॥
शंभुना चोदितो भूतो ददौ निष्कसहस्रकम् । कोटिनिष्कं गृहीतं चेदक्षय्यं च भविष्यति ॥ २९ ॥
इति दत्तं तदादाय संबन्धो मुदितान्तरः । द्रव्यं पित्रे स तद्दत्वा यजने समचोदयत् ॥ ३० ॥
पश्चात्कुष्टालमभ्येत्य स्तुत्वा मायूरमेत्य च । स्तुत्वागान्मातुलपुरं गायकस्यानुयायिनः ॥ ३१ ॥
तद्धर्मपुरमभ्येत्य तत्रत्यैरभिपूजितः । गीत्वा धर्मपुरेशानं कञ्चित्कालं समास्थितः ॥ ३२ ॥
तदानीं नीलकण्ठस्य गायकस्यास्य बान्धवाः । तं स्तुवन्तोऽथ सम्बन्धं निन्दन्तश्चावदन् वचः ॥
त्वद्वीणागानसहिता कवितास्य तु शोभते । नो चेच्छन्दोवदाभाति सम्बन्धकविता न किम् ॥३४॥
इत्युक्तमात्रः खिन्नोऽसौ नत्वा प्राह वचो गुरुम् । यथा न शक्यते गातुमनया मम वीणया ॥३५॥
तथाविधेन वृत्तेन प्रार्थितो रचयेति सः । अशक्यमब्रवीद्वेयं गातुं तुम्बुरुनारदैः ॥ ३६ ॥
अप्ययं गातुमुद्युक्तो वल्लक्यास्तन्त्रिभिः सह । अगायत तदा क्लेशादाकृष्टैः सप्तभिः स्वरैः ॥ ३७ ॥
क्लेशाकृष्टैस्तन्त्रिभिस्तद्गानं नानुगुणं त्वभूत् । यदा नानुगुणं गानमासीत्कोपेन संयुतः ॥ ३८ ॥
वल्लक्यास्फोटनं कर्तुमुद्युक्तोऽभूत्स गायकः । तां वीणां शीघ्रमाहृत्य सम्बन्धोऽगायत स्वयम् ॥ ३९ ॥
पुनस्तस्मै दिशन् वीणां गानं तेनाप्यगापयत् । प्रार्थितो नीलनग्नेन क्षणान्निर्गत्य तत्पुरात् ॥४०॥
शास्त्रमङ्गळमेत्यास्य पुरं गत्वा तु तत्पुरे । नत्वा साम्बं महादेवं गीत्वा तद्भवने स्थितः ॥ ४१ ॥

---

१. पट्टेशेति पाठान्तरम् ।

तत्रागत्य समाहूतो दभ्रभक्तेन वन्दितः । प्रार्थितः सह तेनागाच्छोणारण्यं च तत्पुरम् ॥ ४२ ॥
गीत्वा गणपतीशानं भुक्त्वा तस्य गृहेऽनुगैः । शोणारण्याद्विनिर्गत्य निषेव्येशस्थलानि च ॥४३॥
मरुभूमिमतिक्रम्य मरुत्ताख्यं पुरं गतः । अथासन्नगृहे शम्भोरालयस्य वणिग्वरः ॥ ४४ ॥
शेतेस्मागन्तुकः कश्चित्पान्थो मातुलकन्यया । अनूढया स्वपंस्तत्र सर्पदष्टो ममार सः ॥ ४५ ॥
तस्य प्रेतस्य पुरतो रुदन्तीं तां तु कन्यकाम् । ज्ञात्वा श्रीज्ञानसम्बन्धस्तद्गृहं प्राप्य सत्वरम् ॥
उज्जीवयित्वा रतये पतिर्दत्तः किल त्वया । मह्यमुज्जीवयित्वा त्वं पतिं देहि महेश्वर ॥ ४७ ॥
इत्यादि दीनया वाचा प्रलपन्तीं समीक्ष्य ताम् । परिदेवनमूलं किं कस्तेऽयमिति पृष्टवान् ॥४८॥
साऽब्रवीत्प्राञ्जलिर्भूत्वा मम विज्ञापनं शृणु । अस्ति निक्षेपनगरे सुधामेति पिता मम ॥ ४९ ॥
तस्यायं भागिनेयोऽस्मै कन्यां जातां दिशाम्यहम् । इत्याशावाचमुक्त्वोक्त्वा नादात्कामपि कन्यकाम् ॥
मत्पूर्वकन्यकाषङ्कं दत्तवानन्यतोऽन्यतः । मामप्यस्मै दिशामीति प्रोक्त्वान्यस्मै वराय सः ॥ ५१ ॥
धनमादाय तद्धस्ताद्यदादित्सुरभूत्पिता । तदाहममुमाहूयानुक्त्वा पितरि मातरि ॥ ५२ ॥
प्रस्थितावित्दिता सर्वैः स्वपुरादमुना सह । देशान्तरं तु गन्तव्यमित्यावाभ्यामिहागतम् ॥ ५३ ॥
अत्रागतो निशीथिन्यां सर्पदष्टो मृतोऽधुना । पितृष्वसृसुतोऽयं मेऽमुष्याहं मातुलात्मजा ॥ ५४ ॥
तथाप्यनूढयास्पृश्यो धृतानुमरणाशया । तस्मात्त्वं कृपया प्रेतं जीवयित्वाव मामिति ॥ ५५ ॥
रुदतीं दीनया वाचा संबन्धः स कृपाकरः । मा भैषीरिति तामुक्त्वा नीलकण्ठोऽहिभूषणः ॥
शङ्करो जीवयत्वेनमित्यगायद्दशोक्तिभिः । गीतमात्रेण तरसा मृतः प्राणैः सहोत्थितः ॥ ५७ ॥
उज्जीवयित्वा तं तत्र कल्याणमुभयोरपि । कारयित्वा जगामायं मुदितौ तौ तु दम्पती ॥ ५८ ॥
ययतुः स्वां पुरीं भूयः प्रणम्य ज्ञानवारिधिम् । ततोऽगच्छत्पथि क्वापि स्थले सीसपुराभिधे ॥ ५९ ॥
तथैवैकं सर्पदष्टं तस्य मातुलकन्यया । भस्मनोज्जीवयामास वैश्यं संप्रार्थितस्तया ॥ ६० ॥
तयोरपि च कल्याणं कारयित्वा महाकविः । शंभुलिङ्गशमीकूपसाक्षिणामन्तिके गुरुः ॥ ६१ ॥
प्रीणयित्वा दम्पती तौ नत्वा शंभुं विनिर्गतः । सहैव दभ्रभक्तेन शोणारण्यमुपेत्य च ॥ ६२ ॥
अगायद्दश गेयानि दभ्रनामाङ्कितोक्तिभिः । गातुराविरभूदस्य तत्रारूढवृषः शिवः ॥ ६३ ॥
तं निषेव्य पुनः शम्भुं कृतार्थोऽस्मीति पिप्रिये । पश्चाच्छ्रीस्तुल्यनगरं स्कन्देन प्रार्थितो गतः ॥६४॥
भुक्त्वास्य गेहे भक्तस्य ब्राह्मणस्यातिहर्षितः । गीत्वा तन्नगरेशानं स्थिते सति महात्मनि ॥ ६५ ॥
त्यागेश्वरं निषेव्यात्र वागीशोऽप्याजगामतम् । प्रत्युद्गम्य सहागत्य तेन स्वावासमागतः ॥ ६६ ॥
कमलालयवृत्तान्तं श्रुत्वाशेषं तु तन्मुखात् । त्यागेश्वरस्य सेवार्थं गन्तुमिच्छन्नुवाच तम् ॥ ६७ ॥
निषेव्य त्यागराजेशं यावदागमनं मम । तावदत्रैव वासस्ते वागीशभवतादिति ॥ ६८ ॥
उक्त्वा ततो विनिर्गत्य संप्राप्य कमलालयम् । त्यागेश्वरं महादेवं सुधाधाराभिवर्षिभिः ॥ ६९ ॥
अस्तौषीद्वचसां गुम्भैः कल्हारैर्विकचैरिव । गीत्वागतः पुनरयं वागीशो यत्र वर्तते ॥ ७० ॥

उभौ श्रीस्त्युत्यनगराच्छम्भुक्षेत्रदिदृक्षया । विनिर्गतौ तदा पादचारिणं ज्ञानवारिधिम् ॥ ७१ ॥
वागीशः प्रार्थयामास शिबिकारुह्यतामिति । मास्तु मास्त्विति चोक्त्वायं पादचारी विनिर्गतः ॥७२॥
पुनः पदातिमाह स्म वागीशस्तं भयान्वितः । आरुह्यायाहि शिबिकां पथि कण्टकदन्तुरे ॥ ७३ ॥
युष्मद्दासेष्वहं कश्चिन्मत्तस्ते मास्तु भीरिति । एवं पुनः पुनः प्रोक्तोऽप्ययमाहाङ्घ्रिणा चरन् ॥७४॥
भक्ताग्रे वाहनारोहोऽप्ययुक्तस्त्वं शिवोऽपरः । तस्मात्त्वं पुरतो गच्छ पश्चाद्यास्यामि तत्स्थलम् ॥७५॥
इत्युक्त्वारुह्य शिंबिकां नीलकण्ठाभिधेन च । गायकेनानुगेनापि वागीशेनाप्रयायिना ॥ ७६ ॥
ताभ्यां सुहृद्भ्यां सहितः कलशीपुरमाप्तवान् ।

॥ इति श्रीस्कान्देपपुराणे शिवभक्तविलासे संबन्धचारित्रे तदीयविविधवैभववर्णनं
नाम द्विपञ्चाशोऽध्यायः ॥

॥ अथ त्रिपञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ।

तत्रामृतघटोशनं वाक्पुष्पैरभिपूज्य सः । कलानाथेन विप्रेण भोक्तुं संप्रार्थितो गृहे ॥ १ ॥
गत्वा भुक्त्वा तु तौ हृष्टौ जग्मतुस्तेजिनीवनम् । तद्ग्रामवासिभिर्विप्रैः प्रत्युद्गम्यार्चितावुभौ ॥ २ ॥
तत्र वागीशसंबन्धौ तेजिनीशं निषेवतुः । आकाशनगरेशानं स्तुवन्तौ द्राविडोक्तिभिः ॥ ३ ॥
वागीशः स च सम्बन्धश्चिरं तत्रोषतुः सुखम् । चिरकाले गते तत्र ज्ञानसम्बन्धबान्धवाः ॥ ४ ॥
दिदृक्षया समागत्य ज्ञानसंबन्धसन्निधिम् । प्राप्य विज्ञापयामासुर्विनयेन समन्विताः ॥ ५ ॥
एतावत्कालपर्यन्तं कालक्षेपः कृतः किल । वने ग्रामे पुरे पुण्यस्थलेष्वपि बहुष्वतः ॥ ६ ॥
आयाहीतः परं ग्राममलं कालविलम्बनम् । इत्याहूतो बन्धुभिस्तैः प्रत्याह स शिवाज्ञया ॥ ७ ॥
आगच्छामीति तानुक्त्वा सुखं सुष्वाप तन्निशि । तदाह ज्ञानसंबन्धमतिकारुण्यवारिधिः ॥ ८ ॥
द्रोणीपुरेश्वरः स्वप्ने समागत्यास्य सत्वरम् । यावत्क्षामनिवृत्तिः स्यात्तावत्त्वं तेजिनीवने ॥ ९ ॥
स्तुवन् जपन्नमन् गायन् सुखं वस ममाज्ञया । द्रोणीपुरे तु यद्रूपं तद्रूपं मम नित्यशः ॥ १० ॥
दर्शयाम्यहमत्रैव तवाकाशपुरे शुभे । आकाशान्तर्विमानेऽहं साकं द्रोणाद्रिकन्यया ॥ ११ ॥
इति दृष्ट्वाद्भुतं स्वप्नमुत्थायालयमेत्य च । असेवताविर्भूतं तं साक्षाद्द्रोणीपुरेश्वरम् ॥ १२ ॥
आकाशनगरे दृष्ट्वा हर्षविस्मयसंयुतः । अस्तौषीदेकया सूक्त्या द्रोणीशं तेजिनीश्वरम् ॥ १३ ॥
सपूर्वार्धापरार्धाभ्यामेकसूक्त्यैव तावुभौ । ऐक्यं विधाय मतिमान् गीत्वा वागीशतोषितः ॥ १४ ॥
आगतान् बान्धवान् स्वीयान् प्रेषयन् स्वपुरं प्रति । शिवस्थलदिदृक्षुःसन्नास्त तत्तेजिनीवने ॥१५॥
अनावृष्टिरभूत्क्षामोऽभवत्सर्वत्र भूतले । तदा क्षीणा बभूवुश्च जना गावो मृगा अपि ॥ १६ ॥
पक्षिणश्चापि वृक्षाद्या वर्षाभावात्क्षयं गताः । तदा श्रीज्ञानसंबन्धवागीशौ वरवाग्मिनौ ॥ १७ ॥

स्वस्वानुगश्रीसङ्घानां भोक्तुं भक्ताद्यभावतः । वृष्टयर्थं तेजिनीशानं यदा तौ गातुमुद्यतौ ॥ १८ ॥
तदाशरीरिणी वाणी शङ्करस्याभवद्दिवि । ज्ञानसंबन्धवागीशौ शृणुतं वचनं मम ॥ १९ ॥
गीतिर्मास्त्वद्य वृष्टयर्थं सृष्टिस्थित्यन्तकारिणः । मम संहारकालोऽयं पञ्चकृत्यविधायिनः ॥ २० ॥
युवयोर्दासभूतानां भुक्त्यर्थं युवयोरपि । वाचा मामेव गायेतां काचं हाटकनिर्मितम् ॥ २१ ॥
एकैकं युवयोः प्रातर्दीनारशतकप्रदम् । दास्यामि तत्क्रयं क्रीत्वा प्राप्य सत्तण्डुलादिकम् ॥ २२ ॥
श्रीसङ्घानतिथीन् भक्तान् विप्रानपि समागतान् । भोजयित्वा सुखेनात्र यावत्क्षामो भवेद्भुवि ॥
तावद्युवाभ्यां स्थातव्यं सुभिक्षे समुपस्थिते । पुनर्न दृश्यते काचमित्युक्त्वा विरराम सा ॥ २४ ॥
नत्वा चेलाञ्चले बद्ध्वा तदारभ्य च तावुभौ । हर्षविस्मयसंयुक्तौ तेजिनीशमगायताम् ॥ २५ ॥
प्रातः प्रातः प्रतिदिनं कश्चिदीशप्रसादतः । प्रचोदितः स्वर्णकाचं भूतस्ताभ्यां दिशन्नभूत् ॥२६॥
तत्काचं ज्ञानसंबन्धो गीत्वा नत्वाग्रहीदयम् । स तु वागीश्वरः शंभुं गायञ्शोभोस्तदालयम् ॥ २७ ॥
संमार्जयञ्शोधनीभिः कुर्वन्नङ्गप्रदक्षिणम् । नृत्यं स्तुवन्नमन् भक्त्या गृह्णात्येकं तु काचकम् ॥२८॥
उभयोः काचयुगळमापणे दर्शितं यदि । शीघ्रं गृह्णाति वागीशकाचमुत्तमवर्णतः ॥ २९ ॥
वर्णे तु किंचिदूनत्वात्संबन्धस्य महात्मनः । वणिक्काचं कश्चिदपि न गृह्णात्यस्य सत्वरम् ॥ ३० ॥
वागीशस्योत्तमं वर्णमभूत्कैङ्कर्यकारिणः । यातायातपरिश्रान्त्या ह्यामध्याह्नविलम्बनात् ॥ ३१ ॥
क्रीणाति किंचिदूनेन कश्चिद्विट् शिवभक्तिमान् । तद्विक्रीय पणैर्नित्यं गृहीत्वा तण्डुलादिकम् ॥
पक्त्वा दिनान्ते रात्रौ वा भुञ्जन्त्यस्यानुगा द्विजाः । वागीशस्य तु मध्याह्ने भुञ्जन्त्यनुचरा इति ॥
विषादी ज्ञानसंबन्धः प्राप्य तं तेजिनीश्वरम् । स्वकाचवर्णपूर्त्यर्थमगायदशसूक्तिभिः ॥ ३४ ॥
तद्गानमुदितः शंभुस्तदारभ्यानुवासरम् । उत्तमस्वर्णकाचं स्याद्युभयोरित्यदात्समम् ॥ ३५ ॥
तत्काचद्वयमादाय कृत्वा ब्राह्मणभोजनम् । कृत्वा माहेश्वरीं पूजामूषतुस्तेजिनीवने ॥ ३६ ॥
आक्षामक्षयकालं तु स्थित्वा सति सुभिक्षके । अदृष्ट्वेशाज्ञया काचं सोपाने तावुभावपि ॥ ३७ ॥
ज्ञात्वा सुभिक्षं सर्वत्र धनधान्यसमाकुलम् । तस्मात्क्षेत्राद्विनिर्गत्य शंभुक्षेत्रदिदृक्षया ॥ ३८ ॥
गीत्वा श्रीवाञ्छ्यमतुलं स्तुत्वा वटवनेश्वरम् । करवीरपुरेशानं पतञ्जलिपुरेश्वरम् ॥ ३९ ॥
कमलालयनाथं च स्तुत्वा गीत्वा निषेव्य च । वेदारण्यं गतौ क्षेत्रं वेदैः सङ्घट्टितारम् ॥ ४० ॥
गत्वा तदालयमुभावन्योन्यं वाचमूचतुः । आवाभ्यां सेवनीयोऽयं प्रधानद्वारमार्गतः ॥ ४१ ॥
सङ्घट्टितं कवाटं तु वेदैः पूजावसानके । समुद्घाटयितुं पूर्वं गायस्वेतीरितोऽमुना ॥ ४२ ॥
वागीशोऽगायदरमुद्घाटयितुमीश्वरम् । गाने तु दशमे प्रोक्ते कवाटोद्घाटनं त्वभूत् ॥ ४३ ॥
तद्द्वारेणैव संसेव्य शंभुं वेदवनेश्वरम् । बहिरागत्य वागीशोऽप्यवदद्विनयान्वितः ॥ ४४ ॥
स्वामिन् श्रीमद्भिरधुनोद्घाटितं तु कवाटकम् । त्वदीयवाक्कुञ्चिकया पिहितं क्रियतामिति ॥ ४५ ॥
अर्थितोऽगायदेकेन गानेन पिहितं व्यधात् । वागीशवाचा विवृतं वेदारण्यालयाररम् ॥ ४६ ॥

ज्ञानसम्बन्धकविना सूक्त्या द्राविडयैकया । संघट्टितमनेनासीत्कवाटं शङ्करालये ॥ ४७ ॥
ततः खिन्नमनास्तस्माद्वागीशस्तु विनिर्गतः । तेनैव सह सम्बन्धः श्रीवर्त्मपुरमेयिवान् ॥ ४८ ॥
वृषारूढं महेशानं दर्शनादर्शनोत्सुकम्[1] । दृष्ट्वा निषेव्य तौ भक्तौ वेदारण्यमवापतुः ॥ ४९ ॥
पाण्ड्यदेशे जिनग्रस्ते कुलबन्धनमन्त्रिणा । आहूतः सन्निधौ शंभोर्वादं कृत्वार्हतैः सह ॥ ५० ॥
जित्वा जिनाष्टसाहस्रं शूलेष्वारोपयत्कविः ।
मुनयः ॥
कथमारोपिताः शूले जिना वैदिकशत्रवः । कुंभसंभव तत्सर्वं विस्तराद्वक्तुमर्हसि ॥ ५१ ॥
श्रीअगस्त्यः ॥
मथुरायां पुरा कश्चित्कुब्जपाण्डय इति श्रुतः । सुन्दरेशाङ्घ्रिभक्तोऽपि जिनैरासीत्स वञ्चितः ॥५२॥
चोळेन्द्रदुहिता तस्य पत्न्यभून्महिळेश्वरी । शिवभक्ताग्रणीर्नाम्ना मन्त्र्यभूत्कुलबन्धनः ॥ ५३ ॥
कुलक्रमागतां शंभौ भक्तिं चोळसुतावहत् । हालास्येश्वरसेवार्थं कदाचित्प्रस्थितो नृपः ॥ ५४ ॥
निषेव्य निर्गतः केचिदाहुर्मायाविदः शठाः । शिलायां देवताबुद्धिस्त्वं मूढोऽसि महीपते ॥ ५५ ॥
यदुपासनया दुष्टं कर्म साक्षान्न शाम्यति । किं तस्य सेवया भावि शल्मलीसेवया यथा ॥ ५६ ॥
यदस्माभिरुपास्यं तद्दैवतं फलदं पुरः । परीक्षा क्रियतां राजन् सिद्धं चेदार्हतो भव ॥ ५७ ॥
अथ कौतुकिना तेन पृष्टा जैनाः कथं न्विति । ग्राव्णः स्तोमान् गृहाणेति तं प्रोचुः स तथाकरोत् ॥
पस्पर्श किंचित्पिञ्छाग्रै राजहस्तस्थिताञ्जिनः । माणिक्यभावमगमन् ग्रावाणस्ते तदीक्षिताः ॥ ५९ ॥
तत्पादे प्रणतः पाण्डयस्तदैवार्हततां गतः । अथ मन्त्री च महिषी दुःखितौ मथुरापुरे ॥ ६० ॥
ऊषतुस्तौ रहो भक्तान् रक्षन्तौ शिवसम्मतान् । महिळेशीवशो रूपादासीत्पाण्ड्यो जिनोऽपि सन् ॥
राजा तदनुसारार्थं तत्प्रीत्यर्थं प्रतिक्षपम् । रतिकालेषु मालं तु फाले भस्म दधाति च ॥ ६२ ॥
चिरकाले गते मन्त्री राज्ञीं सविजने स्थिताम् । प्राह प्रह्वोऽद्य हे देवि देशोऽस्माकं जिनावृतः ॥
सन्त्यक्ता च पुरी सेयं शिवभक्तैर्महात्मभिः । तव प्रसादाच्च मया भक्ताः केचित्प्रतिष्ठिताः ॥ ६४ ॥
संरक्षणीयो राजा नः संहर्तव्या इमे जिनाः । राज्ञ्यभ्युनुज्ञा यदि ते न चैतन्मम दुष्करम् ॥६५॥
उपायः को न्विति तया पृष्टः स सचिवोत्तमः । ज्ञानसंबन्धवृत्तान्तं यथाश्रुतमवर्णयत् ॥ ६६ ॥
गौरीस्तन्यामृतास्वादसंप्राप्तपरमार्थदृक् । आहूयतामित्यादिष्टो मन्त्री विप्रानचोदयत् ॥ ६७ ॥
ते च वेदविदो विप्रा वेदारण्ये सवाक्पतिम् । प्राप्य गौरीसुतं प्रोचू राज्ञीमन्त्रिसमीरिताम् ॥६८॥
मुदितो ज्ञानसंबन्धस्तत्रावस्थाप्य वाक्पतिम् । मथुरां गन्तुमुद्युक्तो वागीशप्रमुखास्तदा ॥ ६९ ॥
अस्मिं तिथिवाराद्यं न गन्तव्यं त्वयार्भक । प्राणहानिं प्रकुर्वन्ति वञ्चनाचञ्चवो जिनाः ॥ ७० ॥

---

१. **दर्शनादर्शनोत्सुकमिति** ॥ खिन्नाय वागीशाय परं वृषारूढेन दर्शनम् । तेन खिन्नाय सम्बन्धाय पश्चाद्दर्शनं दत्तम् । ततस्तावुभावपि समाहितावभूताम् इति तात्पर्यार्थः ॥

बान्धवाः सुहृदो वृद्धा न्यरुन्धन् गन्तुमुद्यतम् । अशुभं तिथिवाराद्यं शुभायास्तु शिवाज्ञया ॥७१॥
इति गायन् महेशानं दशभिर्द्राविडोक्तिभिः । मौक्तिकान्दोलिकारूढः प्रतस्थे मथुरां प्रति ॥ ७२ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे ज्ञानसंबन्धचरिते त्रिपञ्चाशोऽध्यायः ॥

॥ अथ चतुःपञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ॥

विनिर्गत्य ततोऽगस्त्यपुरे शम्भुं निषेव्य सः । श्रीहिडिम्बपुरेशानं स्तुत्वा गीत्वा क्रमेण च ॥ १ ॥
ततो मार्गे महेशस्य स्थानानि सुबहून्यपि । निषेवमाणः शनकैः सम्बन्धः स जगाम ह ॥ २ ॥
तृतीये तनये गौर्याः प्रस्थिते मथुरां प्रति । आर्हतानामभावाय दुर्निमित्तानि जज्ञिरे ॥ ३ ॥
चैत्यप्रासादमामूलं पतितं ददृशुः क्षितौ । स्वप्ने च कुण्डिकां ध्वस्तां पाटितं च विशङ्कटम् ॥ ४ ॥
कटं चण्डानिलध्वस्तं पिच्छाग्रं दग्धमग्निना । अपश्यन्नार्हताचार्याः क्षपणैर्व्याघ्रभक्षिताः ॥ ५ ॥
स्त्रियश्च मुण्डिता दृष्टाश्चारुदर्जिनदेवता । अथ दुःस्वप्नमालोक्य तं राज्ञे ते न्यवेदयन् ॥ ६ ॥
अथ राजापि तानाह स्वप्ने दग्धार्धमग्निना । स्वं भार्यासचिवौ मोचयन्ताविति भवेन्नु किम् ॥ ७ ॥
किं वा कर्तव्यमिति ते सर्वे विमनसोऽभवन् ।

रत्न अथ पथि धरणीसुरैः कृताशीरवनतमौलिरवेक्ष्य योगिवर्यान् ।
मणिमयशिबिकोत्तमाधिरूढो मधुरकविर्मथुरान्तिकं विवेश ॥ ८ ॥

अथागतानां विप्राणां प्रेषितानां पुरा स्वयम् । मुखादाकर्ण्य मुदितौ ज्ञानसंबन्धमागतम् ॥ ९ ॥
कल्पयामासतू राज्ञीसचिवौ चोपकारिकाम् ।

स्नानापदेशात्सचिवः कवीन्द्रं प्रत्युद्ययौ तं प्रहितश्च राज्ञा ।
मठोत्तमे वेगवतीतटान्ते प्राप्यान्तिकं तत्पदयोः पपात ॥ १० ॥

पृष्टः कोऽयमिति प्रोक्तो मन्त्रीति द्विजपुङ्गवैः । हस्ते गृहीत्वा सचिवं मदाह्वानप्रयोजनम् ॥११॥
किं वेत्युपह्वरेऽपृच्छच्छिवाङ्घ्रिहृदयात्मजः । इति पृष्टोऽथ सचिवस्तमाह विहिताञ्जलिः ॥ १२ ॥
वेदान्तागमसिद्धान्तप्रतिष्ठाऽऽर्हतनाशनात् । फलं ममेति पदयोः प्रणनाम पुनः पुनः ॥ १३ ॥
आलयोऽत्र कियद्दूरे मीनाक्षीसुन्दरेशयोः । इत्यमात्यं स पप्रच्छ सोऽप्यदर्शयदन्तिके ॥ १४ ॥
अथ गोपुरमालोक्य मणिकुम्भैरलङ्कृतम् । प्रणनाम स साष्टाङ्गं स्नात्वा गन्तुं मनो दधे ॥ १५ ॥
स्नात्वा वेगवतीपूरे भस्मोद्धूलितविग्रहः । मुक्ताप्रवाळान्तरितां बिभ्रद्रुद्राक्षमालिकाम् ॥ १६ ॥
मौक्तिकान्दोळिकारूढो मौक्तिकच्छत्रभूषितः । वीथ्यां विधातुकामोऽगाद्गोपुराणां प्रदक्षिणम् ॥१७॥
गन्धतैलावसिक्ताभिर्दीपिकाभिर्दिनात्यये । उद्भासितपुरोभागः पुरीं पश्यन् ययौ शनैः ॥ १८ ॥
चत्वरेषु जिनाः सर्वे सङ्घीभूय विलोक्य तम् । आश्चर्याकृष्टमनसस्तस्थुः चित्रार्पिता इव ॥ १९ ॥

आययौ वैदिकाचार्य आययौ कविशेखरः । आययौ तनयो गौर्या आययौ शैवशेखरः ॥ २० ॥
नम्रेभकेसरी यातीत्येवं काहलिकाध्वनत् । वन्दिनो वाग्मिनोऽग्रेऽस्य पेठुश्च बिरुदावलीः ॥ २१ ॥
जय वैदिकसिद्धान्तशैवस्थापन सद्गुरो । जयाद्रिकन्यकास्तन्यसुधामधुरवाङ्मय ॥ २२ ॥
जयकौण्डिन्यगोत्राब्धिवृद्धिपूर्णसुधाकर । जयदुष्टार्हतमतध्वान्तध्वंसदिवाकर ॥ २३ ॥
जय क्षपणकध्वाङ्क्षक्षोभप्रस्तरभाषित ।

अयोघनोऽयं जिनकुण्डिकानां चण्डानिलस्तत्पटसत्कटानाम् ।
दावानलस्तत्करपिच्छिकानामायाति चैत्याचलवज्रसूक्तिः ॥ २४ ॥

पलायध्वं निलीयध्वं रे रे चार्वाककौशिकाः । ज्ञानसंबन्धचण्डांशुरुदितः संप्रकाशते ॥ २५ ॥
इति तत्कवितावळ्यः पठितास्तत्पुरःसरैः । तदार्हतानां कर्णेषु पेतुर्दम्भोलयो यथा ॥ २६ ॥
अथ श्रीज्ञानसंबन्धः कृत्वा वीथीप्रदक्षिणम् । वाहनादवरुह्याथ शिवयोः सन्निधिं ययौ ।.२७ ॥
नन्दिशंकरयोर्मध्ये नमस्कृत्वा महाकविः । लिङ्गं ज्योतिर्मयं शम्भोर्दिव्यचन्दनचर्चितम् ॥ २८ ॥
सूर्यकोटिप्रतीकाशं सोमार्धकृतशेखरम् । अनादिभूतमतुलं सोमसुन्दरसंज्ञितम् ॥ २९ ॥
सोपहारः प्रणम्येशं स्तोतुं समुपचक्रमे ।

हेमाब्जिनीतीरनिकेतनाय हेमाचलाकल्पितकार्मुकाय ।
हेरम्बषड्वक्त्रसमन्विताय हालास्यनाथाय नमः शिवाय ॥ ३० ॥
सामर्ग्यजुःसूचितवैभवाय धामस्थसूर्याग्निसुधाकराय ।
वामार्धभागाय सदाशिवाय सोमार्धचूडाय नमः शिवाय ॥ ३१ ॥
पाण्ड्याधिराजार्चितपादुकाय फणाधराधीश्वरकङ्कणाय ।
पाषण्डदूराय परात्पराय हालास्यनाथाय नमः शिवाय ॥ ३२ ॥
कन्दर्पदर्पार्णवबाडबाय कण्ठस्थलाकल्पमहाविषाय ।
कल्पान्तवह्न्यास्पदलोचनाय हालास्यनाथाय नमः शिवाय ॥ ३३ ॥
मन्दाकिनीभूषितमस्तकाय मन्दारमालाञ्चितकन्धराय ।
बृन्दारकाधीश्वरसंस्तुताय हालास्यनाथाय नमः शिवाय ॥ ३४ ॥
वेदान्तविज्ञानसुखप्रदाय नादन्तरूपाय नटेश्वराय ।
पूतान्तरङ्गैः पुरुषैः स्तुताय हालास्यनाथाय नमः शिवाय ॥ ३५ ॥
लीलाचतुष्षष्टिसुधार्णवाय हेलास्मितप्लुष्टपुरत्रयाय ।
मूलाय वेदागमवल्लरीणां हालास्यनाथाय नमः शिवाय ॥ ३६ ॥
नानाभवव्याधिविनाशकाय दीनावनाङ्गीकृतविग्रहाय ।
भानात्मने भस्मविलेपनाय हालास्यनाथाय नमः शिवाय ॥ ३७ ॥

सामप्रियाय सकलागमसंस्तुताय साम्बाय संसृतितमिस्रदिवाकराय ।
सत्यात्मने सदसतोश्च विलक्षणाय साक्षात्कृताय सुकृतेन नमः शिवाय ॥ ३८ ॥
इति स्तुत्वा महादेवं द्राविडोक्त्या महाकविः । नमस्कृत्वाथ मीनाक्षीमस्तौषीदमृतोक्तिभिः ॥ ३९ ॥
मातर्मतङ्गकुलवल्लभमान्यमूर्ते मन्दस्मितद्युतिमनोज्ञमुखारविन्दे ।
मन्त्रात्मिके मरकतोत्पलसारनीले मह्यं प्रसीद मलयध्वजराजकन्ये ॥ ४० ॥
लीलाशुकार्भकमनोहरहस्तपद्मे नीलालकप्रथितनिर्मलकैतकाग्रे ।
हालास्यनाथसहचारिणि हंसयाने मह्यं प्रसीद मलयध्वजराजकन्ये ॥ ४१ ॥
कुन्दस्मिते कुमुदबन्धुकलावतंसे कुम्भस्तनालिखितकुङ्कुमपत्रलेखे ।
कोणत्रयैकनिलये कुलशैलबाले मह्यं प्रसीद मलयध्वजराजकन्ये ॥ ४२ ॥
कल्याणि कल्पलतिके करुणाकटाक्षकल्लोलनर्तितकवित्वकलानटीके
कामावरोधसुभगंकरणानुकम्पे मह्यं प्रसीद मलयध्वजराजकन्ये ॥ ४३ ॥
कर्णावतंसितकदम्बवनप्रसूने कौशेयकान्तिजितकल्पतरुप्रवाळे ।
कस्तूरिकारसकरम्बितफालदेशे मह्यं प्रसीद मलयध्वजराजकन्ये ॥ ४४ ॥
मस्तार्पितं मणिमिव श्रुतिमालिकाया मान्यं मुकुन्दकमलासनशंकरादैः ।
मञ्जीरशिञ्जितकृताभयमङ्घ्रिपद्मं मन्मूर्ध्नि देहि मलयध्वजराजकन्ये ॥ ४५ ॥
सद्यः समुद्यदरुणप्रतिमांशुकाभे सौभाग्यदायकसकौतुकदीर्घनेत्रे ।
सन्ध्यानटप्रळयताण्डवसाक्षिभूते मह्यं प्रसीद मलयध्वजराजकन्ये ॥ ४६ ॥
शिक्षामवाप्य महतीं निकटे गुरूणां जन्मान्तरेषु च परं शिवमर्चयित्वा ।
मीनाक्षि पुण्यपरिपाकवशात्त्वदङ्घ्रिं प्राप्तस्य कस्यचिदुदेति चिदात्मबोधः ॥४७॥
इति देवीमपि स्तुत्वा कृतपञ्चाक्षरीजपः । कृत्वा प्रदक्षिणान् पञ्च जगाम स्वोपकारिकाम् ॥ ४८ ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीज्ञानसंबन्धचरिते चतुःपञ्चाशोऽध्यायः ॥

॥ अथ पञ्चपञ्चशोऽध्यायः ॥

श्रीअगस्त्यः ॥

कटाम्बरास्तु संभूय श्रुततद्विरुदोक्तयः । बभूवुर्दुरहंकारा दावाग्निप्लुष्टमानसाः ॥ १ ॥
हन्त श्रुता नु सुहृदः कस्यापि विरुदोक्तयः । कथं शिलामयी गौरी वहेत्स्तन्यं च पाययेत् ॥ २ ॥
अयं तस्याः पयःपात्रे पपाविति मृषाब्रवीत् । ब्रह्मबन्धोर्वटोरस्य दौरात्म्यं पश्यताहताः ॥ ३ ॥
बाल्य एवामुना लोको मायावादेन वञ्चितः । उपेक्षणीयो नास्माभिरयं व्याधिरिवैधितः ॥ ४ ॥
मठे वेगवतीतीरे वर्तते ब्राह्मणाङ्कुरः । रविर्यावदुदेत्यस्मन्मन्त्रैस्तं मारयामहे ॥ ५ ॥

नग्नानां मतसिद्धान्तं विजेतुमयमागतः । इतीह किंवदन्ती च ववृधे महतीतराम् ॥ ६ ॥
इति संमन्त्र्य ते मन्त्रान्निशीथे जेपुरार्हताः । घटिकान्तरमात्रेण हन्यन्ते द्रोहिणो जिनैः ॥ ७ ॥
तत्प्रेरितोऽपि मन्त्राग्निर्न तं पस्पर्श दुःसहम् । पूतपञ्चाक्षरजपं पीतगौरीपयःसुधम् ॥ ८ ॥
नागमज्ज्ञानसंबन्धं दावाग्निं कीटको यथा । तस्मिन् प्रतिहते मन्त्रे शिलायाः शिरसीव ते ॥ ९ ॥
साक्षादेव ददुर्वह्निं मठे तस्य महात्मनः । तदन्तिकस्थाः शिष्यास्तं ज्वलन्तं वीक्ष्य पावकम् ॥ १० ॥
तस्मै निवेदयामासुराचकर्षाथ सोऽनलम् । स मूर्तः प्राञ्जलिर्भूत्वा दासोऽस्मीति व्यजिज्ञपत् ॥ ११ ॥
आर्हतप्रहितस्याशु स्थितिः क्वापि नियुज्यताम् । श्रुत्वैतज्ज्ञानसंबन्धः प्राह सप्तार्चिषं प्रति ॥ १२ ॥
यैरिह प्रेषितोऽसि त्वं क्षपणैर्वेददूषकैः । तत्त्वं तन्मतसिद्धान्तवर्तिनं पाण्डयभूपतिम् ॥ १३ ॥
व्रजेत्युक्त्वा पुनरयं पाण्ड्यमग्निर्भजेदिति । अगायदृश गेयानि गीतमात्रादवाप तम् ॥ १४ ॥
अथाग्निर्ववृधे देहे पाण्ड्यस्य ज्वररूपभाक् । निबध्य पाणी पादौ च प्रक्षिप्त इव पावके ॥ १५ ॥
व्याघूर्णमानो निश्चेष्टः स रुद्धवचनो नृपः । मन्त्री वैद्यानथाहूय पप्रच्छामयकारणम् ॥ १६ ॥
जिनेन्द्रा दृष्टनाडीकाः प्रोचू राज्ञीं च मन्त्रिणम् । नाडीषु नैव वैषम्यमस्त्यर्हन् रक्षतादिमुम् ॥ १७ ॥
भास्त्पतोऽस्तमगे, यावत्ततः प्रागेव तु ज्वरम् । राज्ञः प्रशमयिष्यामः पश्य विद्याबलं महत् ॥ १८ ॥
इत्यार्हतानां भिषजः पिञ्छिकाग्रैर्महीपतिम् । प्रजपन्तोऽर्हन्मन्त्रांस्तमाकेशपदमामृजन् ॥ १९ ॥
आमृज्यमाने तद्गात्रे व्यवर्धत महाज्वरः । निश्वासपरमे रात्रि दह्यमान इवाग्निना ॥ २० ॥
समीपे ये स्थितास्तस्य चिकित्साया विधित्सया । सहसा ते विनिर्जग्मुर्दूनाङ्गास्तज्ज्वरोष्मणा ॥ २१ ॥
आहूता दूरतः केचिदार्हता धूतपिञ्छिकाः । अर्हन्नर्हन्निति मनुं जपन्तः प्रामृजन् मुहुः ॥ २२ ॥
औषधैरपि मन्त्रैश्च चिकित्सन्ति स्म ते जिनाः । निराशास्ते ततः सर्वे संभूयोचुरिदं वचः ॥ २३ ॥
कश्चिच्छैववटुः प्राप्तस्तद्वासान्नृपतेर्ज्वरः । विजृम्भते महाक्रूरः सर्पिषेव महानलः ॥ २४ ॥
इत उच्चाटने तस्य शाम्यत्येष महाज्वरः । अथाकर्ण्य वचो मन्त्री प्राह तानार्हतानिमान् ॥ २५ ॥
शक्तिरस्ति न युष्माकं तत्प्रयोगनिवर्तने । तदुत्सारणमिष्टं वस्ततो नूनं भविष्यति ॥ २६ ॥
ज्वरशान्तिरिति प्रोक्तं पश्चाद्यदि भवेज्ज्वरः । कः शक्नोत्यपहर्तुं वो दुरवस्थां तदेदृशीम् ॥ २७ ॥
अत्रागत्य स वै पश्येत्प्रशाम्येत्स्वामिनो ज्वरः । इत्युक्ते नैव तस्यापि शक्तिरित्यूचुरार्हताः ॥ २८ ॥
मन्त्रिणा च स्वयं गत्वा समानीतोऽम्बिकासुतः । विवेश पाण्डयप्रासादं भयं हृत् कटवाससाम् ॥ २९ ॥
महान्तमार्हतं शैवपाषण्डः संस्पृशेत्कथम् । निस्सार्यतां बहिरयं शमयामो वयं ज्वरम् ॥ ३० ॥

इत्यष्टसाहस्रकटाम्बराणां सङ्घः समावृत्य महीपतिं तम् ।
स्वकीयमन्त्रैर्महितौषधैश्च शशाक नैवास्य रुजं निमार्ष्टुम् ॥ ३१ ॥

यदा मूर्च्छालुरभवन्नृपतिर्महिलेश्वरी । शरणं ज्ञानसंबन्धमाप माङ्गल्यवृद्धये ॥ ३२ ॥
अथ तां प्राह कारुण्यान्माहिषीमम्बिकासुतः । रक्षाम्यवश्यं भर्तारमभयं ते पतिव्रते ॥ ३३ ॥

महिमानं शिवस्यात्र पश्यन्तु सकला जिनाः । प्रतिज्ञायेति हस्तस्थं भस्म दातुं समुद्यते ॥ ३४ ॥
आहुर्हस्तस्थितं भस्म मास्त्वस्येत्यार्हताधमाः । मध्यस्थैरानयद्भस्म सर्वौषधमयं त्विति ॥३५ ॥
गीत्वा विभूतिगेयानि दश नश्येद्विभोर्ज्वरः । इति भस्म समादाय संचिक्षेप नृपालिके ॥ ३६ ॥
उन्मीलिताक्षियुगलः सबोधः पाण्ड्यभूपतिः । जगाद प्राञ्जलिर्मन्दं शयानः शैवदेशिकम् ॥३७॥
स्वागतं ते महाभाग रत्नपीठमिहास्यताम् । इति स्वमौळेः सविधे स्थापिते साचिवेन तम् ॥३८ ॥
उपवेश्य महात्मानं ददर्शेन्दुमिवोदितम् । तदा श्वासो बभूवास्य सामीप्येन महीपतेः ॥ ३९ ॥
यथा महातपार्तस्य छायावृक्षस्य संश्रयात् । मणिपीठे स्थितं राज्ञो मौळिपार्श्वे महाद्युतिम् ॥ ४० ॥
साम्यसूयमवैक्षन्त जिनाश्चोरा विधुं यथा । निवासः कुत्र भवतामिति पृष्टो महीभृता ॥ ४१ ॥
पाण्ड्यं गौरीसुतस्त्वाह स्थानं द्रोणीपुरं महत् । भक्तिः कुत्रेति संपृष्टः शंभावित्याह साक्षिणि ॥४२॥
ऊचुश्चासहमानास्तं शिवो नास्तीति चार्हताः । अहं प्रत्ययरूपोऽसौ सर्वत्रेत्याह शाङ्करिः ॥४३॥
देहमूचुरथात्मानं ते विकारितया न सः । इत्युवाचाम्बिकासूनुः प्रत्यक्षं मानमूचिरे ॥ ४४ ॥
जिना बहिर्मुखस्यैतद्वेदा मानं महात्मनाम् । इति श्रीज्ञानसंबन्धः प्राह तैर्बहुभाषितम् ॥ ४५ ॥
यद्यत्तद्दूषितमभूद्वितण्डाजातिनिग्रहैः । जिग्ये जिनाष्टसाहस्रमेकेन द्विजवर्णिना ॥ ४६ ॥
जयोऽस्माकमिति प्रोचुर्निल्लज्जाः क्षपणाः पुनः । निवार्य वाचा कलहं तस्य तेषां च पार्थिवः ॥४७॥
येन मे शाम्यते रोगस्तन्मतं स्यान्महत्तरम् । न वाचा महिमा ज्ञातुं शक्यो वर्षशतैरपि ॥ ४८॥
इत्युवाच स्वाभिमतं तत्क्षणे क्षपणैर्ज्वरः । वामभागगतोऽस्माभिः शक्यते दक्षिणेऽमुना ॥ ४९ ॥
विनीयते चेदेषः स्यात्समोऽस्माकं द्विजार्भकः । अस्त्वित्यनुमता राज्ञा पिञ्छाग्रैः पृथिवीपतिम् ॥ ५० ॥
ममृजुः सिषिचुर्जैनाः कुण्डिकाजलबिन्दुभिः । विद्याविशारदैर्वैद्यैरौषधैरभिवर्धितः ॥ ५१ ॥
जिनभागस्थितो राज्ञो ज्वलति स्म ज्वरानलः । हा हतोऽस्मि जिनैर्दुष्टैरित्युक्त्वा मूर्छितो नृपः ॥५२॥
यदा भीता महिष्यासीत् तदा मन्त्र्यपि शङ्कितः । रक्षेति ज्ञानसंबन्धं वदन्नञ्जलिमादधे ॥ ५३ ॥
भस्मामृष्टमथानेन दक्षिणाङ्गं महीपतेः । उल्काभममृताम्भोधौ निमग्नमिव निर्ज्वरम् ॥ ५४ ॥
वामे महाज्वराक्रान्ते दक्षिणे सुखनिर्भरे । हालाहलमयं क्वापि सुधामयमिव क्वचित् ॥ ५५ ॥
आसीत्पाण्ड्यनृपस्याङ्गमार्हता प्रोचुरत्रपाः । पुंसां दक्षिणभागः श्रीकरोऽश्रीदो ह्यदक्षिणः ॥५६ ॥
तस्माच्छमयति स्मायं राज्ञो ज्वरमितीर्ष्यया । ब्रुवन्तो दक्षिणं पार्श्वं पुनरामन्त्र्य यत्नतः ॥ ५७ ॥
न शेकुरपनेतुं ते तदानीं तान् क्रुधा नृपः । जिना मा स्पृशतेत्युक्त्वा सम्बन्धं शरणं गतः ॥५८ ॥
स तु तत्राप्यदाद्भस्म प्रशान्तश्च महाज्वरः । तत्करस्पर्शमात्रेण भस्मनः क्षेपमात्रतः ॥ ५९ ॥
कुब्जतापि गता तस्य कुब्जाख्यस्य महाज्वरैः । अभूत्सुन्दरपाण्ड्याख्यस्तदा प्रभृति पाण्ड्यराट् ॥

इतः प्रभृत्यस्तु सभाप्रवेशो न मे जिनानामिति मन्त्रिणं नृपः ।
उदीर्य निष्कास्य समस्तसौगतानरोगगात्रः शरणं तमासदत् ॥ ६१ ॥

अथ पञ्चाक्षरीविद्यां हालास्येश्वरसन्निधौ । गृहीतुकामो निरगादम्बिकासूनुना नृपः ॥ ६२ ॥

निष्कासिता जिनाः सर्वे शोचन्तोऽर्हतमीडिरे । स्वप्नेऽप्यपश्यन्नात्मानं शुष्ककाष्ठोपरि स्थितम् ॥६३॥
भीस्योत्थिता यदा तावद्दुष्प्रभातमजायत । अथ संगत्य ते सर्वे नृपमूचुरिदं वचः ॥ ६४ ॥

मास्मन्मतं दूषय पाण्ड्य नायं युक्तस्तवान्यस्य मते प्रवेशः ।
बलं मतस्येह परीक्ष्यतां न चेद्रणो भविष्यत्यचिरेण निश्चयः ॥ ६५ ॥

अथाभूत्कुपितो राजा मन्त्रिवाणीप्रचोदितः । कथं परीक्षेति जिनानपृच्छन्मिळितान् बहून्॥ ६६ ॥
ते तमूचुर्दुरात्मानो नार्हतो दैवतं परम् । इति पत्रे विलिख्याग्नौ क्षिपामो दह्यते न तत् ॥ ६७ ॥
यद्यस्मन्मतमेव स्वीक्रियतां च तथामुना । तथेत्यनुज्ञया राज्ञो निरुद्धेऽग्नौ तदाक्षिपन् ॥ ६८ ॥
क्षिप्तानि क्षपणैर्यानि पत्राणि तरसानले । तानीक्षुदळवत्क्षिप्रमग्निना भस्मतां ययुः ॥ ६९ ॥
अथ श्रीज्ञानसंबन्धो न दैवं शङ्करात्परम् । इत्यात्मपुस्तकान्तःस्थां चिक्षेपाग्नौ तु पत्रिकाम् ॥७०॥
जले स्थितमिवाभाति तत्पत्रं शङ्कराज्ञया । अशुष्कताळदळवत्तत्पत्रं वीक्ष्य विस्मिताः ॥ ७१ ॥
जना नृपोऽपि मन्त्री च राज्ञी च महिळेश्वरी । विस्मयं प्रापुरत्यर्थमेते तां वीक्ष्य पत्रिकाम् ॥७२॥
अथ भीतो महाराजो मन्त्री च प्रणनाम तम् । पुष्पवृष्टिरभूद्दिव्या वैदिकाश्च मुदं दधुः ॥७३॥
अथार्हताः पुनः प्रोचुरन्तर्भीता बहिर्दृढाः । निर्लज्जास्ते सभामध्ये स्तब्धोऽग्निरिति सङ्गताः॥७४॥
इतः परं लिखित्वा तु पत्रिकां स्वां पृथक् पृथक् । सरितो वेगवत्या भोः प्रवाहे पाण्ड्यभूपते ॥
क्षिपामो यानि गच्छन्ति प्राक् पत्री स पराजितः । क्षिप्तानि यानि पत्राणि प्रातिकूल्येन पश्चिमाम्॥७६॥
दिशं व्रजन्ति सद्यस्ते पत्रिणो विजयान्विताः । अस्माभिरेवं कर्तव्यमिच्यूचुः क्षपणास्तदा ॥ ७७ ॥
इति श्रुत्वा वचस्तेषां मन्त्र्याह कुलबन्धनः । जयेऽप्यपजये प्राप्ते कः पणः स्याद्द्वयोरिति ॥ ७८ ॥
पृष्टाः प्राहुर्विजयिनो भृत्यः स्याद्यः पराजितः । भृत्यापेक्षा च नैवास्तु मध्यस्थेन मयोच्यते ॥७९॥
पराजितानां भवतु शूलारोपणमञ्जसा । तथेत्यनुमते तेऽपि शैवाश्चापि नदीतटम् ॥ ८० ॥
गता राज्ञा सह प्रेम्णा गृहीत्वा पत्रिकां पृथक् । शूलारोपणमेवास्तु तस्य यस्य पराजयः॥ ८१ ॥
इत्यार्हताष्टसाहस्रमवोचद्राजसन्निधौ । तत्पद्मबृन्दलिखितं पूर्ववत्क्षपणैः पुनः ॥ ८२ ॥
तैर्दुष्टैर्दुरहंकारैः क्षिप्तं पूर्वं नदीजले । सहार्हतमतेनोर्वीं प्राप्तं सत्त्वैश्च खण्डितम् ॥ ८३ ॥
अम्बासुतेन यत्क्षिप्तं पूर्ववन्निहिताक्षरम् । तत्प्रवाहाभिगमनादपागात्पश्चिमां दिशम् ॥ ८४ ॥
दिवि दुन्दुभिनिर्घोषः सशङ्खनिनदोऽभवत् । आलोक्य विस्मिताः पौराः सिंहनादं व्यधुर्बुधाः ॥८५॥
राजापि मुमुदे पाण्ड्यः सामात्यः सानुगस्तदा । ज्ञानपूर्णस्य शिष्यास्तु मुदमापुरनेकधा ॥ ८६ ॥
शोकानतमुखाश्वासन् क्षपणाश्च सशिष्यकाः । जिता वयमिति प्रोचुः संबन्ध भवतेति तान्॥ ८८॥
आह जातदयो यूयं भस्मरुद्राक्षधारिणः । त्यक्त्वार्हतीयचिह्नानि पञ्चाक्षरपरायणाः ॥ ८८ ॥
भविष्यथ यदि प्राणहानिः स्यान्न कदापि वः । इति ब्रुवन्तं तं वाक्यैर्भर्त्सयित्वा क्रुधान्विताः ॥८९॥
स्वयमेव तदा शूलं नग्ना आरुरुहुः परे । शैवैरारोपिता नग्नाः केचित्प्राणभयात्पुनः ॥ ९० ॥

शैवा वयमिति प्रोचू रुद्राक्षालम्बिनः परे । केचिच्छिव शिवेत्याहुः केचिद्भस्माळिके दधुः ॥ ९१ ॥
भस्माभावात्परे फाले गोमयालेपनं व्यधुः । अभावे गोमयस्यापि प्राणभीत्या परे जिनाः ॥ ९२ ॥
भस्महेतव इत्युक्त्वा गोवत्सानंसदेशतः । धृत्वा शूलारोपकेभ्यो विचेरुर्निर्भयाः पुरे ॥ ९३ ॥
एवं नानाविधोपायैरभयाद्रक्षिता जिनाः । भस्मगोमयवत्साद्यैरत्यक्त्वा नग्नान् विभूषितान् ॥९४ ॥
अन्यानारोपयन्ति स्म शूले संबन्धकिङ्कराः । शैवसिद्धान्तिसंबन्धदर्शनत्यक्तभोजनाः ॥ ९५ ॥
केचिच्छ्रीज्ञानसंबन्धागमश्रुत्युपवासिनः । उत्पाट्य कटवासांसि ध्वंसयित्वा च कुण्डिकाम् ॥ ९६ ॥
दग्ध्वा च पिञ्छिकाग्राणि चैत्यं निर्मथ्य च द्विषैः । जिनानामष्टसाहस्रं शूलेष्वारोपितं तदा ॥ ९७॥
शूलप्रोतेषु बौद्धेषु तत्परीवारकोटयः । धृतरुद्राक्षमस्मानः केचित्तं शरणं गताः ॥ ९८ ॥
ररक्ष शरणं प्राप्तानयं सर्वाञ्जिनानपि । शिवस्मरणमात्रेण मत्वा विगतकल्मषान् ॥ ९९ ॥
द्वीपान्तरं गताः केचिदेशान्तरमथापरे । आसीन्नष्टं जिनकुलं तमः सूर्योदये यथा ॥ १०० ॥
दन्तान् प्रदर्शयन्तस्ते शूलाग्रप्रोतवक्षसः । गतप्राणाः पिशाचाभा गृध्राद्यैर्भक्षितामिषाः॥ १०१ ॥
पूयशोणितदुर्गन्धाः शेषाश्चासन् भयानकाः । यत्राग्नौ ज्ञानसंबन्धः पत्रं क्षिप्त्वाजयच्च तान् ॥१०२॥
ज्ञानसंबन्धपुरमित्यासीत्तत्प्रथितं स्थलम् । नृपाद्या ज्ञानसंबन्धं तन्मूर्तिं मेनिरे हरम् ॥ १०३ ॥
पत्रिका केति पाण्डयेन पृष्टस्तुष्टान्तरोऽर्भकः । शिवाङ्गयानयिष्यामीत्युक्त्वागात्पश्चिमां दिशम् ॥
मृगयामास सा तत्र वक्रगादृश्यतां गता । अध्यर्धयोजनाद्दूरे जले मग्नाथ खिन्नधीः ॥ १०५ ॥
गोपालबालानालोक्य युष्माभिर्दृष्टमत्र किम् । अद्भुतं वदतेत्युक्त्वा न जानीमो वयं त्विति ॥१०६॥
उक्तेऽत्रैव विशेषोऽस्तीत्यगायद्दशसूक्तिभिः । तत्पत्रिकां दिशेशानेत्यर्थयुक्ताभिरीश्वरम् ॥१०७॥
तत्स्तोत्रमुदितः शंभुरदृश्यं च चिरन्तनम् । अदर्शयन्निजं लिङ्गं तत्प्रीत्यर्थं महेश्वरः ॥ १०८ ॥
आविर्भूय पुरो लिङ्गाद्वृद्धब्राह्मणवेषवान् । कम्पयन् गात्रमखिलं तत्फाले भस्मधारणम् ॥१०९॥
कुर्वन्नालम्ब्य तत्पाणिं पत्रमादाय तज्जलात् । जित्वा शत्रूनिह क्षोण्यामन्ते सायुज्यमेष्यसि ॥११०॥
इत्युक्त्वा पत्रिकां दत्वा तत्फालं भस्मना पुनः । अलंकृत्य तिरोभूतः पाण्डयादीनां प्रपश्यताम् ॥
दत्वा राज्ञे तु तत्पत्रं तेन राज्ञास्य शूलिनः । कारयित्वालयादीनि सेवयित्वोत्सवानि च ॥ ११२॥
कारयञ्ज्ञानसंबन्धः स पाण्डयो मथुरामगात् । अथ पाण्ड्यः समालोक्य महिमानममानुषम् ॥११३
प्रशंसन् मन्त्रिणा राज्ञ्या सार्धं हर्षमवाप्तवान् । अथ पञ्चाक्षरं तस्माद्गृहीत्वा पाण्डयभूपतिः ॥११४॥
महाभिषेकविधिना हालास्येशमपूजयत् । प्रतिष्ठां वैदिका जग्मुरीजिरे च मखैर्हरम् ॥ ११५ ॥

स पाण्ड्यभूपो नवरत्नराशिभिः परार्धहेम्ना च कृताभिषेचनम् ।
निषेवमाणः शिवमेव दैवतं ययौ समृद्धिं सुरनायको यथा ॥ ११६ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे संबन्धचरित्रे पञ्चपञ्चाशोऽध्यायः ॥

(1) चालयं

(2) निजालयम्

॥ अथ षट्पञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ॥

अथ श्रीज्ञानसंबन्धं स पाण्डयः सुन्दराभिधः । तत्रस्थाः शिवभक्ताश्च तन्मन्त्री कुलबन्धनः ॥१॥
जनास्तन्नागराः सर्वे तत्पत्नी महिलेश्वरी । त्रिसन्ध्यमन्वहं नत्वा हरवक्त्रमपूजयन् ॥ २ ॥
शिवपादाब्जहृदयस्तदाज्ञां पुत्रवाञ्छया । वसन् द्रोणीपुरेऽस्मार्षीदात्मजं मथुरां गतम् ॥ ३ ॥
नम्रान् जेतुं गतो बालस्तेषां वासीज्जयः किमु । अस्य वा मम बालस्य किं जयोऽभूच्छिवाज्ञया ॥
चिरप्रवासिनो नास्य वृत्तान्तो ज्ञायते मया । इति चिन्तापरवशो वीक्षितुं निर्गतो जवात् ॥ ४ ॥
नीत्वा शनैः शनैर्मार्गमाययौ मथुरापुरीम् । प्राप्य श्रीसुन्दरेशस्य चालायं नियमान्वितः ॥ ६ ॥
स्नात्वा हेमाब्जिनीतीर्थे विघ्नेशं संप्रणम्य च । अथ संसेव्य मीनाक्षीं हालास्येशं च भक्तितः ॥ ७ ॥
प्रदक्षिणनमस्कारस्तोत्रैः शंभुं निषेव्य च । पश्चात्स्वपुत्रो यत्रास्ते मठे तत्रागतोऽभवत् ॥ ८ ॥
आगते पितरि प्रीत्या समुत्थाय निजासनात् । प्रणनाम पदे तस्य संबन्धो विनयान्वितः ॥ ९ ॥
वाचा निरुध्य चोत्थाप्य समाघ्राय च मूर्धनि । समाश्लिष्यातिसंतुष्टो मुमुदे तत्पिता भृशम् ॥ १० ॥
स्वपित्रा पृष्टवृत्तान्तः स्ववृत्तान्तं ब्रुवन्नयम् । उषित्वा कतिचित्कालान् हालास्येशस्य सन्निधौ ॥
पित्रा सह विनिर्गत्य सुब्रह्मण्याचलं गतः । पाण्डयोऽपि मन्त्रिणा पत्न्या द्रष्टुमीशस्थलानि च ॥
निर्जगाम सहैतेन चतुरङ्गबलान्वितः । सुब्रह्मण्याचले दुर्गां विष्णुं स्कन्दं शिवं क्रमात् ॥ १३ ॥
निषेव्य गीत्वा गेयानि नद्या उत्तरतो व्रजन् । गायन्नन्नविनोदेशं श्रीनूतनपुरेश्वरम् ॥ १४ ॥
गीत्वा पुष्पवनं गन्तुं नदीं तर्तुं समुद्यतः । वेगवत्याः सैकतानि लिङ्गाकाराणि चासत ॥ १५ ॥
तानि लिङ्गानि संवीक्ष्य पदा स्प्रष्टुमशक्नुवन् । अगत्वैव तु तत्क्षेत्रं नद्या उत्तरतीरतः ॥ १६ ॥
अगायत्सन्निधिं वीक्ष्य तुष्टः पुष्पवनेश्वरम् । अदृष्ट्वा वृषभस्कन्धछन्नं लिङ्गं महेशितुः ॥ १७ ॥
द्रष्टुं तज्ज्ञानसंबन्धस्तुष्टाव बहुभिः स्तवैः । तदा पुष्पवनेशानो दयालुर्भक्तवत्सलः ॥ १८ ॥
स्वपुरःस्थं ककुभन्तमित्याहाकाशरूपवान् । मा माछादय मूर्ध्ना ते हे वृषोन्नतकन्धर ॥ १९ ॥
ज्ञानसंबन्धसेवार्थं भव त्वं नम्रकन्धरः । इतीशाज्ञावशान्नम्रकन्धरोऽभूत्क्षणाद्वृषः ॥ २० ॥
तदा श्रीज्ञानसंबन्धो विस्मयाविष्टमानसः । आत्मन्यत्यन्तवात्सल्यमीशस्यालोक्य हर्षितः ॥ २१ ॥
स्तुत्वा च बहुभिः स्तोत्रैर्नत्वानड्वत्पुरेश्वरम् । अज्ञाय मार्गे गच्छन्तमनड्वद्रूपभृच्छिवः ॥ २२ ॥
धावयन् भ्रामयन् मार्गादनुद्रुत्य निजालयम् । नीत्वादृश्योऽभवल्लिङ्गमात्रं वीक्ष्यातिविस्मितः ॥२३॥
संबन्धोऽन्वीक्ष्य तच्चित्रमवीक्ष्यानड्वहं दृशा । शिव एव समागत्य मार्गे रुद्धानयत्पुरम् ॥ २४ ॥
इति निश्चित्य मनसा तुष्टः प्राप्य तदालयम् । तत्र स्थितं महेशानं गीत्वा द्राविडसूक्तिभिः ॥ २५ ॥
त्रिकूटाचलमासाद्य तत्र गीत्वा सदाशिवम् । पश्चाद्वेणुवनस्थाने गीत्वा वेणुवनेश्वरम् ॥ २६ ॥
रामेश्वरं पुनः प्राप्य रामनाथमगायत । प्राप्याजगजपुरीं तु गायन्नजगजेश्वरम् ॥ २७ ॥

प्राप्य पश्चाद्वनमुखं पुरं गीत्वा तदीश्वरम् । क्रूरगोत्रं समासाद्य तत्र गायन् महेश्वरम् ॥ २८ ॥
चतुर्दशस्थलान्येवं पाण्डयदेशास्थितान्यपि । सभार्येणैव पाण्डयेन चान्वितः सहमन्त्रिणा ॥ २९ ॥
पित्रा सह निषेव्यायं गीत्वा संप्रार्थितः पुनः । आहूतोऽभ्यवहारार्थं कुलबन्धनमन्त्रिणा ॥ ३० ॥
अवाप तत्पुरं रम्यं कल्याणपुरमाख्यया । भुक्त्वायं षड्सैस्तत्र घृतापूपपयःफलैः ॥ ३१ ॥
प्रस्थितश्चोळदेशाय पित्रा भक्तजनैः सह । पश्चादनुगतं पाण्डयं निवार्यात्र वसेति तम्॥ ३२ ॥
मन्त्रिणं च निवार्याथ प्रणमन्तौ च तावुभौ । प्रेषयित्वा च मथुरां प्रस्थितो ज्ञानवारिधिः ॥३३॥
चोळदेशं गतः पश्चान्नत्वा तत्र स्थलान्यपि । श्रीपाताळेश्वरक्षेत्रे गीत्वा पाताळनायकम् ॥ ३४ ॥
तत्र स्थाने स्थलान्येवं गीत्वा नत्वा विशेषतः । पश्चाद्वयाघ्रनदीतीरं प्राप्य चोत्तरतीरगम्॥३५ ॥
विजयाख्यपुरेशानं गातुमर्जुनपूजितम् । उत्सुकेऽस्मिन् गन्तुकामे सति वैदिकवारणे ॥ ३६ ॥
कूलङ्कषप्रवाहौघैरभूदुल्लोलवीचिभिः । केनाप्यशक्येयं तर्तुं प्लवैर्नावेति नाविकैः ॥ ३७ ॥
निबध्य कस्यचिन्मूले तरोस्तैर्निर्गतं तथा । द्रष्टुं झटिति तं शंभुं गन्तुं गातुं समुद्यतः ॥ ३८ ॥
चिन्तयामास मनसा किं कर्तव्यमितः परम् । आलोच्य शिष्यानारोप्य नावमुन्मुच्य बन्धनात्॥३९॥
नौकादण्डस्याप्यसाध्ये नद्याः पाथसि तां क्षिपन् । आरुह्य स्वयमप्येनां ज्ञानविज्ञानवारिधिः ॥ ४० ॥
ईशाज्ञयेयं नौरद्य नद्याः कूलङ्कषाज्जलात् । नाविकप्रेरितेव द्राक् तीरमुत्तरमेत्विति ॥ ४१ ॥
अगायदश गेयानि तद्गानानिलचोदिता । शरवेगवतीतीरमुत्तरं प्राप सत्वरम् ॥ ४२ ॥
अक्षोपिण्या तया नावा तीर्त्वा गानेन तां नदीम् । निषेव्य विजयेशानं स्तुत्वा तत्र महेश्वरम्॥ ४३॥
श्रीमन्नळपुरं प्राप्य तुष्टावैवं महेश्वरम् । मयि वात्सल्यतोऽभ्येत्य हालास्यक्षेत्रमुत्तमम् ॥ ४४ ॥
मध्ये तत्क्षपणानां तु भवदीयस्तवेऽग्निगे । अशुष्कपल्लवत्पत्रं मद्रक्षार्थं कृतं किल ॥ ४५ ॥
इति गीत्वा नळेशानं गच्छल्यस्मिन् पथि क्रमात् । क्षपणावासपूरस्ति नाम्ना या बुद्धमङ्गळम्॥४६॥
तद्बुद्धमङ्गळप्रान्तमार्गे शिष्यैः सहानुगैः । आरूढशिबिके चिह्नवाद्यवादितवैभवे ॥ ४७ ॥
शैवाध्वस्थापनाचार्ये सर्वक्षपणभञ्जने । आगते ज्ञानसंबन्धे सति वैदिकवारणे ॥ ४८ ॥
तमालोक्याभवन् बुद्धाः क्रुद्धाः स्पर्धाळवो जवात् । बुद्धनन्दिनमित्याहुर्बुद्धशास्त्रार्थकोविदम्॥४९॥
शृणु हे कश्चिदायाति शैवसङ्घसमावृतः । सर्वक्षपणवैरीति स्वपुरोगीतवैभवः ॥ ५० ॥
पार्वतीस्तन्यपायीति पठन् वन्दिसमावृतः । मौक्तिकछत्रवान् मुक्ताशिबिकामधिरुह्य च ॥ ५१ ॥
घोषयित्वा चिह्नवाद्यं मुक्तामयमिहागतः । इति तेषां वचः श्रुत्वा बुद्धनन्दी कुधान्वितः ॥ ५२ ॥
निर्गत्य सहसाभ्येत्य संबन्धं मार्गमध्यतः । निरुध्य तच्चिह्नवाद्यं निवार्येत्याह गर्वितः ॥ ५३ ॥
किमर्थं चिह्नवाद्यं ते वटोरज्ञानवारिधेः । विद्या यदि स्याद्वादे मां जित्वा त्वं याहि नो यदि ॥५४॥
न गन्तव्यं चिह्नवाद्यं न ध्मातव्यमितः परम् । इत्युक्त्वा बुद्धनन्दी तमरुणद्वाद्यवादिनम् ॥ ५५ ॥
तद्वृत्तान्तं शंभुभक्ताः संबन्धाय व्यजिज्ञपन् । मार्गे मास्तु प्रसङ्गोऽस्तु विशाले कुत्रचित्स्थले ॥५६॥
इत्याह ज्ञानसंबन्धो ज्ञानवारिनिधिः प्रभुः । तदास्य मातुलो नाम्ना संबन्धचरणालयः ॥ ५७ ॥

तद्वानलेखकः प्राह कोपादस्योत्तमाङ्गके । पतेदम्भोळिरिति तमशपत्तत्क्षणात्पुनः ॥ ५८ ॥
अभूद्द्विधा भिन्नतनुः तद्वागशनिखण्डितः । भीतभीतास्तदा नग्ना निहते बुद्धनन्दिनि ॥ ५९ ॥
धावन्त्यनुचराः सर्वे पारितः पक्षिणो यथा । श्रीसङ्घा हर्षसंयुक्ता नेदुर्हर हरेति च ॥ ६० ॥
पुनरेकत्र ते सर्वे सङ्घीभूयार्हताधमाः । मन्त्रयामासुरन्योन्यं कर्तव्यं किमतः परम् ॥ ६१ ॥
वञ्चनाभिः किमेतेषां शैवानां मन्त्रतोऽथ वा । किमु शैवमताधिक्याद्बुद्धनन्दी मृतो भवेत् ॥६२॥
न निर्जिता वयं पूर्वं केनाप्यस्मन्मतारिणा । अनेन बालकेनाद्य वञ्चिता वयमीदृशाः ॥ ६३ ॥
केनोपायेन जेष्यामो वञ्चनापटुमर्भकम् । इत्यालोच्यार्हताः सर्वे कुतर्ककुशलाशयाः ॥ ६४ ॥
पटुं पिटकशास्त्रेषु शारिबुद्धं मदोद्धतम् । पुरस्कृत्य गिरा जेतुं बुद्धास्ते पुनरागताः ॥ ६५ ॥
तदागमनमाकर्ण्य सम्बन्धोऽपि तदार्हतैः । अहं वादं करोमीह शास्त्रवादेन वादिभिः ॥ ६६ ॥
इत्युक्त्वा शिबिकामध्यादवरुह्य तदाध्वनि । कस्मिंश्चिन्मण्डपे तिष्ठन्नुद्युक्तो वदितुं स्थितः ॥ ६७ ॥
अगतेष्वार्हतेष्वेषु संबन्धचरणालयः । बुद्धनन्दिशिरोभेत्ता गीतानामस्य लेखकः ॥ ६८ ॥
शारिबुद्धमिति प्राह ज्ञानसंबन्धचोदितः । त्वदीयशास्त्रं ब्रूह्यत्र ब्रूहि त्वद्वस्तुनिर्णयम् ॥ ६९ ॥
तेनेत्युक्तः पुनः प्राह शारिबुद्धः स्मयान्वितः । बुद्धनन्दिशिरःपातो भवद्भिश्छद्मना कृतः ॥ ७० ॥
न विद्यया न वादेन न सौम्येन पथा क्वचित् । इतः परं जयेच्छा चेद्युष्मच्छास्त्रप्रसङ्गतः ॥७१॥
अस्मच्छास्त्रप्रसङ्गेन जयो यस्य भविष्यति । स श्लाघ्योऽविजितो लोकस्तुत्यः सत्यं सभास्थितैः ॥
भवद्भिर्विजितोऽहं चेद्वः शिष्यः स्यामहं ध्रुवम् । यूयं जिताश्चेद्बुजतां शिष्यत्वं मम नित्यशः॥७३॥
एवं प्रतिज्ञापूर्वेण भाषितः शैवपुङ्गवः । आकर्ण्य पुनरप्याह शारिबुद्धं मदोद्धतम् ॥ ७४ ॥
पुनः पुनश्च जातानां मृतानां भवतामिह । द्रव्याणि कानि नित्यानि कर्ता को वा गतिश्च का ॥७५॥
ज्ञानमात्माथवा देहः कर्म वात्मेन्द्रियाणि वा । तत्त्वशास्त्रप्रसंगेन शंस मे वस्तुनिर्णयम् ॥ ७६ ॥
शारिबुद्धो निशम्यैतच्छैवान् स पुनरब्रवीत् । प्रतिकल्पं तु जातानां मृतानां च पुनःपुनः॥७७॥
मनुष्यपशुपक्ष्यादिजन्मनि क्षणिकायुषि । दानेन तपसा योगाज्ज्ञानं स्याज्जन्मिनामिह ॥ ७८ ॥
तज्ज्ञानान्मुक्तिभाग्यस्तु शास्त्राणि व्यतनोद्विया । आत्मनामुपकाराय सोऽस्माकं कुलदैवतम् ॥७९॥
इत्युक्तो लेखकः प्राह सा मुक्तिः कीदृशी तव । शारिबुद्धः पुनः प्राह बुद्धतन्त्रविशारदः ॥८०॥
देवतिर्यङ्मनुष्यादिसर्वकायेषु नः सदा । न सौगतानामात्मान्यो विनैव स्कन्धपञ्चकम् ॥ ८१ ॥
तत्स्कन्धपञ्चकस्यापि लक्षणं वक्ष्यते पृथक् । रूपस्कन्ध इति प्रोक्तो वेदनास्कन्ध इत्यपि ॥८२॥
इन्द्रियस्कन्ध इत्युक्तो भावनास्कन्ध इत्यपि । विज्ञानस्कन्ध इत्येते पञ्चस्कन्धाः प्रकीर्तिताः॥८३॥
रूपस्कन्धोऽष्टधा प्रोक्तः पृथिव्यादिचतुष्टयम् । तथा गन्धरसस्पर्शरूपादीनां चतुष्टयम् ॥ ८४ ॥
त्रिविधं वेदनास्कन्धलक्षणं पृथगुच्यते । सुखं च दुःखं मिश्रं च त्रितयं परिकीर्तितम् ॥ ८५ ॥
चक्षुः श्रोत्रं रसज्ञा त्वङ्मनो घ्राणममूनि षट् । इन्द्रियस्कन्ध इत्युक्तस्तत्त्वविद्भिः पुरातनैः ॥ ८६ ॥

(1) सत्कृत्य स्मरणं ?

वक्ष्येऽद्य भावनास्कन्धं धर्माधर्मस्वरूपकम् । मनोवाक्कायजं पापं दशधा संप्रकीर्तितम् ॥ ८७ ॥
परद्रव्यापहारेच्छा कृतोपकृतिविस्मृतिः । कथञ्चिदप्यसन्तोषस्त्रिविधं तत्तु मानसम् ॥ ८८ ॥
चतुष्टयं वाचिकं स्यादसत्यं परदूषणम् । क्रूरवाक्यापवादौ च वाचिकं समुदाहृतम् ॥ ८९ ॥
कायजं त्रिविधं पापं हिंसा चौर्यं विटक्रिया । एवं दशानां पापानां विरोधि सुकृतं दश ॥ ९० ॥
? परेषां द्रव्यदानेच्छा सत्कृत्य (1) स्मरणं तथा । सदा सर्वेषु सन्तोषो मानसं पुण्यमीरितम् ॥ ९१ ॥
प्रयोजनोक्तिः सत्योक्तिर्मृदुभाषा परस्तुतिः । चत्वारो वाचिका धर्मा धर्मिष्ठैः समुदाहृताः ॥९२ ॥
अहिंसा कायजा तद्वदस्तेयमविटक्रिया । धर्माधर्मस्वरूपेण विंशतिर्भावनाः स्मृताः ॥ ९३ ॥
श्रवणेन ध्वनिज्ञानं रूपज्ञानं दृशा तथा । स्पर्शज्ञानं त्वचा वेत्ति रसज्ञानं रसज्ञया ॥ ९४ ॥
घ्राणेन गन्धज्ञानं च यज्ज्ञानं वेत्ति तन्मनः । विज्ञानस्कन्ध इत्युक्तं तज्ज्ञानं शास्त्रवित्तमैः ॥९५॥
पञ्चस्कन्धस्वरूपेण जायते जगदव्ययम् । पञ्चस्कन्धस्वरूपेषु लीयते जगदेव तत् ॥ ९६ ॥
आत्मायं देह एवेति भोगो मुक्तिरिति स्थितम् । तस्मादीशेन किं कार्यं जीवेनाप्यथ किं फलम् ॥
ईशोक्तेनागमेन स्यादनुष्ठानेन किं फलम् । कस्यचिद्द्रुफलस्यापि कण्ठे किं धारणात्फलम् ॥ ९८ ॥
आपादकेशमनिशं करीषाङ्गारलेपनात् । शैवाश्च वैदिकाश्चेति वैष्णवा पाञ्चरात्रिकाः ॥ ९९ ॥
स्कान्दाश्च सांख्या इत्येवं प्रत्येकं मतवादिनाम् । भवादृशां लयोत्पत्ती विद्येते स्कन्धपञ्चकात् ॥ १०० ॥
तस्मान्मम मतं श्लाघ्यमश्लाघ्यं भवतां मतम् । युष्मद्दर्शनसंलापस्पर्शनात्पातकी भवेत् ॥ १०१ ॥
इति तद्गिरमाकर्ण्य शैवाः प्राहुः क्रुधान्विताः । स्कन्धपञ्चकजातेन देहेन यदि शं भवेत् ॥ १०२ ॥
तद्गात्रं तत्सुखं नित्यं भवितव्यमनश्वरम् । तत्स्कन्धपञ्चकोपात्तदेहदुःखसुखावलेः ॥ १०३ ॥
सद्यो नाशेन कर्तास्ति जगतः प्रभुरव्ययः । तस्य पूजाप्रभावेण भस्मरुद्राक्षधारणात् ॥ १०४ ॥
तदुक्तागमवेदोक्तकर्मज्ञानावलम्बनात् । सेश्वरा वयमेवेशा निरीशानां भवादृशाम् ॥ १०५ ॥
अस्मान् विना वो मूढानां का गतिः पारलौकिकी । आकाशस्य गुणः शब्दः शिवोऽप्याकाशरूपभृत् ॥
पृथ्व्यादि पञ्चभूतेषु शिवांशाकाशलोपतः । अशिवानां शिवं न स्याच्छिवे भक्तिर्न जायते ॥ १०७ ॥
रुद्राक्षे भस्मनि शिवे पञ्चवर्णे शिवागमे । तदुक्तसमयाचारे विमुखा ये भवादृशाः ॥ १०८ ॥
तेषां निरयवासः स्याद्यावदाचन्द्रतारकम् । इत्युक्त्वा शारिबुद्धं तं न्यायपूर्वमभाषत ॥ १०९ ॥
कर्त्रभावे पुनः कायः कथमुत्पद्य गच्छति । स्कन्धनाशे भवत्कर्तुर्ज्ञाननाशो भविष्यति ॥ ११० ॥
कथं तृप्तो फलं दद्याच्छिलासु प्रेतपूजया । मुक्तो बद्धः कथं ह्यात्मा चेद्वरो वा कथं भवेत् ॥ १११ ॥
इति पृष्टः शारिबुद्धः स्वमतं प्राह तत्त्वतः । कर्ता जनित्वा बहुधा तपस्तप्त्वामृतोऽभवत् ॥ ११२ ॥
अन्ते ज्ञानमथ प्राप्य कर्तास्माकं बभूव सः । स्कन्धान्मोचयितुं चास्मांश्चक्रे पिटकशास्त्रकम् ॥
तच्छास्त्रोक्तविधानेन तत्कायस्थापनस्थले । शिलां च महतीं स्थाप्य कर्ता तस्यां प्रपूज्यते ॥ ११४
तस्य पूजामहिम्ना तु केषांचित्स्कन्धनाशनम् । केषाञ्चित्स्कन्धसंभूतिर्मन्मते विमुखात्मनाम् ॥ ११५ ॥

तस्मान्मदीयशास्त्रोक्तपूजया सर्वमाप्यते । इत्युक्तः प्राह बुद्धेन संबन्धचरणालयः ॥ ११६ ॥
मृतः कर्ता कथं भूत्वा पूज्यते केन तद्वद । कः स्वीकरोति ते पूजां पूजा वा कुत्र विद्यते ॥११७॥
शवगर्ते शिलामध्ये कृता पूजा ददाति किम् । इत्युक्तः पुनरप्याह शारिबुद्धो जिगीषया ॥ ११८ ॥
ज्ञानिनः स्वपतो मार्गे प्रीतिकर्तुः फलं न किम् । कर्तुश्च पूजयास्माकं फलं ज्ञानं च जायते ॥ ११९ ॥
निद्रालुर्दूषणं स्तोत्रं जानाति किमु सर्ववित् । निद्रालोरनभिज्ञस्य फलं नास्ति सुखादिकम् ॥ १२० ॥
स्वपतो हननादोषः फलं चापि तथा भवेत् । हिंसया च भवेद्दोषोऽहिंसया च भवेत्फलम् ॥ १२१ ॥
अनिच्छन्नपि संस्पृष्टो यथा वह्निर्दहेज्जनम् । तथा कर्तुः पूजया नः फलमस्ति न संशयः ॥ १२२ ॥
एतद्दृष्टान्तमाकर्ण्य संबन्धचरणालयः । सुप्तः स्याच्चेदुपमितः करणान्यस्य सन्ति हि ॥ १२३ ॥
तथा त्वदेवतायां किमस्ति कायेन्द्रियादिकम् । तथा चेत्स्कन्धपञ्चादेर्न मुक्तिर्मुक्तिगा न सा ॥१२४॥
तत्र त्वया तु नित्यत्वं प्रोक्तं चेज्ज्ञानजीवयोः । अस्मन्मतं त्वयैवोक्तं नान्यथा गतिरस्ति ते ॥ १२५ ॥
ज्ञानाभावेन वो मुक्तिः स्कन्धनाशेन न क्वचित् । तदाकर्ण्याह नग्नः स संबन्धचरणालयम् ॥१२६॥
ज्ञानं तु द्विविधं प्रोक्तं तत्सामान्यविशेषतः । काष्ठभारं पृथक्काष्ठं यथा दहति पावकः ॥ १२७ ॥
तथा द्विधैव मत्कर्ता ह्यभेदे ज्ञानजीवयोः । नायुक्तमग्नेर्दृष्टान्तत्वं मयोक्तं किलाधुना ॥ १२८ ॥
व्यस्ताव्यस्तं समस्तं च वेत्ति ज्ञानं मदीशितुः । तस्मादस्मद्देवतेयं सर्वशास्त्राणि चाब्रवीत् ॥१२९॥
इत्युक्तवन्तमाहेति ज्ञानमग्नेः कथं समम् । अरूपं तत्सरूपोऽग्निस्त्वत्कर्ता वर्तमानवित् ॥ १३० ॥
किं भूतभव्यविद्वह्निस्पृष्टं दहति नान्यतः । तस्मात्त्वद्देवता नूनं न त्रिकालपदार्थवित् ॥ १३१ ॥
न सार्वकालिकः कर्ता तस्मादज्ञतमश्च सः । अस्मत्कर्ता तु सर्वज्ञो व्यापकः सर्वकालवित् ॥१३२॥
कर्तुः सर्वज्ञताभावाद्यूयं सर्वे पराजिताः । पिटकाह्वयशास्त्रं च तत्प्रणीतं निरर्थकम् ॥ १३३ ॥
इति न्यायोक्तियुक्तेन शारिबुद्धः पराजितः । अनुत्तरत्वादानम्रमुखः पादे पपात ह ॥ १३४ ॥
तं पादे प्रणतं दृष्ट्वा कृपया गुरुसन्निधिम् । नीत्वा नतं कृतस्नानं न्यायवादपराजितम् ॥ १३५ ॥
अलंकृत्याखिलं गात्रं भस्मरुद्राक्षलाञ्छनैः । शैवदीक्षाविधानेन दीक्षयामासुरार्हतम् ॥ १३६ ॥
ततो रराज बुद्धोऽसौ मणिरुत्तेजितो यथा । तदा प्रभृति ते बुद्धाः सर्वे शैवा बभूविरे ॥ १३७ ॥
जितान् भीतानिति प्राह क्षपणानात्मदूषकान् । दयालुर्ज्ञानसंबन्धः शरणागतवत्सलः ॥ १३८ ॥

शिवं विना नान्यदिहास्ति दैवतं तूलोपमेष्वन्यमतेष्विदं महत् ।
शैवं मतं चोत्तममित्युपास्यतां मन्त्रेषु पञ्चाक्षरमन्त्र उत्तमः ॥ १३९ ॥

इति तद्वचनं श्रुत्वा शारिबुद्धादयो जिनाः । भीतिकम्पितसर्वाङ्गाः प्रणेमुर्ज्ञानवारिधिम् ॥ १४० ॥
विनतान् वीक्ष्य रुद्राक्षरक्षापञ्चाक्षरादिभिः । पावनीकृतदेहांश्च दीक्षाक्षालितपातकान् ॥ १४१ ॥
शैवान् विधाय तान्नम्रान् स तु वैदिकवारणः । श्रीचूतपुरमभ्येत्य वागीशो यत्र वर्तते ॥ १४२ ॥
तत्र गन्तुमना ज्ञानसम्बन्धस्तं विचारयन् । श्रीमत्पुष्पद्रुतिस्थाने स्थितं ज्ञात्वा महाकविः ॥ १४३ ॥
श्रीमत्पुष्पद्रुतिक्षेत्रं प्रति गन्तुं विनिर्ययौ । अस्यागमनमालोक्य वागीशो हर्षसंयुतः ॥ १४४ ॥

शिबिकां पृष्ठभागेन वहन् केनाप्यलक्षितः । आगतस्तं परिज्ञाय स्वानुगैरुक्ततत्क्रियः ॥ १४५ ॥
वाहनादवरुह्याह कोऽपराधः कृतो मया । इत्युक्त्वाश्लिष्य तं हर्षात्तदा तेनाभिवन्दितः ॥ १४६ ॥
उक्त्वा तस्मै स्ववृत्तान्तं तमामन्त्र्य निजं पुरम् । अवाप ज्ञानसंबन्धो वागीशोऽपि निषेवितुम् ॥
मथुरादिस्थलान्येव प्रययौ दक्षिणां दिशम् । गत्वा ब्रह्मपुरं स्वस्य सभक्तपितृगायकः ॥ १४८ ॥
ननाम मातरं मूर्ध्ना भक्त्या भगवतीमयम् । तया तु विनतो हर्षादाशीर्भिरभिवादितः ॥ १४९ ॥
औत्तराणि स्थलान्येव सेवितुं शाम्भवानि सः । निवार्य पितरं स्वस्य तिष्ठेत्यत्रानुयायिनम् ॥१५०॥
प्रस्थितो भक्तसंघैश्च साकं तद्गायकेन च । चिदम्बरमथ प्राप्य सन्निषेव्य नटेश्वरम् ॥ १५१ ॥
प्राप्यायं वामनपुरं गीत्वा नत्वा महेश्वरम् । श्रीपाटलव्याघ्रपुरे नत्वा गीत्वा महेश्वरम् ॥ १५२ ॥
वीराट्टहासक्षपितत्रिपुरेशं निषेव्य च । अगायत्तत्र भगवान् अङ्घ्रिपद्ममदर्शयत् ॥ १५३ ॥
तत्पाददर्शनात्तुष्टः पुनस्तुष्टाव शंकरम् । प्राप्यागायत्पुनरयं जलन्धरमहेश्वरम् ॥ १५४ ॥
स्मरणान्मुक्तिदं नृणामरुणाचलमेत्य सः । गीत्वा निषेव्य तं शंभुं पुनर्वेदपुरं गतः ॥ १५५ ॥
तत्रास्ति शंभुभक्तेषु भक्तिमांस्तालपालकः । फलितेष्वथ तालेषु विक्रीयैतद्धनैरहम् ॥ १५६ ॥
पालयिष्यामीशभक्तानिति तालानवर्धयत् । पालितेष्वथ तालेषु वर्धितेषु चिरात्परम् ॥ १५७ ॥
एकस्यापि फलं नाभूदथ चिन्तापरोऽभवत् । तत्र स्थिता जिनास्त्वेनं परिहासविधायिनः ॥ १५८ ॥
तव भक्तिः शिवे स्याच्चेत्स चेत्ते कुलदैवतम् । फलिताश्चेत्तालवृक्षास्तदा शैवं मतं महत् ॥१५९॥
नो चेच्छैवं मतं व्यर्थमित्याहुस्तन्निशम्य सः । प्रकामनिर्विण्णमना ज्ञानसंबन्धमागतम् ॥ १६० ॥
समाकर्ण्यान्तिकं प्राप्य नत्वोवाच वचो रुदन् । स्वामिन् हसन्ति मां नित्यं हसन्त्यस्मन्मतं जिनाः ॥
पालितास्तालवृक्षा ये त्वया संवर्धितास्त्विह । सद्यः स्युः सफलाः शैवमताद्वा शंभुवैभवात् ॥ १६२ ॥
नो चेत् व्यर्थो महेशस्ते व्यर्थं स्यात्त्वन्मतं ध्रुवम् । इत्युक्तस्तैरिह प्राप्तो मम दुःखं निवारय ॥१६३॥
इति प्रणाममकरोत्तं वीक्ष्य कृपयान्वितः । सम्बन्धोऽपि शिवं ध्यात्वा तालाः सन्तु फलान्विताः ॥
सद्यः शिवाज्ञयेत्युक्त्वा दश गेयान्यगायत । तद्गानमात्रात्पुंस्तालाः स्त्रीतालाश्चाभवन् क्षणात् ॥
पुष्पिताः फलिताश्चास्य वाक्सुधासेकमात्रतः । तदा भक्ता विस्मिताश्च नेदुर्हर हरेति च ॥ १६६ ॥
तदा भीताश्च ते नम्राः सर्वे विनतकन्धराः । देशान्तरं गताः केचिद्द्वीपान्तरमथापरे ॥ १६७ ॥
अन्येऽवशिष्टाः क्षपणाः शिवदीक्षामवापिरे । अनेन दीक्षिता नम्रा वीक्षितास्तालभूरुहाः ॥ १६८॥
अथ कालेन मुक्ताश्च बभूवुर्मुक्तकिल्बिषाः ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे ज्ञानसंबन्धचरित्रे षट्पञ्चाशोऽध्यायः ॥

॥ अथ सप्तपञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ॥

जिनास्तत्र विनिर्जित्य पश्चात्काञ्चीपुरं गतः । एकाम्रनाथं संसेव्य गत्वान्यानि स्थलान्यपि ॥ १ ॥

निषेव्य गीत्वा क्रमशो वटारण्यमगादथ । पुरा पुनीतवल्येदं सञ्चरन्त्योत्तमाङ्गतः ॥ २ ॥
पदा कदापि न स्पृष्टं वीक्ष्य क्षेत्रस्य वैभवम् । मयापि न पदा गन्तुं शक्यते क्षेत्रमुत्तमम् ॥ ३ ॥
इति निश्चित्य मनसा पुरबाह्यस्थिते मठे । स्थित्वा सुष्वाप तद्रात्र्यां स्वप्ने वटवनेश्वरः ॥ ४ ॥
आगत्येत्थं वचः प्राह सम्बन्धं करुणाकरः । अगीत्वा मां तु विस्मृत्य कुत्र गच्छसि हे वटो ॥ ५ ॥
इतः परं वा मामेत्य गीत्वा गच्छ यथेप्सितम् । इति दृष्ट्वा समुत्थाय प्रातर्गत्वा शिवाज्ञया ॥ ६ ॥
नत्वा प्रदक्षिणीकृत्य गीत्वा स्तुत्वा निषेव्य च । पुनः श्रीज्ञानसंबन्धः कालहस्तिस्थलं गतः ॥ ७ ॥
तत्र स्थित्वा महादेवं गीत्वा स्तुत्वा निषेव्य च । द्राविडानुपयोगित्वात्केदाराद्यौत्तरात्मनाम् ॥ ८ ॥
वसंस्तत्रैव कैलासमुद्दिश्यागायदीश्वरम् । केदारेशं च गोकर्णनाथं गीत्वा क्रमेण च ॥ ९ ॥
पश्चाच्छ्रीपर्वतेशं च गीत्वा तत्रैव सन्नयम् । सुवर्णमुखरीतीरे कालहस्तिस्थले पुनः ॥ १० ॥
प्रस्थितो दक्षिणं देशं प्रति मार्गे स्थलानि च । गायन् स्तुत्वा भजन्नाप श्रीबन्धकपुरं ततः ॥ ११ ॥
तं त्यागराजं संसेव्य गीत्वा तत्र स्थिते सति । तत्क्षेत्रदक्षिणे पार्श्वे मयूरपुरनामनि ॥ १२ ॥
शिवप्रिय इति ख्यातः कश्चिद्वैश्यः समृद्धिमान् । शिवभक्ताङ्घ्रिभक्तश्च सदाशिवमते प्रियः ॥ १३ ॥
मतान्तरं परित्यज्य शृण्वन् शङ्करवैभवम् । महत्त्वं च समाकर्ण्य संबन्धस्य कथामृतम् ॥ १४ ॥
पीत्वा श्रवणपात्रेण मुदमेत्यावसत्सुखम् । अपत्यार्थीशमुद्दिश्य तपश्चक्रे शिवप्रियः ॥ १५ ॥
विना पुत्रेण काप्यासीत् कन्या तस्येश्वराज्ञया । कन्यां प्राप्याथ सन्तुष्टो दानानि सुबहूनि च ॥
कृत्वा तां वर्धयामास पुष्पाङ्गीत्यभिधां व्यधात् । जातमात्रेण तां कन्यां संबन्धाय दिशाम्यहम् ॥
सधनां दातुकामस्तां पुपोषासप्तवत्सरम् । कन्यामठं विधायाथ तत्र संस्थाप्य तां सुताम् ॥ १८ ॥
पिता सखीजनैः सार्धं क्रीडयद्भिरपोषयत् । ततो वसन्ते संप्राप्ते पुष्पापचयकौतुकात् ॥ १९ ॥
पुष्पारामे चरन्तीं तां सर्पोऽदंशत्पदाङ्गुलौ । सा सर्पदष्टमात्रेण गृहं प्राप्यावदत् पितुः ॥ २० ॥
सोऽतिदुःखात् समाहूय वैद्यान् मन्त्रविदो जवात् । चिकित्सां कारयामास गारुडैर्मन्त्रतन्त्रगैः ॥ २१ ॥
चिकित्सितापि मन्त्रज्ञैर्वैद्यैरौषधवेदिभिः । दैवगत्या ममारेयं कन्या तस्याः पिता तदा ॥ २२ ॥
यो वा को वा तु मत्कन्यामुज्जीवयतु मन्त्रतः । दास्यामि तस्मै सधनां प्रतिज्ञामकरोदिति ॥ २३ ॥
उज्जीवयितुमेकोऽपि न शशाक मृतैव सा । ततः पिता बन्धुवर्गै रुरोदात्यन्तदुःखितः ॥ २४ ॥
आश्वासितः परिजनैः प्राप्तधैर्यो वणिक् पुनः । संस्कृत्य विधिवत् पुत्रीं सञ्चित्यास्थीनि भस्मतः ॥
संपूर्य कुम्भे कस्मिंश्चित् संबन्धाय मयार्पिता । कन्येयं किल तस्मात्तां स एवोज्जीवयिष्यति ॥ २६ ॥
इति निश्चित्य तत्कुम्भमलंकृत्य च भूषणैः । कन्यामठे निवेश्यायं यथापूर्वं सखीजनैः ॥ २७ ॥
कदा वा ज्ञानसंबन्धः समायास्यति मन्मुदे । कालं प्रतीक्षमाणोऽसावतिष्ठद्बहुवत्सरान् ॥ २८ ॥
अथेदानीं समाकर्ण्य संबन्धस्य समागमम् । तदाह्वानाय निर्यातः श्रीबन्धकपुरं प्रति ॥ २९ ॥
प्रस्थितः सोऽप्यभिमुखोऽभून्मयूरपुरं प्रति । तदा वणिक् च सन्तुष्टो नत्वा तूष्णीं स्थितः पुरः ॥

तत्पुरस्यालयद्वारि सोऽवरुह्य स्वयाहनात् । तत्रस्थान् शंभुभक्तांस्तान्नतानन्तिकमागतान् ॥ ३१ ॥
पप्रच्छ ज्ञानसंबन्धः कोऽयं खेदीव भाति मे । इति पृष्टाश्च ते भक्ताः प्राहुस्तद्वृत्तमादितः ॥ ३२ ॥
तच्छ्रुत्वोज्जीवयिष्यामि तथैवेति वदन्नयम् । गङ्गायामस्थिनिक्षेपान्मृतानामपि पापिनाम् ॥ ३३ ॥
अभूद्यथा पुण्यलोकस्तथास्थि प्राणकारणम् । इति निश्चित्य संबन्धो वैश्यं प्राहेति हर्षयन् ॥ ३४ ॥
अस्मिच्छिवालयद्वारि शीघ्रमानीयतां त्वया । अस्थिसंपूरितघटो वैश्योज्जीवयितुं त्विति ॥ ३५ ॥
श्रुत्वा तुष्टः सखीवर्गैर्भूषणैरन्वितं घटम् । आदाय तरसाम्येत्य ज्ञानसंबन्धसन्निधिम् ॥ ३६ ॥
तत्पुरेशालयद्वारि वणिक्स्थापितवान् घटम् । तदा शिवं हृदि ध्यात्वा भक्तानां पादसेविनाम् ॥ ३७ ॥
मुक्तिहेतुः शिवः स्याच्चेज्जीवेन सह कन्यका । उद्भिद्य कुम्भमीशानादुत्तिष्ठतु शिवाज्ञया ॥ ३८ ॥
इत्यगायद्द्राविडोक्त्या शंभुवैभववादया । गीते तु दशमे प्रोक्ते मासीव दशमे पुरा ॥ ३९ ॥
उद्भिद्य कुम्भं जाताभूच्छ्रीरिवाम्बुजकुड्मलम् । आपञ्चाब्दं कुम्भगता मृता सा सप्तवार्षिकी ॥ ४० ॥
आयुर्वर्णप्रमाणेन यावता तावता युता । भूषणैर्भूषिताल्यन्तसुकुमाराङ्गयष्टिका ॥ ४१ ॥
सौन्दर्यसागरोद्भूतपूर्णचन्द्रनिभानना । पितुरानन्ददा चासीत् कन्या द्वादशहायना ॥ ४२ ॥
दृष्ट्वा तामुत्थितां कन्यां जनास्तुष्टाश्च विस्मिताः । तत्रत्याः क्षपणाश्चासन् खिन्नाः किमिति शङ्किताः ॥
तान्निपात्यास्य पदयोः स्वयं नत्वा वणिग्वरः । पुत्रीं नीत्वा गृहं पश्चाद्बुवानं षोडशायुषम् ॥ ४४ ॥
ज्ञानसंबन्धमाहाथ पुत्रीमुद्वाह्य गम्यताम् । इति तद्वचनं श्रुत्वा पुनः प्राह महाकविः ॥ ४५ ॥
यथा त्वयैषा जनिता तथाद्य जनिता मया । न युक्तो मे विवाहोऽस्यास्ततोऽन्यस्मै प्रदीयताम् ॥
हृष्टास्तद्वचनात्सर्वे कन्यात्रानप्यगाद्गृहम् । सापि कन्या वरं नान्यं वव्रे निर्विण्णमानसा ॥ ४७ ॥
पुनः कन्यामठे स्थित्वानूढा सासीत्तपोव्रतैः । आराध्य शिवमेकाग्रा कालात्कैवल्यमाप सा ॥ ४८ ॥
संबन्धोऽपि पुनः सर्वैश्शंभुक्षेत्रदिदृक्षया । तत्पुरान्निर्गतस्तूर्णं गृध्राचलमुपेत्य च ॥ ४९ ॥
गीत्वा तत्रेश्वरं भक्त्या चिदम्बरमुपेत्य च । निषेव्यान्यस्थलान्येवं पुनर्ब्रह्मपुरं गतः ॥ ५० ॥
श्रुत्वा तु ज्ञानसंबन्धं चिरप्रस्थितमागतम् । द्रष्टुकामौ नीलनग्नस्कन्दौ तत्रागतावुभौ ॥ ५१ ॥
नत्वा तु ज्ञानसंबन्धं श्रुतद्वृत्तहर्षितौ । नीलनग्नादयः पश्चाद्बान्धवाश्चास्य तर्पिता ॥ ५२ ॥
सर्वेऽप्यालोच्य संबन्धविवाहे निश्चितान्तराः । स एतैः प्रार्थितोऽत्यर्थं मा स्तद्वाह इति ब्रुवन् ॥ ५३ ॥
ब्रह्मचर्येण विप्राणां तुष्टाः स्युर्मुनयोऽपि च । यजन्ति यज्ञमुद्वाह्य ये तेषामध्वरैः सुराः ॥ ५४ ॥
प्रजया पितरः सर्वे तुष्टाः स्युरिति हि श्रुतिः । तस्मात्त्वया विवाहोऽत्र कार्योऽस्मद्वचनादिति ॥ ५५ ॥
एतैः सम्प्रस्थितः पश्चादनुमेने तथास्त्विति । ततः प्रस्थाय कन्यार्थं श्रीभद्रपुरवासिनः ॥ ५६ ॥
कस्यचिद्विप्रवर्यस्य तनयां प्रष्टुमुद्यतः । शिवपादाब्जहृदयो निर्गतस्तत्पुरं प्रति ॥ ५७ ॥
तदागमनमाकर्ण्य पूर्णकुम्भं वहन् करे । सोऽप्यागत्य द्विजैः सार्धं प्रत्युद्गम्यानयद्गृहम् ॥ ५८ ॥
कन्यां पृष्टः स पुत्रार्थं तेनायमपि हर्षितः । संबन्धं प्रति संबन्धात्कृतार्थोऽस्मि भवादृशैः ॥ ५९ ॥

(१) ~~श्वश्वसौ~~ (२) श्वश्वासौ

तथैव दास्यामीत्युक्त्वा कल्याणोद्योगमातनोत् । पश्चान्निर्गत्य तद्ग्रामादयं निश्चित्य कन्यकाम् ॥ ६०
पुत्रोद्वाहाय बन्धूनां प्रेषयामास पत्रिकाम् । बान्धवा आगताश्चास्य विवाहे धृतकौतुकाः ॥ ६१ ॥
शुभे मुहूर्ते लग्ने च सर्वे संभूय बान्धवाः । कन्यां निश्चित्य ताम्बूलं दत्वा वस्त्रं विभूषणम् ॥६२॥
श्वःकर्तुकामाः कल्याणं मूलर्क्षे निश्चयं व्यधुः । सकृन्मूलानुराधाभ्यां ब्रह्मायुर्न निवर्तते ॥ ६३ ॥
ज्ञात्वापि मूलनक्षत्रे वैशाखे मासि सद्विजाः । जन्मकर्म निवृत्त्यर्थं क्षौरकर्म व्रताङ्गकम् ॥ ६४ ॥
कारयामासुरेतस्य स्नानकर्म यथाविधि । निर्वर्तितव्रतस्नानः कृतकौतुकबन्धनः ॥ ६५ ॥
सुमुहूर्ते शुभे लग्ने चन्द्रताराबलान्विते । आरूढमुक्ताशिबिको नानाभरणभूषितः ॥ ६६ ॥
गन्धाक्षतनस्रगाकल्पो ययौ भद्रपुरीं प्रति । ब्राह्मणाः क्षत्रिया वैश्याः शिवभक्ताश्च पादजाः ॥ ६७ ॥
द्रष्टुं श्रीज्ञानसंबन्धविवाहोत्सवमागताः । अलंकृता सभा तत्र भद्रवेदिसमन्विता ॥ ६८ ॥
विश्वकर्मकृता पूर्वं शिवयोरिव मङ्गले । भूषणैर्भूषितो रेजे यथा स्कन्दस्तथापरः ॥ ६९ ॥
तत्कल्याणालोकनार्थमायाता बहवो जनाः । रथेन केचिदायाता गजेनान्ये तुरङ्गतः ॥ ७० ॥
अनेकवाद्यघोषेण चागता द्रष्टुमुत्सवम् । सर्वे ते भद्रनगरीं कारयित्वा प्रदक्षिणम् ॥ ७१ ॥
श्वशुरस्य गृहद्वारं जामात्रा सह चागताः । आगते च वरेऽलिन्दं श्वशुरोऽपि सह स्त्रिया ॥ ७२ ॥
तदा नीराजनं कृत्वा दृष्टिदोषनिवृत्तये । प्रक्षाळ्य पादौ क्षीरेण संबन्धस्य महात्मनः ॥ ७३ ॥
पादावनेजनपयः प्राश्य किंचिच्छिरस्यपि । प्रोक्षयित्वा स्त्रियः स्वस्य पावनं सर्वपापहृत् ॥ ७४ ॥
अन्तर्नीत्वा भद्रपीठं सन्निवेश्य वरं पुनः । स्वस्य त्रिपूरुषं पूर्वमुक्त्वा जामातुरप्यथ ॥ ७५ ॥
उक्त्वा भृङ्गारसलिलं मुञ्चन्त्या योषिता सह । धारापूर्वं स्वतनयां कृतकौतुकबन्धनाम् ॥ ७६ ॥
ददौ श्रीज्ञानसंबन्धवराय महितात्मने । सोऽप्यग्रहीत्तां वनितां पाणिना पाणिमामृशन् ॥ ७७ ॥
वाद्यघोषा बभूवुश्च स्वस्तिमङ्गळवाचकैः । संबन्धो नीलनम्रादिसंवृतो जनकेन च ॥ ७८ ॥
तत्पाणिग्रहणं कृत्वा कृत्वा माङ्गल्यधारणम् । कृतोपचारः श्वश्वासौ (१) वध्वा सह विभूषितः ॥ ७९ ॥
कल्याणवेदिमास्थाय चारुकल्याणरूपवान् । विवाहहोमं विधिवन्मुखान्तं कृतवांस्तदा ॥ ८० ॥
लाजहोमत्रयेष्वेकं लाजहोमं विधाय तु । अग्निं प्रदक्षिणीकृत्य तदाश्मारोहकर्म यत् ॥ ८१ ॥
समापयेति संप्रोक्तः स्वाचार्येण समुत्थितः । अयमग्निर्न मे कर्तुं प्रदक्षिणमिहार्हति ॥ ८२ ॥
आज्यलाजेन्धनान्येवमत्यग्निस्तु शिवानलः । कर्मजन्मादिबीजानां भर्जने चतुरः शिवः ॥ ८३ ॥
तत्र प्रदक्षिणं कृत्वा सर्वं कर्म समापये । इत्युक्त्वा ज्ञानसंबन्धो वरजामातृरूपवान् ॥ ८४ ॥
कल्याणमण्डपाच्छीघ्रं निर्गत्यालयमीशितुः । प्राप्तुकामः स्त्रियः पाणिं गृहीत्वा निर्जगाम ह ॥ ८५ ॥
तदा सर्वेऽपि तत्रत्याः कल्याणार्थं समागताः । तद्बान्धवा ब्राह्मणाश्च श्वशुरौ पितृमातरौ ॥ ८६ ॥
स्कन्दनाथो नीलनम्रः संबन्धचरणालयः । मातुलो लेखकश्चास्य गानानामन्तिकस्थितः ॥ ८७ ॥
गायको नीलकण्ठश्च तथान्ये ब्राह्मणादयः । सर्वे श्रीज्ञानसंबन्धमनुयान्ति स्म वीक्षितुम् ॥ ८८ ॥

वैभवं तु महाहर्षाद्गतास्तेन सहालयम् । प्रदक्षिणीकृत्य शिवं श्रीभद्रपुरवासिनम् ॥ ८९ ॥
तत्पदं गन्तुकामोऽसौ संस्मृत्य मनसा शिवम् । पादच्छायासु युष्माकं नित्यं कल्याणमस्तु मे ॥९०॥
अस्तु मेऽत्रैव कल्याणमित्यगायद्दशोक्तिभिः । तद्गानान्ते शिवो लिङ्गादाविर्भूयेत्युवाच ह ॥ ९१ ॥
संबन्ध शृणु मद्वाक्यं तवैकस्य न मे पदम् । तवापि त्वत्स्त्रियश्चापि कल्याणं पश्यतामपि ॥ ९२ ॥
मुक्तिर्भवतु मे शक्त्या सर्वेषामविवेकिनाम् । महतामपि सर्वेषां तव पार्श्वानुवर्तिनाम् ॥ ९३ ॥
समागच्छन्तु ते शीघ्रमागच्छन्तु ममाज्ञया । इत्युक्त्वा लिङ्गमध्येऽयं कोटिसूर्यप्रभो बभौ ॥ ९४ ॥
अनाकारे शिवज्योतिष्याविशन् सकला जनाः । ये ये विभूतिरुद्राक्षधारिणः शिवकिङ्कराः ॥ ९५ ॥
श्रीसङ्काश्चास्य ते सर्वे विविशुः शंभुतेजसि । अदीक्षितानां विप्राणामागमोक्तविधानतः ॥ ९६ ॥
अन्येषामपि विप्राणामज्ञानामाप्तपाप्मनाम् । पौनःपुन्येन जातानां मृतानामपि नित्यशः ॥ ९७ ॥
सर्वेषां ज्ञानसंबन्धो मुक्त्यर्थं सुलभेन च ॥

हर हर इति शब्दमादितोऽसौ मुहुरभिधाय मुनीन्द्रबृन्दवन्द्यः
अपठदथ च मेघघोषतुल्यं सकलहिताय नमश्शिवायमन्त्रम् ॥ ९८ ॥

पञ्चाक्षराङ्कितान्ताभिरगायद्दशसूक्तिभिः । तद्गानवैभवात्सर्वे तत्रत्याः पामरा अपि ॥ ९९ ॥
विविशुर्ज्योतिषीशस्य बालखिल्या यथा रवेः । मुक्त्याकाङ्क्षी नीलनग्नः स्कन्दः कैवल्यकाम्यपि ॥
शिवपादाब्जहृदयस्तत्पिता तस्य मातुलः । तद्गानलेखकश्चैव सम्बन्धचरणालयः ॥ १०१ ॥
तच्छ्रुश्रूः श्वशुरोऽप्यस्य नीलकण्ठश्च गायकः । एते सर्वेऽपि सस्त्रीका गृहीतस्त्रीकराश्च ते ॥१०२॥
नत्वा प्रदक्षिणीकृत्य शम्भुज्योतिषि लिल्यिरे । ये चाप्यत्रागता विप्रास्तत्कल्याणदिदृक्षवः ॥ १०३ ॥
तेऽपि संबन्धकृपया मुक्ता ज्योतिषि शाङ्करे । शिबिकाच्छत्रधारी च वाद्यधारी च वन्दिनः ॥१०४॥
सर्वे प्रदक्षिणीकृत्य तेजोरूपं सदाशिवम् । ते सर्वेऽपि च सस्त्रीका विविशुः शंभुतेजसि ॥ १०५ ॥
अन्यान् पलायितानज्ञान् संसारभ्रान्तमानसान् । आहूय मुक्तिं प्रददौ निरुध्येशस्य नन्दिना ॥१०६
कोटिसूर्यप्रतीकाशे कोटिशीतांशुशीतले । कुटीरद्वारसदृशे शैवे ज्योतिषि सोऽखिलान् ॥ १०७ ॥
प्रवेशयित्वा भक्तौघान् कल्याणार्थं समागतान् । पुनः श्रीज्ञानसंबन्धः स्वयं गन्तुं समुद्यतः ॥
प्रदक्षिणं विधाय त्रिः परंज्योतिस्स्वरूपिणः । पत्न्याः पाणिग्रहं कृत्वा प्रविवेश शिवानले ॥१०९॥
प्रविष्टमात्रे संबन्धे परमेश्वरवैभवात् । तिरोभूतमभूज्ज्योतिर्लिङ्गमात्रमवस्थितम् ॥ ११० ॥
तदालयस्य वृत्तान्तं ज्ञानसंबन्धवैभवम् । अतिमानुषमाकर्ण्य सर्वे तत्पुरवासिनः ॥ १११ ॥
आगता ज्ञानिनः केचित्सन्तो वृद्धा मुमुक्षवः । अदृष्ट्वा तत्र संबन्धमदृष्ट्वा ज्योतिरैश्वरम् ॥ ११२ ॥
केवलं लिङ्गमालोक्य शंभोर्भद्रपुरीशितुः । भाग्यहीना वयमिति खिन्ना जग्मुः पुनर्गृहम् ॥ ११३ ॥
गत्वा गृहं ते संबन्धं स्मृत्वा स्मृत्वा च वैभवम् । विस्मितास्तेऽपि कालेन मुक्तास्तद्ध्यानवैभवात् ॥
तस्माच्छ्रीज्ञानसंबन्धचरितं वागगोचरम् । सकृच्छ्रवणमात्रेण सर्वाभीष्टफलप्रदम् ॥ ११५ ॥

(1) शिवप्रसादेन

श्रीज्ञानसंबन्धचरित्रमेतत् पठन्ति शृण्वन्ति च ये महान्तः ।
(1) शिवप्रसादेन पुनर्निवृत्तिर्भवेन्न तेषामुदितं हि सत्यम् ॥ ॥ ११६ ॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीज्ञानसम्बन्धमुक्तिप्राप्तिर्नाम सप्तविंशोऽध्यायः ॥

॥ अथाष्टपञ्चाशोऽध्यायः ॥

श्रीअगस्त्यः ॥

अपि प्राणात्यये प्राप्ते यः शिवद्रोहिदर्शनम् । न विधत्ते भवत्यस्य कैवल्यं स्वकरस्थितम् ॥ १ ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् । कलिकामस्य चरितं कलौ कामजितो बुधाः ॥ २ ॥
चोलदेशे पुरं किञ्चिदस्ति श्रीमङ्गलाख्यया । तत्र जातो द्विजः कश्चिच्छिवभक्तार्चने रतः ॥ ३ ॥
यस्य दर्शनमात्रेण बिभ्यतीशद्रुहो भुवि । खड्गधारी सदैवास्ते शिवद्रोहिजिघांसया ॥ ४ ॥
कलिकाम इति ख्यातो नाम्नासौ धर्मबुद्धिमान् । शूरश्चोलेन्द्रसेनानीः स्वपुरान्तिकवर्तिनः ॥ ५ ॥
श्रीकर्म कारयामास श्रीकरञ्जपुरेशितुः । सेवितुं कतिचित्कालान् स्थातुं च कमलालयम् ॥ ६ ॥
अवाप्य तत्र निवसन् बह्वीरगमयत्समाः । एकदा त्यागराजेशमवाङ्मनसगोचरम् ॥ ७ ॥
प्रयातं सुन्दरस्यार्थे दौत्यार्थं परवागृहम् । श्रुत्वा क्रुद्धोऽभवद्द्वेषी छेत्तास्म्यस्य शिवद्रुहः ॥ ८ ॥
पापिनः सुन्दरस्येति प्रतिज्ञामकरोत्तदा । तद्द्वेषपरिहाराय किञ्चिदीशेन कारितम् ॥ ९ ॥
तदद्य वक्ष्ये युष्माकं शृणुध्वं मुनिपुङ्गवाः । कलिकामो यदा द्वेषी बद्धकच्छो धृतायुधः ॥ १० ॥
तदा प्रभृति तद्भीत्या सुन्दरस्तत्पुरासिकाम् । त्यक्त्वान्यस्थलसेवेच्छाव्याजादिव विनिर्गतः ॥ ११ ॥
श्रीमत्कुण्डपुरं प्राप समीपे श्रीपुरस्य सः । नानौषधिसमाकीर्णं नानाफलसमृद्धिमत् ॥ १२ ॥
तत्रैकः शिवभक्तानामग्रणीरङ्गिसंभवः । वृद्धः समृद्धगोधान्यधनः पुत्रादिसंयुतः ॥ १३ ॥
कृषीवलो हलैर्नित्यं नानाधान्यसमृद्धिमान् । सदा दिशति भक्तानां वस्त्रमन्नं च तण्डुलम् ॥ १४ ॥
धान्यं धनं यथाकामं तेषां तत्तदभीप्सितम् । एवं तु वर्तमानोऽयं सुन्दरे भक्तिमानभूत् ॥ १५ ॥
परवागृहकृत्यस्य प्रत्यहं प्रतिवत्सरम् । यावद्धान्यं चोपयुक्तं तावत्फलशलाटुभिः ॥ १६ ॥
गुळक्षीरदधिक्षौद्रैः कन्दमूलेक्षुसञ्चयैः । स्वक्षेत्रफलितं चान्यद्ददत् सुन्दरतुष्टये ॥ १७ ॥
तस्मै ददाति धान्यानि यावदेतेन वाञ्छितम् । इत्यसौ वर्तमानः सन् कदाचिद्दृष्टभावतः ॥ १८ ॥
प्रार्थयित्वातिदुःखेन शिवं प्राप्य निजं गृहम् । त्यक्त्वा भुक्तिं तन्निशायां खिन्नः शिश्ये महीतले ॥
तदा दयालुर्भगवान् कुबेरं समचोदयत् । मद्भक्तस्यास्य वृद्धस्य गेहे व्रीहीन्नगोपमान् ॥ २० ॥
सद्यो दिशेति गिरिशस्तद्विरा गुह्यकेश्वरः । श्रीमत्कुण्डपुरे तस्य वृद्धस्य सदनेऽजिरे ॥ २१ ॥
धान्यकोशाकरे तस्य कुसूलेष्वथ तत्पुरे । वीथ्यां गृहे गृहे तत्र चत्वरेषु चतुष्पथे ॥ २२ ॥
अर्धरात्रे समागत्य शालिवर्षमवर्षयत् । तच्छालिवर्षात्सर्वत्र शालयः पर्वतोपमाः ॥ २३ ॥

आसन् कुण्डपुरे पश्चाद्वृद्धं स्वप्नेऽवदच्छिवः । मया वृद्ध भवद्ग्रामे सर्वत्र व्रीहिसञ्चयाः ॥ २४ ॥
आनीतास्त्वं यथाकामं भक्तेभ्यो वितरेप्सितम् । इत्यथोत्थाय तुष्टोऽभूद्दृष्ट्वा शालिसञ्चयान् ॥२५
तदा सा परवागेहे भोक्तुं शाल्याद्यभावतः । सुन्दरं सर्वदा स्वस्यां प्राहेति रतिलोलुपम् ॥ २६ ॥
अन्नेन हि सुखं सर्वमन्नाभावे कुतः सुखम् । यावद्व्ययाय पर्याप्तं तावद्व्रीह्यादिसाधनम् ॥ २७ ॥
आनीयायाहि मद्गेहं नो चेद्यत्र सुखं व्रज । इत्याकर्ण्यातिनिर्विण्णस्यागेशं सहसैत्य सः ॥ २८ ॥
अस्तुवत्परवामुक्त्यै व्रीहिं यच्छेति सुन्दरः । इत्यर्थितो महादेवः पूर्वेद्युर्निशि सुन्दर ॥ २९ ॥
श्रीकुण्डपुरवृद्ध्यर्थमानीता बहुशालयः । तत्र गत्वा तमापृच्छ्य संगृहाण यथेप्सितम् ॥ ३० ॥
तमेवमुक्त्वा वृद्धं च स्वप्ने गत्वावदच्छिवः । सुन्दराय यथेच्छं त्वं व्रीहीन् वितरतादिति ॥ ३१ ॥
सुन्दरोऽपि तथेत्युक्त्वा प्रस्थितस्तत्पुरं प्रति । वृद्धोऽपि सुन्दरायैतद्वृत्तं वक्तुं समागतः ॥ ३२ ॥
मार्गेऽन्योन्यं दृष्टवन्तौ मिथः सन्तोषमापतुः । वृद्धो ननाम तं सोऽपि चोत्थाप्यालिङ्गनं व्यधात् ॥
अन्योऽन्यं स्वप्नवृत्तान्तमुक्त्वाश्चर्यमवापतुः । पश्चाद्वृद्धस्तमाहेत्थं शालयस्ते समागताः ॥ ३४ ॥
गृह्यन्तां भवता व्रह्मन्नित्युक्तः सुन्दरोऽब्रवीत् । त्वदर्थमीशानीतस्तु तव स्याच्छालिसञ्चयः ॥ ३५ ॥
इत्युक्तस्त्वत्कृते प्राप्ता मदर्थं नागता इति । उक्त्वा सुन्दरमाहूय शाल्योघं समदर्शयत् ॥ ३६ ॥
दृष्ट्वा तु पर्वताकारं सुन्दरोऽत्यन्तविस्मितः । केनापि वोढुं नो शक्या भूतकौघेन शालयः ॥ ३७ ॥
इतः परं किं विधेयमिति चिन्तामुपेत्य च । इन्दीवरेश्वरं मौलौ बन्दीकृतनदीविधुम् ॥ ३८ ॥
वन्दीव वचसां गुम्भैस्तं दीनः शिवमार्थयत् । धान्यवोढा न मे कश्चिच्छाल्योघस्यास्ति शङ्कर ॥
तस्मात्त्वदीयैः पुरुषैर्वाहयित्वा महेश्वर । परवागेहमध्यस्थान् कुरु त्वं शालिसञ्चयान् ॥ ४० ॥
इत्यर्थगर्भितैर्गेयैरगायत्परमेश्वरम् । गाने कृते शिवः प्राह वाण्यातन्व्या महेश्वरः ॥ ४१ ॥
अस्मिन् दिनेऽर्धरात्रे ते भवेयुर्व्रीहिसञ्चयाः । परवागेहमध्ये त्वमद्य गच्छेति सुन्दरः ॥ ४२ ॥
तदाकर्ण्यातिसन्तुष्टः स्तुत्वा स्तोत्रैः प्रणम्य च । क्षेत्राद्विनिर्गतस्तस्मात्तत्प्रान्तस्थस्थलानि सः ॥ ४३ ॥
निषेव्य गीत्वा स्तोत्रौघैरवाप्य कमलालयम् । परवागृहमभ्येत्य चागमिष्यन्ति शालयः ॥ ४४ ॥
त्यक्त्वा विचारं सन्तुष्टा भूत्वा वस वरानने । इत्युक्त्वा सुखमासायं तस्यां रात्र्यां महेश्वरः ॥ ४५ ॥
आहूय भूतसङ्घातान् कुण्डोदरमुखान् बहून् । क्षणाच्छालिचयान् सर्वान् धृत्वा मूर्ध्नि पृथक्पृथक् ॥
क्षिप्यध्वं परवागेहे कमलालय इत्यशात् । तथेति ते भूतगणा धृत्वा तच्छालिसञ्चयान् ॥ ४७ ॥
परवामन्दिरस्यान्तःपुरे सौधे च चत्वरे । कक्ष्यावितर्दिकारामकुसूलौघेष्वलिन्दके ॥ ४८ ॥
मध्ये तन्नाट्यशालायां चन्द्रशालास्थलेऽपि च । तथा सर्वेषु गेहेषु कमलालयवासिनाम् ॥ ४९ ॥
अवाकिरन् भूतगणाः शाल्योघान्निमिषार्धतः । शालीनां राशयश्चासन्नत्युच्चैरम्बरस्पृशः ॥ ५० ॥
पृथक् पृथग्व्यराजन्ताभ्यागता इव मेरवः । प्रातः सर्वे समालोक्य पौरा विस्मयमाययुः ॥ ५१ ॥
परवा विस्मिता भूत्वा मत्वा शंभोरनुग्रहम् । स्वेवेश्मागतधान्यौघं विना तत्तद्गृहागतम् ॥ ५२ ॥

तेषां तेषामिति प्रोक्त्वा वार्थं वीथीष्वघोषयत् । सुप्रीतया तया पश्चात्सुन्दरोऽरीरमत्सुखम् ॥ ५३ ॥
शूरव्याघ्रस्तदागत्य वसन्नटकुटीपुरे । आगन्तुमाह्वयामास सुन्दरं निजमन्दिरम् ॥ ५४ ॥
निर्गत्य तत्प्रार्थनया तत्र मार्गस्थलानि च । नत्वा निषेव्य गीत्वा च शनैर्नटकुटीपुरम् ॥ ५५ ॥
अवाप सोऽपि सन्तुष्टः प्रद्युम्नयद्गृहम् । आसने सन्निवेश्यासुमर्घ्यपाद्योपचारकैः ॥ ५६ ॥
पूजयंश्चोळसेनानीर्दुकूलाभरणानि च । दत्वा तस्मै सुवस्त्राणि भोक्तुं तत्परिचारकैः ॥ ५७ ॥
अपूपव्यञ्जनैर्युक्तं सम्यक्पाकमकारयत् । भोजयामास सघृतदधिक्षीरफलेक्षुभिः ॥ ५८ ॥
भुक्त्वा तु सुन्दरः पश्चात्तत्पुरेश्वरमस्तुवत् । शूरव्याघ्रः प्रणम्यैनं भक्तिपूर्वमभाषत ॥ ५९ ॥
स्वामिन् दुहितरौ मे द्वे सिंहाङ्गिवनवैरिके । नाम्नेमे भवता पाणी गृह्येतामेतयोरिति ॥ ६० ॥
प्रार्थितः प्राह तं भक्तमिमे पुत्र्यौ यथा तव । तथा ममाप्यभूतां द्वे कन्ये दुहितराविति ॥ ६१ ॥
उक्त्वा ते स्वाङ्कमारोप्य चाश्लिष्याघ्राय मूर्धनि । दत्वा तयोरभिमतं वस्त्राण्याभरणानि च ॥ ६२ ॥
तत्पुरेश्वरमस्तौषीच्छूरव्याघ्राङ्कितैः स्तवैः । तत्पुत्र्याः सिंहपादायाः पितेत्यात्मानमीरयन् ॥ ६३ ॥
कवित्वैर्दशभिर्गीत्वा निषेव्यान्यस्थलान्यपि । पश्चाच्छ्रीपुरमासाद्य रेमे परवया सुखम् ॥ ६४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे अष्टपञ्चाशोऽध्यायः ॥

॥ अथैकोनषष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

कदाचिरथागराजस्य संप्राप्ते फाल्गुनोत्सवे । व्ययार्थं परवायास्तु न किंचिदभवद्धनम् ॥ १ ॥
तदा सुन्दरमाहेयं धनं देहि व्ययाय मे । इतीरितस्तया सोऽपि श्रीस्तुल्यपुरमेत्य च ॥ २ ॥
तत्पुरेश्वरमस्तौषीद्धनार्थं सुन्दरः कविः । गीत्वा नत्वा बहिर्गत्वा गोपुरद्वारि सुन्दरः ॥ ३ ॥
शयानः पुळिने चासीदनिद्रोऽनुपधानतः । श्रीकर्मार्थाद्भताभक्तैर्गृह्णन्निचतुरेष्टकाः ॥ ४ ॥
कृत्वोपधानं सुप्त्वायं ध्यात्वेशं प्रातरुत्थितः । तदा स्वर्णमयीः सर्वा उपधानीकृतेष्टकाः ॥ ५ ॥
समालोक्यातिसन्तुष्टो विस्मयं परमं गतः । आदाय ताः पुनः स्तुत्वा श्रीताळनगरान्तिके ॥ ६ ॥
साक्षात्कृतेशनटनं दृष्ट्वा स्तुत्वा प्रणम्य च । पुनः श्रीनगरं प्राप्य परवाया गृहं गतः ॥ ७ ॥
प्राप्ताः शिवाज्ञयास्यैताः प्रादात्स्वर्णमयेष्टकाः । एवं तां प्रीणयन्नास्त सुखेन कमलालये ॥ ८ ॥
पश्चात्स्थलानि संसेव्य तेजिनीवनमेत्य च । श्रीवाञ्छं नूतनपुरं सिद्धेश्वरमुपेत्य च ॥ ९ ॥
मध्यार्जुनमथ प्राप्य श्रीनागेश्वरमेत्य च । गत्वा शिवपुरं पश्चात्कलशीपुरमाप्तवान् ॥ १० ॥
कुम्भकोणमथ प्राप्य दक्षिणावर्तकस्थलम् । जम्बूपुरं गन्तुकामे सत्यागत्य महेश्वरः ॥ ११ ॥
स्वयं स्वप्नेऽवदद्वर्षपुरे स्थित्वा व्रजेति तम् । प्रातर्गत्वा तत्र नत्वा गीत्वा जम्बूपुरं पुनः ॥ १२ ॥

प्राक् शिलाश्रममासाद्य नत्वा गीत्वा स्तुवञ्शिवम् । तत्र वित्तमपृच्छत्तमीशस्तूष्णीं स्थितो यदा ॥
तदा क्रोधेन स जगौ त्वां विना देवता न किम् । अन्येष्टदात्री भूलोके कवीनां गायतामिति ॥१४॥
अगायदश गेयानि तदेशोऽदाद्धनं भयात् । तत्र साक्षात् कृतेशस्य निषेव्यानन्दताण्डवम् ॥१५॥
शिलाकुटीरनगरीमेत्य स्तुत्वा सरित्पुरम् । त्यक्त्वा वृद्धाचलं गन्तुमुद्युक्तं पथि शङ्करः ॥ १६ ॥
वृद्धब्राह्मणवेषेण सभार्यः प्राप सुन्दरम् । वृद्धाचलसमीपाध्वा केति पृष्टोऽब्रवीच्छिवः ॥ १७ ॥
सारित्पुरायानुगतश्चेत्समीपो भविष्यति । इत्युक्त्वाद्रय तन्मार्गं दर्शयन् मार्गमध्यतः ॥ १८ ॥
तिरोहितः स दृष्ट्वतदाश्चर्यं किमिति ब्रुवन् । तत्सरित्पुरमभ्येत्य स्तोत्रमेवमधादयम् ॥ १९ ॥
कृतार्थोऽस्मीह दृष्ट्वेशं गीत्वैवं द्राविडोक्तिभिः । पश्चाद्वृद्धाचलं प्राप्य द्रव्यार्थं तं निषेव्य च ॥ २० ॥
शंभो द्वादशसाहस्रं निष्कान् देहीत्यगायत । तदा तुष्टः शिवो द्रव्यं सुन्दराय ददौ पुनः॥२१॥
एवमप्रार्थयद्देवं वोढुं मे नास्ति कश्चन । भवतानीयतां स्वामिन् मत्पुरे कमलालये ॥ २२ ॥
इत्युक्तः प्राह गौरीशस्तमाकाशशरीरभृत् । मणिमुक्तासरित्तोये क्षिप्त्वात्र कमलालये ॥ २३ ॥
मृगय त्वं तदा तन्नागमिष्यति धनं तव । इत्याकर्ण्य सुसन्तुष्टः पुनः प्राह महेश्वरम् ॥ २४ ॥
असत्यं मादृशे भक्ते तव नास्ति किलेत्ययम् । ब्रुवन् वर्णपरीक्षार्थं किञ्चिच्छित्वा सुवर्णके ॥ २५ ॥
तत्सर्वमापगातोये क्षिप्त्वा प्राप चिदम्बरम् । स्तुत्वा गानाट्टनगरं गन्तुकामे तु सुन्दरे ॥ २६ ॥
मार्गेऽभ्येत्य वृषारूढस्तस्मै रूपमदर्शयत् । दृष्ट्वा स्तुत्वाथ सन्तुष्टः पश्चादन्यस्थलानि च ॥ २७ ॥
गीत्वा स्तुत्वा निषेव्याप पुनस्तत्कमलालयम् । सम्प्राप्य परवागेहं वृत्तान्तं सर्वमूचिवान् ॥ २८ ॥
द्रव्यं द्वादशसाहस्रं वृद्धाचलपुरेश्वरात् । आत्तं तद्वोढुमीशानमक्षमोऽभ्यर्थयं शिवम् ॥ २९ ॥
स प्राह नद्यां क्षिप्त्वात्र त्वत्पुरे कमलालये । मार्गितं चेन्मत्प्रभावात्तन्नायास्यति तद्धनम् ॥ ३० ॥
इत्युक्तः शंभुना द्रव्यं क्षिप्त्वा तत्र नदीजले । अत्रागतोऽहं परवे श्वः प्रातस्तीर्थपाथसि ॥ ३१ ॥
गत्वा द्रव्यं गृहीतव्यं ब्रुवन्तमिति सावदत् । परिहासवदाभाति वचस्ते सुन्दराधुना ॥ ३२ ॥
नद्यां क्षिप्तं तटाकेऽस्मिंस्त्वं प्रत्यसे त्वं ध्रुवं धनम् । इत्युक्त्वा प्रातरुत्थाय तत्तटाकं सहामुना ॥३३॥
गत्वाद्भुतमतिष्ठत्सा वीक्षितुं तीर्थरोधसि । तीर्थस्यैशान्यकोणेऽभ्यस्यवगाह्य स सुन्दरः ॥ ३४ ॥
मृगयामास सर्वत्र पङ्के पादयुगेन तु । शिवाज्ञयाभूत्तल्लीनं परवा प्राह तं तदा ॥ ३५ ॥
सारिक्षिप्तं तटाके किमागमिष्यति तद्धनम् । आयाहि तीरं गच्छावो गृहमित्यभिधाय सा ॥ ३६ ॥
हस्ततालं वितन्वाना जहास परवा यदा । परिहासोक्तिमाकर्ण्य खिन्नस्तुष्टाव शङ्करम् ॥ ३७ ॥
पद्यानामष्टके क्लेशादुक्ते शंकरवैभवात् । आविर्बभूव प्रत्यक्षाद्धनमम्भसि पुप्लुवे ॥ ३८ ॥
आदाय स्वकरस्वर्णे तत्स्वर्णे निकषोपले । परीक्षिते स्वकरगे स्वर्णे चोत्तमवर्णके ॥ ३९ ॥
लुप्तवर्णे तत्सुवर्णेऽगायत्तद्वर्णपूर्तये । स्वर्णं सुवर्णमभवद्गीते तुल्यं शिवाज्ञया ॥ ४० ॥
तदादाय स्तुवन् शंभुं परवायै ददौ धनम् । चिरं तया सुखं भुक्त्वा पश्चात्तत्कमलालयात् ॥४१॥

शिवस्थानानि सर्वाणि सेवितुं निर्जगाम ह ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रे एकोनषष्टितमोऽध्यायः ॥

॥ अथ षष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

गत्वामृतघटेशानं स्तुत्वा छायावनेश्वरम् । स्तुत्वा श्वेतवनं प्राप्य गीत्वा द्राविडगानकैः ॥ १ ॥
त्यक्त्वा विशालनगरं कोलारण्यगतिस्पृहम् । रुद्राध्वनीशो दयया स्वस्वरूपमदर्शयत् ॥ २ ॥
तं नत्वा तत्स्थलं प्राप्य गीत्वा द्राविडसूक्तिभिः । कुरुकानगराभ्यर्णे मार्गे दूरागतानुगः ॥ ३ ॥
संप्राप्य मरुकान्तारमातपार्तकलेबरः । क्षुधितस्तृषितो मूर्च्छायुक्तः शिव शिवेति च ॥ ४ ॥
उक्त्वा गच्छति तस्मिन् वै प्रपामुत्पाद्य शंकरः । मरुभूमौ महाकूपं शीतच्छायं च निष्कुटम् ॥ ५ ॥
बद्धान्नमावहन् विप्रवेषेणाविरभूच्छिवः । तं वृद्धं विप्रमालोक्य मूर्च्छितः सुन्दरः श्रमात् ॥ ६ ॥
शिवाय नम इत्युक्त्वा प्रपावेद्यामतिष्ठत । व्यजनेन तदा शंभुर्व्यपोह्याध्वश्रमं पुनः ॥ ७ ॥
क्षुधितस्त्वमिवाभासि दध्यन्नं भुज्यतामिति । प्रार्थितस्तेन वृद्धेन न निवार्यमिति स्मरन् ॥ ८ ॥
बुभुजेऽन्नमयं पश्चादागताः परिचारकाः । भुक्तं तैरन्नमपि तद्वृधे शिवशासनात् ॥ ९ ॥
पश्चाद्ये ये समायान्ति मार्गे पान्था बुभुक्षवः । तेषामप्यन्नमभवदभिवृद्धं शिवाज्ञया ॥ १० ॥
भुक्त्वा सुष्वाप तत्रायं सुन्दरस्तु प्रपान्तरे । तदेशमायया कूपो निष्कुटश्च प्रपापि च ॥ ११ ॥
वृद्धोऽपि तद्वनप्रान्तादन्तर्धानमगात्क्षणात् । सुप्तोत्थितः पुनर्वीक्ष्य मरुभूमिमथातपम् ॥ १२ ॥
अदृष्ट्वा वृद्धमच्छोदं कूपं चापि प्रपामपि । खिन्नो भूत्वा शिव इति मत्वा तत्कुरुकापुरम् ॥ १३ ॥
प्राप्य स्तुत्वा महादेवं पश्चादाप चिदम्बरम् । गीत्वा स्तुत्वा चित्सभेशं तत्प्रान्तस्थस्थलान्यपि ॥
गत्वा गीत्वा निषेव्याथ गृध्राचलमुपेत्य च । स्तुत्वा कच्छपुरं प्राप तत्र शंभुं प्रणम्य च ॥ १५ ॥
वाग्भिः स्तुत्वा गोपुरस्य बहिरागत्य सुन्दरः । परिचारकसङ्घे स्वं जवादननुयायिनि ॥ १६ ॥
अतीव क्षुधितो भूत्वा किंकर्तव्यमिति स्मरन् । आस्ताथाग्रेऽस्याविरभूदीशो वृद्धद्विजाकृतिः ॥ १७ ॥
अभ्येत्य सुन्दरं प्राह क्षुत्क्षान्त इव भासि मे । हस्ते न किञ्चिदप्यस्ति ह्यटन् भिक्षां तवोदनम् ॥
दास्यामि भुङ्क्ष्व विप्रेन्द्रेत्युक्त्वा भिक्षामथाग्रहीत् । गृहे गृहे गृहीत्वान्नं भोजयामास सुन्दरम् ॥
भुक्त्यनन्तरमीशोऽसौ वृद्धरूपी तिरोहितः । तिरोहितेऽथ निर्विण्णः शिव एवेति चिन्तयन् ॥ २० ॥
पुनः स्तुत्वा महादेवं काञ्चीपुरमवाप सः । एकाम्रनाथं संस्तुत्य कामाक्षीं कच्छपेश्वरम् ॥ २१ ॥
निषेव्यान्यस्थलान्येष गीत्वा नत्वा क्रमेण सः । ओणकान्तपुरेशानं धनार्थी समवायत ॥ २२ ॥
शिवाल्लब्ध्वा धनं तत्र हरिमुक्तीश्वरं गतः । तत्र स्तुत्वाथ संप्राप कालहस्तिस्थलं महत् ॥ २३ ॥
कालहस्तीश्वरं गीत्वा स्तुत्वा नत्वा विशेषतः । तत्रैव च चिरं स्थित्वा केदारेशमगायत ॥ २४ ॥

कैलासे स्थितमस्तौषीच्छ्रीकण्ठपरमेश्वरम् । पश्चाच्छ्रीबन्धकपुरं प्रापार्यं सुन्दरः कविः ॥ २५ ॥
तत्रत्याः शम्भुभक्तास्तं प्रत्युद्गम्यानयन् पुरीम् । तत्रत्यत्यागराजं तु स्तुबंश्चिरमवस्थितः ॥ २६ ॥
तदा श्रीबन्धकपुरप्रान्ते भानुपुरेऽङ्घ्रिजः । वृद्धः कश्चिदभूत्तस्य गौरीशापादनिन्दिता ॥ २७ ॥
शृङ्खलेत्याख्यया पुत्री जातासीत्कोमलाकृतिः । पितृभ्यां ववृधे बाला लालितेन्दुकलेव सा ॥ २८ ॥
शैशवं समतिक्रम्य क्रमाद्यौवनमाप सा । सौन्दर्यं वीक्ष्य कौशल्यमस्याः प्राह पिता स्त्रियम् ॥
कस्मै देया भवेदस्याः सदृशः कः पतिर्गुणैः । इति ब्रुवन्तमाहेयं मदुद्वाहविचारणा ॥ ३० ॥
युवयोर्मास्तु हे तात पतिर्मे स्याच्छिवाज्ञया । न वृणेऽन्यानहं मर्त्यान् श्रीबन्धकपुरेश्वरम् ॥ ३१ ॥
निषेव्य व्रतिनी भूत्वा तस्य तिष्ठामि सन्निधौ । अहमेव शिवोपास्त्या पतिं यामीशशासनात् ॥
एवं वदन्तीं तां पुत्रीं पारिणेतुमिमं प्रति । शूद्रेषु बान्धवेष्वेकः प्रेषयामास पत्रिकाम् ॥ ३३ ॥
कन्या मे शंकरोपास्त्या भर्तारं प्राप्स्यति स्वयम् । देवतारूपिणी कन्या मया दातुं न शक्यते ॥
प्रतिपत्रं विसृज्यैवं पुत्र्या सम्प्रार्थितः पिता । श्रीबन्धकपुरं प्राप्य निजवध्वा सहाङ्घ्रिजः ॥ ३५ ॥
गत्वा स्तुत्वा शिवं नत्वा कन्यागेहं विधाय च । तद्गेहे स्थाप्य तां पुत्रीं संयोज्य च सखीजनैः ॥
द्रव्यं च दत्वा बहुलं दृष्ट्वा पुत्रीं रुदन् सृजन् । पत्न्या सार्धं जगामायं स्वगृहं शूद्रवल्लभः ॥ ३७ ॥
गते पितरि सा कन्या शंभुकैङ्कर्यलालसा । सखीभिः पुष्पमाहृत्य माला निर्माय चान्वहम् ॥ ३८ ॥
समर्पयित्वा देवाय सेवां स्तोत्रं प्रदक्षिणम् । कृत्वा नियमशीला सावर्तत प्रत्यहं तथा ॥ ३९ ॥
गते तु कतिचित्काले सुन्दरः सेवितुं शिवम् । आगतश्चालये सासीन्मालानिर्माणमण्टपे ॥ ४० ॥
तां तिरस्करिणीलीनामन्यालोकनवर्जिताम् । क्वचित्कोणे स्थितां नम्रमुखीमेनामनिन्दिताम् ॥ ४१ ॥
निर्मात्रीं मालिकां शंभोः सुन्दरः सन्ददर्श ताम् । उन्नतस्तनभाराढ्यामुद्यन्मीनाभलोचनाम् ॥
उपमारहितां मेने साक्षात्स्मरवधूमिव । पुनः पुनश्च तां वीक्ष्य मुमोह विरहातुरः ॥ ४३ ॥
तदन्तिकस्थाः पप्रच्छ केयमिन्दुकलेव मे । आह्लादयति चित्तं च नेत्रे च करणानि च ॥ ४४ ॥
इति पृष्टास्तु ताः प्राहुर्भान्वाख्यः शूद्रवल्लभः । पुरेऽस्ति तस्य पुत्रीयं शृङ्खला नाम विश्रुता ॥ ४५ ॥
त्यक्त्वा तु मातापितरावनूढा शंभुसन्निधौ । वसन्ती शिवकैङ्कर्यं रचयन्तीह वर्तते ॥ ४६ ॥
इत्याकर्ण्य वचस्तासां सुन्दरः क्षुभितेन्द्रियः । अवाप्तुकामस्तामेतां तं त्यागेश्वरमस्तुवत् ॥ ४७ ॥
स्तुत्वा नत्वा च बहुधा गीत्वा गानैः पुनः पुनः । अप्रार्थयन्महाकामी मन्मथास्त्रेण पीडितः ॥ ४८ ॥
एवं प्रार्थयमानाय सुन्दराय सदाशिवम् । अदत्वा वाञ्छितं तस्मै जगामार्कोऽस्तपर्वतम् ॥ ४९ ॥
उदिते सति शीतांशौ सर्पिषेव यथानलः । सुन्दरस्याङ्गमाक्रम्य विरहाग्निर्व्यजृम्भत ॥ ५० ॥
तद्ध्यानास्तात्मनियमजपसन्ध्याविधिक्रमः । सायं पूजावसाने तु गायन् गायन्ननुक्षणम् ॥ ५१ ॥
शंकरं प्रीणयामासानिन्दितात्मतये भृशम् । तदा दयालुस्त्यागेशो वाण्यातन्व्याह सुन्दरम् ॥ ५२ ॥
प्रातः संयोजयिष्यामि शृङ्खलाख्यामिमां त्वया । मा विषादं भजात्र त्वं सन्देहो मास्तु मद्गिरि ॥ ५३ ॥

इत्याकर्ण्य वचः शंभोः परां प्रीतिमवाप्तवान् । तन्निश्चयनिन्दितां प्राप्य स्वप्ने ब्राह्मणवेषवान् ॥ ५४ ॥
शंभुः प्राहायि सुश्रोणि गिरमाकर्णयाधुना । मद्भक्तः सुन्दरो नाम वर्तते मम सन्निधौ ॥ ५५ ॥
तं वृणीष्वानवद्याङ्गि भर्तारं मम शासनात् । इत्युक्ता प्रत्युवाचाथ शृङ्खला सा विशृङ्खला ॥ ५६ ॥
प्रणता विनयेनैव तद्वृत्तान्तं ब्रुवे शृणु । काचिदस्यस्य वनिता परवा कमलालये ॥ ५७ ॥
तया विना क्षणं वापि तिष्ठतीह न सुन्दरः । पतिं कथं तं यास्यामि कामुकाग्रेसरं वद ॥ ५८ ॥
इत्युक्तः स पुनः प्राह शृङ्खलां स महेश्वरः । अत्रैव निवसामीति शपथं सन्निधौ मम ॥ ५९ ॥
करिष्यति स भर्तारं सुन्दरं भज भामिनि । उक्त्वैवं सुन्दरं प्राह तद्वृत्तान्तमशेषतः ॥ ६० ॥
तथास्त्वहं करिष्यामि शपथं तव सन्निधौ । यावच्छपथकर्तास्मि तावद्भगवता त्वया ॥ ६१ ॥
पश्चाद्वकुळमूलेऽत्र स्थातव्यमिति चार्थितः । तथोमिति ब्रुवञ्छंभुरवाप्यानिन्दितां तु ताम् ॥ ६२ ॥
श्वः प्रातः सुन्दरः सत्यं करोमीति ममाग्रतः । आगतश्चेच्छिवस्याग्रे शपथो मास्तु मास्त्विति ॥ ६३ ॥
उक्त्वा वकुळमूलेऽलमिति ब्रूहीति तामशात् । दृष्टेति बुद्ध्वा सा स्वप्ने समुत्थाप्य सखीजनान् ॥
स्वप्नवृत्तान्तमुक्त्वाथ ताभिर्विस्मयमाययौ । सन्तुष्टः सुन्दरः प्रातः शपथं कर्तुमुद्यतः ॥ ६५ ॥
प्राप्य प्राग्गोपुरद्वारं शिवस्य परमात्मनः । प्रतीक्षमाणः सोऽन्वास्त शृङ्खलागमनं द्रुतम् ॥ ६६ ॥
तदा साप्यागता तत्र सखीभिः सह सत्वरम् । तामाह सुन्दरः पूर्वं त्वया साकं वसाम्यहम् ॥ ६७ ॥
अत्रेवेति करिष्यामि शपथं शंभुसन्निधौ । इति ब्रुवन्तमाहैका तत्सखी तत्प्रचोदिता ॥ ६८ ॥
अलं वकुलमूले स्याच्छपथो नेशसन्निधौ । इत्युक्तो भीतहृदयो यद्वा तद्वा भवेन्मम ॥ ६९ ॥
इति निश्चित्य मनसा तया सह विनिर्गतः । गत्वा वकुळमूलं त्रिः कृत्वा तस्य प्रदक्षिणम् ॥ ७० ॥
यावज्जीवं त्वया साकं वसाम्यत्रैव शृङ्खले । तत्साक्षी शङ्करो विद्यात् सत्यमुक्तं मृषा न मे ॥ ७१ ॥
इत्युक्त्वा वकुळाग्रेऽयमकरोच्छपथं कविः । तदा तच्छपथात् खिन्ना चकिताङ्गी पिनाकिनः ॥
लीलेयमिति मन्वाना नत्वा शंभुं तदास्तुवत् । तयोर्भक्त्यातिसन्तुष्टः कल्याणमुभयोरपि ॥ ७३ ॥
कर्तुकामः स्वभक्तानां स्वप्ने तत्क्षेत्रवासिनाम् । गत्वेशो विप्रवेषेण प्राहः कल्याणमेतयोः ॥ ७४ ॥
कारयध्वं समेताश्चेत्याह शंभुः पृथक् पृथक् । प्रातरुत्थाय ते सर्वे समेता अतिविस्मिताः ॥ ७५ ॥
यथा स्वप्ने शिवेनोक्तं तथोद्वाहमकारयन् । उद्वाह्यानिन्दितामीशकृपयासौ महाकविः ॥ ७६ ॥
तयानिन्दितया भोगं तत्र भुक्त्वावसच्चिरम् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शृङ्खलाविवाहो नाम षष्टितमोऽध्यायः ॥

॥ अथैकषष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

एकदा मन्दपवनवीजितः सुन्दरः स्वयम् । अस्मरत्यागराजेशं परवां कमलालयम् ॥ १ ॥

सद्यो विकृतचित्तोऽसावज्ञातो निरगान्निशि । एकाकी संप्रतस्थे स यदा तच्छ्रीपुरं प्रति ॥ २ ॥
पुरसीमावसानेऽस्यासत्यदोषादुपागमत् । आन्ध्यं च कुष्ठरोगश्च ताभ्यां रुग्भ्यां सुदुःखितः ॥ ३ ॥
पथि गन्तुमशक्तः सन् सन्निवृत्य पुरं पुनः । नेत्रं देहि ममेशेति शिवं स्तोत्रैरयाचत ॥ ४ ॥
तूष्णीं स्थिते विनिर्गत्य माधवीपुरवासिनम् । गीत्वेशं स पुनर्गीत्वा छायाश्वेतपुरेश्वरम् ॥ ५ ॥
तूष्णीं स्थितेऽस्मिन् कुपितः प्राहैवं शंकरं प्रति । ईशोऽस्मिन्नालये वास्ति न वा किमिति वादिनी ॥
भीतः शिवोऽपि निर्गत्य तिष्ठाम्यत्रैव सुन्दर । इत्युक्त्वादाद्ददां तस्मै सौवर्णीं मार्गदर्शिनीम् ॥ ७ ॥
तामादाय वटारण्यं गत्वा गीत्वा निषेव्य च । पश्चात् काञ्चीपुरं गत्वा कामाक्षीं संप्रणम्य सः ॥ ८ ॥
एकाम्रनाथं संसेव्य नेत्रं देहीत्ययाचत । ध्यायन् जपन् नमन् गानैरर्चयन्नेत्रमार्थयत् ॥ ९ ॥
स्तुवन्तं प्रणमन्तं तं दृष्ट्वा शम्भुर्दयाकरः । सोमाग्निरविनेत्रोऽस्मै कामाक्षाहतचक्षुषे ॥ १० ॥
कामाक्षीरमणो देवो वामाक्षार्पणमादधे । प्राप्तैकनेत्रो मुदितः प्रणम्यैकाम्रनायकम् ॥ ११ ॥
कामाक्षीं संप्रणम्याथ वामाक्षीं परवामपि । मनसा संस्मरन् गन्तुमुद्युक्तः कमलालयम् ॥ १२ ॥
प्रतिप्रस्थानगेयानि प्रतस्थे रचयन्नयम् । तस्मात् क्षेत्राद्विनिर्गत्य तत्रत्यानि स्थलानि च ॥ १३ ॥
निषेव्य गीत्वा क्रमशश्चोळदेशमगाहत । तत्र तत्र स्थलं गत्वा गीत्वा नेत्रार्थमीश्वरम् ॥ १४ ॥
कुष्ठालस्थलमासाद्य तुष्टाव परमेश्वरम् । स्वामिन् कुष्ठालदवेश कुष्ठाधिं त्वं व्यपोह्य मे ॥ ५५ ॥
अष्टापदाभं कृत्वाङ्गं तुष्टाशं कुरु मां शिव । इति स्तुत्वा महादेवं प्रणनाम पुनः पुनः ॥ १६ ॥
तत्स्तोत्रमुदितः प्राह शंभुराकाशरूपधृत् । स्नाहि सुन्दर तीर्थेऽस्मिन् कुष्ठाद्यामयनाशने ॥१७॥
स्नानमात्रात् सुवर्णाभो भविष्यसि न संशयः । इति श्रुत्वा वचः शंभोस्तीर्थे सस्नौ झटित्ययम् ॥
स्नानमात्रात् सुवर्णाभो भूत्वा कुष्ठादमुच्यत । तदा प्रभृति सर्वत्र तथा लोकत्रयेष्वपि ॥ १९ ॥
कुष्ठं लातीति तत्क्षेत्रं कुष्ठालमिति पप्रथे । ततः परं निषेव्येशं श्रीपुरं प्रति निर्गतः ॥ २० ॥
शनैः स्थलानि संसेव्य सम्प्राप कमलालयम् । एकनेत्रविहीनत्वाल्लज्जितः स तु सुन्दरः ॥ २१ ॥
गूढोऽज्ञातो निशीथिन्यां क्वचित् कोणे स्थितः पुनः । अन्धकारे पराज्ञातः प्राप्य त्यागेशमन्दिरम् ॥
निषेव्य बहुधा स्तुत्वा नेत्रं देहीति चार्थयत् । तदा दयालुस्त्यागेशो दक्षिणं नेत्रमप्यदात् ॥ २३ ॥
लब्धनेत्रः सुसन्तुष्टः सहस्रस्तम्भमण्टपम् । प्राप्य भक्तजनैः सार्धं सुखमास्ते स्म सुन्दरः ॥ २४ ॥
अथ स्वागमनं तस्यै विज्ञापयितुमुद्यतः । स्वदूतं प्रेषयामास परवामन्दिरं प्रति ॥ २५ ॥
गत्वा तद्भवनद्वारं भृत्यो वृत्तान्तमब्रवीत् । तदाकर्ण्यातिकुपिता जगाद परवा तदा ॥ २६ ॥
नो मृतः सुन्दरो धूर्तः शृङ्खलाबन्धनेन किम् । अत्र किं तस्य भवति शृङ्खलाबन्धनेऽर्हति ॥२७॥
इत्युक्त्वा भर्त्सयित्वा तं व्यधादररबन्धनम् । दूतो निरस्तः स तया सुन्दरायावदच्च तत् ॥ २८ ॥
पुनः सद्भिः समाधाने कृतेऽप्यफलिते सति । तस्याः श्रुत्वा महामर्षं किं कर्तव्यमिति स्मरन् ॥२९॥

परत्रावचनादतिखिन्नमतिः प्रणतः कमलालयनाथकविः ।
शरणं कमलालयनाथशिवं भजति स्म पटुं निजदौत्यविधौ ॥ ३० ॥
सहसा कृपया शिव आविरभूद्वृषवाहनगो नगराजसुवा ।
प्रणिपत्य तदा शशिमौळिमसौ भवता किल शृङ्खलया घटितः ॥ ३१ ॥
इदानीं परत्रा मह्यं कुप्यतीश प्रियापि मे । यथा सा सुमुखी भूयात्तथा कृत्वात्र रक्ष माम् ॥ ३२ ॥
इति तेनार्थितो भूत्वा शिवद्विजवराकृतिः । अभ्येत्य परत्रागेहमाह्वयामास सा भृशम् ॥ ३३ ॥
आह्वानध्वनिमाकर्ण्य विजघाट कवाटकम् । अन्तर्नीत्वार्घ्यपाद्यैरर्चयन्ती च भक्तितः ॥ ३४ ॥
किमद्य भवतो ब्रह्मन्नत्रागमनकारणम् । वदेति पृष्टः प्राहैनां शृणु कल्याणि मद्वचः ॥ ३५ ॥
मत्सख्युः सुन्दरस्यार्थे तवान्तिकमगामहम् । मदर्थं तेन साकं त्वं युक्त्वा क्रोधं विहाय तम् ॥ ३६ ॥
रमय त्वं यथापूर्वं मद्वाक्यं नानृतं कुरु । इत्युक्ता तेन कुपिता प्राह तं परत्रा तदा ॥ ३७ ॥
अर्चकस्येदृशं दौत्यमनर्हमिति शंसिनी । भर्त्सयामास गच्छेति क्षान्तमागस्तवाधुना ॥ ३८ ॥
एवं तया भर्त्सितोऽयं सुन्दरं प्राप शंकरः । आगते सिद्धसङ्कल्पे कार्यसिद्धिममन्यत ॥ ३९ ॥
स्तुवन्नमन् स पप्रच्छ गमनं सफलं किमु । इति पृष्टोऽब्रवीदेनं मद्वाक्यं सा शृणोति किम् ॥ ४० ॥
त्वन्नामश्रवणादासीत्कोपाग्नेर्धूमधूपिता । केनाप्यशक्यं तच्चित्तमनुरञ्जयितुं क्षितौ ॥ ४१ ॥
इत्युक्तः स पुनः प्राह तस्यां प्रीतिस्तवाधिका । नासीत्ते तादृशी प्रीतिर्मयि शंभोऽधुनापि च ॥ ४२ ॥
मैत्री कुतः स्यान्मम ते स्वामिभृत्यत्वमस्ति किम् । कस्माज्जम्बूपुरे पूर्वं गृहीता क्रयपत्रिका ॥ ४३ ॥
मैत्र्याववयोरलमलमिति कुप्यति सुन्दरे । विकारान्मूर्छिते भूमौ पतिते दुःखिते सति ॥ ४४ ॥
पुनर्यत्नं करिष्यामि मास्तु दुःखं तवेत्यसौ । ब्रुवन् शिवो विनिर्गत्य नन्द्यादिगणसंवृतः ॥ ४५ ॥
महावृषभमारुह्य ब्रह्मविष्ण्वादिसेवितः । दिव्यदुन्दुभिनिर्घोषैर्ययौ स परत्रागृहम् ॥ ४६ ॥
शिवद्विजे गते सा तु पुळकोद्गमनात्तनौ । शिवोऽयमिति मन्वाना चकिता वाक्यलङ्घनात् ॥ ४७ ॥
पुनरायति किं वेति द्वारि वीक्ष्यासकृत्स्थिता । सा तं शिवं समालोक्य नत्वा भक्तिपुरस्सरम् ॥ ४८ ॥
बहिःकक्ष्यास्थितेष्वन्येष्वेकं तं शिवमद्वयम् । अन्तःपुरं निनायेशं करं दत्वावलम्बनम् ॥ ४९ ॥
पर्यङ्के सन्निवेश्यामुं पाद्यार्घ्यैरुपचारकैः । सपर्यां विधिवत् कृत्वा कृतार्थास्मीत्यमन्यत ॥ ५० ॥
तदा शिवस्तामाहैवं न श्रुतं मद्वचः पुरा । अद्य वा शृणु मद्वाक्यं सख्या मे सुन्दरेण तु ॥ ५१ ॥
सङ्गता भव सुश्रोणि कोपं त्यज गिरा मम । इत्युक्ता कम्पिता भूत्वा न जाने त्वां शिवद्विजम् ॥
क्षमस्व कृपया स्वामिन्नपराधं मया कृतम् । यथा ह्यनुगृहीताहं स्वामिनेतः परं विभो ॥ ५३ ॥
तथा करिष्यामीत्युक्त्वा प्रणम्य च पुनः पुनः । सुन्दरः शीघ्रमायातु गृहं मे भवदाज्ञया ॥ ५४ ॥
इत्युक्तः शङ्करः सद्यः कटाक्षेणानुगृह्य ताम् । सख्युर्निकटमासाद्य सर्वं वृत्तं न्यवेदयत् ॥ ५५ ॥
निर्गत्येशाज्ञया सोऽपि सुन्दरः परत्रागृहम् । ययौ सापि समागत्य नत्वालिङ्गत्य मुदान्विता ॥ ५६ ॥

दत्वा करावलम्बं च नीत्वात्मान्तःपुरं ततः । डोलामञ्चगतं किञ्चिद्दोलानघ्नं वचोऽब्रवीत् ॥ ५७ ॥
त्यागेशपक्षमालम्ब्य सुखी स्यास्त्वं कियद्दिनम् । इत्यादिपरिहासोक्त्या कृत्वा प्रहसनं पुनः ॥५८॥
अरीरमत्तेन साकं सुन्दरोऽपि तया सह । अन्योन्यसौख्यमतुलं भुक्त्वा सुखमवापतुः ॥ ५९ ॥
श्रीबन्धकपुरादद्य सुन्दरं कमलालयम् । पुनरागतमाकर्ण्य चुकोप परवा भृशम् ॥ ६० ॥
तदर्थं त्यागराजोऽसौ तद्गृहं पूर्ववन्निशि । गत्वा दौत्यं चकारेति किंवदन्तीह पप्रथे ॥ ६१ ॥
तच्छ्रुत्वा कलिकामोऽपि कोपसङ्क्षुण्णमानसः । दुःखितोऽतीव भक्तोऽयमिदमाह तदा वचः ॥
लोके दौत्यं करोतीह भृत्यः स्वामिनिदेशतः । अयं पापी सुन्दरस्तु स्वामिनं भृत्यमादधे ॥ ६३ ॥
विष्णोरपि विमृग्येन पदा भुवि गतागती । अकरोत्सुन्दरस्यास्य कृते सर्वजगत्प्रभुः ॥ ६४ ॥
शरपातो यथा नेत्रे तथा शङ्करचङ्क्रमः । दुनोति हृदयं मेऽद्य कम्पतेऽङ्गं करोमि किम् ॥ ६५ ॥
अहो किमिति वक्ष्यामि शिवद्रोहं दुरात्मनः । अहो विटाग्रगण्योऽसि वेषच्छन्नोऽसि दुर्मते ॥ ६६ ॥
स्मृत्वा स्मृत्वेति दुःखार्तः सुन्दरं तं शिवद्रुहम् । कदाचिद्यदि पश्यामि स्वयं हन्तास्मि निश्चयः ॥
इति प्रतिज्ञामकरोत्तदाकर्ण्य स सुन्दरः । भीतभीतो विलीनः सन् गत्वा त्यागेश्वरं विभुम् ॥६८॥
नत्वा विज्ञापयामास तद्वृत्तान्तमशेषतः । श्रुत्वा त्यागेश्वरोऽत्यन्तं भीतवत्त्रिपुरान्तकः ॥ ६९ ॥
आलोच्य सुन्दरेणेशः किं कर्तव्यमिति स्मरन् । भक्तयोरुभयोर्मैत्रीं कर्तुं काञ्चित् क्रियां व्यधात् ॥
कलिकामस्य भक्तस्य कुक्षावक्षममामयम् । चोदयामास शूलाख्यमतिक्रूरतरं शिवः ॥ ७१ ॥
तेन शूलेन महता व्यथितो दुःखितो रुदन् । स्तुवञ्जपन् शिवं ध्यायन् पतन् भूमौ वदन् लुठन् ॥
त्यागेश रक्ष रक्षेति चुक्रोशार्तीव विह्वलः । तदास्य पत्नी बहुधा भैषज्यं समकारयत् ॥ ७३ ॥
कृतेऽपि बहु भैषज्ये नाशमज्जठरामयः । किमद्य बहु भैषज्यैः शिवो रुद्रो भिषङ्मम ॥ ७४ ॥
इति मत्वा शिवं ध्यायन् स्तुवन् गायन् नमन् स्थितः । तत्स्वप्ने शंभुरागत्य वृद्धब्राह्मणवेषवान् ॥
कलिकामाकर्णयेदं वाक्यं मत्तोऽवधानतः । अन्यैर्भिषग्भिर्भैषज्यैर्मन्त्रतन्त्रादिभिश्च ते ॥ ७६ ॥
अशक्यो जाठरो रोगो ह्यपाकर्तुं कथंचन । तवोदरगतः सद्यः सुन्दरालोकमात्रतः ॥ ७७ ॥
भस्मानुक्षेपमात्रेण रोगो नाशमुपैष्यति । इत्युक्तस्तमुवाचेदं कलिकामः क्रुधान्वितः ॥ ७८ ॥
शिवस्यामी वयं दासाः पापिनं तं शिवद्रुहम् । किं पश्येमामयस्यार्थे न पश्यामः कथञ्चन ॥ ७९ ॥
शिवद्रुहोदरव्याधिः शाम्यतीतीरितं त्वया । नावलोक्यः शिवद्रोही मास्तु तस्मादरोगता ॥ ८० ॥
किं तु रोगोऽस्तु तद्वक्त्रालोकनान्मरणं वरम् । इत्युक्त्वा भर्त्सयित्वा तमवसच्छूलपीडितः ॥ ८१
शिवः सुन्दरमभ्येत्य समीकृत्यागतं मया । तत्र गत्वा तु तद्रोगं परिमृश्य च भस्मना ॥ ८२ ॥
व्यपोह्यायाहि शीघ्रं त्वमित्युक्त्वा प्रेषयच्च तम् । श्रीसङ्गैः सह निर्गत्य सुन्दरे शंभुचोदनात् ॥
गते तु तद्गृहद्वारं कलिकामो निरीक्ष्य तत् । अनर्हं पापिनस्तस्य वक्त्रालोकनमित्ययम् ॥ ८४ ॥

अन्तरागमनात्पूर्वं शूलेन स्वोदरं स्वयम् । चकर्तान्त्रं बहिष्कुर्वन् साहसी कलिकामकः ॥ ८५ ॥
पत्नी तस्याभिगच्छन्ती निवार्यानुगरोदनम् । यथोपचारं भृत्यौघैः सुन्दरं गृहमागतम् ॥ ८६ ॥
अन्तर्गतार्चयामास प्रच्छाथ पतिमात्मनः । पूजितः सुन्दरोऽथाह कलिकानः क्व वेति ताम् ॥८७॥
तद्रोगशमनायाहमत्रागामीशशासनात् । इत्याकर्ण्य वचः साध्वी प्राह भृत्यमुखेन सा ॥ ८८ ॥
युष्मदागमनात्पूर्वं शूलरोगोऽस्य मत्पतेः । शान्तो निद्राति मे भर्ता सुखं युष्मत्कृपावशात् ॥ ८९ ॥
स्मर्तव्यास्तत्र युष्माभिरनुग्राह्या वयं किल । अस्माकमपचारायाकस्माद्यूयमिहागताः ॥ ९० ॥
पूजितोऽप्युपचारोक्त्या पुनः प्राह वचः स ताम् । यथा कथञ्चिद्द्रष्टव्यः कलिकामः पतिस्तव ॥
तत्सन्दर्शनसल्लापैः स्नेहं कर्तुमिहागतः । तस्मात्त्वं दर्शयेत्युक्ता च्छिन्नोदरमदर्शयत् ॥ ९२ ॥
तं छिन्नोदरमालोक्य सुन्दरो भयकम्पितः । तदा शिव शिवेत्युक्त्वा सुन्दरोऽत्यन्तदुःखितः ॥९३॥
कलिकामः शंभुभक्तो मदर्थेऽसून् यदत्यजत् । तस्मादस्यायुधे प्राणांस्त्यक्ष्यामीति वदन् गिरम् ॥
आदाय खड्गं तत्रस्थं कण्ठे संस्थाप्य चात्मनः । छेतुं स्वशीर्षमुद्युक्ते सुन्दरे निन्दितात्मनि ॥९५॥

तदा मृतोऽयं कलिकामनामा शिवाज्ञया जीवनमेत्य शीघ्रात् ।
उत्थाय मास्त्वद्य मृतिस्तवेति रुरोध हस्तावबलम्ब्य तस्य ॥ ९६ ॥

तं सुन्दरं ननामायमालिलिङ्गामुमेव सः । आलोक्य विस्मिताः सर्वे तदाभूवञ्जनाः किल ॥ ९७ ॥
पुष्पवृष्टिरभूद्व्योम्नि तत्राभूद्दुन्दुभिध्वनिः । विनिर्गत्य ततस्तस्मात् स्वावासात् कलिकामकः॥९८॥
सुन्दरेण ततः प्राप शंभुक्षेत्राणि तौ मुदा । निषेव्य गीत्वा क्रमशः कमलालयमापतुः ॥ ९९ ॥
भक्तैः स्थित्वा चिरं तत्र देवताश्रयमण्टपे । शिवं स्तुवन्नमन् गायन् कलिकामोऽतिभक्तिमान् ॥
त्यागराजप्रसादेन सायुज्यं प्राप कालतः ॥ ॥ १०० ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कलिकामुक्तिप्राप्तिर्नाम एकषष्टितमोऽध्यायः ॥

॥ अथ द्विषष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

श्रूयते हि महाशैलः स्मरणादघनाशनः । सिद्धचारणगन्धर्वमुनिकोटिनिषेवितः ॥ १ ॥
यत्र सर्वेश्वरः श्रीमान् शंभुराकाशमध्यगः । स्कन्दविघ्नेशसहितः सह देव्याखिलाम्बया ॥ २ ॥
निवसत्यब्जसम्भूतहरिमुख्यसुरैः स्तुतः । काचित्पक्कणकोटीषु यत्र साप्यळकापुरी ॥ ३ ॥
षष्टयष्टकोटिगणपनीरन्ध्रशिखरश्च यः । यत्र सौगन्धिकं नाम सरः सुरभिहल्लकम् ॥ ४ ॥
यत्र मन्दाकिनी रम्या प्रवहन्ती न दृश्यते । यः शंकरजटाचन्द्रकलिकाचन्द्रिकोज्ज्वलः ॥ ५ ॥

अमावास्यां न जानाति निश्शेषितसुधाकराम् । यदीयशिखरं दृष्ट्वा पुनर्गर्भे न मज्जति ॥ ६ ॥
यं न पश्यन्ति पापिष्ठाः कामक्रोधान्धचेतसः । तत्र सिद्धेषु कैलासे मूलनाथ इति श्रुतः ॥ ७ ॥
परकायप्रवेशादौ शक्तिमान् भक्तिमान् हरे । जातु बुद्धिरमुष्यासीत् स्थानेषु धरणीतले ॥ ८ ॥
सर्वत्र सेवितुं शंभुं प्रतस्थे व्योममार्गतः । न कैलासात् परं किञ्चित् पदमस्ति न गम्यताम् ॥
सिद्धैरेवं निरुद्धोऽपि ततः प्रस्थित एव सः । केदारे चाविमुक्ते च गोकर्णे मल्लिकार्जुने ॥ १० ॥
कालहस्तिस्थले दिव्ये विश्रुते चारुणाचले । श्रीमद्वृद्धाचले काञ्च्यां पुण्डरीकपुरे हरम् ॥ ११ ॥
सेवमानः क्रमेणाप कावेरीतीरमुत्तमम् । वेदारण्ये पुरे लक्ष्म्याः कावेरीसिन्धुसङ्गमे ॥ १२ ॥
छायावने श्वेतवने मायूरे चाघनाशने । निषेव्य देवमीशानं गवावतरमभ्यगात् ॥ १३ ॥
श्रुत्वा तु गोकुलाक्रोशं गत्वाभ्याशं गवामयम् । बाष्पायमाणनयनं मूलनाथो गवां कुलम् ॥ १४ ॥
दृष्ट्वा तत्सविधं गत्वा किमेतदिति शङ्कितः । परितः प्रेक्षमाणस्तु गोपालं मृतमैक्षत ॥ १५ ॥
कण्डूविनोदैश्च तृणैः छायाभिः सलिलैर्गवाम् । स कुलं पोषयामास गावस्तच्छोककर्शिताः ॥ १६ ॥
यथा नष्टेषु वत्सेषु तृणेष्वपि गतस्पृहाः । विलोक्य दयया कार्यं कथं स्यादित्यचिन्तयत् ॥ १७ ॥
योगशक्त्या निकुञ्जे स्वं देहं विन्यस्य स क्वचित् । नासिकादृष्टिमार्गेण प्राणैस्तद्वपुराविशत् ॥ १८ ॥
अथ सद्यः समुत्तस्थौ गोपः सुप्तोत्थितो यथा । गावो हृष्टास्तदा सर्वाः पीत्वामृतमिवाभवन् ॥ १९ ॥
आसायं चारयित्वा गाः प्रदोषे पुरमाविशत् । वासनावासितं वर्त्म ययौ गेहं तदङ्गना ॥ २० ॥
क्षीरान्नैर्भोजयित्वा तं निशि तच्छयनं ययौ । व्रज दूरे स्पृश न मामिति यावदुवाच सः ॥ २१ ॥
परिहास इति ज्ञात्वा सा बलादालिलिङ्ग तम् । गोपः शिव शिवेत्युक्त्वा निर्ययौ सहसा बहिः ॥
मातृग्रहेण ग्रस्तो वा महानुन्माद एव वा । भवेदस्य शिवेत्युक्तिर्वैष्णवस्य श्रुता कदा ॥ २३ ॥
इति सा विह्वला गोपी निशि बन्धूनमेळयत् । निशीथे मिळिताः सर्वे किं किमित्यन्वयुञ्जत ॥ २४ ॥
अनुयुक्ता च सा गोपी वृत्तान्तं तं व्यजिज्ञिपत् । मायागोपश्च तत्पृष्टः किमेवं धीरिहेति तैः ॥ २५ ॥
नोन्मत्तो न ग्रहग्रस्तो विरक्तोऽस्मीत्यभाषत । अलङ्घ्या दैवगतिरित्युक्त्वा सर्वे गता जनाः ॥ २६ ॥
रुदित्वा सा चिरं गोपी निर्विण्णा प्राविशद्गृहम् । आमोदितगुरन्येद्युर्विविक्षुः स्वां तनुं पुनः ॥ २७ ॥
निकुञ्जे नात्मनो मूर्तिं मूलनाथो ददर्श ताम् । प्रणिधानस्थितः सर्वं निरचैषीद्विलोक्य सः ॥ २८ ॥
वेदान्तसंप्रदायस्य वृद्धयर्थं पाशुपालिकीम् । प्रवेशितस्तनूमस्मि शंभुना सर्वसाक्षिणा ॥ २९ ॥
स्वपुर्निकुञ्जनिक्षिप्तमाज्ञयास्य तिरोहितम् । इति गोपालतां प्राप्तः सर्वैर्लोकैश्च वन्दितः ॥ ३० ॥
श्रीमन्नाख्यं प्रबन्धं स द्राविड ज्ञानसारतः । शैवं प्रबन्धं निर्माय शिवानन्दानुभूतिमान् ॥ ३१ ॥
यथा नियुक्तोऽस्मीशेन करोम्येवमिति स्मरन् । विचचार महायोगी पूज्यमानो मुनीश्वरैः ॥ ३२ ॥
अध्यात्मविद्यां व्याकुर्वन्नन्नयत्समयं बहु । गवावतारमासाद्य देवस्याग्रे समुन्नतम् ॥ ३३ ॥

आश्रितः पिप्पलतरुमन्वहं ध्यानमास्थितः । दक्षश्चर्याक्रियायोगे विन्यस्तात्मा महेश्वरे ॥ ३४ ॥
क्रमेणोन्मुक्ततन्मूर्तिः शैवे ज्योतिष्यलीयत ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मूलनाथमुक्तिप्राप्तिर्नाम द्विषष्टितमोऽध्यायः ॥

॥ अथ त्रिषष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

शिवालयतटाकाद्यो मृत्तिकामुद्धरेत्स्वयम् । स शिवस्य प्रसादेन न पुनः शोकमाप्नुयात् ॥ १ ॥
कश्चिद्दण्डीति विख्यातो भक्तोऽभूत्यागनायके । जातस्तत्रैव वसतिमकरोत् कमलालये ॥ २ ॥
जात्यन्धः श्रवणात्तस्य शिवे भक्तिरजायत । अन्धस्य मे कथं मुक्तिः स्यादित्येष विचिन्तयन् ॥ ३ ॥
कमलालयतीरस्थं ब्राह्मणं शरणं गतः । ब्राह्मणः सोऽपि तं प्राह चक्षुषारूपदर्शनम् ॥ ४ ॥
देहिनः संसृतौ हेतुरिति नेत्रं मुनीश्वराः । निमीलयित्वा ध्यायन्ति ब्रह्म ज्योतिः सनातनम् ॥ ५ ॥
तदभावात्कृतार्थस्त्वमन्धोऽहमिति मा शुचः । मुक्तिहेतुं तु वक्ष्यामि सावधानमनाः शृणु ॥ ६ ॥
पश्चाद्भागे महेशस्य तीर्थमेतन्महत्कुरु । खातवेणुद्वयान्तः स्थां रज्जुमालम्ब्य मृत्तिकाः ॥ ७ ॥
दूरीकुरुष्व पञ्चार्णं जप नित्यमतन्द्रितः । एवं चेन्मुक्तबन्धस्त्वं भविष्यसि न संशयः ॥ ८ ॥
स एवमुक्त्वा पञ्चार्णं तस्मै मन्त्रमुपादिशत् । प्रजपन् स परं मन्त्रं खनित्रपिटकाधरः ॥ ९ ॥
कृत्वा शिरसि मृद्भारं रज्जुमालम्ब्य गच्छति । तथैव पुनरायाति दण्डी मृत्खननाय सः ॥ १० ॥
तस्यैवं वर्तमानस्य ययौ वर्षत्रयं द्विजाः । तत्खन्यमानं सुमहदगाधं च शनैरभूत् ॥ ११ ॥
तमागत्य जिनाः केचिद्धसन्तो वाक्यमब्रुवन् । वृथायासेन जात्यन्ध किमनेन भविष्यति ॥ १२ ॥
अस्मदालयमागत्य खातमृत्कुरु भित्तिकाम् । दास्यामो वेतनं नित्यं तेनात्मभरणं भवेत् ॥ १३ ॥
दण्डीत्याह शिवः सर्वं सर्वसाक्षी प्रदास्यति । श्रीकर्मकरणं तस्य प्रीतये विदुरुत्तमाः ॥ १४ ॥
भवन्तो नैव जानन्ति महिमानं पिनाकिनः । प्रसन्ने सति गौरिशे किमसाध्यं शरीरिणाम् ॥ १५ ॥
इत्युक्तास्ते पुनः प्रोचुः परिहासात्तथागताः । सत्यमान्ध्यनिवृत्तिं स विधास्यति तवेश्वरः ॥ १६ ॥
दण्डी त्वथ विनिश्वस्य प्राह भूयः स सौगतान् । अनान्ध्यं मे तथान्ध्यं वो वाञ्छितं चेद्विधास्यति ॥
विकलानां परीहासाद्भवन्ति विकला जनाः । इत्युक्ताः कुपिता मौर्ख्याद्वेणुं रज्जुं च हेतिना ॥ १८ ॥
अन्धालम्बनमारोढुमवरोढुं च चिच्छिदुः । तेषु कश्चन दुष्टात्मा खनित्रं तत्करस्थितम् ॥ १९ ॥
अपहृत्यान्यतो यातोऽशक्तस्तदनुधावने । रुदन् सन्निधिमभ्येत्य पाणिभ्यां प्रहतोदरः ॥ २० ॥
त्यागराज क्व यातोऽसि यत्रस्थो दुरात्मनाम् । आन्ध्यमद्यैव भवतु श्रीकर्मकरणाय ते ॥ २१ ॥

भूयादनान्ध्यं मम चेत्युक्त्वा प्रत्यश्रृणोत्पुनः । न मेऽस्त्यकृत्वा श्रीकर्म मुक्तिर्यावन्न शिक्षिता ॥२२॥
त्वया जिना भवन्त्यन्धा न मे त्यागेश वाङ्मृषा । कृत्वा प्रतिज्ञां सुदृढामेवं तिष्ठति दण्डिनि ॥ २३ ॥
रविरस्तं गतः प्राप्तं सर्वान्धङ्करणं तमः । अनश्नन्नवसद्दण्डी शंभोरग्रे स्वपन्निशि ॥ २४ ॥
स्वप्ने तमाह त्यागेशस्तव नेत्रे भविष्यतः । भविष्यन्ति जिनाश्चान्धा राज्ञा हृतधनादिकाः ॥ २५ ॥
यत्र क्वापि गमिष्यन्ति श्वः प्रातः सत्यमुच्यते । इति दण्डिनमाश्वास्य राजानं प्राह शङ्करः ॥ २६ ॥
जैनैरुपद्रुतो दण्डी सन्निधौ वर्तते मम । श्रीकर्मकारिणस्तस्य खनित्रं यद्धृतं बलात् ॥ २७ ॥
उपोषितः शुचाविष्टस्तस्यान्ध्यं जन्मसंभवम् । अपनीय मया दत्तौ दृशौ भक्तशिखामणेः ॥ २८ ॥
मेलयित्वार्हतान् प्रातः पृच्छ त्वं मिलितान् बहून् । किं वो युक्तमिदं कर्तुं खनित्राहरणं बलात् ॥
इति पृष्टास्त्वया मूर्खा वक्ष्यन्ति त्वां तु संगताः । अयं मिथ्या वदत्यन्धः केन वास्मास्विदं कृतम् ॥
स्थूलः कृशो वा खर्वो वा द्राघीयानसितोऽरुणः । वर्षीयांस्तरुणो वास्मै द्रुह्यति स्म स कीदृशः ॥
वदत्वसावथाप्यस्य प्रमाणं वचनं यदि । प्रत्ययः क्रियतेऽस्माभिः पुरतो दैवतस्य ते ॥ ३२ ॥
एवमुक्तेऽथ तान् ब्रूहि सस्त्रीपुत्राः सहार्भकाः । त्यागेशसन्निधिं प्राप्य कुरुध्वं शपथं दृशोः ॥३३॥
इत्याचक्ष्व ततः सर्वं कर्तव्यं क्रियते मया । भूपमाज्ञापयित्वैवं त्यागराजस्तिरोदधे ॥ ३४ ॥
भूपः सद्यः समुत्थाय भीतः सपुलकोद्गमः । सभृत्यः सन्निधिं प्राप दण्डी स्वपिति यत्र सः ॥
त्यागेश रक्ष रक्षेति तस्याक्रोशं निशम्य सः । उत्थापयंस्तमद्राक्षीत्समुन्मीलितलोचनम् ॥ ३६ ॥
सद्यो भीतः प्रणम्याह प्राञ्जलिः प्रश्रितो नृपः । किं करोमि विधेयस्ते कृत्ये योजय मामिति ॥
प्रणतं पादयोः प्राह दण्डी लब्धविलोचनः । यथानिदेशं देवस्य क्रियतामिति भूपतिम् ॥ ३८ ॥

ततः प्रभाते स जिनान् समस्तान्निरुध्य शंभोर्नृपतिः पुरस्तात् ।
किं दण्डिभक्तस्य करात्खनित्रं बलाद्धृतं तद्वदतेत्यवोचत् ॥ ३९ ॥

स दर्शयत्थिहागत्य जात्यन्धः स्वापराधिनम् । मृषावादं निशम्यात्र युक्तं नास्मन्निरोधनम् ॥ ४० ॥
इत्यूचुरार्हता राज्ञः पुरस्तात्सोऽप्यथाब्रवीत् । युष्मासु चेन्न केनापि हृतं तद्दण्डिहस्ततः ॥ ४१ ॥
खनित्रं तर्हि कर्तव्यः शपथः स्वामिसन्निधौ । सबालाः सार्द्रवसना निमग्नाः कमलालये ॥ ४२ ॥
शपित्वा नेत्रयोः स्पृष्ट्वा सुखिनस्तिष्ठतार्हताः । दण्डी चेत्सत्यवादी स्याच्चक्षुष्मान् स भविष्यति ॥
जन्मन्यन्यत्र च न चेद्भवितान्ध्यं यथाधुना । एवमस्विति राजानमुक्त्वा ते सकलार्हताः ॥ ४४ ॥
कटं वसानाः स्नानार्द्रं सस्त्रीबाला मुदान्विताः । प्रतिमा देवता नेति मन्वानाः प्राप्य सन्निधिम् ॥
यदा सम्मिलिताः सर्वे राजागच्छत्सहानुगैः । चक्षुष्मानथ दण्डी तैस्तत्रैव प्रत्यदृश्यत ॥ ४६ ॥
ते निरुद्धा नृपभटैर्विलोक्योन्मीलितेक्षणम् । दण्डिनं तु भियान्योन्यं पश्यन्ति स्म मुखं जिनाः ॥
न चेद्बुध्या भविष्याम इति स्पृष्टदृशोऽशपन् । बभूवुः सद्य एवान्धाः सस्त्रीबालाः सहानुगाः ॥
तदों नमः शिवायेति दण्डी तुष्टाव शङ्करम् । राज्ञा गृहीतसर्वस्वास्तस्मादेशात्पलायिताः ॥ ४९ ॥

जिनाः सर्वे ततो हृष्टा ववर्षुः कुसुमं सुराः । अलब्धशरणाः क्वापि महाव्याधिप्रपीडिताः ॥ ५० ॥
क्षुधार्ता विलयं जग्मुः शिवभक्तद्रुहो जिनाः । चैत्यमुत्पाट्य मूर्खाणां सोपानानि महीपतिः ॥ ५१ ॥
कमलालयतीर्थस्य कारयामास चाभितः । त्यागेशमिव तं भक्तं मानयामास नित्यशः ॥ ५२ ॥
दण्डिभक्तोऽपि तत्रैव कुर्वञ्छ्रीकर्म शाङ्करम् । चिराय त्यागराजस्य प्रसादान्मुक्तिमाप्तवान् ॥ ५३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे दण्डिभक्तमुक्तिप्राप्तिर्नाम त्रिषष्टितमोऽध्यायः ॥

॥ अथ चतुष्षष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

यया कयापि वा वृत्त्या द्रविणैः स्वयमार्जितैः । पुष्णाति शिवभक्तान् यः कर्मबन्धात् स मुच्यते ॥
सञ्चरन्नपि सर्वत्र भुञ्जानो वा यतस्ततः । निषिद्धमपि कुर्वाणस्त्यजन् वा कर्म दुस्त्यजम् ॥ २ ॥
शुश्रूषयेशभक्तानां नरः पापैः प्रमुच्यते । इतिहासमिह ख्यातं शृणुत प्रब्रवीमि वः ॥ ३ ॥
शिवभक्तेषु भक्तिः स्याद्यस्यैवाकर्णनादिह । क्षीरिणी नाम तटिनी क्षीरप्रस्रवणोज्ज्वला ॥ ४ ॥
सदा पुष्पफलैर्वृक्षैः कूलयोरुभयोर्वृता । विहितावभृतस्नानैर्वैतानेषु द्विजोत्तमैः ॥ ५ ॥
तीर्थानि तीर्थीकुर्वद्भिर्नित्याभिषवपाविता । अस्ति तस्यास्तटे किञ्चिदरण्याख्यं महत्पुरम् ॥ ६ ॥
स्वाचारनिरतैर्वर्णैश्चतुर्भिः समधिष्ठितम् । दीक्षिता ब्रह्मसत्रेषु यत्र वैदिकसत्तमाः ॥ ७ ॥
मुखरीकुर्वते सौधानृग्यजुस्सामनिस्वनैः । तत्रासीच्छिवभक्ताङ्घ्रिसेवकः कश्चिदङ्घ्रिभूः ॥ ८ ॥
स धनैः शिवभक्तानां पूरयन्नास्त वाञ्छितम् । नास्य प्राणे तथा प्रीतिर्यथा भक्तेष्टसाधने ॥ ९ ॥
न कश्चिच्छिवभक्तेषु यस्तेनासीदनर्चितः । वर्तमाने तथा तस्मिन् भक्त्या प्रीतोऽभवद्धरः ॥ १० ॥
तस्य भक्तिपरीक्षायां शम्भुः कौतुकवानभूत् । अग्निना सदनं नष्टं गावो नष्टाः कृषिर्हता ॥ ११ ॥
सर्वं नष्टं क्षणेनैव दानमश्रोत्रिये यथा । अथापेरद्युर्मध्याह्ने भस्मरुद्राक्षभूषितः ॥ १२ ॥
अतिथिस्तापसः कश्चिदाययौ गिरिशो यथा । भक्तस्तापसमालोक्य गृहाभ्यन्तरमानयत् ॥ १३ ॥
तमर्चयित्वा शिवभक्तमादरात्पाद्यार्घ्यदानाचमनासनादिना ।
प्रणम्य भक्त्या पदयोर्महामना जगाद दासोऽस्मि विधेहि किङ्करम् ॥ १४ ॥
अथ तापसरूपी तं भगवानाह शङ्करः । शिवभक्तार्चकः श्रीमन् भक्ताभीष्टप्रदायिनः ॥ १५ ॥
भवतः कीर्तिमाकर्ण्य द्रष्टुं त्वामागतोऽस्म्यहम् । आवयोर्वधि देयं मे वस्त्रमन्नं त्वयाधुना ॥ १६ ॥
इत्युक्तस्तमवस्थाप्य भक्तो भार्यामथाब्रवीत् । निर्धनस्य निरन्नस्य तपस्वी गृहमागतः ॥ १७ ॥
नास्ति छायाप्यवस्थातुं किं विधेयं पतिव्रते । अङ्गानि मम वेपन्ते नेति वक्तुं तपस्विने ॥ १८ ॥
न जानामीह कर्तव्यं साध्वि बुद्धिर्विधीयताम् । अथाह भार्या भर्तारं न वाङ्नेत्युचिता तव ॥ १९ ॥

यथा कथञ्चिद्दातव्यमीप्सितं स्यात्तपस्विनः । एवं भार्यावचस्तस्मिन् शृण्वति प्राह शङ्करः ॥२०॥

मध्यातपे तिष्ठति भक्तवर्य किं सुन्दरीं वीक्ष्य चिरं स्थितोऽसि ।
किमस्ति तद्वस्तु मदीप्सितं यद्वदान्यथावाहमितः प्रयास्ये ॥ २१ ॥

हन्त पापं मया प्राप्तं दम्पत्यालापविघ्नतः । यावदत्येति समयः प्रयास्ये कार्यसिद्धये ॥ २२ ॥
वर्तन्ते त्वादृशा भक्ताः कुम्भघोणे महास्थले । ततस्तत्र गमिष्यामीत्युक्त्वा शम्भुस्तिरोदधे ॥ २३ ॥
बहिर्निर्गत्य भक्तोऽपि तमदृष्ट्वा तु तापसम् । अद्भुतत्राससंयुक्तस्तमेवेशमन्यत ॥ २४ ॥
कुम्भघोणं व्रजामीति तद्वचःप्रत्ययादयम् । तदैव कुम्भघोणाख्यं प्राप्य स्थलमतन्द्रितः ॥ २५ ॥
अतिष्ठत्सन्निधौ शम्भोः सप्तरात्रमुपोषितः । शम्भुः स्वप्नेऽथ तं प्राह वसात्रैव मदाज्ञया ॥ २६ ॥
यया कयाचिद्विधया पुष्णन् भक्तान् समागतान् । इत्युक्त्वान्तर्हिते शम्भौ स तु भक्तः समुत्थितः ॥
प्राप्य वृत्त्याशया वीथीं न काञ्चिद्वृत्तिमाप्तवान् । अथागाद्वणिकावीथीं संवृतां द्यूतकारिभिः ॥२८॥
स द्यूतचैत्यमासाद्य धूर्तान् देवनलीलया । जिगाय पणबन्धेन प्रापाथ विपुलं धनम् ॥ २९ ॥
भक्तेभ्यः प्रददौ तुष्टः शिवस्य प्रीतयेऽन्वहम् । कुम्भघोणे तथा द्यूतपरा ये ये तदासत ॥ ३० ॥
ते द्यूते विजितास्तेन ददुः सर्वं पणीकृतम् । तेनान्नवसनैर्भक्ष्यैस्तर्पयन् भक्तमण्डलम् ॥ ३१ ॥
मूर्खभक्त इति ख्यातस्तत्रैव सुचिरं वसन् । शङ्करानुग्रहादन्ते मुक्तिं प्राप सुदुर्लभाम् ॥ ३२ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मूर्खभक्तमुक्तिप्राप्तिर्नाम चतुष्षष्टितमोऽध्यायः ॥

॥ अथ पञ्चषष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

पुण्येषु शम्भुस्थानेषु स्थितान् श्रीकर्मकारिणः । ये रक्षन्ति धनैः स्वस्य तेऽपि स्युर्मुक्तिभागिनः ॥
सम्पदाकरभूरस्ति चम्पकारामवासिता । शम्बरारेस्तु धामेहास्त्यम्बराख्यं महास्थलम् ॥ २ ॥
केशे कुटिलता यत्र काठिन्यं कुचकुम्भयोः । स्त्रीणामेवाधरे रागः कामो नित्यं शिवार्चने ॥ ३ ॥
यत्रालयेषु षष्टृणां वलभीनीडवासिनः । पठन्ति शारिकाः श्रौतं कल्पसिद्धान्तनिर्णयम् ॥ ४ ॥
तत्र प्रतिवसन् कश्चित्सोमेन परमेश्वरम् । यागेन प्रीणयन् विप्रः सोमयाजीति पप्रथे ॥ ५ ॥
पूर्वं मार इति ख्यातः श्रीमान् द्विजकुलोत्तमः । नित्यमन्नैर्जलैर्वस्त्रैः पुष्णन् श्रीकर्मकारिणः ॥ ६ ॥
यस्य शालाबहिर्भागे भुक्तोच्छिष्टान्नराशयः । विडम्बयन्त्यनुदिनं रजतादिं पयोनिधिम् ॥ ७ ॥
दुर्वृत्ताः सन्तु सद्वृत्ता धृतरुद्राक्षभूतयः । पूजितास्तेन शिववदप्याचारविवर्जिताः ॥ ८ ॥
अननुष्ठितमेतेन नास्ति श्रौतेषु किञ्चन । अनधीतं च यच्छास्त्रं तदर्थो वाप्यनिश्चितः ॥ ९ ॥
अपि मन्त्रेषु सर्वेषु मन्त्रं पञ्चाक्षरं परम् । निश्चित्य प्रजपन्नित्यं सोऽयं भक्तानपूजयत् ॥ १० ॥

स तं दृष्ट्वा त्यागराजस्य वैभवं फाल्गुनोत्सवे । सभार्यस्तत्र गत्वाथ मन्त्रैः सङ्कल्पपूर्वकम् ॥ ११ ॥
कमलालयमासाद्य स्नात्वा तत्र यथाविधि । धृतत्रिपुण्ड्रुद्राक्षो जजाप द्विजसत्तमः ॥ १२ ॥
कमलालये विहितमज्जनो मुदा कमलालयेश्वरपदार्पिताशयः ।
कमलालयाविलसितानि नश्वराण्यवगत्य सुन्दरसखं ययौ गतिम् ॥ १३ ॥
निरस्तसर्वेन्द्रियविभ्रमः शिवं हृदन्तरे सन्ततमेव चिन्तयन् ।
दुरापमन्यैर्हरिपद्मजादिभिर्जगाम धामेश्वरमीडितः सुरैः ॥ १४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मारसोमयाजिचारित्रे पञ्चषष्टितमोऽध्यायः ॥

॥ अथ षट्षष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

श्रुतं किल महाभागाश्चरितं सोमयाजिनः । स्वकीयसवने शम्भुं सोऽपश्यत्किल चक्षुषा ॥ १ ॥

ऋषयः

विष्णुब्रह्मादिदेवानां वेदानामप्यगोचरः । साक्षात्कृतः कथं तेन यज्वना परमेश्वरः ॥ २ ॥
यदेतद्विस्तराद्विद्वन् सर्वज्ञोऽसि घटोद्भव । त्वत्सूक्त्यमृतधाराभिः सन्तापोऽन्तः प्रशाम्यतु ॥ ३ ॥
इति पृष्टो मुनिवरैः सादरं कुम्भसम्भवः । रोमाञ्चितः शिवं स्मृत्वा प्रवक्तुमुपचक्रमे ॥ ४ ॥

श्रीअगस्त्यः ॥

सन्निधौ त्यागराजस्य निवासे कृतनिश्चयः । मारस्त्वेवं सोमयाजी भार्यायै व्रतमादिशत् ॥ ५ ॥
कृत्यं ममार्चनं शम्भोस्तव कृत्यं निशम्यताम् । यः कोऽपि शिवभक्तश्चेद्भोजयैनं गृहागतम् ॥ ६ ॥
स भार्यामनुशास्यैवं सन्निधौ निवसन् सदा । समयं गमयामास जपन् पञ्चाक्षरीमनुम् ॥ ७ ॥
अनेन वपुषैवाहं कथं त्यागेश्वरं विभुम् । पश्येयं क उपायोऽत्रेत्येवं चिन्तापरोऽभवत् ॥ ८ ॥
तदा शुश्राव महतां समवाये प्रजल्पितम् । कृतार्थः सुन्दरः साक्षात्त्यागेशस्य सखा यतः ॥ ९ ॥
तत्सख्यं येन लभ्येत लभ्यते तेन वाञ्छितम् । ऐहिकामुष्मिकं सर्वं पुरुषार्थचतुष्टयम् ॥ १० ॥
सुन्दरालापणात्तस्य न किञ्चिदपि दुर्लभम् । अन्यैः कृतं न सुकृतं तथैव तु कृतं कृतम् ॥ ११ ॥
या सुन्दरस्य दयिता तस्या भाग्यं महत्तरम् । भगवांस्त्यागराजोऽपि स्वसुहृत्प्रीतिहेतवे ॥ १२ ॥
नियोगात्तस्य दौत्याय ययौ यस्या गृहं हरः । इत्याकर्ण्य स मारास्यः सोमयाजी हुताशनः ॥ १३ ॥
निर्वर्त्य नित्यकृत्यानि प्रत्यहं सेवितेश्वरः । सखा यस्त्यागराजस्य तदास्ये कृतधीरभूत् ॥ १४ ॥
अहो कृतार्थता तस्य येन संलपतीश्वरः । तस्यापि या प्रिया तस्याः सौभाग्यं वाग्गोचरः ॥ १५ ॥

ब्रह्माद्यगोचरो यस्यास्त्यागेशो गृहमागतः । सख्यं कथं स्यान्मेऽनेन सुन्दरेण महात्मना ॥ १६ ॥
केनोपायेन लघुना शिवानुग्रहमाप्नुयाम् । इतीव चिन्तयन्नस्य किमिष्टं भोज्यवस्तुषु ॥ १७ ॥
पप्रच्छ पाचकांस्तस्य ते चैवं प्रबभाषिरे । अलर्कपत्रमारोग्यं तत्पुष्पं धातुवर्धनम् ॥ १८ ॥
तत्फलं कृमिनाशाय तन्मूलं च विरेचकम् । मत्वैवं वैद्यशास्त्रार्थं सुन्दरः सुधियां वरः ॥ १९ ॥
तच्छाखाफलपुष्पादिव्यञ्जनैरन्नमत्ति सः । सुन्दरेष्टतमं चैतत्क्षीरादिरसवस्तुनः ॥ २० ॥
ज्ञात्वैवं पाचकादिष्टं यत्नात्सम्पाद्य चान्वहम् । एकयोजनमात्रस्थात्स्वावासात्प्रत्यहं व्रजन् ॥ २१ ॥
चिरकालं नदीं तीर्त्वा पाकार्थं पाचकाग्रतः । द्वारदेशे निधायैतत्स जगामानुवासरम् ॥ २२ ॥
पाचकाः सुन्दरादेशादानयत्ययमन्वहम् । अलर्कमिति मन्वाना अपचन् सम्यगन्वहम् ॥ २३ ॥
क्रयक्रीतमिदं नित्यं पाचकैरिति संस्मरन् । भुक्त्वा व्रजत्यतिजवात्परवावेश्म सुन्दरः ॥ २४ ॥
अप्रज्ञातप्रयास्त्यालर्कमानयतोऽन्वहम् । अतीतो वत्सरस्त्वेकः क्षणवत्सोमयाजिनः ॥ २५ ॥
अथैकदा नदीकूलङ्कषा मध्ये प्रवाहतः । नावापि तर्तुं नो शक्या तेन रुद्धस्तदागमः ॥ २६ ॥
तद्दिने परवागेहात्सुन्दरो भोक्तुमागतः । भुञ्जन् भोजनवेलायामलर्ककुसुमं विना ॥ २७ ॥
पप्रच्छ पाचकानस्मिन् दिनेऽलर्कसुमादिकम् । कुतो न पक्वं युष्माभिः क्रेतुं किं वा न लभ्यते ॥
इति ब्रुवन्तं प्रत्याहुः पाचकाः सुन्दरं तदा । कदाचिदपि न क्रीतं प्रत्यहं प्रातरुत्थितः ॥२९॥
कश्चिदत्वा गच्छति स्म नागतोऽस्मिन् दिने द्विजः । कारणं किं न जानीम इत्युक्तः सुन्दरोऽब्रवीत् ॥
अथ श्वो वा परश्वो वा यदि स्यादागतः पुनः । अस्मदागमपर्यन्तं स्थापनीयो द्विजोत्तमः ॥ ३१ ॥
वदन्नेवं गतो वेगात्परवावेश्म सुन्दरः । अथ निर्विण्णचित्तोऽसौ सौमयाजी महाद्विजः ॥ ३२ ॥
नदीं कूलङ्कषां तर्तुमशक्तो रोधसि स्थितः । गते प्रवाहे त्रिदिनान्यतीत्य प्रागिव स्वयम् ॥ ३३ ॥
गृहं त्यक्त्वा साग्निहोत्रो नद्या दक्षिणरोधसि । निर्माय विपुलं वेश्म तत्रोषित्वा निरङ्कुशः ॥३४॥
चतुर्थे दिवसेऽलर्कपत्राण्यादृत्य चागतः । पाचकास्तद्गृहीत्वाद्युर्यावदायाति सुन्दरः ॥ ३५ ॥
त्वद्दर्शनेच्छुर्भवता तावत्स्थेयं महात्मना । तथास्त्विति ब्रुवन्नास्त कृतार्थोऽस्मीति चिन्तयन् ॥३६॥
तस्मिन् दिने सुन्दरोऽपि भोक्तुं सदनमागतः । सुन्दरं सोमयाजी तं दृष्ट्वा त्यागेशरूपिणम् ॥३७॥
नत्वा स्तुत्वा बहुविधैरुपचारैरुपाचरत् । शिवांशस्त्वं सोमयाजिन् यतस्तस्याष्टमीतनूः ॥ ३८ ॥
यज्वनां प्रवरोऽसि त्वं धूर्तोऽहं भुवि विश्रुतः । अहं तवोपचारार्हो नैवं वैदिकसत्तम ॥ ३९ ॥
ददास्यन्नं च वस्त्रं च भक्तानामिति ते यशः । अपचारः कृतो मह्यमलर्ककुसुमार्पणात् ॥ ४० ॥
यातायातेन भवता मत्तः किं फलमस्ति ते । आस्तामेतत्किं विधेयं मया तत्साधयाम्यहम् ॥ ४१ ॥
निश्शङ्कमुच्यतां ब्रह्मन् मत्तो यत्तेऽभिकाङ्क्षितम् । इति ब्रुवन्तं तं प्राह सोमयाजी शिवप्रियः ॥४२॥
आकर्णय महाभाग दयया तव भेऽखिलम् । दृष्टं भाग्यमिहान्यूनं त्वामस्मर्थी समागतः ॥ ४३ ॥
इदं च तव वाङ्मात्रं पुरुषार्थो ममोत्तमः । वसन्ते माधवे मासि भविष्यति शिवप्रिये ॥ ४४ ॥

क्रियमाणे मया सोमयागे वैदिककर्मणि । राजाध्वरस्य रुद्रोऽसौ त्यागराजः सखा तव ॥ ४५ ॥
प्रत्यक्षीभूय दयया प्रथमं हविरत्तु मे । पश्चान्मुक्तिं दिशत्वीशः शाश्वतीमनपायिनीम् ॥ ४६ ॥
एतावता कृतार्थोऽस्मि दया मयि विधीयताम् । श्रुत्वा तदेतन्मात्रस्य कृते क्लिष्टोऽस्यतीव भोः ॥
त्यागेशो भवते यज्वन्नानेतव्यो यदा यदा । तदा तदानयिष्यामि साधयिष्यामि वाञ्छितम् ॥ ४८ ॥
शालां विशालां निर्माय यागारम्भो विधीयताम् । इत्युक्त्वा प्रेषयामास कृतार्थोऽस्मीति सोऽप्यगात् ॥
तमेवं प्रेषयित्वा तद्वृत्तान्तं त्यागनायके । अतिशुश्रूषया प्रीते सति कर्णे व्यजिज्ञपत् ॥ ५० ॥
श्रुत्वा तत्त्यागराजस्तं प्रत्यभाषत सुन्दरम् । ब्रह्मादीनामपि सखे न गृहीतं हविः स्वयम् ॥ ५१ ॥
प्रत्यक्षीभूय पुरतः कुत्रापि हि मया मखे । हविरग्निमुखेनैव विष्णुब्रह्मादयः सुराः ॥ ५२ ॥
गृह्णन्ति सर्वयज्ञेषु ह्यमरा अवरा अपि । अस्मत्प्रेष्योऽभवदिति सर्वप्रेष्यं करोषि किम् ॥ ५३ ॥
कथं त्वया प्रतिज्ञातमनिवेद्य ममाग्रतः । अनालोच्य कथं कार्यगौरवं सोमयाजिने ॥ ५४ ॥
मत्प्रेषणं प्रतिज्ञातं मारायालर्कदायिने । इत्युक्तः प्रार्थयामास सुन्दरस्त्यागनायकम् ॥ ५५ ॥
स्वामिन् मद्वाक्यमनृतं यथा न स्यात्तथा कुरु । एष ते रुद्रभागस्तज्जुषस्वाम्बिकया सह ॥ ५६ ॥
इति प्रार्थयमानस्य त्वद्भक्तान् परिपुष्णतः । लिङ्गार्चनरतस्यास्य साधोः श्रीसोमयाजिनः ॥ ५७ ॥
जगदम्बिकया सार्धं मखे मद्वचनात्सखे । हविरत्तु भवानत्र मद्वाक्यं नानृतं कुरु ॥ ५८ ॥
इति तत्प्रार्थनातुष्टस्त्यागेशः पुनरब्रवीत् । येन केनापि रूपेण निकृष्टेनोत्तमेन वा ॥ ५९ ॥
यादृशेनोपगच्छामि तादृशेऽविजुगुप्सितः । प्राप्ते मयीशभावेन भावितश्चेत्प्रदास्यति ॥ ६० ॥
हविर्गृह्णामि मारस्य नो चेन्नैवं भविष्यति । इत्युक्तानुमतौ शंभावस्त्वित्युक्त्वाथ सुन्दरः ॥ ६१ ॥
सोमयाजिगृहं प्राप सन्तुष्टः स त्वरान्वितः । प्राग्वंशकरणोद्युक्तश्चिकीर्षुर्माधवे मखम् ॥ ६२ ॥
दृष्ट्वा गृहागतं यज्वा सुन्दरं प्रीतमानसः । विधायापचितिं युक्तां प्रणिपत्य कृताञ्जलिः ॥ ६३ ॥
सोमाञ्चिततनुः प्राह त्यागेश्वरसुहृत्तमम् । अद्य प्रसन्नस्त्यागेशः प्राप्तं यज्ञफलं मया ॥ ६४ ॥
यदस्मत्सदनं प्राप्तो देवदेवसुहृत्स्वयम् । शरणं त्वां प्रपन्नोऽस्मि त्यागेशस्य तनुं पराम् ॥ ६५ ॥
सुप्रभातं दिनं मेऽद्य युष्मत्पादाब्जदर्शनात् । तीर्णोऽस्मि युष्मत्कृपया दुस्तरं भवसागरम् ॥ ६६ ॥
महत्सन्दर्शने प्राप्ते किमसाध्यं शरीरिणाम् । भवत्सन्दर्शने लब्धे कुतः शोकः कुतो भवः ॥ ६७ ॥

यज्वानमेवं विहितोपचारमाप्तः सखा प्राह पिनाकपाणेः ।
उक्तं त्वदिष्टं सुहृदेऽथ तेनाप्युक्तं तथेवेति समागतः स्यात् ॥ ६८ ॥

अथापि यादृशेनैव रूपेण त्यागनायकः । सुरूपेण कुरूपेण दक्षयज्ञविनाशनः ॥ ६९ ॥
आगमिष्यति तं वीक्ष्य मा भूश्चलितमानसः । सर्वो वै रुद्र इत्येवं स्थिरा धीरस्तु तेऽनघ ॥ ७० ॥
तदा शिवप्रसादः स्यान्नात्र कार्या विचारणा । इत्युक्ते तादृगीशानः कथं ज्ञायेत मादृशैः ॥ ७१ ॥
भवतापि सहागत्य दर्शनीयस्तदा शिवः । इति प्रार्थयमानेऽस्मिन् दीक्षिते सुन्दरः कविः ॥ ७२ ॥

तथास्त्विति समाधाय जगाम परवागृहम् । अथ सोमसवामोदं दधानो मासि माधवे ॥ ७३ ॥
पौर्णमास्यामवभृथं चिकीर्षुर्यज्ञ उत्तमे । दिदृक्षुः शङ्करं साक्षादेकादश्यां सह स्त्रिया ॥ ७४ ॥
शालाप्रवेशमकरोदृत्विग्भिः सहितो द्विजः । विधिज्ञास्तस्य विधिवदुपचक्रमिरे मखम् ॥ ७५ ॥
क्रीतश्च सोमराजोऽभूत्पिङ्गाक्ष्यारुणया गवा । चेरुश्चोपसदः सोममभ्यषुण्वंश्च ऋत्विजः ॥ ७६ ॥
चमसेषु यथादेवमगृह्णन् कलशाद्रसम् । सामगैरध्यथ बर्हिष्पवमानः स्तुतोऽभवत् ॥ ७७ ॥
गृह्णन्ति स्माश्विनं पुण्यं ब्रह्मा दक्षिणतो वृतः । योजितः सवनीयश्च पशुर्यूपे सलक्षणः ॥ ७८ ॥
आलब्धश्च वपाच्छिद्रा गृहीताग्नौ च संस्कृता । उपस्कृता मन्त्रपूतैराज्यैरासादिताभवत् ॥ ७९ ॥
स्रुचा हिरण्यसंभिन्ना गृहीताध्वर्युणा वपा । आश्राविता प्रैषिताभून्मैत्रावरुणचोदनात् ॥ ८० ॥
प्रचोदितस्य होतुस्तच्छंसनं प्राग्वषट्कृतेः । यदा तदा महादेवमस्मार्षीद्द्विजसत्तमः ॥ ८१ ॥
अथाविरासीद्भगवानम्बिकासहितो हरः । सर्वस्वरूपी सर्वेशश्चाण्डालं रूपमास्थितः ॥ ८२ ॥
विधाय वृषभं स्वीयं मृतगोवत्सरूपिणम् । लम्बजिह्वास्रवद्रक्तं पूतिगन्धिकलेबरम् ॥ ८३ ॥
तमाधाय निजस्कन्धे घूर्णद्रक्तविलोचनः । गर्तिं मदप्रस्खलितां दधानः कम्पयञ्छिरः ॥ ८४ ॥
पार्वतीमेव तां देवीं कृत्वा मातङ्गकन्यकाम् । किञ्चिक्किञ्चिद्विलम्ब्यानुयान्तीं मातङ्गकन्यकाम् ॥
मदाघूर्णितलोलाक्षीं मत्तमातङ्गगामिनीम् । साचीकृतमुखाम्भोजां मन्दस्मितमनोहराम् ॥ ८६ ॥
मौलिमन्दाकिनीक्लृप्तमधुकुम्भं च बिभ्रतीम् । उन्नतस्तनभारार्तभुग्नमध्यवलित्रयाम् ॥ ८७ ॥
अरालालकसञ्छन्नां दधानां श्रुतिभेकिकाम् । एककर्णावसक्तेन दन्तपत्रेण मण्डिताम् ॥ ८८ ॥
आलम्बमानौ चेलान्तं विनायकषडाननौ । मातङ्गपोतवेषाढ्यौ चालयन्तीं शिशुद्वयम् ॥ ८९ ॥
जननीं जगतां गौरीमाह्वयन् यौवनोज्ज्वलाम् । अनुद्रुताखिलाम्नायश्वघोषैर्भीषयज्जगत् ॥ ९० ॥
दृष्टे मयि द्विजाः सर्वे पलायन्तामितस्ततः । कथं विशसनं कुर्युरजस्य द्विजसत्तमाः ॥ ९१ ॥
कृताजमांसभक्षाणामस्त्वासवनिषेवणम् । विप्राणां मांसकबलः कण्ठरोधं विधास्यति ॥ ९२ ॥
मातङ्गि तूर्णमागच्छ द्विजेभ्यो मधु दीयताम् । अजामिषाशयैतेषामजवत्कुश्यतां सदा ॥ ९३ ॥
संशुष्यत्कण्ठरन्ध्रं त्वं सेचयासवधारया । नो चेदहं पाययिष्ये हेषितात्तृषितान् द्विजान् ॥ ९४ ॥
कुम्भीमासवसम्पूर्णां हस्ते कुरु ममाचिरात् । किञ्चिक्किञ्चिद्विलम्ब्यान्वायान्तीं मातङ्गकन्यकाम् ॥
वीक्ष्य ब्रुवाणः प्रहसञ्छालान्तिकमुपागतः । क्व सोमयाजी सस्त्रीकः केति जल्पन् पदे पदे ॥
कालायसश्रीश्चण्डालो वेद्यभ्याशमुपागमत् । तमागतं तथारूपं दृष्ट्वा सविधमागतम् ॥ ९७ ॥
रे नीच दूरं गच्छेति क्षिपन्तः क्षुद्रशर्करान् । ब्राह्मणाः कर्मचण्डाला न विदुः परमेश्वरम् ॥
द्रव्यं देशश्च कालश्च बर्हिर्यज्ञा च दक्षिणा । फलं च कर्मणामाहुर्यन्मयं तं न ते विदुः ॥
सक्तयज्ञायुधाः केचिद्दत्विजः स्पर्शशङ्किनः । स्नानाय प्रययुस्तीर्थं तस्य सन्निहितास्तु ये ॥ १०० ॥
परुषैर्वचनैः केचित्पांसूनस्मिन्नवाकिरन् । क्रुद्धेनेव तदा नीचाकारच्छन्नेन शम्भुना ॥ १०१ ॥

प्रेषिता द्रुतमाम्नायश्वानो भषणभीषणाः । प्रद्रुत्य द्रावयामासुः परितस्तान् द्विजाधमान् ॥ १०२ ॥
अधावन्नमितः केचिद्भीत्या पेतुरथापरे । अपश्यन्नकमपरे प्रधाव्य क्वचिदास्थिताः ॥ १०३ ॥
चण्डालदूषिता शाला माराशु कुरु निष्कृतिम् । इति दूरं गताः केचिद्यजमानं तमूचिरे ॥ १०४॥
मधुमत्तमिमं शूलेष्वारोपयतु भूपतिः । निश्शङ्कं यन्मदान्धोऽसौ यज्ञशालामदूषयत् ॥ १०५ ॥

जात्यन्धतामुपगतेषु महीसुरेषु तत्तत्कटूक्तिशतमेवमुदीरयत्सु ।
ब्रह्मादिदुर्लभममुष्य पदं प्रदित्सुः शालामगाइत सहाम्बिकया महेशः ॥ १०६ ॥

अव्यक्तवचसामाद्यं पुरुषं कृष्णपिङ्गलम् । चण्डालवेषप्रच्छन्नं प्रविशन्तं मखालयम् ॥ १०७ ॥
अनुग्रहाय मारस्य समार्यातनयं शिवम् । परवागृहसौधाग्रे स्थित्वा पश्यन् स सुन्दरः॥ १०८ ॥
अवरुह्य झटित्यस्य यागशालामुपेत्य च । मा चञ्चलमनाः सोमयाजिन् भव दृढो भव ॥ १०९ ॥
सावधानेन तिष्ठ त्वमेष एव हि शङ्करः । सुन्दरोक्तिमिमां श्रुत्वा यज्वनां प्रवरस्तदा ॥ ११० ॥
पत्न्या सह विनिश्चित्य तमेव परमेश्वरम् । विद्रुतेषु समस्तेषु कर्मठेषु द्विजातिषु ॥ १११ ॥
प्रत्युद्ययौ समुत्थाय भगवन्तं सदाशिवम् । अर्घ्यपाद्यकरा पत्नी भक्त्या भर्तारमन्वगात् ॥ ११२ ॥
सपत्नीकः सोमयाजी पुलकाङ्कितविग्रहः । प्रसीद देव पाहीति वदन्नङ्घ्र्योः पपात ह ॥ ११३ ॥
दत्वार्घ्यमात्मनो दास्यं सफलीकर्तुमुद्यतः । स्कन्धाद्भगवतो वत्सं मृतं स्वांसे न्यवेशयत् ॥ ११४ ॥
सापि भाग्यवती पत्नी मताङ्ग्याः शिरसा धृतम् । मधुकुम्भमुपादाय स्वमौलौ भूषणं व्यधात् ॥
जय शङ्कर विश्वात्मन् जय जन्मविभञ्जन । इत्युक्त्वाकल्पयद्वेदीं समयासनमैश्वरम् ॥ ११६ ॥
तस्य भार्या समीपेऽस्य चक्रे देव्या वरासनम् । प्रक्षाल्य पादावभ्युक्ष्य निजे शीर्षेऽथ दीक्षितः ॥
प्रादादर्घ्यं स देवाय तथैवाचमनीयकम् । उपस्तीर्य करे शम्भोरभिघार्य वपां पशोः ॥ ११८ ॥
प्रददौ देवदेवाय साक्षिणे सर्वकर्मणाम् । तदानीं तत्र तत्रैव सङ्कशोऽवस्थिता द्विजाः ॥ ११९ ॥
द्विजो नीचं पूजयति सकुटुम्बमिति क्रुधा । चण्डालस्य सुहृन्मारश्चण्डालः कोटिजन्मसु ॥ १२० ॥
भविष्यतीति निन्दन्तो दिशो दश विदुद्रुवुः । अर्पयित्वा वपां हस्ते शिवस्य परमात्मनः ॥१२१॥
अध्वरेशं यदा दध्यौ सोमयाजी महेश्वरम् । तदा हर्षाम्बुना छन्ना तद्दृष्टिः स ततः स्वयम् ॥
प्रमृज्य बाष्पमद्राक्षीन्मृतं वत्सं महावृषम् । कैलाससदृशाकारं ककुद्मन्तं विषाणिनम् ॥ १२३ ॥
घण्टाचामरमञ्जीररत्नास्तरणमण्डितम् । देवीं मरकतश्यामा मातङ्गीं साप्यदृश्यत ॥ १२४ ॥
तावेव बालकावास्तां विनायकषडाननौ । मध्ये गङ्गासरिद्भूद्भटो ब्रह्मकपालकम् ॥ १२५ ॥
स विश्वमायाप्रच्छन्नः परः शम्भुरदृश्यत । ववर्षुरमराः पुष्पाण्यस्तुवन्निगमाः पुरः ॥ १२६ ॥
जगुर्गन्धर्वपतयो नृत्तमप्सरसो व्यधुः । ब्रह्मविष्णू सिषेवाते जयेत्युक्त्वाथ पार्श्वयोः ॥ १२७ ॥
इन्द्रादयो लोकपालाः समन्ताच्च सिषेविरे । षष्टयष्टकोटिगणपा विभोर्ददृशिरेऽभितः ॥ १२८ ॥
भीतभीता बभूवुश्च प्रणता ब्राह्मणा द्रुताः । तुष्टुवुश्चाम्बरे सिद्धाः सनकाद्याश्च योगिनः ॥१२९॥

चराचरं जगत्तत्र दृष्टमीश्वरसन्निधौ । नमस्कृत्वाथ देवाय ज्योतिषे सर्वसाक्षिणे ॥ १३० ॥
मारो दत्वा हविः पश्चाच्छेषेणेयाज देवताः । यज्वनेऽथ सभार्याय कृतावभृथकर्मणे ॥ १३१ ॥
कैवल्यनाथः कैवल्यं दत्वा शंभुस्तिरोदधे । केवला यज्वनो यज्ञशालापि समदृश्यत ॥ १३२ ॥
ये पठन्तीममध्यायं शृण्वन्ति भुवि मानवाः । तेषां शंभुप्रसादेन स्यात्कैवल्यपदस्थितिः ॥१३३॥
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मारसोमयाजिकैवल्यप्राप्तिर्नाम षट्षष्टितमोऽध्यायः ॥

॥ अथ सप्तषष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

नियमेनान्वहं शंभुं भुक्तेः पूर्वं निषेवते । कर्मबन्धो न तस्यास्ति सत्यमेव मयोच्यते ॥ १ ॥
अत्रेतिहासं प्रथितं प्रवदन्ति पुराविदः । श्रीमतः शाक्यनाथस्य चरितं यत्र वर्ण्यते ॥ २ ॥
अस्ति शङ्खपुरं नाम नगरं शङ्करप्रियम् । चातुर्वर्ण्यसमाकीर्णं चत्वरारामशोभितम् ॥ ३ ॥
तदन्तिके पुरं किञ्चित्सार्थयोजनदूरतः । कुतर्कवादकुशलमतिक्षपणसङ्कुलम् । ॥ ४ ॥
तत्र श्रीशाक्यनाथाख्यः क्षपणः शूद्रवंशजः । अष्टादश पुराणानि शुश्राव महतां मुखात् ॥ ५ ॥
तेन तस्य शिवे भक्तिरचला समजायत । सर्वेष्वपि मतेष्वेकं शैवं मतमनुत्तमम् ॥ ६ ॥
ज्ञात्वा तस्य शिवे भक्तिरचला समजायत । प्रलोभितोऽपि पाषण्डैर्नान्यत्र रमते क्वचित् ॥ ७ ॥
शिव एव परं तत्त्वं तस्मादन्यन्न दैवतम् । स कर्ता कर्मफलद इति स्थितिरसंशयः ॥ ८ ॥
स्वर्गादि फलमिज्यादि कर्म कर्ता तु कामवान् । तस्यानुरूपफलदः परमात्मा महेश्वरः ॥ ९ ॥
दुस्तरं तत्प्रसादेन तारेष्यामि भवार्णवम् । इति निश्चित्य सुमतिरत्यजत्तन्त्रमार्हतम् ॥ १० ॥
तच्छास्त्रमर्मविज्ञानाच्छाक्यनाथमिमं विदुः । एवं निश्चित्य मतिमाञ्शाक्यनाथस्ततः परम् ॥ ११ ॥
विचारयामास कथं शंभुराराध्यतां मया । शक्यते साङ्गपूजा तु शंभोः कर्तुं न केनचित् ॥१२॥
येन केनापि सन्तुष्येद्यदि भक्तिः स्थिरा विभुः । इति निश्चित्य मनसा नियमं कञ्चिदाददे ॥
अनिवेद्य हरं क्वापि न भोक्तव्यं दिने मया । उपहारश्च यः कश्चिदर्पणीयो भवेद्विभोः ॥ १४ ॥
एवं सङ्कल्पयञ्शाक्यः स्वगृहात्प्रातरुत्थितः । स्नात्वापगाजले नित्यं क्षपणेभ्यो भिया बहिः ॥
त्यक्त्वा विभूतिं रुद्राक्षं पञ्चार्णं मनसा जपन् । सार्धयोजनदूरस्थं गत्वा शङ्खपुरं महत् ॥ १६ ॥
अग्रे शङ्खपुरेशस्य स्थित्वा दूरान्नमन् हृदा । स्वजातिक्षपणामोदकारीव प्रक्षिपञ्शिलाः ॥ १७ ॥
निर्दोषमिदमेवास्तु पुष्पं पाषाणमित्ययम् । शिवाय नम इत्युक्त्वा चिक्षेपाभिमुखं विभोः ॥ १८॥
एवं दिने दिने कुर्वन्नपूजयदुमापतिम् । अभूत्किणशतं मौलौ चन्द्रमौलेः शिलाहतैः ॥ १९ ॥
परं दधार तच्चिह्नं चन्द्ररेखामिवेश्वरः । पाषाणक्षेपणाश्लिष्टं तं शाक्यं तुष्टुवुर्जिनाः ॥ २० ॥
दिने दिने पूजयतः शिलयोपदया हरम् । महानत्यगमत्कालस्तस्य प्रीतोऽथ शंकरः ॥ २१ ॥

तस्य भक्तिपरीक्षार्थं हृदि कौतुकमादधे । अथान्येद्युरभूद्वर्षो जञ्झानिलदुरासदः ॥ २२ ॥
विद्युत्स्तनितनिर्घातवातघोरतरो महान् । आरभ्यार्कोदयमभूदार्धरात्रं च दुर्दिनम् ॥ २३ ॥
विस्मृत्य तद्दिने शंभुपूजां भोक्तुं समुद्यतः । सस्मार सद्यः शाक्योऽसौ काले त्यक्तं शिवार्चनम् ॥
तदैव सहसोत्थाय भृशं निर्विण्णमानसः । धिगस्तु मां व्रतभ्रष्टमकृतेशाङ्घ्रिपूजनम् ॥ २५ ॥
इति शोकपरीताङ्गः सद्यः स्नात्वापगाजले । वर्षे महति वेगेन प्राप्य शङ्खपुरं महत् ॥ २६ ॥
महादेवमहालिङ्गं दृष्ट्वा नत्वा च भक्तितः । तदुपायनपाषाणमन्विष्यन्न लभेत सः ॥ २७ ॥
यदा तदातिनिर्विण्णो विनिर्गत्यालयाद्बहिः । मृगयामास पाषाणं परितोऽतिप्रयत्नतः ॥ २८ ॥
अलभ्यमाने पाषाणे शिवमायातिरोहिते । पूजान्तरायमन्वीक्ष्य मनस्येवमचिन्तयत् ॥ २९ ॥
पूजाविहीनदेहेन प्राणैर्वा किं फलं मम । मदीयशिर उत्पाट्य तेन पूजां करोम्यहम् ॥ ३० ॥
इत्यालयशिलास्तम्भे घातयित्वा स्वकं शिरः । पाणिना कण्ठमावेष्ट्य चोत्पाटयितुमुद्यतः ॥ ३१ ॥
तदाविरासीद्भगवान् वृषारूढोऽम्बिकापतिः । भक्तं निरुध्य वेगेन साहसं मास्तु मास्विति॥३२॥
गृहीत्वा पाणिना पाणिं तद्भक्तिमुपलालयन् । सशरीरं च सायुज्यं दत्वा तस्मै महेश्वरः ॥३३॥
पश्यतां यक्षगन्धर्वकिन्नरोरगरक्षसाम् । ब्रह्मविष्ण्वादिदेवानां सद्यः शंभुस्तिरोदधे ॥ ३४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शाक्यनाथमुक्तिप्राप्तिर्नाम सप्तषष्टितमोऽध्यायः ॥

॥ अथाष्टषष्टितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

मनसा पूजयञ्छंभुं तद्भक्तान् बहिरन्वतः । वर्तते दृढभक्त्या यः स शोकं दुस्तरं तरेत् ॥ १ ॥
कथयामि कथामत्र ब्राह्मणस्य महात्मनः । वैराग्यनिष्ठया यस्य प्रसन्नः पार्वतीपतिः ॥ २ ॥
श्रीवाक्पुरमिति ख्यातं चोळमण्डलमण्डनम् । पुरमस्ति महत्तत्र कश्चिदासीद्द्विजोत्तमः ॥ ३ ॥
स नाम्ना नरशार्दूलः शिवभक्ताङ्घ्रिभक्तिमान् । न तस्याविदितं किञ्चिद्वेदशास्त्रादिषु क्वचित् ॥४॥
यत्नैरपूजयच्छंभुं विधिवच्चोक्तदक्षिणैः । स पर्यालोच्य सकलं शास्त्रं कर्तव्यनिर्णयम् ॥ ५ ॥
कृतवान् काममुक्तस्य मनसः शाङ्करे पदे । निश्चला स्थितिरीशार्चा सैवान्या तु विडम्बना ॥ ६ ॥
न लिङ्गपूजनादेव प्रीतो भवति शंकरः । द्रव्यैः पूजा तु कर्तव्या शिवभक्तेषु धीमता ॥ ७ ॥
जङ्गमे पूजितः शंभुः स्थावरादपि तुष्यति । इति निश्चित्य मतिमान् भक्तानेवाभ्यपूजयत् ॥ ८ ॥
अन्वहं शतरुद्रीयं प्रजपन्नर्थिनां प्रियः । अतिथ्यभ्यागतेष्वीशं प्रत्यक्षं समपूजयत् ॥ ९ ॥
पयोभिः सघृतैरन्नैः सोपदंशैश्च षड्सैः । भोजयामास विधिवत् कुसुमैश्च नवाम्बरैः ॥ १० ॥
पितेव शिवभक्तानां पोषणे भाग्यवानभूत् । नाध्वरेषु तथा प्रीतो ब्रह्मादीनां महेश्वरः ॥ ११ ॥
पुष्णतोऽस्य यथा भक्तान्नदानेन सन्ततम् । लिङ्गे तु जङ्गमाकारे भावनापुष्पकोटयः ॥ १२ ॥

अर्चितास्तेन भक्तेन शिवभावनयानिशम् । निर्माल्यशोधने तासामशक्ता गणनायकाः ॥ १३ ॥
कैलासशिखरे शंभुमम्बासहितमब्रुवन् । श्रीवाकपुरस्थितेनैव त्वत्पादाब्जे समर्चिताः ॥ १४ ॥
पुष्पभारान् वयं वोढुमशक्ताः स्मश्चिरादपि । वाञ्छां प्रपूरयास्येति श्रुत्वा तद्गिरिशोऽहसत् ॥ १५ ॥
हासकारणमाचक्ष्वेत्यम्बयाभ्यर्थितः शिवः । अवदद्गिरिजां देवीं तद्भक्तिमुपलालयन् ॥ १६ ॥
ध्यानेन भावनापूजा कृता मयि मया फलम् । तस्य नो शक्यते दातुं न किञ्चित्सोऽपि वाञ्छति ॥
तद्दर्शनोत्सुकायां तु तस्यां देवो महेश्वरः । अरूढवृषभो देव्या सह तस्यान्तिकं ययौ ॥ १८ ॥
यन्मद्भावनया भक्तानन्वहं त्वमपूजयः । त्वय्यहं नरशार्दूल प्रीतोऽस्मि वद वाञ्छितम् ॥ १९ ॥
दास्यामीतीश्वरप्रोक्तः सारूप्यात्त्वामनारतम् । द्रष्टुमिच्छामि तद्देहीत्येवं पृष्टः सदाशिवः ॥ २० ॥
योगिनामप्यगम्यं तद्दत्त्वा सारूप्यमुत्तमम् । तेनापि गौर्या सवृषः शंभुरन्तरधीयत ॥ २१ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे नरशार्दूलसारूप्यदानं नाम अष्टषष्टितमोऽध्यायः ॥

॥ अथैकोनसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

दुर्लभा शाङ्करी भक्तिः शिवभक्तः सुदुर्लभः । दुष्करं भुवि जन्तूनां भक्तवाञ्छितपूरणम् ॥ १ ॥
किं जन्मना तस्य जनस्य येन भक्तस्य वाञ्छा न च पूरिता स्यात् ।
शरीरमर्थांस्तनयं स्त्रियं वा समर्प्य पूज्यः शिवभक्त एव ॥ २ ॥
गृहानभ्यागते भक्ते गृहिणां किं नु दुस्त्यजम् । यदि स्याद्भक्तपूजायामसुकूला कुटुम्बिनी ॥ ३ ॥
शोकसन्तरणे जन्तोरुपायोऽन्यो न विद्यते । विनैकेन महादेवभक्तेष्टकरणेन हि ॥ ४ ॥
साहसे वाप्यकार्ये वा कृत्वा भक्तेष्टदायिनाम् । नाधयो व्याधयो जन्म मृत्युर्वा देहिनां भवेत् ॥
असारे ह्यत्र संसारे सारभूतमिदं नृणाम् । सर्वदा शिवभक्तानां दीयते ह्यर्थितं यदि ॥ ६ ॥
वाचा देहीति यो देही याचितोऽपि महात्मना । नेत्याह तेन धात्रीयं भृशं भारवती भवेत् ॥ ७ ॥
उपकुर्वन्ति वृक्षाश्च पत्रैः पुष्पैः फलैरपि । उपकारो मनाङ्नो चेद्वृथा जातः स नेतिवाक् ॥ ८ ॥
तस्मात् सर्वप्रयत्नेन शम्भोश्चरणसेविनाम् । सम्पादितं स्याद्येनेष्टं तस्य जन्मोत्तमं विदुः ॥ ९ ॥
इष्टान्नदानेन समर्चनीयाः सर्वात्मना चान्यहमीशभक्ताः ।
प्रियेषु शम्भोरथवा दिनेषु स्वस्येच्छता जन्मफलं जनेन ॥ १० ॥
प्रदोषसोमवारार्द्राकृष्णाष्टम्ययनादयः । चैत्रापभरणीमासशिवरात्र्युपदर्शकाः ॥ ११ ॥
शिवप्रियकरा ह्येते दिवसाः सद्भिरीरिताः । अपि वा भोजयित्वैकं भक्तं माहेश्वरं नरम् ॥ १२ ॥
त्रैलोक्यस्यान्नदानेन यत्तत्फलमवाप्नुयात् । किमत्र बहुनोक्तेन शिवः प्रीणाति विश्वसृक् ॥ १३ ॥

किं प्रसन्ने पशुपतौ प्राणिनां दुर्लभं भवेत् । परमापद्गताश्चापि माहेश्वरसमर्चनात् ॥ १४ ॥
न सन्ति कति वा लोके तीर्णसंसारसिन्धवः । अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ १५ ॥
परंज्योतिरुपाख्यानं प्रसिद्धं भुवनत्रये । अरुणारण्यनामास्ति पुरं धाम पिनाकिनः ॥ १६ ॥
आवासः शिवभक्तानामाम्नायागमवेदिनाम् ।

नमः शिवायेति वदन्ति यत्र बालाश्च कन्याः शुकशारिकाश्च ।
क्षुतेषु च प्रस्खलितेषु केळौ स्वप्ने प्रबोधेऽपि रतौ मिथश्च ॥ १७ ॥

नाभस्मरुद्राक्षधरोऽस्ति कश्चिदजप्तपञ्चाक्षरमन्त्रराजः ।
नरोऽश्रुतेशानकथापदानो यत्रापि वा संकरजातिजातः ॥ १८ ॥

क्रीडासु बाला अपि यत्र भूत्वा जटाधरा भस्मकृताङ्गरागाः ।
शार्दूलचर्माम्बरसंवृताङ्गाः शिवोऽहमस्मीति मिथो वदन्ति ॥ १९ ॥

जनानां वसतां यत्र चित्तवृत्तिरकल्मषा । पतिव्रतेव भर्तारमाश्लिष्यति महेश्वरम् ॥ २० ॥
तत्राभूच्चोलदेशेन्द्रसचिवान्वयसंभवः । परंज्योतिरिति ख्यातो ब्राह्मणो वेदपारगः ॥ २१ ॥
बाहटेऽपि प्रवीणोऽसौ धन्वन्तर्यश्विनोरपि । पठिता सर्वशास्त्राणां पारदृश्वागमाम्बुधेः ॥ २२ ॥
दुर्जयान् यो विनिर्जित्य चोलराजस्य विद्विषः । द्वात्रिंशद्धनकोशांश्च शून्यान् पूरितवान् धनैः ॥
भक्ते माहेश्वरे यस्य त्वभुक्तवति न स्वयम् । अश्नीयामिति विख्यातं व्रतं कीर्त्या जगत्त्रये ॥२४॥
श्रीमदभ्रसभानाथनामस्मृतिमतः सदा । यस्याखिलैः कृतं नाम दभ्रभक्त इति क्षितौ ॥ २५ ॥
नानाविधानां जातीनां नम्रत्वादल्पभावतः । भक्त्या पादेष्वभूत्तस्माद्दभ्रभक्त इति प्रथा ॥२६॥

स चोळराजेन शिवप्रसादो यतस्त्वयि स्यादधिकस्ततस्त्वम् ।
मत्प्रेष्यतां नार्हसि मन्दिरे ते सुखं निषीदेति नियोजितोऽभूत् ॥ २७ ॥

तदा श्रीज्ञानसम्बन्धस्तच्छोणारण्यमागतः । गातुं गणपतीशानमभ्युद्गम्यामुमेष हि ॥ २८ ॥
नीत्वा गृहं भोजयित्वा षड्सैस्तमतोषयत् । जगौ गणपतीशानं दभ्रनामाङ्कितैः स्तवैः ॥ २९ ॥
गते तस्मिन्नमुष्य स्त्री या श्वेतवननायिका । तया सहस्रं भक्तानां भोजयित्वेप्सितान्नतः ॥ ३० ॥
समयं गमयामास जन्मसाफल्यमार्जयन् । तस्य तस्यामभूत् पुत्रो धरित्र्यामिव शेवधिः ॥ ३१ ॥
चन्द्रमा इव सर्वेषां नयनानन्दवर्धनः । तत्पिता मुमुदे दभ्रः सिन्धुश्चन्द्रोदयादिव ॥ ३२ ॥
पैतृकात्स ऋणान्मुक्तो ब्राह्मणान् प्रीणयन् धनैः । सहितो बन्धुभिः सर्वैर्विहिते जातकर्मणि ॥३३॥
नाम श्रीपतिरित्यस्य चक्रेऽन्वर्थं स्वसंपदाम् । अन्नमाप्राशयच्चार्धे वत्सरस्य निजात्मजम् ॥ ३४ ॥
अर्धाङ्कुरितदन्तस्य दृष्ट्वास्य मुमुदे मुखम् । अथ संवर्धितो बालो बालकल्पतरुर्यथा ॥ ३५ ॥

कृतचौळोऽक्षराभ्यासे नियुक्तो मातृभूषितः । शिक्षाशालां शिशुः प्राप्य लिपिनिर्णयवानभूत् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीपतिजननं नाम एकोनसप्ततिमोऽध्यायः ॥

॥ अथ सप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अथ कैलासशिखरे पार्वती परमेश्वरम् । अङ्के शयानं पप्रच्छ कदाचित्कौतुकान्तरा ॥ १ ॥
नन्दिप्रभृतयः सन्ति भक्तास्तव सहस्रशः । तेषु कुत्र तव प्रीतिरधिका सत्यमुच्यताम् ॥ २ ॥
इति हैमवतीपृष्टः पशूनां पतिरम्बिकाम् । स्मयमानो जगादेदं नखोल्लुळिततत्कचः ॥ ३ ॥
न मे त्वयि तथा प्रीतिर्दभ्रभक्ते यथाधिका । न तद्भक्तेः फलं दातुं प्रभुरस्मि शिवे समम् ॥ ४ ॥
न मय्यपि तथा स्यात् किमियुक्तः शिवया हरः । तद्भक्तेरग्रतः का ते भक्तिरालोक्यतामियम् ॥

इत्युत्थितो बालशशाङ्कमौलिरापादकेशं धृतभस्मलेपः ।
समुन्नतोन्नद्धजटाकलापः स दभ्रभक्तं प्रति सम्प्रतस्थे ॥ ६ ॥

अथ चैत्रापभरणी भवितेति समुत्सुकः । माहेश्वरेप्सितान्नानि पचेति प्रैरयद्वधूम् ॥ ७ ॥
भोक्तारः कति कः पाके विशेषः क्रियतामिति । पृच्छन्तीं दभ्रभक्तः स्वां भार्यां भक्तप्रियोऽब्रवीत् ॥
अध्यास्ते नभसो मध्यमहामयमधीश्वरः । न कोऽपि शिवभक्तोऽस्मद्गृहानतिथिरागतः ॥ ९ ॥
चैत्रापभरणी चाद्य तिथिः पुण्यतमा मता । न कञ्चिदपि पश्यामि माहेश्वरमिहोत्तमम् ॥ १० ॥
आरभ्यतां त्वया पाको भोक्तुमन्विष्य चत्वरे । यं कञ्चनाप्यहं भक्तं प्रार्थयित्वानयामि तम् ॥ ११ ॥
संवासय प्रिये कञ्चिदिह भक्तः समागतः । इत्युक्त्वा निरगाद्भक्तान् दभ्रभक्तो गवेषयन् ॥ १२ ॥
अथातपेन कथिताः समन्तात् पांसवो भुवि । लक्ष्यन्तपद्मांशोर्वपुर्धे दिनयौवनम् ॥ १३ ॥
अथ माहेश्वराकारमास्थितः कालकन्धरः । आविवेशालयं तस्य संप्रस्खलन्मुखाम्बुजः ॥ १४ ॥
श्रान्तोऽस्मि क्षुधितोऽस्मीह भक्तो भोक्तुं समागतः । इदं किं दभ्रभक्तस्य सदनं क्व स तिष्ठति ॥
इति पृष्टाङ्गणस्था तच्चेटी चन्दननायिका । नत्वा विनयपूर्वेण भक्तं तं प्रत्यभाषत ॥ १६ ॥
भोक्तुं भक्तजनान्वेषी दभ्रभक्तो बहिर्गतः । यावदायाति तावत्त्वं तिष्ठेत्युक्तोऽब्रवीद्वचः ॥ १७ ॥
अस्मिन् स्थातुं न शक्तोऽस्मि गृहे स्वामिविनाकृते । तस्माद्गच्छामि बहिरित्येवं यान्तं निशाम्य सा ॥
बहिर्निर्गत्य तरसा श्रीश्वेतवननायिका । नामाग्रेडनपूर्वेण भक्तायाहीत्यवोचत ॥ १९ ॥
अहूतः सन्निवृत्तोऽसावाह भैरववेषभृत् । अस्ति वा समयः को वेत्याकर्ण्य वचनं सती ॥ २० ॥
अत्यन्तमुदिता भूत्वा दृष्ट्वा माहेश्वरं परम् ।

प्रणम्य दत्वासनमाहिताञ्जलिः सुस्वागतं भक्तवरेह चास्यताम् ।
आतिथ्यमत्रास्त्वनुमन्तुमर्हसीत्युक्त्वा वितेने विधिवत्तदर्चनम् ॥ २१ ॥
तया संपूजितश्चैवं छद्मवेषेण शङ्करः । वसति क्व गृहस्वामीत्यपृच्छत्प्रणतां सतीम् ॥ २२ ॥
तं प्रत्युवाचाथ सती मदीयो नाथः स माहेश्वरपाददासः ।
भवादृशान् भक्तवरान् विचिन्वन्नितो बहिर्निर्गत एष्यतीति ॥ २३ ॥
यत्र नास्ति गृहस्वामी न तत्र निवसेत्सुधीः । यत्र युक्ता स्थितिस्तत्र गच्छामीत्यालयं ययौ ॥ २४ ॥
गते माहेश्वरे तस्मिन् दभ्रभक्तश्च सर्वतः । अन्विष्यादृष्टभक्तोऽसौ स्ववेश्म पुनराविशत् ॥ २५ ॥
ध्यायमानः शिवं चित्ते भ्रान्त्या निर्विण्णमानसः । उपागतं पतिं साध्वी साञ्जलिः समभाषत ॥
नाथ माहेश्वरः कश्चित् साक्षादिव महेश्वरः । प्राप्तो दत्तासनो युष्मानपश्यन्नालयं गतः ॥ २७ ॥
तत्र गत्वा महात्मानं प्रसाधानीय शाङ्करम् । युक्तं भोजयितुं नाथ मा विलम्बो विधीयताम् ॥
सुधासमं वचः साध्व्या दभ्रभक्तो निशम्य तत् । देवालयं ययौ हृष्टो यत्र माहेश्वरस्थितिः ॥ २९ ॥
कोविदारतरोर्मूले वीरासनमथ श्रितम् । यात्रायष्टयग्रनिहिते प्रकोष्ठे स्थापिताननम् ॥ ३० ॥
भस्ममस्त्री च पुरतो वेष्टितामक्षमालया । कृतवन्तं परिश्रान्तं मीलिताक्षं जरत्तमम् ॥ ३१ ॥
लम्बमानभ्रुवं ज्योतिर्ध्यायमानं परात्परम् । आलोक्य दभ्रभक्तोऽस्य प्रणनाम पदद्वये ॥ ३२ ॥
मुमुदे दर्शनादेव निधिं दृष्ट्वेव निर्धनः । गृहीतचरणाङ्गुष्ठं दभ्रभक्तं दयानिधिः ॥ ३३ ॥
उत्थापयित्वा नामाथ पप्रच्छ परमेश्वरः । कस्त्वं नाम किमित्युक्तः प्राह दभ्रो महेश्वरम् ॥ ३४ ॥
माहेश्वरपदाम्भोजपदरेणुरहं विभो । दभ्रभक्तोऽस्मि दासोऽस्मि प्रसादः क्रियतां मयि ॥ ३५ ॥
आतिथ्यं गृह्यतां स्वामिन् आतपः सुमहानिह । मदीयं सदनं स्यात्त्वत्पादरेणुपवित्रितम् ॥ ३६ ॥
अन्नं यद्रोचते तुभ्यं दीयते भुज्यतामिदम् । इत्यावेद्य पुनर्भक्तः प्रणनामातिथिप्रियः ॥ ३७ ॥
दभ्रभक्तमथ प्राह मायामाहेश्वरो हरः । दभ्रभक्तस्त्वमेवासि भक्तानामग्रणीः क्षितौ ॥ ३८ ॥
शिवभक्तान्नदानेन प्राप्तोऽसि विपुलं यशः । भक्तेष्टदानविधिषु भवानेव भनानिव ॥ ३९ ॥
अद्यापभरणी चैत्रा परमेश्वरवल्लभा । भोजयेद्भाग्यवानस्यां भक्तान्यो चेत्स्वयं तु वा ॥ ४० ॥
शिवभक्तगृहेष्वेव भुञ्जीयादात्मशुद्धये । भक्तोऽसि दभ्रभक्तस्त्वं क्षुधितश्चास्मि साम्प्रतम् ॥ ४१ ॥
तथापि किञ्चिदुक्तव्यमस्ति तच्चाप्रियं भवेत् । कथं त्वामप्रियं वक्तुं शक्नोम्यतिथिरागतः ॥ ४२ ॥
न वक्तव्यं मया चैव न श्रोतव्यमपि त्वया । क्व चायं प्राकृतो लोकः क्व वयं तद्विलक्षणाः ॥ ४३ ॥
अलौकिकस्य वचनं लौकिकाय न रोचते । भोजयान्यान् गृहं गत्वा मा ते शोकोऽस्तु मत्कृते ॥ ४४ ॥
इत्युक्त्वाभूत्प्रतिष्ठासुस्तस्य माहेश्वरोऽग्रतः ॥ ॥ ४५ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे दभ्रभक्तचरिते सप्ततितमोऽध्यायः ॥

॥ अथैकसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

ततो जिगमिषुं कापि पादाग्रस्पृष्टपादुकम् । यात्रायष्टिधरं देवं नत्वा भक्तस्तमब्रवीत् ॥ १ ॥
मा मैवं वद वक्तव्यं शङ्का मास्त्वयि मां प्रति । कर्तास्मि तद्यथावत्ते यल्लौकिकमथापरम् ॥ २ ॥
दूरे निरस्य सन्देहं कर्तव्यो मय्यनुग्रहः । वदन्तमेवं बहुधा गृहीतचरणं मुहुः ॥ ३ ॥
आस्स्वेति कोविदारस्थ मूले माहेश्वरोऽवदत् । घोरमाहारनियमं समाकर्णय दुष्करम् ॥ ४ ॥
नान्नं न दधि न क्षीरं न सर्पिर्न मधूत्तमम् । मनःप्रीतिकरं विद्धि दभ्रभक्त ममाश्नतः ॥ ५ ॥
मं कल्पकफलं वा मे खदते यत्पचेळिमम् । विरसं चामयकरमन्यच्छाकादिकं पुनः ॥ ६ ॥
उद्दिष्टं मनसान्नं तच्छ्रूयतां दभ्रभक्त मे । षण्मासमध्ये मे भुक्तिरेकदास्य क्रमं शृणु ॥ ७ ॥
पशोर्विशसनं कृत्वा पक्त्वा सस्येन तेन मे । दत्तं चेदोदनं प्रीतिर्भविष्यति न संशयः ॥ ८ ॥
असाध्यं न तथा कर्तुं त्वयेति गदितोऽब्रवीत् । तथा चेत्सुलभं स्याद्यत्सन्ति मे पशवोऽमिताः ॥
स पशुर्न ममेष्टः स्यादिष्टं नरपशोर्हविः । वक्ष्याम्यस्यापि नियमं शृण्वतां च भयङ्करम् ॥ १० ॥
त्यक्तन्यूनातिरिक्ताङ्गः पूर्णाङ्गः सुमनोहरः । अग्रेजातश्च लक्षण्यः पुत्रः पञ्चषहायनः ॥ ११ ॥
विद्याविनयसंपन्नः कुलतन्तुर्महामतिः । मातापित्रोः प्रियतमः सर्वेषां नयनप्रियः ॥ १२ ॥
स्याच्चेत्तं मातुरुत्सङ्गे स्थापितं खड्गधारया । माता दृढगृहीताङ्घ्रिपाणिं सुतं च बालकम्॥१३॥
पिता विशस्य प्रक्षाळ्य नखरोमादिवर्जितम् । पचेति पत्न्यै दद्याच्चेत्पचेदव्यसना च सा ॥ १४॥
सस्यं कुर्वीत सरसं पाकाङ्गैः सह भर्जितम् । सिद्धार्थमेधिकाहिङ्गुजीरकाद्यैः सुवासितम् ॥ १५ ॥
समसैन्धवमादाय दर्व्या मे दीयतां हविः । एवं चेद्भविता तृप्तिरन्यद्भोज्यमरोचकम् ॥ १६ ॥
यदि शक्नोषि तत्कर्तुमस्तु भिक्षा त्वदालये । नो चेत्तत्र गमिष्यामि दातारो यत्र चार्थिनाम्॥ १७॥
अर्थं श्रावयितुं चेमं त्वामासं धृतसंशयः । कौतूहलं चेद्यशसि पत्न्याश्च न विलम्ब्यताम् ॥१८॥
स्मयमानस्तथेत्युक्त्वा दभ्रभक्तोऽपि धीरधीः । निश्शङ्कमेव स्वं वेश्म गत्वा भार्यान्तिकं ययौ॥१९
अथाभिमुखमायान्तीं स श्वेतवननायिकाम् । मूर्तामिव निजश्रद्धां भक्तिं माहेश्वरीमिव ॥ २० ॥
सर्वथा सानुसरणां छायां सहचरीमिव । शोकाम्बुधेरगाधस्य सन्तारे सुतरीमिव ॥ २१ ॥
कलामिवामलां चान्द्रीं विद्यामाधिच्छिदं यथा । चक्षुर्भ्यामनिमेषाभ्यां पश्यंस्तां समबोधयत्॥२२॥
कल्याणाभिजने कान्ते कर्णान्तायतलोचने । करुणावति कल्याणि कालकण्ठः प्रसीदतु ॥२३ ॥

नीलालके निर्मलमन्दहासे नीतिस्थिते नीरजपत्रनेत्रे ।
नीरन्ध्रवक्षोजभरानताङ्गि नीहारहारेऽवतु नीलकण्ठः ॥ २४ ॥

सुधासमोक्ते सुषमानवद्ये सुनासिके सुन्दरगात्रि सुभ्रूः ।
सुकेशि सूनास्त्रमहापताके सुधांशुमौळिस्तव सन्निधत्ताम् ॥ २५ ॥

वीणागुणालापिनि वीतरोषे वीरुद्भुजे विश्वजनान्नदात्रि ।
वीरः स माहेश्वरवीतिहोत्रो वीरासनस्थोऽर्थयति त्वदन्नम् ॥ २६ ॥

त्वयैव गुणशालिन्या भवनं मम भूषितम् । नन्दनं कल्पवल्ल्येव पूरिताभ्यागताशया ॥ २७ ॥
अनुकूलं न यस्यास्ति कलत्रं साध्वि मन्दिरे । अरण्यमेव तस्याहुः शरणं गृहमेधिनः ॥ २८ ॥
पतिं प्राणान् परित्यज्य रक्षन्ति हि पतिव्रताः । इति गाथाः पुराणेषु साध्वि साक्षात्कृतं त्वयि ॥
शृणु कर्तव्यमधुना विहितं विधिना मम । सर्वथा ह्यतिथिः पूज्यो गृहिणेत्यनुशासनम् ॥ ३० ॥
दृष्टादृष्टानि भाग्यानि नश्वराण्येव पश्यताम् । दायः कलत्रं पुत्राश्च पशवः सर्वसम्पदः ॥ ३१ ॥
अतिथ्यभ्यर्थिता देया न चेन्नश्यन्ति हि स्वयम् । विषया न परित्यक्ताः स्वयं पुंसागता यदि ॥
शोकशूलं हृदि न्यस्य गच्छन्त्येव पतिव्रते । सुधिया चेत्स्वयं त्यक्ता ददुः सौख्यमनन्तकम् ॥३३॥
शिबिर्वपुः स्वं श्येनाय कपोतत्राणतत्परः । अक्ष्यलर्को द्विजायादाद्व्याधायाङ्गं कपोतकः ॥ ३४ ॥
तिर्यञ्चोऽप्यतिथेः पूजामात्मनापि वितन्वते । अथ माहेश्वरे प्राप्ते किमदेयं भवेन्मम ॥ ३५ ॥

त्वदानुकूल्येन न किञ्चिदस्ति लोके दुरापं त्विह मेऽप्यमुष्मिन् ।
चिकीर्षुरस्मि यदत्र साध्वि छायेव मे तद्भवती करोतु ॥ ३६ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे दभ्रभक्तचरिते एकसप्ततितमोऽध्यायः ॥

॥ अथ द्विसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

एवं संबोधिता तेन सा श्वेतवननायिका । प्राञ्जलिः स्मयमानाह प्रणम्य प्राणनायकम् ॥ १ ॥
नाथ संबोधनमिदं किमपूर्वं कृतं मयि । कर्णयोर्मेऽसिधारेव भवच्चाटूक्तिचातुरी ॥ २ ॥
सर्वथा सापराधाहं शिक्षणीया ननु त्वया । कर्तव्यमादिश क्षिप्रं न चेत्तत्रानुकूलता ॥ ३ ॥
स्रज सद्यो जनमिमं भिन्नं भाण्डमिवान्तरे । दभ्रभक्तस्ततः प्रीतस्तदंसे हस्तमर्पयन् ॥ ४ ॥
तन्माहेश्वरसङ्कल्पं तस्याः कर्णे न्यवेदयत् । साध्वी तद्वाचमाकर्ण्य वज्रपातसमाक्षराम् ॥ ५ ॥
अपि स्म व्यथते नैव गङ्गेवाश्मनिपातनात् । आनयार्भकमत्रेति नियुक्तो निजभार्यया ॥ ६ ॥
जपन् पञ्चाक्षरीमेव बालशिक्षागृहं ययौ । अथ स श्रीपतिः स्वप्ने छिन्नं कैतकधारया ॥ ७ ॥
दृष्ट्वात्मीयं शिरो दुःखाद्भ्रान्त्या त्रस्तः समुत्थितः । जप्त्वो नमः शिवायेति चुकोशोच्चैर्गुरोः पुरः ॥
आहूय पृष्टो गुरुणा जगाद स्वप्नविस्मयम् । सर्वथावतु शंभुस्त्वां दीर्घाः सन्तु तवाशिषः ॥ ९ ॥
मा भैरिति तमाभाष्य गुरुश्चिन्तामपाकरोत् । अथान्तरा विवेशायं दभ्रभक्तो गुरोर्गृहम् ॥ १० ॥

मध्ये स्थितं श्रीपतिमर्भकाणां निधिं कलानामिव तारकाणाम् ।
उमापतेः स्तोत्रशतं पठन्तं तन्नात्मजं भक्तवरो ददर्श ॥ ११ ॥

पितुर्मुखालोकनजातहर्षः सुतः शिवस्तोत्रमुदाजहार ।
स श्रीपतिर्देशिकचोदितः सन्नुच्चैस्तरामुच्चरति स्म पद्यम् ॥ १२ ॥

उपास्य एकोऽधिपतिः पशूनां समर्चनीयाश्च तदीयभक्ताः ।
प्रीतः शिवो भक्तसपर्यया स्याच्छिवप्रसादेन शुचं तरन्ति ॥ १३ ॥

पद्यमाकर्ण्य पुत्रोक्तं मज्जन्नानन्दसागरे । प्रेषणीयो गृहं बाल इति तद्गुरुमाह सः ॥ १४ ॥
श्रीपते गच्छ सदनं पित्रोरानन्दमावह । इत्याकर्ण्योत्थितो बालः स्वगुरुं प्राणमत्पदे ॥ १५ ॥
उत्थाप्याघ्राततन्मौलिर्विततेने गुरुराशिषः ।

सन्त्वाशिषस्त्वयि सतां सफलाः प्रसादो गौरीपतेरनवधिः सुमतेऽस्तु दीर्घम् ।
आयुश्च वज्रमिव ते वपुरस्त्वरोगमैश्वर्यमक्षतमुपैतु कुलं च वृद्धिम् ॥ १६ ॥

कृताशिषं समाहूय गुरुणा पुत्रमात्मनः । माहेश्वरग्रहविभूतिं मूर्ध्न्याघ्राय च नन्दनम् ॥ १७ ॥
स्यादुच्छिष्टं हविरिति नाचुम्बत कपोलयोः । दभ्रभक्तस्तमादाय गुरुणा विहिताशिषम् ॥ १८ ॥
समारोप्य विजस्कन्धे तनयं विनयोज्ज्वलम् । नीत्वा गृहं स्वभार्यायै दत्वाह त्वर्यतामिति ॥ १९ ॥
सुगन्धिना तमभ्यज्य तैलेन तनयं सती । अभिषिच्य सुखोष्णेन वारिणा वारिजेक्षणम् ॥ २० ॥
मोचयित्वा निजोत्सङ्गे सुते बालं तु लालनात् । आह्वयामास भर्तारमचञ्चलमनाः सती ॥ २१ ॥
स तीक्ष्णधारासिधरः सहसान्तिकमाययौ । भूषितं सर्वगात्रेषु धृतभस्मत्रिपुण्ड्रकम् ॥ २२ ॥
दृढं जग्राह करयोः पाणिभ्यां पादयोर्वधूः । साध्वि भैक्षं महाभिक्षोर्मा भूद्वाष्पेण दूषितम् ॥ २३ ॥
पत्योक्ता त्वस्मरच्छम्भुं श्रीश्वेतवननायिका । उदस्तो दक्षिणेनासिर्दभ्रभक्तस्य पाणिना ॥ २४ ॥
रेजे दत्तेव देवेन कैलासक्रयपत्रिका । अथों नमः शिवायेति खड्गेनाखण्डयच्छिरः ॥ २५ ॥
ततः पादौ ततः पाणी श्रीपतेर्विचकर्त सः । रुधिरं नूतने क्वापि करकेऽस्य न्यधापयत् ॥ २६ ॥
त्वचमाच्छिद्य मुण्डं च नखकेशादिवर्जितम् । पचेति भार्यामवदत्सा च साध्वी तथाकरोत् ॥ २७ ॥
इयं भक्तिपरीक्षैव शंभोरिति कृताशया । पचति स्मार्भकवपुः शिरोमात्रं विहाय तत् ॥ २८ ॥
गृहीत्वा तच्छिरो दभ्रचेटी चन्दननायिका । खण्डयित्वापि च स्थाल्यामेकत्रास्थापयद्गृहे ॥ २९ ॥
अङ्गं समस्तमादाय सा श्वेतवननायिका । क्षालयित्वा च सलिलैः खण्डयित्वा च खण्डशः ॥ ३० ॥
मरीचैर्जीरिकाद्यैश्च कृष्णनिम्बदलैरपि । सद्यो घृतेन बहुना भर्जितं समसैन्धवम् ॥ ३१ ॥
एलाचूर्णैर्मिश्रितं च हिङ्गुसर्षपवासितम् । अर्भकाङ्गमशेषं च पचति स्म पतिव्रता ॥ ३२ ॥
संपन्नमिति भर्तारमुवाच मुदिता सती । उपलिप्यालयं सम्यग्भैरवं प्रत्यपालयत् ॥ ३३ ॥

भक्तः शिवालयं गत्वा कुदालतरुमूलगम् । महाभैरवमाहेदं संपन्नं साम्प्रतं हविः ॥ ३४ ॥
श्रान्तोऽसि सुचिरं देव मा विळम्बो विधीयताम् । इति तद्वाक्यमाकर्ण्य हरो माहेश्वराकृतिः ॥३५॥
काण्डत्रयात्मिके धृत्वा पादुके पादयोर्विभुः । शब्दब्रह्ममयारावनिक्वणन्मणिनूपुरः ॥ ३६ ॥
भस्माङ्गरागो बिभ्राणश्चालमल्लकमर्जुनम् । डमरुध्वननाटोपमुखरीकृतदिङ्मुखः ॥ ३७ ॥
रटत्करोटिसाहस्रकटिसूत्रभयंकरः । दधानस्त्रिशिखं शूलं स्फुरत्स्फटिककुण्डलः ॥ ३८ ॥
तार्तीयलोचनीभूतरोचनातिलकोज्ज्वलः । कपालमालिकानद्धजटोत्तम्भितकुन्तलः ॥ ३९ ॥
अरुणापाङ्गकलिकाविन्यासितजगत्त्रयः । आलम्ब्य दभ्रभक्तस्य हस्तमागात्तदालयम् ॥ ४० ॥

अथावनिज्याङ्घ्रिसरोरुहद्वयं तदीयमाधाय सुवर्णभाजने ।
दधार मूर्ध्ना तदपः स्वभार्यया जगाद धन्योऽस्मि चिरादपीति सः ॥ ४१ ॥

सुवर्णपुष्पैरपि चन्दनेन विधाय पूजामपि दभ्रभक्तः ।
पादारविन्दे भगवत्तमस्य प्रदक्षिणीकृत्य ननाम भूयः ॥ ४२ ॥

उपवेश्यासने हैमे मायामाहेश्वरं हरम् । रम्भापत्रद्वयं साग्रं विदधे विपुलं तले ॥ ४३ ॥
संप्रोक्ष्य पात्रं तोयेन स्थलशुद्धिं विधाय च । शिशुमांसोपहारं तं पात्रे पूर्वमुपस्तृते ॥ ४४ ॥
ददौ भक्तिमती साध्वी पश्चादन्नं घृताप्लुतम् । कर्पूरवासितं हस्ते दभ्रभक्तोऽप्यदाज्जलम् ॥४५॥
अथ माहेश्वरो मौलिं चालयन्नाह तौ पुनः । पक्वं शीर्षं न पश्यामि यन्मे प्रियतमं भवेत् ॥४६॥
तौ दम्पती तदा भीतौ पश्यतः स्म मुखं मिथः । शिशुशीर्षं ततः सम्यक्कृतपाकं च भर्जितम् ॥
श्रीश्वेतवननायक्यै चेटी चन्दननायिका । स्वामिन्यै प्रददौ सास्मै तत्पात्रे पर्यवेषयत् ॥ ४८ ॥
दत्वा त्वमृतमित्याह भुज्यतामिति तापसम् । भैरवः प्राह तं भूयस्त्वरा कार्या न मे त्वया ॥४९॥
शृणु चैकं वचो भक्त न वेत्सि नियमं मम । नाश्नीयामेक एवाहं क्वापि चण्डालकर्म तत् ॥५०॥
अभ्यागतोऽतिथिर्वान्यः कश्चिदाहूयतामिह । यावन्नायाति साक्ष्येको मया तावन्न भुज्यते ॥ ५१ ॥
इत्युक्ते बहिरुद्गम्य विचिन्वन् परितः क्वचित् । दभ्रभक्तोऽनवेक्ष्यान्यं भक्तं प्राप्य तदन्तिकम् ॥
साञ्जलिः प्राह न स्वामिन् क्वापि भक्तः प्रदृश्यते । अनुष्णमाहुश्चाभोज्यं भुक्त्वा तदयतां मयि ॥
दभ्रभक्तमथोवाच देवः परमभैरवः । भक्तो भवान् वा यः कश्चित् स्थीयतां भोजनाय तु ॥ ५४ ॥
वधूमुखमथालोक्य दभ्रभक्तोऽप्युवाच तम् । विज्ञप्तिः श्रूयतां स्वामिन्नाजन्मास्ति प्रतिश्रुतम् ॥५५॥
भुक्तवत्सु महत्स्वेव भुज्यतेऽनुदिनं मया । शिलान्यथा चेद्भोक्तव्या कथमेवं विधीयताम् ॥ ५६ ॥
शिलाभुजा वा भवता भुक्तिर्भक्त सहोत्तमा । विळम्बो मा तदास्त्वेह नो चेन्मे स्यान्न पारणा ॥
एवमुक्तौ माहेश्वरस्याथ प्रीतये भोक्तुमुद्यतः । दभ्रभक्तः शिवं स्मृत्वा शिलाकवळमाददे ॥ ५८ ॥
तं गृहीताश्मकवळं निरुध्याह पुनर्हरः । आः स्मृतं किञ्चिदधुना विस्मृतं यत्पुरा क्षुधा ॥ ५९॥

अस्ति हि श्रीपतिर्नाम तव पञ्चषहायनः । पुत्रः स भोजने प्राप्ते कथमत्र न दृश्यते ॥ ६० ॥
भुक्तपूर्वं च न मया सदने पुत्रवर्जिते । सर्वशास्त्रनिषिद्धं तदपुत्रगृहभोजनम् ॥ ६१ ॥

सरः सरोजेन विना कृतं यथा विना शशाङ्केन नभःस्थलं यथा ।
अदृष्टसूर्यं दिवसं यथा तथा निकेतनं भाति न पुत्रवर्जितम् ॥ ६२ ॥

अलङ्कारो मुखस्याक्षि वेदविद्या द्विजन्मनः । पातिव्रत्यं कुलीनाया वेश्मनो भूषणं सुतः ॥ ६३ ॥
यस्य भोजनकालेऽन्नं पात्रे निहितमर्भकः । न भुङ्क्ते सह तस्याद्य भोजनं तच्छ्वभोजनम् ॥६४॥

आच्छिद्य हस्तात्पितुराददानो बालो घृताक्तं कबळं मुखे स्वे ।
करोति चेदग्रत एव मातुस्तयोर्मुदा ब्रह्मसुखं न तुल्यम् ॥ ६५ ॥

मधुरं गृह्णतः सूनोरस्यजतः कटु भोजनम् । मुखचालनमालोक्य मोदेते ननु दम्पती ॥ ६६ ॥
अहो दयाविहीनोऽसि कुलतन्तुं कुमारकम् । उद्यतोऽसि विहायैव भोक्तुं भक्त कथंतराम् ॥ ६७॥
कथं वा ते दया नास्ति श्रीश्वेतवननायिके । भर्तुर्भोजनकालज्ञा पुत्रं नाह्वयसे यतः ॥ ६८ ॥
अद्य भक्त बहिर्गत्वा बाल आह्वयतां द्रुतम् । त्वदङ्गणे वा गोष्ठे वा क्रीडतीह स ते सुतः ॥६९॥
विलोकय विळम्बेन चालमित्यन्वशात्स तम् । अन्योन्यमालोकितमुखौ दम्पती प्राहतुर्वचः ॥७०॥
यथा भगवतादिष्टं तथावाभ्यां कृतः सुतः । स छिन्नावयवः पुत्रः पुत्रवान् कथमस्म्यहम् ॥ ७१ ॥

दव्यां शरावेऽपि च भोज्यपात्रे मातुः करे भैरवशस्तहस्ते ।
इत्थं विभक्तावयवं कुमारमचिन्तयित्वा कथमाह्वयामि ॥ ७२ ॥

इत्याकर्ण्य वचस्तस्य दभ्रभक्तं हरोऽब्रवीत् । यन्मया पूर्वमुदितमधुना तदिदं स्मृतम् ॥ ७३ ॥
दभ्रभक्त बहिर्गत्वा बाल आह्वयतां त्वया । सोऽप्यागमिष्यति क्षिप्रं नामश्रवणमात्रतः ॥ ७४ ॥
इति शंभुगिरं श्रुत्वा सन्तोषेण समन्वितः । शिवं ध्यात्वास्य नामोक्त्वा वदेति वनितां प्रति ॥७५॥
यथामाहेश्वरादेशं तदा पत्न्यै जगाद सः । तथेति बहिरागत्य सा श्वेतवननायिका ॥ ७६ ॥
शिक्षाशालोन्मुखी भूत्वा चाह्वयामास नन्दनम् । श्रीपते तूर्णमायाहि भोक्तुं माहेश्वराज्ञया ॥७७ ॥
आनन्दय कळालापैरावामप्यमृतोपमैः । इति मात्रा त्रिराहूतः श्रीपतिः शिवशासनात् ॥ ७८ ॥
वीथ्यामाविरभूद्बालः सर्वाभरणभूषितः । कङ्कणाङ्कितपाणिः सन् शिञ्जन्मञ्जीरमेखलः ॥ ७९ ॥

सिद्धार्थजीरकमरीचिनवाज्यागन्धीन्यङ्गानि भूषणकलापविभूषितानि ।
बिभ्रत्पिनाकधनुषैव कृताभयश्रीः स श्रीपतिः पुरत एव बभूव मातुः ॥ ८० ॥

अम्ब निद्रालुरङ्के ते कदाहं निर्गतो बहिः । इत्यालपन् मुहुर्मात्रा चाश्लिष्यत मुदार्भकः ॥८१ ॥
दिवि दुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता । रोमाञ्चिताङ्गी गिरिजा तद्भक्तिं श्लाघते स्म सा ॥ ८२ ॥

शंभुरन्तरधात्सद्यो महाभैरवरूपभृत् । तदैव शिशुमांसेन पात्रं तदवशेषितम् ॥ ८३ ॥
अथ तौ दम्पती भक्त्या बालालिङ्गननिर्वृतौ । अथ भोजयितुं देवमवालोकयतां मुदा ॥ ८४ ॥
तौ भैरवमपश्यन्तौ मांसमप्यर्पितं शिशोः । विस्मयाविष्टहृदयौ विचिन्वाते स्म सर्वतः ॥ ८५ ॥

गतस्य लाभेन सुतस्य नो मुदं तदा तथा प्रापतुरेव दम्पती ।
अदर्शनेनास्य यथा शुचं विभोर्महत्तरं तापमवापतुश्चिरम् ॥ ८६ ॥

उपेक्षसे कथं शंभो भक्ताविल्यश्रुवर्षिणौ । जन्मन्यन्यत्र पूजायाः शंभोर्विघ्नः कृतो महान् ॥ ८७ ॥
इति सञ्चिन्त्य सञ्चिन्त्य तं च तस्यापदानकम् । स्मारंस्मारं मुदा व्याप्तौ दत्तदृष्टी बभूवतुः ॥ ८८ ॥
अतिनिर्विण्णमनसावम्बिकापतिरीक्ष्य सः । अनुग्रहं तदा ताभ्यां चिकीर्षुर्मोक्षदः प्रभुः ॥ ८९ ॥

अथाविरासीद्भगवान् दयानिधिः पुरस्तयोर्देवगणैरभिष्टुतः ।
सहैव गौर्या गजवक्त्रशक्तिभृन्निषेव्यमाणो वृषभोपरि स्थितः ॥ ९० ॥

जयेति रक्षेति विलोकयेति देव प्रसीदेति पुराणवाग्भिः ।
अभिष्टुतश्चन्द्रकलावतंसः श्रीदभ्रभक्तान्तिकमाससाद ॥ ९१ ॥

संपूजितस्तेन च भक्तिपूर्वं भार्यासमेतस्य च तस्य चेट्यः ।
तद्बन्धुसामन्तगृहस्थितानां मुक्तिं वितीर्यान्तरधात्स शंभुः ॥ ९२ ॥

पुत्रमित्रकलत्रादिवर्गेण सह संयुतः । सारूप्यमुक्तिं संप्राप्य कैलासे मुमुदेतराम् ॥ ९३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे दभ्रभक्तमुक्ति प्राप्तिर्नाम द्विसप्ततितमोऽध्यायः ॥

॥ अथ त्रिसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

सारूप्यमुक्तिभाग्दभ्रभक्तः कैलासपर्वते । वसंस्तुरीयावरणे शंभुसेवासमुत्सुकः ॥ १ ॥
एकदा नन्दिनं प्राह तृतीयावरणेश्वरम् । नत्वा विज्ञापयामास दभ्रो विनयपूर्वकम् ॥ २ ॥
श्रीमद्विरन्तर्गत्वाद्य वक्तव्यं शंभुसन्निधौ । पुत्रच्छेत्ता महापापी द्वार्यागत्य तु वर्तते ॥ ३ ॥
एवं संप्रार्थितो नन्दी गत्वा शुद्धान्तमीशितुः । श्रावयामास तद्वृत्तं यथा दभ्रेण भाषितम् ॥ ४ ॥
आनयेति तदादिष्टो नन्दी तं सहसानयत् । आनीतोऽष्टाङ्गपञ्चाङ्गत्र्यङ्गभेदैर्नमस्क्रियाम् ॥ ५ ॥
अकरोत्तमुवाचेशः स्मयमानमुखाम्बुजः । पुत्रछेदिन् महापापिन्नुत्तिष्ठेतीशचोदितः ॥ ६ ॥
उत्थायाञ्जलिहस्तः सन् दभ्रोऽतिष्ठच्छिवाग्रतः । तदा तु गौरीमिलाह यावन्नलोकमेत्य च ॥ ७ ॥

दृष्टाद्भुतोऽत्रागच्छामि तावत्तिष्ठात्र पार्वति । उक्त्वेति दभ्रभक्तस्य गर्वापनयनाय च ॥ ८ ॥
प्रतिप्रतस्थे भूलोकं तत्करं प्रतिगृह्य च । सुदृढं स्थूलमुष्णाख्ये ग्रामे वैष्णवसङ्कुले ॥ ९ ॥
शंकरो दभ्रभक्तश्च वृद्धब्राह्मणवेषगौ । धृतत्रिपुण्ड्ररुद्राक्षौ पूजापेटकधारिणौ ॥ १० ॥
कम्पितावयवावात्तदण्डौ क्षुच्छ्रमसंयुतौ । आविर्बभूवतुस्तत्र वैष्णवावसथे पुरे ॥ ११ ॥
अयाचतां प्रतिगृहमन्नमस्ति किमावयोः । इति पृष्टास्तदा ताभ्यां वैष्णवा निर्दयाशयाः ॥ १२ ॥
बिभूतिरुद्राक्षभृतामत्र नास्त्योदनं त्विति । तर्जयामासुरितरे प्रोचुरेव दयालुवत् ॥ १३ ॥
अन्ये दयालवः केचिद्दृढौ वीक्ष्येति चोचिरे । अस्मिन् ग्रामे वधूः काचित् ब्राह्मणी विधवाधुना ॥
एकपुत्रवती शैवी कृतवेतनजीवना । अस्यास्त्रिचतुराः सन्ति गावस्तत्पालकः सुतः ॥ १५ ॥
शिवभक्तिमती शुद्धा सुभक्ता शाम्भवे जने । अन्नदा शिवभक्तानामागतानामकिञ्चना ॥ १६ ॥
सत्करोति युवां सा चेदन्नैः सर्वोपचाकरकैः । इति तद्वाक्यमाकर्ण्य यत्रान्यगृहचत्वरे ॥ १७ ॥
वेतनार्थं व्रीहिचयं प्रहरन्ती च वर्तते । मुसलाहतिजीवातोर्वितन्तोरन्तिके तदा ॥ १८ ॥
तस्याश्चाविरभूतां द्वौ सा दृष्ट्वा शंसुरूपिणौ । नत्वा विनयपूर्वेण कृतार्थास्मीत्यभाषत ॥ १९ ॥
अद्य मे सफलं जन्म सफलं चाद्य मे तपः । उक्त्वेति सदनं स्वस्य नीत्वा तौ चासनादिभिः ॥२०॥
पूजयित्वा पुनः श्रान्तिं व्यपोह्य व्यजनानिलैः । आतिथ्यं युवयोरस्तु मम गेहे महात्मनोः ॥ २१॥
पच्यते युवयोः शीघ्रं स्नात्वागच्छतमित्यसौ । स्नानाय प्रेषयित्वा तौ स्वयं स्नात्वा धृतादरा ॥ २२
अनुलिप्यालयं स्वीयं श्रद्धया गोमयाम्भसा । सूपापूपैर्व्यञ्जनौघैः पायसेनापि चौदनम् ॥ २३ ॥
क्षणान्नवीनभाण्डेषु सम्यक् पक्वमधत्त सा । पक्त्वा शुचिरुचीन् पाक्यन् पराधीनाप्यलिन्दगा ॥
पदेपदे समालोक्यानागते द्विजयुग्मके । आतपेऽतितरां धान्यं तप्तं चेच्चूर्णतां व्रजेत् ॥ २५ ॥
मूढे प्रहर्तुमायाहि धान्यं वैतनिके जवात् । इत्याहूता तत्र गत्वा भीता तच्छालिमर्दिनी ॥ २६ ॥
पदेपदे बहिर्गत्वा पश्यन्त्यागमनं तयोः । अनागते तदा भक्तजने निर्विण्णमानसा ॥ २७ ॥
अर्गळेनात्मभवनारं बद्ध्वान्यचत्वरे । व्रीहिप्रहारं कुर्वन्ती तिष्ठति स्म तदा शिवः ॥ २८ ॥
स्नानार्थमापगातीरं गतो गङ्गाधरः पुनः । चिरप्रवासिनस्तस्या भ्रातुर्वेषं वहन् सह ॥ २९ ॥
दभ्रेण मित्ररूपेण कृतपाटीरलेपनः । प्रातः पुरातनं भुक्त्वा दध्नान्नं वनगामिनः ॥ ३० ॥
तत्सूनोः पशुपालस्य मातुलो भुक्तवत्पुरः । गतस्तन्निकटं नत्वा भागिनेयः स्वमातुलम् ॥ ३१ ॥
पिप्रिये तं समुत्थाप्य सस्नेहं परिरभ्य तम् । प्रत्याह भागिनेयस्त्वमत्र तिष्ठस्युपोषितः ॥ ३२ ॥
अस्मिन् दिने मया प्राप्तं स्वस्रा पक्वं मयाशितम् । त्वयापि गत्वा भोक्तव्यमन्नं गेहेऽस्ति षड्रसैः ॥
तावद्गाः पालयाम्यत्र यावदागमनं तव । इति तत्प्रेषितः शीघ्रं वटुः प्राप्य निजं गृहम् ॥ ३४ ॥
करादर्गळमुत्पाट्य प्रविश्यान्तर्गृहं तदा । आयते कदळीपत्रे सर्वव्यञ्जनसंयुतम् ॥ ३५ ॥
अन्नं निक्षिप्य भाण्डस्थं ससूपापूपपायसम् । अभुङ्क्तदखिलं भीतिवर्जितो बालको यदा ॥ ३६ ॥

शंभुरन्तरधात्सद्यो महाभैरवरूपभृत् । तदैव शिशुमांसेन पात्रं तदवशेषितम् ॥ ८३ ॥
अथ तौ दम्पती भक्त्या बालालिङ्गननिर्वृतौ । अथ भोजयितुं देवमवालोकयतां मुदा ॥ ८४ ॥
तौ भैरवमपश्यन्तौ मांसमप्यर्पितं शिशोः । विस्मयाविष्टहृदयौ विचिन्वाते स्म सर्वतः ॥ ८५ ॥

गतस्य लाभेन सुतस्य नो मुदं तदा तथा प्रापतुरेव दम्पती ।
अदर्शनेनास्य यथा शुचं त्रिभोर्महत्तरं तापमवापतुश्चिरम् ॥ ८६ ॥

उपेक्षसे कथं शंभो भक्ताविल्यश्रुवर्षिणौ । जन्मन्यन्यत्र पूजायाः शंभोर्विघ्नः कृतो महान् ॥ ८७ ॥
इति सञ्चिन्त्य सञ्चिन्त्य तं च तस्यापदानकम् । स्मारंस्मारं मुदा व्याप्तौ दत्तदृष्टी बभूवतुः ॥ ८८ ॥
अतिनिर्विण्णमनसावम्बिकापतिरीक्ष्य सः । अनुग्रहं तदा ताभ्यां चिकीर्षुर्मोक्षदः प्रभुः ॥ ८९ ॥

अथाविरासीद्भगवान् दयानिधिः पुरस्तयोर्देवगणैरभिष्टुतः ।
सहैव गौर्या गजवक्त्रशक्तिभृन्निषेव्यमाणो वृषभोपरि स्थितः ॥ ९० ॥

जयेति रक्षेति विलोकयेति देव प्रसीदेति पुराणवाग्भिः ।
अभिष्टुतश्चन्द्रकलावतंसः श्रीदभ्रभक्तान्तिकमाससाद ॥ ९१ ॥

संपूजितस्तेन च भक्तिपूर्वं भार्यासमेतस्य च तस्य चेत्याः ।
तद्बन्धुसामन्तगृहस्थितानां मुक्तिं वितीर्यान्तरधात्स शंभुः ॥ ९२ ॥

पुत्रमित्रकलत्रादिवर्गेण सह संयुतः । सारूप्यमुक्तिं संप्राप्य कैलासे मुमुदेतराम् ॥ ९३ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे दभ्रभक्तमुक्ति प्राप्तिर्नाम द्विसप्ततितमोऽध्यायः ॥

॥ अथ त्रिसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

सारूप्यमुक्तिभाग्दभ्रभक्तः कैलासपर्वते । वसंस्तुरीयावरणे शंभुसेवासमुत्सुकः ॥ १ ॥
एकदा नन्दिनं प्राह तृतीयावरणेश्वरम् । नत्वा विज्ञापयामास दभ्रो विनयपूर्वकम् ॥ २ ॥
श्रीमद्भिरन्तर्गत्वाद्य वक्तव्यं शंभुसन्निधौ । पुत्रश्छेत्ता महापापी द्वार्यागत्य तु वर्तते ॥ ३ ॥
एवं संप्रार्थितो नन्दी गत्वा शुद्धान्तमीशितुः । श्रावयामास तद्वृत्तं यथा दभ्रेण भाषितम् ॥ ४ ॥
आनयेति तदादिष्टो नन्दी तं सहसानयत् । आनीतोऽष्टाङ्गपञ्चाङ्गत्र्यङ्गभेदैर्नमस्क्रियाम् ॥ ५ ॥
अकरोत्तमुवाचेशः स्मयमानमुखाम्बुजः । पुत्रछेदिन् महापापिन्नुत्तिष्ठेतीशचोदितः ॥ ६ ॥
उत्थायाञ्जलिहस्तः सन् दभ्रोऽतिष्ठच्छिवाग्रतः । तदा तु गौरीमिल्माह यावद्भलोकमेत्य च ॥ ७ ॥

भुक्त्वा क्षणात्पुनरिमावूचतुः समवेक्ष्य ताम् । आवयोस्तृप्तिरभवद्भुक्त्वात्र सदने तव ॥ ६६ ॥
अस्मत्प्रीत्यै भवत्सूनुरद्य वाढूयतामिति । प्रोक्ताहायास्यति कथं सुतो मन्मुसलाहतः ॥ ६७ ॥
इत्युक्तावाहतुर्भूयस्तन्नामाम्रेडने कृते । अस्मच्छक्त्यायास्यतीति प्रोक्ता सा सहसाह्वयत् ॥ ६८ ॥
शिवाज्ञया मृतः सोऽपि प्राप्य प्राणान् गतव्रणः । सुप्तोत्थितवदुत्थाय कटीमावेष्टय वाससा ॥ ६९
अट्टालादवरुह्याशु यथापूर्वमभूत्पुरः । मातुर्विस्मय एवासीत्किमेतदिति मानसे ॥ ७० ॥
तदन्तरे महादेवो वृद्धरूपं विहाय च । मृगीपरशुहस्तश्च वरदाभयसंयुतः ॥ ७१ ॥
अर्धचन्द्रलसन्मौलिर्विरासीत्तदग्रतः । तं दृष्ट्वा कम्पिताङ्गी सा रोमाञ्चितकलेबरा ॥ ७२ ॥
आनन्दाश्रुपरीताङ्गी नत्वा स्तुत्वा च भक्तितः । मुसलाहतिसन्नाहवाङ्मनःकायसम्भवम् ॥ ७३ ॥
अपराधं क्षमस्वेति पुनः पुनरुदैरयत् । तदा दयालुर्भगवांस्तामाह स्म महेश्वरः ॥ ७४ ॥
त्वद्भक्त्या मुदितोऽस्म्यद्य मत्तो वरमभीप्सितम् । वरयेति शिवेनोक्ता वव्रे सा मोक्षमीश्वरात् ॥ ७५॥
मास्तु मुक्तिरिदानीं ते पश्चाद्भवतु सुव्रते । अन्नदानरता भूत्वा मद्भक्तानां विशेषतः ॥ ७६ ॥
महद्दैर्भ्रयसंयुक्ता पुत्रेण सह भूतले । चिरकालमुषित्वान्ते मल्लोकं यास्यसि ध्रुवम् ॥ ७७ ॥
इत्युक्त्वानुगृहीत्वा तां सदश्रोऽन्तर्हितः शिवः । तदा प्रभृति तत्क्षेत्रं शिवक्षेत्रमभूद्भुवि ॥ ७८ ॥
कैलासलोकमासाद्य दभ्रं गर्वितमानसम् । इत्युवाच महादेवो दभ्रगर्वापनुत्तये ॥ ७९ ॥
सपत्नीको गृहस्थस्त्वमेकं पुत्रं छिनत्सि चेत् । पुत्रान् समुत्पादयितुं शक्नोषीयमभर्तृका ॥ ८० ॥
एकपुत्रवती पुत्रमहनत्किल साहसात् । पुत्रं जनयितुं नान्यं विधवार्हति कुत्रचित् ॥ ८१ ॥
त्वद्भक्तेरधिका भक्तिस्तस्मादस्या न संशयः । गर्वादस्मत्समो नास्ति त्रिषु लोकेषु भक्तिमान् ॥
इति व्याजेन वचसा यस्मादुक्तं त्वया पुरा । तस्मान्मर्त्यो भव क्षोण्यामिति शप्तो भयान्वितः ॥
नत्वा संप्रार्थयामास मयाज्ञानादुदीरितम् । सर्वं यदागस्तत्सोढ्वा रक्ष रक्ष कृपानिधे ॥ ८४ ॥
शापान्तं ब्रूहि कृपयेत्युक्तः शंभुरुवाच तम् । भूम्यां मद्भक्तिमान् भूत्वा नन्दगोप इति श्रुतः ॥
जनित्वा पुत्रभावेन कृष्णं प्राप्य कृतार्थताम् । उपेत्य कृष्णसम्बन्धान्मुक्तशापो भविष्यसि ॥ ८६ ॥
पश्चान्मल्लोकमासाद्य यथापूर्वं वसिष्यसि । शापान्तमिति कृत्वास्य यथापूर्वं स्थितः शिवः ॥ ८७ ॥
सोऽपि तच्छापमात्रेण नन्दो भूत्वा शिवार्चनात् । पुत्रभावेन कृष्णेन कृतार्थो मुदितान्तरः ॥८८॥
देहान्ते मुक्तशापोऽसौ दभ्रभक्तः स्तुवञ्छिवम् । पश्याज्जगाम सायुज्यं पार्वतीशप्रसादतः ॥ ८९॥
चरित्रं दभ्रभक्तस्य ये शृण्वन्ति पठन्ति वा । पार्वतीशप्रसादेन ते तरन्ति भवाम्बुधिम् ॥ ९० ॥
श्रीमुण्डब्राह्मणीवृत्तं ये शृण्वन्ति पठन्ति वा । इह भुक्त्वाखिलान् भोगानन्ते सायुज्यमप्नुयुः ॥९१
॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीमुण्डब्राह्मणीमुक्तिप्राप्तिर्नाम सप्तसप्ततितमोऽध्यायः ॥

॥ अथ चतुरशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अनवद्येषु भोगेषु करस्थेष्वपि निस्पृहाः । येऽर्चन्ति केवलं शंभुं तेषां मुक्तिरदुर्लभा ॥ १ ॥
इतिहासमिह प्राहुरार्याः शिवकथाविदः । चरितं वर्ण्यते यत्र क्षत्रियस्य क्षमावतः ॥ २ ॥
चेरस्याशेषजन्तूनां भाषाचिन्तिततवेदिनः । पुरं महोदयमिति ख्यातमत्र जगत्त्रये ॥ ३ ॥
नामान्तरं च तस्याहुर्वानीरपुरमित्यपि । तत्र कश्चिद्भूद्राजा विक्रमोन्मूलिताहितः ॥ ४ ॥
क्षमावानिति विख्यातश्चिन्ताविदिति च श्रुतः । अनन्तगुणसंपन्नः श्रीमान् राम इवापरः ॥ ५ ॥
आहुः श्रीचेरनामानं पारराष्ट्रेषु यं नृपाः । स तु राजा नीतिचरो वदान्यो ब्राह्मणप्रियः ॥ ६ ॥
आम्नायागममर्मज्ञः सर्वक्रतुषु दीक्षितः । सर्वसंशयसञ्छेत्ता सदस्पतिसंमतः ॥ ७ ॥
सदा सम्पूर्णकोशश्च सामात्यबलवाहनः । गृहेषु तस्य पर्यङ्का नवरत्नविचित्रिताः ॥ ८ ॥
पयःफेननिभाः शय्या दुकूलास्तरणोज्ज्वलाः । शतसाहस्रसङ्ख्याताः श्यामा हेमरुचः स्त्रियः ॥ ९ ॥
करदैरन्वहं दत्तं वर्धते मेरुवद्धनम् । स सर्वं तृणवत्पश्यन् शिवमेव समर्चयन् ॥ १० ॥
जपन् पञ्चाक्षरं नित्यं दिवसानत्यवाहयत् । स विसृज्याखिलान भोगान् तपसेऽरण्यमेयिवान् ॥ ११ ॥
संप्रार्थितश्च सचिवैः प्रवेशाय पुनः पुरे । नानुमेने स्वयं राज्यं शिवपूजाविघातकृत् ॥ १२ ॥
पिपीलिकादिहस्त्यन्तजन्तूनामविवेकिनाम् । भाषेङ्गितहिताज्ञानां राज्ञां स्यान्नरकं ध्रुवम् ॥ १३ ॥
त्यक्त्वेति राज्यं न्यवसत् प्राणिहिंसाभयाद्वने । स्वप्ने तदा शिवेनैवं क्षमावान् शासितोऽभवत् ॥ १४ ॥
अधिशाधि महीं शत्रून् जहि विप्रांश्च पालय । जानीहि सर्वजन्तूनां भाषाश्च मदनुग्रहात् ॥ १५ ॥
यद्यद्वाञ्छसि तत्तेऽहं विधास्य इति सर्वकृत् । यथावच्छासनं शंभोश्चिकीर्षन्नथ भूपतिः ॥ १७ ॥
प्रविवेश पुरं भूयः सचिवैश्चाभ्यषिच्यत । जन्तूनक्लेशयित्वायं ज्ञाततद्वचनेङ्गितः ॥ १८ ॥
विधिवत्पालयामास सधेनून् ब्राह्मणानपि । अयजद्विविधैर्यज्ञैरध्वराधिपतिं हरम् ॥ १९ ॥
पूजयामास विधिवद्रुस्मरुद्राक्षधारिणः । क्वचिदूषाधरं दृष्ट्वा भस्मोद्भूलनशङ्कया ॥ २० ॥
प्रणमन् रजकं तेन प्रणतस्तमतोषयत् । जातिभेदोऽस्य राज्ञो नो यस्मिन् भस्मेशलाञ्छनम् ॥ २१ ॥
स एव पूज्यो भवति नीचो वा रजकोऽपि वा । तस्यैवं भक्तिशीलस्य नगरी सुप्रजाभवत् ॥ २२ ॥
अवन्ध्यसस्या भूरासीत् स्वधर्मनिरता जनाः । तस्मिन् सिंहासनारूढे क्षमावति महीपतौ ॥ २३ ॥
स हालास्येशमाहात्म्यं श्रुत्वा तस्मिन् निविष्टधीः । सस्मार मनसा तस्य नाम दिव्यं श्रुतादिषु ॥
शूद्रवंशोद्भवः कश्चिद्बाणभद्रसमाह्वयः । सन्निधौ सुन्दरेशस्य सञ्जगौ धनकाङ्क्षया ॥ २५ ॥
त्रिसन्ध्यं वीणया गायंस्तस्य लीला मनोहराः । देवमानन्दयामास मीनाक्षीरमणं विभुम् ॥ २६ ॥
स्वप्नेऽथ बाणभद्रस्य ददौ पत्रं करे हरः । चेराय देहि तद्दत्तं गृहाण द्रविणं महत् ॥ २७ ॥
इत्यादिश्य तिरोभूते देवे सभयमुत्थितः । बाणभद्रः करे दृष्ट्वा पत्रमाश्चर्यवानभूत् ॥ २८ ॥

महोदयपुरं प्राप्य स तत्पत्रं क्षमावते । दत्वा राज्ञा विनाचिह्नैर्दत्तं धनमुपात्तवान् ॥ २९॥
बाणभद्रोऽपि मधुरां धनं यावदपेक्षितम् । गृहीत्वा प्रययौ हृष्टः पथि यानैर्यथा नृपः ॥ ३० ॥
एवं तु शिवभक्तानामनन्दः स्वर्णदः सदा ।

पूजावसानेऽनुदिनं पुरारेः स नृत्यतो नूपुरशिञ्जितानि ।
आकर्णयन् मोदकृताश्रुवर्षः कालं निनाय क्षणवन्महान्तम् ॥ ३१ ॥

स कदाचन पूजायां समाप्तायामुमापतेः । अशृण्वन्नूपुरारावं मेने स्वमपराधिनम् ॥ ३२ ॥
द्रोहस्य निष्कृतिः शम्भोः प्राणत्याग इति स्मरन् । निजोदरं विनिर्भेत्तुं दधौ कौक्षेयकं करे॥ ३३
न्यरुणत्साहसं तस्य प्रादुर्भूय सदाशिवः । सुन्दरस्तुतिसक्तेन विस्मृतं ताण्डवं मया ॥ ३४ ॥
सख्यं ते सुन्दरेणास्तु सहितस्तेन सर्वतः । स्थलेषु सेवमानो मां परां प्रीतिमुपैष्यसि ॥ ३५ ॥
आगमिष्यति कैलासं यस्मिन् काले स सुन्दरः । तदा मदाज्ञया कश्चिच्चतुर्दन्तो महागजः॥३६॥
भविष्यति समीपे ते तदा तेनामुना सह । वपुषायाहि मत्स्थानमित्युक्त्वान्तर्दधे हरः ॥ ३७ ॥
क्षमावानथ सन्तुष्टः सचिवारोपितक्षितिः । प्रतस्थे सुन्दरं द्रष्टुं सभृत्यबलवाहनः ॥ ३८ ॥

हालास्यनाथं च चिदम्बरेशं द्रोणीपुरेशं च निषेव्य मार्गे ।
संप्राप्य स श्रीकमलालयं च स्तुत्वा हरं सुन्दरमित्रमासीत् ॥ ३९ ॥
स तेन सर्वत्र निषेव्य शंभुं प्रस्थाप्य मित्रं कमलालयाय ।
महोदये पूर्ववदेव राज्यं शशास भूयः शतमन्युतेजाः ॥४० ॥

कालेन चेरनृपतिः क्षमावान् शिवशासनात् । आगतं गजमालोक्य मुक्तिं प्राप्तः सुन्दरः ॥४१॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे चेरचरित्रं नाम त्रिसप्ततितमोऽध्यायः ॥

॥ अथ चतुःसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

श्रीकर्म ये प्रकुर्वन्ति ध्यायन्तः शङ्करं गुरुम् । शोकमोहविनिर्मुक्तास्ते यान्ति शिवमन्दिरम्॥ १ ॥
आसीद्द्रोणीपुरीनाथवामाङ्गस्तन्यपायिनः । दयालवाप्तविज्ञानो गणनाथाह्वयो द्विजः ॥ २॥
श्रीकर्मणि नियुक्तोऽभूद्गुरुणा पारमेश्वरे । स्वरूपं तस्य पप्रच्छ प्रणम्य परया मुदा ॥ ३ ॥
गौरीतृतीयतनयः स तस्मै तदुपादिशत् । गुरुपादाब्जभजनं नित्यं पञ्चाक्षरीजपः ॥ ४ ॥
त्रिसन्ध्यमात्मलिङ्गार्चा भस्मरुद्राक्षधारणम् । स्वयंव्यक्तमहालिङ्गदर्शनं च प्रदक्षिणम् ॥ ५ ॥
रुद्राध्यायजपश्चापि शिवाग्नौ हविरर्पणम् । अतिथ्यभ्यागताख्ये च चरलिङ्गे शिवार्चनम् ॥ ६ ॥
श्रीमज्जनाम्बुदानं च तद्द्रव्यस्य समर्पणम् । ग्रन्थकुङ्कुमकर्पूररोचनादिसमर्पणम् ॥ ७ ॥

दध्याज्यक्षीरतैलाद्यैः फलैर्लिङ्गाभिषेचनम् । अशान्तदीपारोपश्च पूजापात्रविशोधनम् ॥ ८ ॥
निर्माणं वाद्यजातानां शंभोर्दासीसमर्पणम् । पाठनं नृत्तगीतादेरालयालेपमार्जनम् ॥ ९ ॥
नित्यं शिवपुराणानां श्रवणं श्रावणं तथा । पुष्पारामविधानं च चित्रवस्त्रसमर्पणम् ॥ १० ॥
रम्भादाडिमजम्बीरनालिकेरादिभूरुहाम् । उद्यानवाटीरचनं तटाकारचनं तथा ॥ ११ ॥
शैवागमार्थश्रवणं तत्कोशानां च सङ्ग्रहः । निर्माणं मण्टपादीनां रथवाहनकल्पनम् ॥ १२ ॥
कैङ्कर्यकारिणां नित्यं पोषणं देहिनामपि । अन्येषामेवमादीनां शिवप्रीतिविधायिनाम् ॥ १३ ॥
पालनं सर्वधर्माणां श्रीकर्म परिकीर्तितम् । इत्यादिष्टः स गुरुणा तथा चक्रे गणाग्रणीः ॥ १४ ॥
महोत्सवविधानं च शिवयोर्भूषणानि च । स्वधनैः कारयामास चान्यदत्तैश्च वेतनात् ॥ १५ ॥
अशून्यं गमयामास यावदायुर्गणाग्रणीः । देहावसाने देवस्य प्रसादाद्गिरिजापतेः ॥ १६ ॥
स्मरन् गुरुपदाम्भोजं स कैवल्यमवाप्तवान् ॥ १७ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे गणनाथचरित्रं नाम पञ्चसप्ततितमोऽध्यायः ॥

॥ अथ षट्सप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

दृढभक्तिमता शंभुः सेवितो विजितारिणा । प्रसन्न इह चामुत्र प्रदद्यादेव वाञ्छितम् ॥ १ ॥
पुरं पुष्करनामास्ति प्रथितं भुवनत्रये । तत्रासीन्नृपतिः श्रीमान् परान्तक इति श्रुतः ॥ २ ॥
स धीराणां च वीराणां प्रथितोऽग्रेसरो भुवि । त्रैणं तृणं धनं लोष्टं येनासीत्तुलितं धिया ॥ ३ ॥
आजानसिद्धवैराग्योऽप्यासीत्क्षत्रियवृत्तिमान् । रणे दृष्ट्वा पलायन्ते तस्य रम्यं हरिध्वजम् ॥ ४ ॥
मृगराजमिवारण्ये दूरे दृष्ट्वा महागजाः । शत्रून् वित्रास्य नृपतिर्व्याघ्रो मेषव्रजानिव ॥ ५ ॥
स्वविक्रमार्जितं सोऽयमध्युवास नृपासनम् । पुण्डरीकपुरे स्थित्वा सेवमानो नटेश्वरम् ॥ ६ ॥
आनन्दनृत्तमकरोत्प्रीत्यर्थं चित्सभापतेः । परान्तकस्तदारभ्य नृत्तकश्चेति पप्रथे ॥ ७ ॥
कैङ्कर्यं बहुधा शंभोर्विततान परान्तकः । तत्कैङ्कर्येण मुदितश्चिदम्बरसभापतिः ॥ ८ ॥
बभूव भक्तवात्सल्याद्वचसामप्यगोचरः । स्वप्ने कदाचित्तं प्राह त्रिपुरारिः परान्तकम् ॥ ९ ॥
स्यात्किरीटाभिषेकस्ते जिता यद्भवता मही । इत्यादिष्टो महेशेन तथा कर्तुं मनो दधे ॥ १० ॥
यज्ञनो मेळयित्वायं पुण्डरीकपुरस्थितान् । किरीटधारणं यूयं विधत्तेत्याह भूपतिः ॥ ११ ॥
ते तमूचुर्महात्मानं चोळवंशपुरोहिताः । वयं चोळस्य मकुटं नो दध्म इति सङ्गताः ॥ १२ ॥
शङ्कितश्च स्वयं वोढुमभून्मौनी परान्तकः । अथ स्वप्ने नटेशानो मूर्ध्नि तस्य महीपतेः ॥ १३ ॥
न्यधत्त चरणद्वन्द्वं तदभून्मकुटद्वयम् । प्रातस्तं पूजयामासुर्यज्वानो मुदिताशयाः ॥ १४ ॥

त्वमेव भक्त इत्युक्त्वा तस्माद्विभ्युर्यथेश्वरात् । महानटपदाम्भोजविन्यासमकुटोज्ज्वलः ॥ १५ ॥
भोगान् भुक्त्वेह नृपतिः शिवसायुज्यमाप्तवान् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे परान्तकचरित्रं नाम षट्सप्ततितमोऽध्यायः ॥

॥ अथ सप्तसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥
शब्दब्रह्ममयाम्भोधौ चेतोमीनस्य वल्गतः । सदाशिवपदध्यानं स्यात्कालबडिशापहम् ॥ १ ॥
अस्ति वेदपुरं नाम वेदागमविदां पदम् । नगरी यत्र विख्याता वाणीलक्ष्म्योः सहस्थितिः ॥ २ ॥
सत्यदासाह्वयस्तत्र द्विजानामग्रणीरभूत् । शिवपादाम्बुजे भक्तिरासीत्तस्येव सोदरी ॥ ३ ॥
त्रिसन्ध्यं पूजयन् शंभुं वेदशास्त्राब्धिपारगः । आरराध गिरां देवीं मन्त्रेण त्र्यक्षरेण सः ॥ ४ ॥
समर्चिता द्वादश वर्षमीश्वरी गिरां प्रसन्ना शरदिन्दुनिर्मला ।
तनुं दधाना तमपाययत्पयः समागता स्वप्नदशान्तरे स्वयम् ॥ ५ ॥
सद्यः समुत्थितस्यासीदमृतासारवर्षिणी । लहरी वचसां शंभोः कपर्दादिव जाह्नवी ॥ ६ ॥
स गुरुं प्रातरभ्येत्य स्वप्नवृत्तं निवेद्य च । वाग्जन्मनः फलं किं स्यादित्यपृच्छन्महामतिः ॥ ७ ॥
स च सन्तुष्टहृदयः शिष्यं प्राह पदानतम् । सत्यदास कृतार्थोऽसि जन्म ते चरमं ध्रुवम् ॥ ८ ॥
चतुर्णामपि वेदानामागमानां च निश्चितम् । तात्पर्यं शिव एवेति मुनिभिर्ब्रह्मवादिभिः ॥ ९ ॥
स्तुहि तस्माद्वचोभिस्तं प्रसीदतु महेश्वरः । इत्याचार्येण संदिष्टः सत्यदासः कवीश्वरः ॥ १० ॥
आवयोऽवधि गौरीशं स्तुवन् सायुज्यमाप्तवान् ।

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सत्यदासचरित्रं नाम सप्तसप्ततितमोऽध्यायः ॥

॥ अथ अष्टसप्ततितमोऽध्यायः ॥

श्रीअगस्त्यः ॥
यः स्वयं शिवभक्तोऽपि शैवचिह्नभृतामपि । न कदाप्यपराधी स्यादपराधे त्यजेदसून् ॥ १ ॥
सोऽपि कैवल्यमाप्नोति सत्यमेतन्मयोच्यते । राज्ञां चोळान्वयभुवां राजधानी महीयसी ॥ २ ॥
अस्त्यामोदपुरं नाम तत्राभूद्धर्मकेतनः । भोगे शक्रसमो राजा त्यागे निधिपतेः समः ॥ ३ ॥
योगे तु कपिलप्रख्यो यागेष्वर्चितनिर्जरः । स निर्जित्य दिशः सर्वा एकवीरो महीपतिः ॥ ४ ॥
ईजे विश्वजिता देवं क्रतुना परमेश्वरम् । स्वमातुः कुलदेवस्य श्रीगोस्थलनिवासिनः ॥ ५ ॥
कैङ्कर्यं सुमहत् कुर्वन् शिवभक्तानपालयत् । विन्ध्यमन्दरसह्याद्रिदिग्दन्तिकुलसंभवाः ॥ ६ ॥
सदा मदमुचस्तस्य द्वार्यासन् द्विरदोत्तमाः । तत्पदातिरथाश्वीयसंख्यानं केन वर्ण्यते ॥ ७ ॥
एतावज्ज्ञायते सर्वं मन्दुरा विप्रमन्दिरम् । वेदमार्गरता विप्राः सायुधाः समरे भटाः ॥ ८ ॥

दिशो जिग्युश्च सर्वत्र तस्मिन् भूमिं प्रशासति । कदाचित्तस्य मध्याह्ने पयः पाययितुं महान् ॥९॥
यन्त्रा नियुक्तो मत्तेभः प्रतस्थे सरितं प्रति । शिवदास इति ख्यातस्तदा कश्चिद्द्विजोत्तमः॥१०॥
अवगाह्य महानद्यां धृतश्रीमज्जनोदकः । धृताच्छभस्मरुद्राक्षः कदळीपत्रसंपुटे ॥ ११ ॥
कृत्वा बहूनि पुष्पाणि बिभ्राणो भक्तिमान् करे । प्रचचाल प्रति गृहं महिम्नः स्तुतिमुच्चरन्॥ १२॥
पार्श्वे तस्थौ गजं दृष्ट्वा पथि यन्त्रा प्रचोदितः । गच्छन् सशृङ्खलानादस्तदा नृपतिकुञ्जरः ॥१३॥
कदळीदळलोभेन हस्ताग्रादग्रजन्मनः । क्षिप्रं जहार हस्तेन ब्राह्मणस्तु पलायितः ॥ १४ ॥
तेनोपमर्दिते पत्रे पेतुः पुष्पाणि भूतले । शिवायेति वदंस्तानि द्विजोऽगान्निजमन्दिरम् ॥ १५ ॥
चन्द्रशालास्थितश्चोलोऽप्यपश्यद्धर्मकेतनः । प्राप्तं मत्वा शिवद्रोहं छेत्तुमात्मशिरः करे ॥ १६ ॥
दधार खड्गं सद्योऽभूद्दिवि वागशरीरिणी । पश्य पुष्पाणि मन्मौळौ तानि मा साहसं कृथाः॥१७॥
इत्याकर्ण्यालयं प्राप्य विलोक्य हरमूर्धनि । तानि पुष्पाणि तं विप्रममन्यत हरं परम् ॥ १८ ॥
स्वर्णपद्मसहस्रं च ददौ तस्मै महीपतिः । गृहान् क्षेत्राणि धेनूश्च दत्वा तद्दास्यभागभूत् ॥ १९॥
गजं च तन्महेशाय नित्यं श्रीमज्जनाम्भसः । सुवर्णकलशं वोढुं प्रददौ धर्मकेतनः ॥ २० ॥
तन्नन्दिकेशमपरं प्रोचुर्भक्त्या नृपं जनाः । क्षान्तो दान्तो महावीरस्तथा जगदपालयत् ॥ २१ ॥
तस्यैवं वर्तमानस्य सुमहान् समयोऽत्यगात् । मेदिनीं राजधर्मेण रक्षतो भक्तसेविनः ॥ २२ ॥
गिरिदुर्गाश्रितं कञ्चिद्विजेतुं विद्विषं निजम् । चोदयामास सेनाभिः सह सेनापतिं क्वचित्॥२३॥
जीवग्राहं गृहीत्वारिं हत्वा तत्सैन्यवल्लभान् । शिरांसि मौलिजुष्टानि सहस्रमनयद्द्विषाम् ॥ २४ ॥
आनीतशत्रुवदनं गृहीतरिपुमोजसा । स्वसेनापतिमायान्तमालिलिङ्ग मुदा नृपः ॥ २५ ॥
तदा भक्तिपरीक्षार्थं हरः कौतुकमादधे । छिन्नशीर्षान्तरे किञ्चिच्चकार जटयान्वितम् ॥ २६ ॥
प्राप्य तापसरूपेण चोळस्यान्तिकमीश्वरः । ततः सन्दर्शयामास छिन्नशीर्षाणि स प्रभोः ॥ २७ ॥
क्रमेण पश्यन् राजापि ददर्शैकं जटान्वितम् ।

आः पाप किं वा विहितं त्वयेति निर्भर्त्स्य सेनापतिमीशभक्तः ।
स सर्वविघ्निष्कृतिमात्मशीर्षत्यागेन मेने दुरितस्य तस्य ॥ २८ ॥

दत्वा धनानि विप्रेभ्यः सुतं राज्येऽभिषिच्य च । अग्नौ संवर्धिते राजा प्रवेष्टुं स्वयमुद्यतः ॥ २९ ॥
मौलौ निधाय तच्छीर्षमग्निकुण्डान्तिकं ययौ । अन्तर्धिं तदगाच्छीर्षं राजा विस्मितमानसः ॥ ३० ॥
नैवापश्यत्तदाद्राक्षीद्वृषभारूढमीश्वरम् । प्रणम्य प्राञ्जलिर्हृष्टस्तुष्टाव परमेश्वरम् ॥ ३१ ॥
तस्तोत्रमुदितस्वान्तस्तस्मै चोळनृपाय च । दत्वा कैवल्यमतुलं सद्यः शंभुस्तिरोदधे ॥ ३२ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे धर्मकेतनमुक्तिप्राप्तिर्नाम सप्तसप्ततितमोऽध्यायः ॥

॥ अथ [illegible]तितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

पतितः कितवो वापि भस्माङ्कितमुखो यदि । शिवप्रसादमिच्छद्भिः स पूज्यः शिववद्भवेत् ॥ १ ॥
अस्ति भाग्याकरं नाम पुरं भूतलभूषणम् । श्रीविहारालये यत्र नास्ति कुत्राप्यकिञ्चनः ॥ २ ॥
तत्राभून्नरसिंहाख्यश्चोळराजो महीपतिः । यत्कुलद्वयजातानां दैवतं परमः शिवः ॥ ३ ॥
बाल्य एव जिताशेषसामन्तः सर्वधर्मवित् । शिवभक्तान्नदानेन धर्मं परममन्यत ॥ ४ ॥
व्यञ्जनैः षड्सोपेतैः शिवभक्तानभोजयत् । प्रतिश्रयसहस्राणि मार्गे मार्गे चकार सः ॥ ५ ॥
तत्राधिकारिणः कृत्वा पान्थानामन्नदोऽभवत् । वर्तमानस्य तस्यैवं चतुष्षष्टिः समाययुः ॥ ६ ॥
एकदासीदनावृष्टिः सर्वप्राणिभयङ्करा । तस्यान्नदातुर्नगरमाययुः सकला जनाः ॥ ७ ॥
आसङ्गवान्नृपस्तेषामानिशीथं यथेप्सितम् । ददावन्नं स सर्वेभ्यो धारयामास भस्म च ॥ ८ ॥
जना द्वादशसाहस्रसंख्याताः प्रतिवासरम् । आ द्वादशाब्दं बुभुजुस्तदन्नं घृतभूतयः ॥ ९ ॥
तेन प्रीतः शिवः स्वप्ने तस्यापृच्छच्च कामितम् । त्वया भोक्तव्यमागत्य पङ्क्तिमध्ये द्विजन्मनाम् ॥
इतीशं याचते स्मायं स तथेति तिरोदधे । अथ सुप्तोत्थितो राजा स्मृत्वा स्वप्नं सवेपथुः ॥ ११ ॥
दधार गात्रे रोमाञ्चं भक्त्या परवशोऽभवत् । अथ मासत्रयेऽतीते मध्याह्ने गिरिजापतिः ॥ १२ ॥
द्विजः पल्लविको भूत्वा तद्गृहद्वारमाययौ । श्रोत्रियाणां त्रिसाहस्रं तस्य पङ्क्तौ निवेशितम् १३॥
नखक्षताङ्कितः पार्श्वे मध्ये दन्तक्षताधरः । लाक्षारागरसाङ्केन सहारिद्रेण वाससा ॥ १४ ॥
आवृतो गजकृत्येव मृष्टार्धतिलकोऽलिके । भस्मधूळीकृतां रेखामाबिभ्राणो मुखान्तरे ॥ १५ ॥
खादन् ताम्बूलकवलमपाङ्गैरुन्नतस्तनीम् । आलोकयन् जह्नुसुतां वहन् पर्युषितस्रजम् ॥ १६ ॥
पप्रच्छान्नं किमस्तीति गिरा गम्भीरयान्वितः । नृसिंहचोळस्तत्फाले भस्मरेखावलोकनात् ॥ १७ ॥
सद्यः प्रवेशयामास पङ्क्तिमध्ये द्विजन्मनाम् । मध्ये तद्ब्राह्मणानां तु घोषशान्ति प्रजल्पताम् ॥
शृङ्गारस्येव लहरी तस्याभूद्वैखरीगिराम् । अपाङ्क्तेयोऽयमायात इत्यपश्यन्मिथो द्विजाः ॥ १९ ॥
विवेशयित्वा स्वस्थाने प्रक्षाळ्याङ्घ्रि तदीयकम् । आनर्च चन्दनैः पुष्पैर्नृपतिर्धूर्तशेखरम् ॥ २० ॥
राजभार्याथ तस्यान्नं सक्षीरं पर्यवेषयत् । राजाथाम्बु ददौ हस्ते वदन्नित्यमृतायताम् ॥ २१ ॥
भुज्यतामिति चोवाच द्विजाः सेर्ष्यादृशोऽभवन् । मायाधूर्तो नृपं प्राह दधानश्चोदकं करे ॥२२॥
मम प्रियतमा दासी द्वारि तिष्ठति भूपते । अत्र साद्ध्यतामस्तु तया मे सह भोजनम् ॥ २३ ॥
इत्युक्ते धिग्धिगित्यूचुर्जात्यन्धा ब्राह्मणास्तदा । राजा सद्यः स्मृतस्वप्नो दासीमानयितुं क्षणात् ॥
न यावदगमद्द्वारं तावदीशस्तिरोदधे । द्वारे दासीमनालोक्य द्विजपङ्क्तिमुपागतः ॥ २५ ॥
दृष्ट्वा तिरोहितं देवं बभूव व्यथिताशयः । विप्रा निनिन्दुः स्वात्मानं कर्मान्धा द्रोहकारिणः ॥
अथ राजा च भार्या च प्राणत्यागकृतोद्यमौ । हस्ते स्वे दधतुः खड्गमाविरासीदथेश्वरः ॥ २७ ॥

राजा दृष्ट्वा वृषारूढं सोमास्कन्दगजाननम् । देवं पशुपतिं साक्षात् क्षमस्वेत्यनमत्पदे ॥ २८ ॥
अथ प्रीतमनाः शंभुः स्मयमानः सहोमया । मुक्तिं दत्वा सभार्याय नृसिंहाय तिरोदधे ॥ २९ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलसे नृसिंहमुक्तिप्राप्तिर्नामाशीतितमोऽध्यायः ॥

॥ अथैकाशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

जीवोपहारं नियमेन कुर्वन्नन्तः स्मरन्निन्दुकलाधराय ।
हीनोऽपि जात्या वसतीह यस्तु स कर्मबन्धेन भवेद्विमुक्तः ॥ १ ॥

अस्ति नागपुरं नाम कुबेरनगरोपमम् । विख्यातं त्रिषु लोकेषु प्रतीरे पूर्ववारिधेः ॥ २ ॥
यत्राङ्गणेषु वणिजां परीक्षायै दिने दिने । राशयो नवरत्नानां प्रसार्यन्तेऽन्तरीपजाः ॥ ३ ॥
वणिक्करमधूच्छिष्टमध्ये कनकरेणवः । निलीयन्तेऽन्वहं यत्र प्रकृतौ देहिनो यथा ॥ ४ ॥
स्वर्णानि रजतान्यासन् निष्टप्तान्यत्र पांसवः । तत्रातिभक्त इत्याख्यो धीवरः शफरान्तकः ॥ ५ ॥
बडिशैरपि जालैश्च यत्कृत्यं मीनवेधनम् । कदाचित्स्यागराजस्य प्रवृत्ते फाल्गुनोत्सवे ॥ ६ ॥
जना रथोत्सवं द्रष्टुं जग्मुर्नागपुरस्थिताः । कैवर्तोऽपि स तैर्गत्वा निषेव्य परमेश्वरम् ॥ ७ ॥
कमलालयसोपानमपराह्णे ययौ क्वचित् । तत्रानर्च द्विजः कश्चित्सोपाने परमेश्वरम् ॥ ८ ॥
पश्यंस्तस्थौ जालिकोऽपि निर्निमेषं कृतस्मयः । तदानीं शफरः कश्चिन्निर्माल्याक्षतमम्भसि ॥ ९ ॥
भक्षयामास संत्यक्तं धीवरोऽयं तमग्रहीत् । दृष्ट्वागत्य द्विजस्तूर्णं मोचयामास तं झषम् ॥ १० ॥
त्यक्तमीनो द्विजं प्राह धीवरो विहिताञ्जलिः । किं मीनमोचनफलं ब्रूहीति तमुवाच सः ॥ ११ ॥
जात्या कस्त्वमसीत्युक्तः प्राह स्वं दाशसम्भवम् । द्विजो भस्म प्रदायास्मै स्वधर्मो मीनवेधनम् ॥
तथापि मद्गिरा मीनं मुक्तवान् यद्भवानतः । त्यागेश्वरप्रसादः स्यादित्युक्त्वा भवनं ययौ ॥ १३ ॥
तदारभ्य तु दाशोऽसौ सिन्धौ विस्तार्य जालकम् । गृह्यमाणेषु मीनेषु शिवायेति झषोत्तमम् ॥ १४ ॥
परित्यजन् सजीवं स नित्यं नियमवानभूत् । परिहासाय तं प्रोचुरतिभक्तं च जालिकाः ॥ १५ ॥
अतिभक्त इति ख्यातिस्तदा प्रभृति पप्रथे । एवं नियमयुक्तस्य ययुः संवत्सरा दश ॥ १६ ॥
पतन्त्यनुदिनं तस्य दूरे विचरतोऽर्णवे । जाले प्रक्षिप्तमाले तु शफरौघाः सहस्रशः ॥ १७ ॥
संक्षिप्य जालकं मीनं सजीवं वरमेककम् । उक्त्वायमस्तु देवायेत्युज्झति स्म झषान्तकः ॥ १८ ॥
मीनविक्रयसंपन्नं ववृधे तद्धनं बहु । धनैराढ्योऽतिभक्तोऽयमित्यासीदतुलो भुवि ॥ १९ ॥
भक्तिं परीक्षितुं तस्य शंभुः कौतुकवानभूत् । अथैकस्मिन् दिने सायमेक एवास्य सागरे ॥ २० ॥
दीनस्यालब्धमीनस्य जाले मीनोऽपतन्महान् । दृष्ट्वैकं धीवरो धीरः शिवायेति मुमोच तम् ॥ २१ ॥

तदम्येद्युरपीशस्य मायया तस्य जालके । नापतच्छफराश्चैकं पातयामास शङ्करः ॥ २२ ॥
एवं बहुदिनं शंभुर्विनैकं नान्यमार्पयत् । अलभ्यमाने मीनौघेऽप्येकं लब्धं शिवाय सः ॥ २३ ॥
मुक्त्वा रिक्तकरो गेहं प्राप्य भोज्याद्यभावतः । विक्रीयाभरणं सर्वं जीवनोपायमादधे ॥ २४ ॥
कांस्यादिवस्त्वभावेन विक्रेतुमुपवासतः । अशक्तोऽप्यन्नहीनत्वादात्तमेकं झषोत्तमम् ॥ २५ ॥
शिवाय विसृजन्नब्धौ नियमं स्वमपालयत् । जालिकस्यातिभक्तस्य भक्त्यातिनियमेन च ॥२६ ॥
प्रीतस्तेनाभवच्छंभुः सर्वसाक्षी महेश्वरः । अथापरेद्युरुषसि क्षिप्तमेतेन वारिधौ ॥ २७ ॥
जालिकं न्यपतत्तत्र मत्स्यानामयुतं समम् । स्वर्णमीनश्च सुमहानेकः शंकरमायया ॥ २८ ॥
आकर्षणे स जालस्य नाशक्नोद्बहुभारतः । निजान्तिकचरानन्यानाजुहाव स जालिकान् ॥ २९ ॥
अस्माकमर्घं मत्स्यानामस्त्येकः पार्वतीपतेः । उत्तमोऽस्त्वपरार्धं व इत्युक्तास्तूर्णमागताः ॥ ३० ॥
धीवराश्चकृषुर्जालं निन्युः सिन्धोस्तटं शनैः । हिरण्यमीनमालोक्य दाशा हर्षं ययुस्तदा ॥ ३१ ॥
अतिभक्तो गृहीत्वा तं सहजीवं महार्णवे । विसृज्यास्तु शिवायेति नियमं पर्यपालयत् ॥ ३२ ॥
स्पर्धमानेषु दाशेषु देहि तन्निष्क्रयं क्षिति । तेभ्यः स्वार्धं ददौ धीमान् धीवराणां शिखामणिः ॥
तदा प्रादुरभूत्तत्र गौर्या सह महेश्वरः । प्रणतस्य ददौ मुक्तिं पुनर्भवभयापहाम् ॥ ३४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे अतिभक्तमुक्तिप्राप्तिर्नामैकाशीतितमोऽध्यायः ॥

॥ अथैकाशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

भस्मरुद्राक्षभाजां ये पादाम्भोजावनेजनम् । कुर्वन्ति स्वयमेवेह तेषां नास्ति पुनर्भवः ॥ १ ॥
अस्त्येकं नगरं भूमौ प्रथितं कलशाह्वयम् । पुण्यं धाम पुरारातेः पुरुषैः सद्भिराश्रितम् ॥ २ ॥
तत्र मानधनो नाम महानासीन्महीपतिः । उद्वेजयति यः स्वारीन् गरुडः पन्नगानिव ॥ ३ ॥
धर्मेण पालयामास धरणीमण्डलं नृपः । जन्मकोट्यार्जितैः पुण्यैः तस्य भक्तिः शिवेऽभवत् ॥ ४ ॥
श्रुत्वागमपुराणार्थान् स पर्यवसिताञ्छिवे । भक्तियोगं दृढतममुवाह गिरिजापतौ ॥ ५ ॥
त्रिकालमर्चयन् शंभुं ब्रह्मण्यो ब्रह्मवित्प्रियः । उद्धूलनं त्रिपुण्ड्रं च ध्रियते यैश्च भस्मना ॥ ६ ॥
शिवलाञ्छनमात्रेण तेषामिष्टप्रदोऽन्वहम् । स्वदेशस्थान् जनान् सर्वानप्यशासीच्छिवार्चने ॥ ७ ॥
ये जपन्ति न पञ्चार्णं रुद्राध्यायं न ये द्विजाः । उद्धूलनं त्रिपुण्ड्रं वा ध्रियते यैर्न भस्मना ॥ ८ ॥
ये न बिभ्रति रुद्राक्षं तेषां निष्कासनं भवेत् । एवमुद्घोषयामास भेर्या दिक्षु स सर्वतः ॥ ९ ॥
राजभीत्या जनाः सर्वे शिवे भक्तिकृतस्तदा । नृपं मानधनं नत्वा कम्पमानतनुः कलिः ॥ १० ॥
ययाचे साञ्जलिर्भूत्वा स्थानं क्वचिदिहात्मनः । यस्य भक्तिः शिवे नास्ति स तं तत्स्थानमादिशत् ॥
अलक्ष्मीः कलहः कामः क्रोधश्चाप्यनृतं यतः । तदारभ्याभवद्राजा कलिकम्पाह्वयः क्षितौ ॥

नित्यं व्रतमभूत्तस्य भक्तपादावनेजनम् । ये समायान्ति मध्याह्ने तत्पादाब्जावनेजनम् ॥ १३ ॥
सुगन्धिशीतलजलैः कृत्वा भोजयति स्म तान् । वर्तमानस्य तस्यैवं ययुर्द्वादश वत्सराः ॥ १४ ॥
ततो भक्तजनैः सार्धं शिवलाञ्छनमावहन् । कलिकम्पस्य चेटो यो दास्यं कर्तुमशक्नुवन् ॥
कोपादेशान्तरगतः पौर्विकोऽस्य समागतः । मध्ये राजगृहे भोक्तुमागतानां महात्मनाम् ॥ १६ ॥
अतिष्ठद्धृतरुद्राक्षो भास्वद्भस्मत्रिपुण्ड्रकः । पृष्टः कस्त्वं कुतश्चेति भक्तैर्नोवाच किञ्चन ॥ १७ ॥
कर्तुं चावसरे प्राप्ते भक्तपादावनेजनम् । निर्गतः कलिकम्पोऽयं भार्या तमनुसारिणी ॥ १८ ॥
विधृतस्वर्णभृङ्गारा ददानासीज्जलं तदा । भक्तेषु धौतपादेषु भृत्य एकोऽवशेषितः ॥ १९ ॥
तं दृष्ट्वा कलिकम्पोऽसौ मनसाप्यात्मसेवकम् । जानंश्चेटीसुत इति शिवलाञ्छनदर्शनात् ॥ २० ॥
पादप्रक्षाळनं कर्तुमुद्युक्तः पादमग्रहीत् । तद्भार्याह पतिं वीक्ष्य कथं चेटीसुतोऽर्हति ॥ २१ ॥
पूजायां भवता स्वामिन्निति भर्तुः करद्वयम् । गृहीत्वा न्यरुणत्तोयं नादिशत्सा यदा तदा ॥ २२ ॥
सद्यः प्रकुपितो भूत्वा खड्गमादाय तत्करौ । चिच्छेद तावद्भगवान् सह गौर्याऽग्रतोऽभवत् ॥
स्तुतस्ताभ्यां वृषारूढो दत्वा मुक्तिं तिरोदधे ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कलिकम्पमुक्तिप्राप्तिनामैकाशीतितमोऽध्यायः ॥

द्रव्य
॥ अथैकाशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अस्त्याधिशमनं नाम नगरं लोकविश्रुतम् । जन्मरोगस्य भिषजः प्रियं धाम पिनाकिनः ॥ १ ॥
कलिनीतिरिति ख्यातो नाम्नाभूच्चक्रिणां प्रभुः । स पुराणेषु शुश्राव दीपारोपणवैभवम् ॥ २ ॥
शङ्करालयमासाद्य तत्रत्यः प्रतिवासरम् । दीपान् पञ्चशतं तैलैर्घृतैः पञ्चशतं परान् ॥ ३ ॥
कुर्वन् दिवानिशं भक्त्या सिषेवे स महेश्वरम् । तैलप्रदीपा मध्याह्ने तूलवर्तिषु जज्वलुः ॥ ४ ॥
तन्तुवर्तिषु शुद्धासु घृतदीपास्तथा निशि । दीपाः पञ्चशतं रात्रौ दिवा पञ्चशतं तथा ॥ ५ ॥
ते तु संशोभयामासुः सन्निधिं चान्द्रशेखरम् । दीपानेवं ददानस्य तस्य सप्त समा ययुः ॥ ६ ॥
शिवो भक्तिपरीक्षार्थं तस्य दारिद्र्यमादिशत् । मितंपचः स भूत्वापि विक्रीय गृहमात्मनः ॥ ७ ॥
तद्द्रव्यैर्विदधे दीपान् वर्षमात्रं गतं तथा । विक्रीय भार्याभरणं षण्मासानत्यवाहयत् ॥ ८ ॥
अक्षतं च मतं तस्य तादृशं पशुविक्रयात् । दीपसाधनवित्तेषु गतेषु विलयं पुरे ॥ ९ ॥
याच्ञालब्धेन तैलेन मासं व्रतमपालयत् । अथैकस्मिन् दिने क्वापि न तैलं घृतमेव वा ॥ १० ॥
लब्धवान् सन्निधौ शंभोः कलिनीतिस्तदारुदत् । तदा कश्चित्खलो भूत्वा हरः पप्रच्छ रोदने ॥
निमित्तं व्रतभङ्गे स तत्रोक्त्वा कारणं पुनः । उच्चैःस्वरेण चुक्रोश रक्ष भग्नव्रतं त्विति ॥ १२ ॥
हसन् खलोऽपि तं प्राह रोदनेनात्र किं भवेत् । यदि भक्तिर्दृढा शंभौ छित्त्वा कण्ठं निजासृजा ॥

कुरु दीपानिति प्रोच्य मुहुर्मौलिमकम्पयत् । तदाकर्ण्य तथा कर्तुमुद्यक्तेऽस्मिन् महेश्वरः ॥ १४ ॥
आरूढवृषभः साक्षात् सह गौर्या प्रसन्नया । प्रदाय तस्मै सायुज्यं भक्तायेशस्तिरोदधे ॥ १५ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कलिनीतिमुक्तिप्राप्तिर्नामैकाशीतितमोऽध्यायः ॥

॥ अथ द्व्यशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

श्रीविरिञ्चिपुरे कश्चिच्छक्तिनामा जघन्यजः । स शिवे भक्तिमाधाय शिवस्तुतिपरोऽभवत् ॥ १ ॥
आसीदेवं व्रतं तस्य दृढभक्तिमतः शिवे । वेदवैदिकवेदान्तशैवदूषणवादिनाम् ॥ २ ॥
कर्तास्मि रसनाच्छेदमिति हेतिं करे दधौ । तद्भयान्नगरे सर्वे स्तुवन्तः परमेश्वरम् ॥ ३ ॥
बभूवुर्हतपाप्मानः क्रोधपीतामृता इव । अथ शक्तिः प्रसादेन श्रीविरिञ्चिपुरेशितुः ॥ ४ ॥
पुनर्भवक्लेशहरं धाम शाङ्करमाप्तवान् ।

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शक्तिमुक्तिप्राप्तिर्नाम द्व्यशीतितमोऽध्यायः ॥

॥ अथ चतुरशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अनुकम्पानदीतीरमस्ति काञ्चीपुरं किल । तत्पर्यन्ताटवीकोटिघोषसाहस्रनायकः ॥ १ ॥
वल्लवान्वयसंभूतो नन्दगोपात्मजो यथा । सिद्धेश्वरप्रसादेन लेभे पञ्चाक्षरीमसौ ॥ २ ॥
गुरोर्निदेशादीशेऽसौ करणौघमपातयत् । विरक्तः सर्वभोगेभ्यो ह्यात्मनो राज्यमात्मजे ॥ ३ ॥
निधाय शंभोः श्रीमूर्तिं दध्यौ सन्ततमाशये । गङ्गाचन्द्रार्धभोगीन्द्रदामनद्धजटाभरम् ॥ ४ ॥
भास्वत्तृतीयनयनं फणिकुण्डलमण्डितम् । सूर्यसोमाग्निनयनं मन्दस्मितमुखाम्बुजम् ॥ ५ ॥
कपालमालाभरणं कालकण्ठं चतुर्भुजम् । वरशूलाभयैणाङ्कं यागयज्ञोपवीतिनम् ॥ ६ ॥
भस्मोद्धूलितसर्वाङ्गं भास्वद्व्याघ्राजिनाम्बरम् । शिञ्जानमणिमञ्जीरपरिष्कृतपदाम्बुजम् ॥ ७ ॥
अम्बालङ्कृतवामाङ्गमवाङ्मनसगोचरम् । मनसा विषयीकुर्वन् स पञ्चेन्द्रियवृत्तिना ॥ ८ ॥
पञ्चपाद इति प्राप प्रथां भक्तजनाग्रणीः । पुण्डरीकपुरे स्थित्वा स्तुवन् नित्यं महेश्वरम् ॥ ९ ॥
नटेश्वरप्रसादेन शिवसायुज्यमाप्तवान् ॥

॥ इति श्रीस्कन्दोपपुराणे शिवभक्तविलासे पञ्चपादमुक्तिप्राप्तिर्नाम चतुरशीतितमोऽध्यायः ॥

॥ अथ पञ्चाशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अस्ति क्षेत्रनदीतीरप्रान्ते दक्षिणपार्श्वके । जटायुपुरमित्याख्यं प्रथितं भुवनत्रये ॥ १ ॥

बालाम्बिकावैद्यनाथसान्निध्यात् सर्वसिद्धिदम् । जघन्यवंशजः कश्चित्तत्रासीच्छङ्करप्रियः ॥ २ ॥
त्रिपूरुषा अप्येतस्य शिवभक्ता महत्तमाः । श्रुत्वा शिवपुराणेषु शिवकैङ्कर्यवैभवम् ॥ ३ ॥
दीपारोपणधर्मस्य समं नान्यदिति क्षितौ । ज्ञात्वा निर्गत्य तत्स्थानाच्चिदम्बरमुपेत्य सः ॥ ४ ॥
दीपाननुदिनं शंभोः स्वकीयैरकरोद्घनैः । शिवप्रसादान्निक्षेपमुपलभ्य महाधनः ॥ ५ ॥
दीपसाधनतैलाज्यक्रयार्थं सर्वमादिशत् । कालाद्भक्तिपरीक्षार्थं शंभुना निर्धनीकृतः ॥ ६ ॥
स शुष्कमालातृणकस्तम्बेन शतदीपिकाः । देवस्याग्रेऽतनोन्नित्यं मालातृणकनामकः ॥ ७ ॥
त्रीन् वर्षान् गमयामास सन्निधौ चित्सभापतेः । प्रावृष्यलब्ध्वा कस्याश्चिच्छुष्कमालातृणं ततः ॥ ८ ॥
अग्निप्रज्वलितैः केशैः स्वकीयैर्दीपमादधे । गौर्या सह वृषारूढः प्रादुर्भूतस्तदा हरः ॥ ९ ॥
प्रदाय तस्मै सारूप्यं सह तेन तिरोदधे ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे मालातृणकमुक्तिप्राप्तिर्नाम पञ्चाशीतितमोऽध्यायः ॥

॥ अथ षडशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अविकारीति कोऽप्यस्ति श्रीघटाख्ये पुरे वसन् । कवितावित्तया नित्यं स्तुत्वा तत्तन्महीपतीन् ॥
तेभ्यश्च भूषणं वस्त्रं दुकूलं कटकादिकम् । पशून् धान्यं गृहं क्षेत्रं प्राप्य प्राप्य महद्धनम् ॥ २ ॥
तैर्वस्त्रैर्भूषणैश्चित्रैरन्नपानैश्च सर्वदा । शिवभक्तान् प्रीणयित्वा प्रत्यहं तद्धनैरयम् ॥ ३ ॥
प्राकारं कारयित्वास्य शंभोरायतनानि च । गोपुराणि च सर्वत्र मण्टपानि बहूनि च ॥ ४ ॥
वाहनान्यप्यनेकानि रथपूर्वाणि शूलिनः । गोळकादिप्रभान्तानि किरीटकटकानि च ॥ ५ ॥
पीताम्बरदुकूलादिवस्त्राणि विविधानि च । दत्त्वैवं सर्ववस्तूनि श्रीकर्माणि पिनाकिनः ॥ ६ ॥
विधाय तत्प्रसादेन शिवसायुज्यमाप्तवान् ॥

॥ इति श्रीस्कन्दोपपुराणे शिवभक्तविलासे अविकारिमुक्तिप्राप्तिर्नाम षडशीतितमोऽध्यायः ॥

॥ अथ सप्ताशीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

एकदा कुब्जपाण्डयाख्यः शंकरं सुन्दरेश्वरम् । संसेव्य प्रार्थयामास दारेषु तनयेषु मे ॥ १ ॥
भोगेष्वर्थेषु राज्येषु मा स्पृहा भूदितः परम् । युष्मत्पादारविन्देऽस्तु भक्तिरित्यर्थितोऽब्रवीत् ॥ २ ॥
शंभुराकाशवपुषा प्रविष्टोऽन्यमते भवान् । मद्भक्तहेलनं चापि मल्लिङ्गस्यापि हेलनम् ॥ ३ ॥
कृतवानसि तत्पापादत्र मुक्तिर्न ते भवेत् । तथापि मम भक्तत्वान्मुक्त्युपायं वदामि ते ॥ ४ ॥
अहं शालिवृतीशाख्यो मुक्तिं वेणुवनस्थले । दास्यामि तत्र गच्छेति श्रुत्वा वाक्यं महेशितुः ॥ ५ ॥

देवपाण्डयकुलोद्भूतो देवेन्द्राधिकविक्रमः । यः कुब्जपाण्डयो मधुरापुरीनाथः पुराऽर्हते ॥ ६ ॥
मते प्रविष्टो ज्वरितः संबन्धास्तज्वरामयः । आत्तशैवमतः प्राप्तसौकुमार्याङ्गसुन्दरः ॥ ७ ॥
तां त्यक्त्वा कुब्जपाण्डयाख्यामभूत्सुन्दरपाण्डयपः । स तु सुन्दरपाण्डयोऽसावेकदा मधुरापुरात् ॥
श्रीसोमसुन्दरादेशाच्छिवस्थलदिदृक्षया । आवृतारातिविजयव्याजान्निर्गत्य शीघ्रतः ॥ ९ ॥
तत्र तत्र स्थले शंभुं दृष्ट्वा दृष्ट्वा प्रणम्य च । तत्रत्यान् वैरिसङ्घातान् निर्जित्याजिषु विक्रमात् ॥
प्रतस्थे सेवितुं शंभुं यत्र वेणुवनेश्वरः । ताम्रपर्णी नदी यत्र मुक्तादिनवरत्नसूः ॥ ११ ॥
यत्र गोपपयोभ्रष्टं प्रत्यहं शंभुमूर्धनि । यत्र ताम्रसभामध्ये ताण्डवं तनुते शिवः ॥ १२ ॥
यत्र कल्याणवेषं तु मह्यं दर्शितवान् प्रभुः । यत्र वेदास्तपस्यन्ति चत्वारो वेणुरूपिणः ॥ १३ ॥
यत्र शालिवृतिर्भूत्वा शंभुः शालिमपालयत् । यत्र भिक्षाटनं शंभुरकरोद्दारुकावने ॥ १४ ॥
यत्र कम्पानदीतीरे तपोमा तपस्विनी । यत्र कान्तिमती देवी द्वात्रिंशद्धर्मवर्धनी ॥ १५ ॥
यत्र दक्षिणकाञ्च्यां सा शंभुमाप तपोव्रतैः । तत्र वेणुवनक्षेत्रे शंभुं द्रष्टुं समागतः ॥ १६ ॥
निषेव्य शालिवाटीशं देवीं कान्तिमतीमपि । सम्बन्धस्योपदेशेन गताज्ञानतमोमलः ॥ १७ ॥
विसृज्येशप्रसादेन मलत्रयमयं नृपः । तस्मिन् वेणुवनस्थाने शिवसायुज्यमाप्तवान् ॥ १८ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरपाण्डयमुक्तिप्राप्तिर्नाम सप्ता[ष्टा]शीतितमोऽध्यायः ॥

॥ अथा[ष्टा]शीतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

मयूरपुरमित्यस्ति प्रतीरे पूर्ववारिधेः । नानाजनसमाकीर्णं नानाश्चर्यसमन्वितम् ॥ १ ॥
नानाविधतरुच्छन्नं विविधैश्चर्यभूषितम् । तत्राभूदीशपादाब्जभावनातुष्टमानसः ॥ २ ॥
मौनी शूद्रोद्भवः कश्चिच्छिवभक्तार्चनप्रियः । मनश्शिवालये शंभोरुद्दीप्य ज्ञानदीपिकाम् ॥ ३ ॥
अभिषिञ्चन्ननुदिनमानन्दामृतधारया । भक्त्यान्नैः षड्सैः शंभुं मनसा समपूजयत् ॥ ४ ॥
सन्निधौ स कुटीं कृत्वा ह्यालयस्याविदूरतः । जपन् सदैव पञ्चार्णं भस्माजिनजटाधरः ॥ ५ ॥
सोऽन्वहं सायमेवाम्भः पिबन् प्रसृतिमात्रकम् । सुषुम्नेडापिङ्गळाभिः स्तम्भयन् पूरयंस्त्यजन् ॥ ६ ॥
प्रत्यहं तपसा प्राणवायुं लातीति वायुलः । इति नाम्ना प्रसिद्धोऽभूच्छूद्रो मौनी शिवप्रियः ॥ ७ ॥
एवं तपस्यतस्तस्य द्वादशाब्दादनन्तरम् । वायुलस्यात्मभक्तस्य सारूप्यं प्रददौ शिवः ॥ ८ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे वायुलमुक्तिप्राप्तिर्नामा[ष्ट]शीतितमोऽध्यायः ॥

॥ अथैकोननवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

विशालाख्यपुरे कश्चिच्छूरभिन्नाम पादजः । शूराणामग्रणीरासीदम्बिकापतिभक्तिमान् ॥ १ ॥

राज्ञः सेनापतिर्भूत्वा नरसिंहाङ्कयस्य सः । राज्ञः शत्रून् विजित्यायमाहत्य बहुलं धनम् ॥ २ ॥
राज्ञे प्रदाय तत्सर्वं तस्मात् प्रीतान्महीपतेः । सप्तकोटिधनं प्राप्य शिवभक्तानपालयत् ॥ ३ ॥
गृहक्षेत्राम्बरारामकन्याभूषणवाहनैः । संपूज्य प्रत्यहं शंभुभक्तान् मुक्तिमवाप सः ॥ ४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शूरभिन्मुक्तिप्राप्तिर्नामैकोनाशीतितमोऽध्यायः ॥

॥ अथैकनवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अथाटविकनाथस्य सिंहाङ्कस्य महीपतेः । वर्णयामि चरित्रं वो विचित्रं शृणुत द्विजाः ॥ १ ॥
पल्लवानामधिपतिः सिंहाङ्को नाम भक्तिमान् । शिवपादाब्जयोर्नित्यं शिवभक्तजनप्रियः ॥ २ ॥
तारा इव शशाङ्कस्य भार्यास्तस्याभवञ्छतम् । अनपत्यो नरपतिस्ताभिः सार्धमुमापतेः ॥ ३ ॥
स्थलेषु व्यचरद्भूमौ प्रख्यातेषु सुतेच्छया । श्रीपुरं प्राप सिंहाङ्को यत्र त्यागेश्वरो विभुः ॥ ४ ॥
स्नात्वा तत्र महातीर्थे पावने कमलालये । त्यागेश्वरस्य सेवार्थं सभार्यश्चालयं ययौ ॥ ५ ॥
असमर्पितमीशाय न्यस्तं वेदितले नवम् । दिव्यं जब्वन्तिकापुष्पराशिं वीक्ष्यातिसौरभम् ॥ ६ ॥
भार्यास्वैका गृहीत्वास्य चापलाद्गर्विता सुमम् । जिघ्रति स्म विलोक्यैतत् क्रुद्धो युद्धसखोऽङ्घ्रिजः ॥ ७ ॥
उद्यम्य क्षुरिकां तस्याः सद्यो नासां चकर्त ह । छिन्ननासापतद्भूमौ जना हाहेति चुक्रुशुः ॥ ८ ॥
छिन्ननासासि केनेति पृष्टा शूद्रमदर्शयत् । राजभार्यां तमाहूय क्रुद्धोऽपृच्छन्महीपतिः ॥ ९ ॥
किं कृतं भवता मूर्ख ब्रूहीत्युक्तोऽब्रवीन्नृपम् । अर्चनीयं नवं पुष्पमाघ्रातमनया विभो ॥ १० ॥
शिवस्य त्यागराजस्य महान् द्रोहः कृतः किल । अतस्तत्पापशुद्ध्यर्थं मयेयं कृत्तनासिका ॥ ११ ॥
अथ राजा प्रणम्यैनं नालमेतादिति स्वयम् । खड्गमादाय भार्याया गृहीतकुसुमं करम् ॥ १२ ॥
चिच्छेद भक्तिमान् शंभुं प्रसीदेत्यब्रवीन्नतः । तदा पुष्पाणि विबुधा वर्षन्ति स्म नृपोपरि ॥ १३ ॥
छिन्नस्तस्याः करः सद्यः समजायत काञ्चनः । नासिकापि यथापूर्वमाश्चर्यमगमज्जनाः ॥ १४ ॥
विधाय पूजामीशस्य नृपस्तत्र चिरं वसन् । महेश्वरप्रसादेन काले मुक्तिमवाप्तवान् ॥ १५ ॥
सिंहाङ्कभार्या सा पश्चात्तपस्वी साहसप्रिया । शिवद्रोहकृतं पापं धुन्वती कमलालये ॥ १६ ॥
आद्वादशाब्दं त्यागेशमुपास्य गतकिल्बिषा । त्यागराजप्रसादेन शांभवं प्राप तत्पदम् ॥ १७ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सिंहाङ्कमुक्तिप्राप्तिर्नामैकनवतितमोऽध्यायः ॥

॥ अथ द्विनवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

पुरं गवाक्षं नाम ख्यातमस्ति महीतले । ऐडङ्क इति विख्यातः सूर्यवंशसमुद्भवः ॥ १ ॥

तत्र कश्चिदभूद्राजा त्यागे निधिपतिर्यथा । ददाति शिवभक्तेभ्यः सामन्तैरुपदीकृतम् ॥ २ ॥
अशेषं धनमादाय विख्यातो भूतिदाख्यया । स्वकोशनिहितैर्द्रव्यैश्चित्सभाधिपतेः सभाम् ॥ ३ ॥
यः काञ्चनसभां चक्रे विरक्तः सर्वभोगतः । धर्मेण तस्मिन् धरणीं परिपालयति प्रभौ ॥ ४ ॥
कश्चिच्छूद्रः शंभुभक्तो नियमादन्नदः सदा । नित्यं सहस्रभक्तानामन्नदातेति पप्रथे ॥ ५ ॥
तस्यैवं वर्तमानस्य धनधान्यं क्षयं गतम् । धान्याभावाद्धनाभावाद्गृहीत्वा ऋणमात्मनः ॥ ६ ॥
चकार नियमं सर्वं शिवभक्तान्नदानतः । एकस्मिन् दिवसे कोऽपि ऋणदातास्य नाभवत् ॥ ७ ॥
आत्मीयव्रतपूर्त्यर्थं चौर्यायोद्योगवानभूत् । राज्ञो गृहमुपेत्यायं यत्रास्ते धान्यसञ्चयः ॥ ८ ॥
तत्र गत्वाग्रहीद्द्रव्यं दृष्ट्वा तत्पालका अमुम् । बद्ध्वा नृपान्तिके निन्युः किं कृतं भवतेति सः ॥
राज्ञा पृष्टः पुनः प्राह स्वात्मीयं व्रतमन्वहम् । शिवभक्तान्नदातृत्वं धान्याभावादिहागमम् ॥ १० ॥
श्रुत्वा शिव शिवेत्युक्त्वा शिवद्रोहः कृतो मया । क्षमस्वेति तमाभाष्य मोचयित्वा च बन्धनात् ॥
तद्धान्यराशिर्भक्तेभ्यः स्यादित्यस्मै प्रदाय च । तं नत्वा नृपतिः प्रीतस्तावत् क्षेत्रं धनं ददौ ॥
शिवस्य शिवभक्तानामेवं धान्यं धनानि च । दत्वा च भक्तिभावेन निस्पृहो धरणीपतिः ॥ १३ ॥
निर्धूतमानसमलस्तेन मुक्तिमावाप्तवान् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे ऐडङ्कमुक्तिप्राप्तिर्नामैकनवतितमोऽध्यायः ॥

॥ अथ द्विनवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अस्ति तञ्चापुरे कश्चिच्छूद्रो युद्धसखाह्वयः । त्रिकालं शिवसेवां स कुर्वन् नित्यमतन्द्रितः ॥ १ ॥
सदा शिवपुराणानि संशृण्वन्नतिभक्तिमान् । शिवे च शिवभक्तेषु जन्मान्तरतपःफलैः ॥ २ ॥
अत्यन्तं भक्तिमानासीत् सदा पञ्चाक्षरीं जपन् । बहुकालं निनायासौ तत्रैव शिवसेवया ॥ ३ ॥
शूराणामग्रणीराजौ भीत्यारेर्न निवर्तते । तस्माद्युद्धसखाख्यास्य पप्रथे भुवनत्रये ॥ ४ ॥
स्वावासात् कतिचित्कालान् निर्गत्यासिधरः करे । सेवमानः शिवक्षेत्राण्यागतः कमलालयम् ॥ ५ ॥
स्नात्वा तत्र महातीर्थे सर्वदा शंभुदर्शनम् । कृत्वास्ते त्यागराजस्य सन्निधौ भक्तिपूर्वकम् ॥ ६ ॥
शिवद्रोहकृतां शिक्षां वितन्वन् कमलालये । आद्वादशाब्दमवसत्त्यागेश्वरमुपास्य च ॥ ७ ॥
तत्रैवं वर्तमानेऽस्मिन् सिंहाङ्कः सेवितुं शिवम् । आगतः स्त्रीशतैर्युक्तस्तासां काचिच्छिवालये॥८॥
शिवार्चनीयकुसुममजिघ्रत्तदवेक्ष्य सः । द्रुतं क्षुरिकया तस्या नासां चिच्छेद भक्तिमान् ॥ ९ ॥
सिंहाङ्कोऽप्येतदालोक्य युक्तमित्येव पिप्रिये । शिक्षामेवं वितन्वानो स्थिरचित्तः शिवद्रुहाम्॥ १० ॥
ततः प्रीतान्महादेवात् स तु कैवल्यमाप्तवान् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे युद्धसखचरित्रं नामैकनवतितमोऽध्यायः ॥

॥ अथ त्रिनवतितमोऽध्यायः ॥

श्रीअगस्त्यः ।

अस्ति श्रीनूतनपुरमाख्यया तत्र कश्चन । आसीत् कीर्तिसखो नाम वेदाध्यायी शिवद्विजः ॥ १ ॥
सहस्रकलशाम्भोभिर्धनवान् सरिदाहृतैः । कर्पूरैलालवङ्गाद्यैरन्वहं चाधिवासितैः ॥ २ ॥
धाराभिषेकमीशस्य कुर्वन् व्रतमपालयत् । सर्वाङ्गीणानुलेपेन चन्दनेन सुगन्धिना ॥ ३ ॥
निजारामभवैः पुष्पैर्लिङ्गमाच्छाद्य शाङ्करम् । कर्पूरदीपदानान्ते सिषेवे प्रत्यहं शिवम् ॥ ४ ॥
तस्य भक्तिपरीक्षायै हरः कौतुकवानभूत् । आद्वादशाब्दमभवदनावृष्टिः शिवाज्ञया ॥ ५ ॥
अथ द्रव्येषु नष्टेषु निःस्वः कीर्तिसखोऽभवत् । अन्नतोयाद्यभावेन सोऽस्थिमात्रावशेषितः ॥ ६ ॥
स्वयं दूरात्सरित्तोयमेककुम्भाभिपूरितम् । अक्षतं स्वं व्रतं कर्तुं ददौ शंभोर्दिने दिने ॥ ७ ॥
अथैकस्मिन् दिने शंभोः सन्निधौ स श्रमातुरः । वारिपूर्णं वहन् मूर्ध्नि कुम्भमातपपीडितः ॥ ८ ॥
विह्वलाक्षश्च सोपाने पदे प्रस्खलिते सति । पपात भुवि मूर्च्छालुर्मनसा चास्मरच्छिवम् ॥ ९ ॥
शिवोऽथ सहसाभ्येत्य तस्यौपोह्य परिश्रमम् । उवाच नित्यं सोपाने निहितं काञ्चनं मया ॥ १० ॥
गृहीत्वा शिवभक्तांस्त्वमात्मानं चानुपालय । इत्युक्त्वान्तरधाद्देवोऽप्यबुध्यत शिवद्विजः ॥ ११ ॥
गृहीत्वा चान्वहं दत्तं स्वर्णकाचं हरेण यत् । गृहीत्वा भोजयन् विप्रान् स्वयं कीर्तिसखो द्विजः॥
शिवप्रसादेन चिरादगमद्धाम शाङ्करम् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे कीर्तिसखचरित्रं नाम त्रिनवतितमोऽध्यायः ॥

॥ अथ चतुर्नवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

पुरी नटकुटी नाम पुण्यं धाम पिनाकिनः । तत्राभूद्वीरधौरेयः शूद्रश्चोळचमूपतिः ॥ १ ॥
शूरव्याघ्र इति ख्यातः शुनासीरसमो बले । प्रवरः पादजातानां स्वविक्रमजिताहितः ॥ २ ॥
स बभूव महाभागो भक्तिमान् परमेश्वरे । इष्टदातेशभक्तानामेधमानधनः सदा ॥ ३ ॥
शिवालयेषु सर्वत्र धान्यराशीन् यथा गिरीन् । पूजार्थमादधे कोशेष्वखिलेषु महामनाः ॥ ४ ॥
स कदाचिदरीञ्जेतुं चोदितश्चोळभूभुजा । प्रतिष्ठमानः स्वान् बन्धूनिदमाह चमूपतिः ॥ ५ ॥
शिवार्थं कल्पिता एते युष्मदर्थममी पुनः । धान्यकोशा न वै स्पृश्याः शाङ्करा सत्यमुच्यते ॥ ६ ॥
इत्युक्त्वा जेतुमहिताञ्शूरव्याघ्रो जगाम ह । बाहुल्येनाथ सैन्यानां द्विषतां चिरमावसत् ॥ ७ ॥
शूरव्याघ्रस्य बन्धूनां धान्यकोशालयं ययुः । पुनः प्राप्ते प्रदास्यामः शिवस्येति मनीषया ॥ ८ ॥
सर्वे गृहीत्वा धान्यानि शैवानि बुभुजुस्तदा । अथ शत्रून् विनिर्जित्य शूरव्याघ्रः ससैनिकः ॥ ९ ॥

पुनरासाद्य राजानं धनराशीन् समार्पयत् । राज्ञा बहुमतश्च त्वं गृहं गन्तुं समुद्यतः ॥ १० ॥
शैवानां धान्यकोशानां यः पुरा पालकः कृतः । स तदा प्राप्य सविधं तस्मै वृत्तं व्यजिज्ञपत् ॥
निगूढहृदयः श्रुत्वा बहिर्हृष्ट इवाभवत् । कालीयक्ष्वेलसंवीतो हृदोऽन्तर्यामुनो यथा ॥ १२ ॥
संप्राप्य सदनं शूरः स्वजनान् सान्त्वयन् गिरा । गमयामास दिवसं गङ्गाधरपदप्रियः ॥ १३ ॥
अथ रात्रौ समानीय शिवधान्यभुजो जनान् । उत्कृष्य कोशतः खड्गं समं शीर्षाणि चाच्छिनत् ॥
छिन्नेष्वागर्भपर्यन्तं शूरव्याघ्रेण रुष्यता । अबलैका प्रजाता तमाच्छाद्य वपुषार्भकम् ॥ १५ ॥
शूरव्याघ्रमिदं प्राह देहि त्वं दययार्भकम् । अनन्नप्राशनो ह्येष नापराध्यति ते शिशुः ॥ १६ ॥
इति वाचं सकरुणामाकर्ण्याह स च स्त्रियम् । शिवधान्यभुजः स्तन्यं यस्मात् पीतं तवामुना ॥
तस्मान्निष्कृतिरेतस्य छेदस्तु शिरसस्तथा । इत्युक्त्वा बालकशिरो यावच्छिच्छेद साहसी ॥ १८ ॥
शंभुस्तावद्वृषारूढः सह देव्याग्रतोऽभवत् । अपराधं क्षमस्वेति नमतस्तस्य शङ्करः ॥ १९ ॥
दयादृशा समुज्जीव्य बन्धून् ये निहताः पुरा । दत्वा तस्मै च सायुज्यं तिरोऽभूदम्बया सह ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शूरव्याघ्रमुक्तिप्राप्तिर्नामनवनवतितमोऽध्यायः ॥

॥ अथपंचनवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अन्येऽपि बहवो भक्ता मुक्तास्ते शिवसेवया । येषां तु नामश्रवणान्नरो मुक्तिमवाप्नुयात् ॥ १ ॥
शिवमेव सदा ये च प्रास्तुवन् सत्कवीश्वराः । अन्यस्तोत्रं परित्यज्य शिवसायुज्यदं नृणाम् ॥ २ ॥
ध्यायन्ति ये सदा शंभुं महात्मानस्तपोधनाः । यान्ति तेषां कटाक्षेण मुक्तिं सायुज्यरूपिणीम् ॥
जाताश्च जायमानाश्च मृताश्च कमलालये । जीवन्मुक्ता न सन्देहो जन्तवश्च शिवाज्ञया ॥ ४ ॥
स्वयंभूतं महालिङ्गं येऽर्चयन्ति शिवं द्विजाः । तेषां दर्शनमात्रेण कैवल्यं स्यात् करस्थितम् ॥ ५ ॥
भस्मरुद्राक्षविभ्राजत्तनवो ये शिवप्रियाः । त एव शंभुकृपया सर्वे कैवल्यभागिनः ॥ ६ ॥
ये चेरचोळपाण्ड्यानां देशस्था ह्यपरा जनाः । तेभ्योऽपि शिवभक्तेभ्यो महद्भ्योऽस्तु नमस्क्रिया ॥
त्रिषष्टिगणिता भक्ता महान्तो ये महीतले । तदन्येषां च भक्तानां नमः स्यान्मोक्षगामिनाम् ॥ ८ ॥
इत्ययं शुंभुभक्तानामष्टवर्गं प्रणम्य च । वक्तुं प्रचक्रमे वृत्तं मानसालयकारिणः ॥ ९ ॥
बहुजन्मार्जितैः पुण्यैर्जन्तोर्भक्तिमतः शिवे । भवेदपुनरावृत्तिः शिवलिङ्गप्रतिष्ठया ॥ १० ॥
शृणुध्वं मुनयः सर्वे कथा काचन वर्ण्यते । अस्त्यग्रहारः सुमहाल्लिङ्क्ष्म्यावासाभिधो भुवि ॥ ११ ॥
वेदशास्त्रार्थतत्त्वज्ञैर्ब्राह्मणैरधिष्ठितः । भवेन्निस्संशयो यत्र सर्ववेदार्थनिर्णयः ॥ १२ ॥
तत्र कश्चिद्द्विजवरः शंभुध्यायीति विश्रुतः । तस्य चित्तं सदा शंभौ निश्चलं भक्तिनिर्मलम् ॥ १३
पुराणागमधर्मज्ञः शिवलिङ्गप्रतिष्ठया । प्रहेयं जननक्लेशं निश्चिन्वन्न ययौ धनम् ॥ १४ ॥
अलाभाद्द्रव्यजातस्य मत्वा सर्वं मनोमयम् । मनसैवालयं चक्रे दत्वा बहुधनं हृदा ॥ १५ ॥

स्थपतीनां समूहैः स शिल्पशास्त्रप्रकारतः । कर्षणादि प्रतिष्ठान्तं सर्वलक्षणलक्षितम् ॥ १६ ॥
प्राकारमण्टपशतप्रासादस्तम्भगोपुरैः । अलङ्कृतं मणिमयैर्नानावाहनमण्डितम् ॥ १७ ॥
वापीकूपतटाकाढ्यं पुष्पारामाभिसंवृतम् । दासीदासायुतैर्युक्तमुल्लोचास्तरणाञ्चितम् ॥ १८ ॥
मुक्ताप्रवाळकुसुममालाभिरभिमण्डितम् । चूतनारङ्गलिकुचरम्भाफलपरिष्कृतम् ॥ १९ ॥
पताकातोरणच्छत्रस्तम्भास्तम्भैरलङ्कृतम् । एवं कृत्वालयं शंभोः परिवारालयानपि ॥ २० ॥
कृत्वा सिंहासनं हैमं मध्ये रत्नपरिष्कृतम् । निवेश्य लिङ्गं तन्मध्ये लक्षणाढ्यं सवेदिकम् ॥ २१ ॥
कुम्भाभिषेकद्रव्याणि पूजाद्रव्याणि बुद्धिमान् । दासीदासगणांश्चापि संपाद्य परया मुदा ॥ २२ ॥
निर्ममे नृत्तगीतादिघोषैर्मण्डितमालयम् । दशभिर्दिवसैर्यत्नादहोरात्रमतन्द्रितः ॥ २३ ॥
निर्निद्रोऽयं निराहारो विधायालयमीशितुः । सुमुहूर्ते शुभे लग्ने मन्त्रैरागमवैदिकैः ॥ २४ ॥
कुम्भाभिषेकमीशस्य चिकीर्षुः सन् सुखं स्थितः । तस्यां निशि महादेवश्चोळं काञ्चीनिवासिनम् ॥
सन्तानार्थं क्वचित् कोणे कृत्वालयमुमापतेः । शिवलिङ्गप्रतिष्ठां च श्वः प्रातः कर्तुमुद्यतम् ॥२६॥
गत्वा स्वप्नेऽब्रवीदीशो मद्भक्तः कश्चन द्विजः । शंभुध्यायीति नाम्नासौ लक्ष्म्यावासपुरे वसन् ॥
निर्मायालयमत्युच्चं प्राकारैर्गोपुरैरपि । शिवलिङ्गप्रतिष्ठां श्वो दरिद्रोऽपि करिष्यति ॥ २८ ॥
श्वो न प्रतिष्ठा कर्तव्या त्वयैकद्विदिनात् परम् । कर्तव्या तत्र गच्छामि श्वः प्रातरिति च ब्रुवन् ॥
अन्तर्दधे शिवो राजा बुद्ध्वा प्रातः स्मृताद्भुतः । निर्गत्य वसतिस्तस्य यत्र तत्र ययौ नृपः ॥३०॥
ब्राह्मणान् पृष्टवान् कोऽत्र शंभुध्यायीति नामभृत् । कारयित्वालयं शंभोः प्रतिष्ठां कुरुते किमु ॥
इति पृष्टा द्विजाः प्राहू राजानं नालयं वयम् । विद्मस्तं तु पुनर्विद्म इति प्रादर्शयन् द्विजम् ॥
तं दृष्ट्वा प्रणिपत्यायं श्रीमतालयमीशितुः । कुत्र वा निर्मितं ब्रूहि स्वप्ने पूर्वेद्युरीरितम् ॥ ३३ ॥
शंभुनेशप्रतिष्ठा न त्वया कार्या महीपते । शंभुध्यायीति मद्भक्तः श्वः प्रतिष्ठां करिष्यति ॥ ३४ ॥
इति श्रुत्वा वचस्तस्य शंभुध्यायी तु विस्मितः । निस्वोऽशक्तो धनाभावाद्बहिः कर्तुं शिवालयम् ॥
मनसा कल्पितं किञ्चिदालयं त्विति यन्मया । तदीशप्रीतयेऽभूत्किं कृतार्थोऽस्मीशभाषणात्॥३६॥
इत्युक्तस्तेन भूपोऽपि नत्वा तं स्वगृहं गतः । विप्रैर्मुहूर्तं निश्चित्य पुनरन्यं महीपतिः ॥ ३७ ॥
विधिवत्कारयामास शंभोः कुम्भाभिषेचनम् । लिङ्गप्रतिष्ठामात्रेण शिवादात्मजमाप्तवान् ॥ ३८ ॥
तन्मुहूर्ते स विप्रोऽपि कृत्वा कुम्भाभिषेचनम् । चतुष्षष्टयुपचारैश्च पूजयञ्शंभुमान्तरे ॥ ३९ ॥
पुळकाङ्कितसार्वाङ्गश्चानन्दाश्रुपरीवृतः । मनसैवं सपर्यां स विधाय द्विजपुंगवः ॥ ४० ॥
मलत्रयविनिर्मुक्तो माहेश्वरपदं ययौ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे शम्भुध्यायिचरित्रं नामपञ्चनवतितमोऽध्यायः ॥

॥ अथ [illegible]वतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

पाण्डयं सुन्दरमाराख्यं कुब्जं नम्रमते स्थितम् । प्रापयन्तीशभक्तिं या संबन्धेन महात्मना ॥ १ ॥
सा चोळतनया कुब्जपाण्ड्यस्य वनिता सती । महिळेशीति विख्याता पीताम्बास्तन्यसेवया ॥२॥
कारयित्वेशभक्तं तं भर्तारं मधुरेश्वरम् । हालास्यनाथकृपया भर्त्रा साकं विनिर्गता ॥ ३ ॥
प्राप्य वेणुवनस्थानं संबन्धेन कृपादृशा । निरीक्षिता शिवं सेव्य निर्मुक्ताखिलबन्धना ॥ ४ ॥
शालिवाटीशकृपया शाश्वतं पदमाप सा ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे महिळेशीमुक्तिप्राप्तिर्नाम [illegible]वतितमोऽध्यायः ॥

॥ अथ [illegible]नवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

काम्पिल्यनगरे कश्चिच्छिवभक्तजनाग्रणीः । भक्तप्रिय इति ख्यातस्तन्तुवायशिखामणिः ॥ १ ॥
इष्टदः शिवभक्तानामीशपादार्चनापरः । ये ये जनाः समायान्ति शिवभक्ता महत्तमाः ॥ २ ॥
तेषां तेषां च कौपीनं संव्यानं वस्त्रमर्पयन् । अन्नं चतुर्विधोपेतं भक्ष्यं च घृतपाचितम् ॥ ३ ॥
आजन्ममरणं सर्वमशून्यं दिवसं नयन् । प्रतिष्ठाप्य शुभां कार्तिमन्ते कैवल्यमाप्तवान् ॥ ४ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे भक्तप्रियचरित्रं नामसप्तनवतितमोऽध्यायः ॥

॥ अथ [illegible]नवतितमोऽध्यायः ॥

श्रीअगस्त्यः ॥

शिवभक्त्यैव परया तिर्यञ्चोऽपि महीतले । कृत्वा शिवार्चनं शम्भुप्रसादान्मुक्तिमाययुः ॥ १ ॥
अस्ति स्थानं महेशस्य गजारण्यमिति क्षितौ । पार्श्वयोर्यत्र कावेरीप्रवाहो मालिकायते ॥ २ ॥
श्वेतजम्बूतरुर्भूत्वा यत्र वेदस्तपस्यति । तन्मूले जगतां मूलं सन्निधत्ते महेश्वरः ॥ ३ ॥
अपां लिङ्गमयं पूर्वं पिण्डीकृत्योमयार्चितः । ज्योतिर्लिङ्गाकृतिः श्रीमाञ्ज्योतिषामवभासकः ॥ ४ ॥
तमासाद्य गजो नित्यं मग्नः कावेरिकाह्रदे । स्वहस्तोद्धृततोयेनाभिषिञ्चँल्लिङ्गमूर्धनि ॥ ५ ॥
अन्वहं पूजयामास भक्तिपूतेन चेतसा । तस्मिन्नेव तरौ काचिल्लूता निजमुखोद्भवैः ॥ ६ ॥
तन्तुभिश्चातपत्राभमुल्लोचमनुवासरम् । कृत्वोपास्ते स्म तस्यापि प्रसन्नोऽभवदीश्वरः ॥ ७ ॥
लूताकृतवितानानि करिष्यन्नभिषेचनम् । आच्छिनत्त्यन्वहं दन्ती तेन लूता च कुप्यति ॥ ८ ॥
कदाचिदभिषेकाय हरस्यारण्यको गजः । आगत्योल्लोचमाच्छिन्दन्नभ्यषिञ्चन्महेश्वरम् ॥ ९ ॥

तदानीं कुपिता लूता तद्धस्ते न्यपतद्द्रुमात् । सद्यस्तेनाप्यविज्ञाता शुण्डाभ्यन्तरमाविशत्॥ १० ॥
आरक्षस्य त्वधः स्थित्वा बभ्रामारण्यहस्तिनः । सन्निधौ परिवृत्यायं पतितस्यक्तजीवितः ॥ ११ ॥
क्रमन्तर्मुखे कृत्वा त्यक्तासौर्मूर्ध्नि दन्तिनः । अलब्धनिर्गमद्वारः प्राणाञ्छूंतापि सात्यजत् ॥ १२ ॥
ददौ मुक्तिं गजेन्द्रस्य दयया परमेश्वरः । या लूता विदधे नित्यं तन्तुभिश्छत्रमुत्तमम् ॥ १३ ॥
पत्न्या कमलवल्या यः प्रार्थयन्नीशमात्मजम् । शुभदेवाभिधोऽध्यास्ते तस्य चोळमहीपतेः॥ १४ ॥
सा संत्रास्या बभूवान्तर्जठरे गर्भरूपभृत् । दशमे मास्यथ प्राप्ते क्षाणार्धात् प्रसवोन्मुखीम्॥ १५ ॥
ज्योतिर्विन्माहिषीमाह यदि जातोऽधुना सुतः । म्रियेत दशरात्रे सा[1] चेन्मुहूर्तादनन्तरम् ॥ १६ ॥
जायेत सम्राड्दीर्घायुर्जातस्तु स्यान्न संशयः । इत्याकर्ण्य वचो राज्ञी भूत्वा स्वयमधःशिराः॥ १७॥
तुलातरौ निबध्याङ्घ्री सा मुहूर्तादनन्तरम् । जनयामास तनयं दृष्ट्वा च दृशि लोहितम् ॥ १८ ॥
लोहिताक्षं च नाम्नातं कृत्वाघ्राय शिशोर्मुखम् । तया वेदनया ग्रस्ता व्यत्यासप्रसवात्तया॥ १९ ॥
प्राणांस्तत्याज सा राज्ञी ववृधे चन्द्रवच्छिशुः । वर्धमानं महाबुद्धिं लोहिताक्षं महीपतिः॥ २० ॥
शुभदेवोऽभिषिच्य स्वे पदे वनमुपागमत् । तपोवनं गते ताते लोहिताक्षः स मन्त्रिभिः ॥ २१ ॥
सहितः पृथिवीं सर्वां मनुवत् पर्यपालयत् । भूत्वा जातिस्मरो राजा गजारण्यमुपेत्य सः॥ २२ ॥
श्रीकर्म कारयामास जम्बुनाथस्य शूलिनः । पूर्वं गर्भगृहं कृत्वा त्रिमानस्तूपिराजितम् ॥ २३ ॥
कृत्वार्धमण्टपमपि महामण्डपसंयुतम् । आलयं परिवाराणां कृत्वावरणमद्भुतम् ॥ २४ ॥
समारब्धे बहिःसाले पर्याप्तार्थैर्महीभृता । क्रियमाणे तु तन्मध्ये किञ्चिन्न्यूनमभूत्तदा ॥ २५ ॥
तापसाकारमासाद्य शंभुर्हस्तिवनेश्वरः । विभूतिं स्थपतिभ्यः स्वां दिशंस्तेभ्यः पृथक् पृथक्॥ २६॥
दृढीकुरुत सालं तु तालसालप्रमाणतः । इति ब्रुवाणो गौरीशो विस्मयं पश्यतामधात् ॥ २७ ॥
तैः सहारूढसालाग्रो वीक्षितुं परितोऽभ्यगात् । प्रदक्षिणप्रक्रमणान्मग्नः सालोऽभवत्क्षणात्॥ २८ ॥
बहुद्रव्यव्ययैः क्लृप्तो राज्ञा सालो ममज्ज हि । इतः परं कः कर्तास्यादर्थं दत्वानुवासरम ॥२९॥
इति चिन्तासमाविष्टे स्थपतीनां समूहके । तदा तापसरूपीशो दयया प्राह तानिति ॥ ३० ॥
वेतनं वः प्रदास्यामि यावच्छक्तिप्रयासिनाम् । तावन्मात्रं दिशामीति दिशन् भूतिं पुनः पुनः ॥
कारयामास सालं स तालसालप्रमाणतः । शिवकैङ्कर्यकृषो वा शक्त्या भक्त्या बलेन च॥ ३२ ॥
अवञ्चकः पुमान् यो वा मनोवाक्कायकर्मभिः । तस्येश्वराज्ञया सद्यस्स भस्मरेणुर्हिरण्मयः ॥ ३३ ॥
असत्यवादिनां पुंसामकैङ्कर्यविधायिनाम् । अप्रयासेन पाषाणे टङ्कशब्दं वितन्वताम् ॥ ३४ ॥
न सुवर्णं भवेद्भस्म दत्तं भस्मैव केवलम् । एवं सालं सप्तकृत्वः कृत्वा भूमेरधःपदे ॥ ३५ ॥
दत्वा दत्वा च भस्मानि वेतनार्थमहर्निशम् । तापसः शङ्करः साक्षात्कारयामास शिल्पिभिः ॥
श्रीभस्मकृतसालोऽयं तदा प्रभृति पप्रथे । विनिर्मिते बहिःसाले स तु कैतवतापसः ॥ ३७ ॥

---

1. मुहूर्तादनन्तरं जायेत चेत्सा त्वं म्रियेथाः ।

अलङ्कृत्य कटाक्षेण शोणाक्षं स्वस्य भस्मना । तिरोऽधत्त महादेवः पश्यतां विस्मयप्रदः ॥ ३८ ॥
अयं शंभुरिति ज्ञात्वा चोळो भक्तिसमन्वितः । समुन्नतमहासालगोपुरादिपरिष्कृतम् ॥ ३९ ॥
निर्मायालयमीशस्य महोत्सवमकारयत् । अन्येषु शंभुस्थानेषु महोत्सवमपि व्यधात् ॥ ४० ॥
पुण्डरीकपुरं प्राप्य सन्निधौ चित्सभापतेः । उषित्वा दश वर्षाणि कैङ्कर्यं रचयन्नृपः ॥ ४१ ॥
पालयित्वा च धर्मेण मेदिनीं सागराम्बराम् । प्रसादाच्चित्सभेशस्य शोणाक्षो मोक्षमाप्तवान् ॥ ४२ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीशोणाक्षमोक्षप्राप्तिर्नामा सप्तनवतितमोऽध्यायः ॥

॥ अथ कोनशत [illegible] तमोऽध्यायः ॥

श्रीअगस्त्यः ॥

चोळदेशे व्याघ्रपुरे नीलकण्ठाभिधोऽन्यजः । आसीत् कुशीलवः कश्चिद्गायकानां शिखामणिः ॥ १ ॥
ज्ञात्वा निकृष्टो दूरस्थः शंभुं गानादतोषयत् । अजस्रवीणागानेन तुष्टोऽभूदम्बिकापतिः ॥ २ ॥
गायतस्तस्य भक्तस्य सन्ततं शंभुसन्निधौ । शिवक्षेत्राणि सर्वाणि सेवितुं चाभवन्मतिः ॥ ३ ॥
तत्क्षणेनैव निर्गत्य दृष्ट्वा क्षेत्राणि सर्वतः । गायन् गायन्निषेव्यायं वीणया शंभुवैभवम् ॥ ४ ॥
शनैर्हालास्यमासाद्य तत्र शंभुमगायत । दूरे स्थित्वा बहिरमुं गायन्तं कृपयेशितुः ॥ ५ ॥
निकृष्टमपि तं भक्तमन्तर्निन्युः शिवाश्रिताः । आलयान्तः प्रविष्टोऽयमगायद्वीणया शिवम् ॥ ६ ॥
वीणागानादभूदस्य सुप्रीतः सुन्दरेश्वरः । आकाशरूपी भगवानाहात्मीयकथावलिम् ॥ ७ ॥
गायत्ययमधः स्थित्वा नीलकण्ठाभिधोऽधुना । भवद्भिर्दीयतां दिव्यं फलकं रत्ननिर्मितम् ॥ ८ ॥
आकर्ण्येति वचः शंभोर्भक्तास्तेऽदुस्तथेति तत् । आरूढफलकः शंभोरगायदपदानकम् ॥ ९ ॥
चिरं तत्र वसन् पश्चादवाप कमलालयम् । गीत्वा तं सुन्दरसखमुदग्द्वारात् प्रविश्य सः ॥ १० ॥
नत्वा निषेव्य त्यागेशमथ द्रोणीपुरं ययौ । प्रत्युद्गतोऽयं कविना पार्वतीस्तन्यपायिना ॥ ११ ॥
तेनोदितकवित्वानि सापदानानि शूलिनः । सुरागैर्ग्राहयामास विपञ्चीं मञ्जुवादिनीम् ॥ १२ ॥
द्रोणीपुरे महादेवं वेणीतुल्याभिरुक्तिभिः । अगायच्छङ्करं भक्त्या वीणया मञ्जुरावया ॥ १३ ॥
तेन गानेन तुष्टस्य शंभोर्द्रोणीपुरेशितुः । आज्ञया सुहृदा ज्ञानसम्बन्धेन तदाश्रितैः ॥ १४ ॥
मुक्तिं भक्तजनैः सार्धमगमद्गानपण्डितः ॥

गुरुप्रसादेन शिवप्रसादमवाप्य सद्गानविशारदोऽयम्
निर्धूतमायामलपाशबन्धो बन्धाद्विमुक्तो ह्यभवन्मुनीन्द्राः ॥ १५ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे नीलकण्ठचरित्रं नाम कोनशत [illegible] तमोऽध्यायः ॥

॥ अथैकोद्शततमोऽध्यायः ॥

जटिलः सुन्दरपिता श्रीजम्बूपुरवास्यभूत् । श्रीपुरं प्राप्य पुत्रेण सह शङ्करभक्तिमान् ॥ १ ॥
सदा निषेव्य त्यागेशमुषित्वा कमलालये । तादृशात्मजलाभेन सायुज्यं प्राप शांभवम् ॥ २ ॥
तत्पत्नी च ज्ञानवती शिवध्यानप्रभावतः । स्वभर्त्रा शिवसायुज्यमगमत् सुन्दरप्रसूः ॥ ३ ॥
एते त्रिषष्टिगणिता भक्ताः शिवपदं गताः । दर्शनस्पर्शनालापतत्कथाश्रवणादिभिः ॥ ४ ॥
मुच्यन्ते मानवाः पापात् संसाराब्धेर्न संशयः ॥

॥ इति श्रीस्कान्दोपपुराणे शिवरहस्यविलासे जटिलचरित्रं नामैकोद्शततमोऽध्यायः ॥

॥ अथैकशततमोऽध्यायः ॥

श्रीअगस्त्यः ॥

कैलासयात्रां वक्ष्यामि सुन्दरस्य महात्मनः । तत्सख्युरपि चेरस्य शृणुतात्र क्षमावतः ॥ १ ॥
चेरं प्राणप्रियसखं द्रष्टुकामः स सुन्दरः । नमस्कृत्वात्मसुहृदमामन्त्र्य त्यागनायकम् ॥ २ ॥
श्रीमद्वल्लविलासोक्तकथानां हेतुरेष हि । त्यागेशं मनसा धृत्वा निर्गतः कमलालयात् ॥ ३ ॥
पथि विश्रम्य विश्रम्य निषेव्येशस्थलान्यपि । गीत्वा गानरसैरीशमधनाशिमगाहत ॥ ४ ॥
तत्राग्रहारः सुमहान्शिवभक्तैरलङ्कृतः । तत्रेशगोपुरद्वारि तिष्ठन्नंभुमसेवत ॥ ५ ॥
श्रीसद्गैराकृते तस्मिन् स्तोत्रं कर्तुं समुद्यते । अश्रावि वाद्यघोषश्च रोदनध्वनिरप्यभूत् ॥ ६ ॥
किमेतदिति पप्रच्छ तत्रस्थान् सुन्दरः कविः । ते प्रोचुरत्र सुहृदौ द्विजौ सन्निहितालयौ ॥ ७ ॥
तयोः सुतावजायेतां मास्येकस्मिन् महात्मनोः । बाल्ये तयोरभूत् सख्यं रामलक्ष्मणयोरिव ॥ ८ ॥
कृतचौळौ च तौ काले सञ्चरन्तावितस्ततः । कदाचित् कालगत्यैतौ निकटे सरसीं गतौ ॥ ९ ॥
गृहीतुमुत्पलं कश्चिद्बाल्याद्वारिण्यवातरत् । स्थितः कश्चित्तटे भीतो जले ग्राहस्तमग्रहीत् ॥ १० ॥
स रुदन् मातरं प्राप्य तटस्थो मित्रमम्भसि । मग्नं जगाद तत्पित्रोरथ सर्वे च संगताः ॥ ११ ॥
अवतीर्य जले बालमन्विष्यासायमाकुलाः । अदृष्ट्वा शोकसन्तप्ताः प्रापुर्वेश्मानि नागराः ॥ १२ ॥
तन्माता पितरौ खिन्नावेकपुत्रौ शुचातुरौ । गामयामासतुः कालं सार्धसंवत्सरद्वयम् ॥ १३ ॥
स्वपुत्रमित्रकल्याणं दृष्ट्वोपनयनं प्रियम् । सख्यात्मजे ममाप्यस्य स्यात्कल्याणं सहामुना ॥ १४ ॥
मृतः किलेति स्मृत्वा तं रोदितीत्यब्रुवञ्जनाः । तदाकर्ण्यातिनिर्विण्णस्तद्गृहं प्राप्य सुन्दरः ॥१५॥
जातस्य मरणं नित्यं मृतस्य जननं ध्रुवम् । इति ज्ञात्वापि सुचिरं किमर्थं रोदिषि भ्रमात् ॥१६॥
आश्वासितापि तन्माता रुदन्ती सुन्दरं पुनः । साष्टाङ्गं संप्रणम्यासावब्रवीद्भक्तिपूर्वकम् ॥१७॥
त्वदागमनपर्यन्तं प्रतीक्ष्येह स्थितास्म्यहम् । भवांस्त्यागेश्वरसखस्त्वदसाध्यं न विद्यते ॥ १८ ॥
तस्मान्मम सुतः स्वामिन् कृपया मयि साम्प्रतम् । शिवप्रभावाद्भवता चोज्जीव्यानीयतां क्षणात् ॥
नो चेत्सद्यो मम प्राणांस्त्यक्ष्यामीह न संशयः । तथानयिष्यामीत्युक्त्वा मास्तु दुःखं वरानने ॥२०॥

इत्याश्वास्य स तां शंभुमगायद्द्राविडोक्तिभिः । दशभिश्चाघनाशीशममृतद्रवसूक्तिभिः ॥ २१ ॥
आथाह्नया महेशस्य कालः कम्पितविग्रहः । निष्पङ्के निर्जले ग्रीष्मे निष्पद्मे शाद्वलस्थले ॥२२॥
सरस्युत्पाद्य सलिलमुत्पलं कमलं पुनः । उत्पाद्य शिशुमारं च चिरान्नष्टस्य तच्छिशोः ॥ २३ ॥
वयःप्रमाणं वर्णश्च यावद्बालस्य तावता । वपुषा देहमुत्पाद्य प्राणैश्चापि नियोज्य च ॥ २४ ॥
आदायागत्य वेगेनाप्यदृश्यस्तत्सरोजले । नक्रस्य वक्त्रे निक्षिप्य मृत्युरन्तरधात्तदा ॥ २५ ॥
अथ नक्रोऽघनाशीशचोदितो द्विजनन्दनम् । सभूषणगणं साङ्गमुद्ववाम मुखात्स्वकात् ॥२६॥
सर्वेऽप्यालोक्य तच्चित्रं सन्तोषं परमं ययुः । सान्दीपिनिमुनेः सूनोर्दातुः कृष्णादिमं जनाः ॥२७॥
अत्याश्चर्यसमाविष्टाः सुन्दरं मेनिरेऽधिकम् । यदा जिजीव बालोऽयं स्वर्गे भेरीमताडयन् ॥ २८ ॥
देवाश्च पुष्पवर्षाणि ववर्षुः सुन्दरोपरि । स्तुवन्ति ब्राह्मणाः सर्वे सुन्दरं सूक्तिसुन्दरम् ॥ २९ ॥
तदा तं बालमादाय वर्धयित्वाशिषा शिशुम् । सेवयित्वा महादेवमघनाशीशमस्तुवन् ॥ ३० ॥
तद्दिने तन्मुहूर्ते सोऽप्युपनीतोऽर्भकोऽमुना । कल्याणं कारयित्वास्य प्रतस्थे केरलं प्रति ॥ ३१ ॥
तन्माता तत्पिता बालः तत्रत्या बान्धवा जनाः । प्रणम्य सुन्दरं भक्त्या गृहमेत्य सुखं स्थिताः ॥
स्थलानि मार्गे गच्छन् स गीत्वा स्तुत्वा निषेव्य च । चेरदेशं जगामायं तीर्त्वारण्यसरिद्गिरीन् ॥
तत्र केरलदेशस्थाः सुन्दरस्य समागमम् । राजानं श्रावयामासुरुज्जीवितमृतार्भकम् ॥ ३४ ॥
श्रुत्वा स तुष्टहृदयस्तेषां मङ्गळवादिनीम् । राजा दत्वा धनं रत्नं वस्त्राण्याभरणानि च ॥ ३५ ॥
गजमारोप्य तान् पुर्याः प्रदक्षिणमकारयत् । पुरं सर्वमलङ्कृत्य वितानध्वजतोरणैः ॥ ३६ ॥
पूगपुन्नागकुसुमै रम्भास्तम्भैः फलान्वितैः । अलङ्क्रियाद्य कर्तव्या प्रतिवीथि गृहेगृहे ॥ ३७ ॥
त्यागेशसुहृदायाति सुन्दरोऽत्र महाकविः । इति सर्वत्र नगरे भेरीवाद्यमघोषयत् ॥ ३८ ॥
सेनाभिर्मन्त्रिणा साकं गजारूढो महीपतिः । अभिप्रतस्थे हृत्तोषं रोमाञ्चेन प्रदर्शयन् ॥ ३९ ॥
श्रीसङ्करपि सोऽप्यस्य नगरद्वारि चाययौ । दृष्ट्वा त सुन्दरं राजाप्यवरुह्य गजात्क्षणात् ॥ ४० ॥
साष्टाङ्गं प्रणनामायं तमुत्थाप्येष सस्वजे । स्तुत्वा नृपस्तं त्यागेशं साक्षात्कृतममन्यत ॥ ४१ ॥
अस्य सेनाश्च तद्भक्ताः सर्वे सन्तोषमापिरे । गजस्कन्धं समारोप्य धृत्वा छत्रं स्वयं नृपः ॥ ४२ ॥
प्रदक्षिणवशात्पुर्यां निनाय स्वगृहं प्रति । कल्याणी सर्वतो वाणी तदाभूत्सर्वदेहिनाम् ॥ ४३ ॥
वाद्यघोषैरनेकैश्च हेषितैर्वाजिनामपि । गजानां बृंहितैश्चापि योधानां सिंहनादकैः ॥ ४४ ॥
महोदयपुरी चेरनगरी मुखरीकृता । तद्राजभवनद्वारमागतः सुन्दरः क्षणात् ॥ ४५ ॥
अवरुह्य गजाद्राजा सुन्दरोऽभ्यन्तराविशत् । सिंहासने तमारोप्य नत्वाभ्यर्च्य सुगन्धिभिः ॥ ४६ ॥
कुसुमैर्गन्धपङ्कैश्च प्रलिप्याङ्गमशेषकम् । पूजां वितेने राजासौ सुन्दरस्य महात्मनः ॥ ४७ ॥
भुक्त्वा सुखमुषित्वात्र चिरं तेन महीभुजा । तत्रत्यान्यस्थलान्येत्य शांभवानि निषेव्य तौ ॥ ४८ ॥
पुनर्महोदयपुरं प्राप्योषतुरुभौ सुखम् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सुन्दरचरित्रं नामैकशततमोऽध्यायः ॥

॥ अथ द्विशततमोऽध्यायः ॥

श्रीअगस्त्यः ॥

अलं भूलोकवसतिः कैलासे स्यादितः परम् । इत्यर्थगर्भितैः शंभुं महोदयपुरेश्वरम् ॥ १ ॥
अगायदृशभिः स्तोत्रैरालयं प्राप्य सुन्दरः । ज्ञात्वा तदिङ्गितं शंभुः कैलासे पार्वतीसखः ॥ २ ॥
आनेतुं सुन्दरं प्राह ब्रह्मविष्णुमुखाञ्शिवः । महोदयपुरं गत्वा श्वेतेभेन सहामुना ॥ ३ ॥
समारोप्य गजस्कन्धमिहानयत सुन्दरम् । तथेति शिरसा धृत्वा शिवाज्ञां श्वेतहस्तिना ॥ ४ ॥
ते देवाश्चाययुस्तूर्णं महोदयपुरं तदा । आयाते गोपुरद्वारि देवयूथे स सुन्दरः ॥ ५ ॥
बहिर्निर्गत्य तान् देवाञ्शिवाज्ञापरिपालकान् । प्रणनाम हरीन्द्रादीन् भक्त्या विनयपूर्वकम् ॥ ६ ॥
प्रणमन्तं तमूचुस्ते त्वामानेतुमिहागताः । शिवाज्ञया गजश्रेष्ठं चतुर्दन्तविराजितम् ॥ ७ ॥
औन्नत्यादतिधावळ्यात् कैलासगिरिसन्निभम् । घण्टाघणघणात्कारकिङ्किणीगणमण्डितम् ॥ ८ ॥
आरुह्यायाहि कैलासमिन्द्रस्त्वैरावतं यथा । इत्युक्त्वा तेन करिणः कारयित्वा प्रदक्षिणम् ॥ ९ ॥
आरोप्य निन्युर्गगनं यदा देवास्तदा दिवि । आषाढस्वातिनक्षत्रे निर्गतः श्वेतहस्तिना ॥ १० ॥
रेजे स्वात्या विधुरिव यशोज्योत्स्नाभिरम्बरे । दिवि दुन्दुभयो नेदुः पुष्पवृष्टिरभूदिवः ॥ ११ ॥
तदानीं मार्गमध्येऽसौ स्वमित्रं चेरभूपतिम् । अस्मरन्नागत इति किञ्चिन्मनसि सुन्दरः ॥ १२ ॥
कृमिकीटादिजन्तूनां भाषां वेत्ति हि चेरपः । मनसा चिन्तितं चापि स जानाति शिवाज्ञया ॥१३॥
तादृशश्चेरभूपोऽस्य सुन्दरस्य मनोगतम् । अभिप्रायं तदा स्वस्मिन् वात्सल्यं चापि तादृशम् ॥
परिज्ञायैतदखिलमारुह्याश्वं निजं स्वयम् । आकाशं गन्तुमश्वं स्वं कशाघातादशाद्यदा ॥ १५ ॥
अशक्नुवन् खं गन्तुं स क्षितावेवाभ्रमत्तदा । तदेतत्सुन्दरो ज्ञात्वा मनस्येवमचिन्तयत् ॥ १६ ॥
पञ्चाक्षरोपदेशेन खेचरोऽश्वो भविष्यति । इत्ययं किं न जानाति चेरोऽयं मत्सखेति च ॥ १७ ॥
ज्ञात्वा तदपि पञ्चार्णमश्वाय समुपादिशत् । अश्वो मन्त्रप्रभावेन चोत्पपात नभःस्थले ॥ १८ ॥
धृत्वा यः सुन्दरं हस्ती गच्छत्याकाशमार्गतः । तं च प्रदक्षिणीकृत्य सद्यस्तस्य पुरोऽभवत् ॥ १९ ॥
प्राणत्यागपरा युद्धे राज्ञो ये मूलसैनिकाः । प्राणप्रियतमास्तेऽपि चाकाशं गन्तुमक्षमाः ॥ २० ॥
उद्वीक्ष्योद्वीक्ष्य तं भूपं यावदादृष्टिगोचरम् । अदृष्टिगोचरे राज्ञि तद्भटा दुःखितान्तराः ॥ २१ ॥
परस्परायुधाघातैः प्राणांस्तत्यजुरुत्कया । ते दिव्यतनवो भूत्वा वीरस्वर्गाभिगामिनः ॥ २२ ॥
सुन्दरस्य च चेरस्य प्रदक्षिणविधायिनः । नानाविधायुधधरा नानाभरणभूषिताः ॥ २३ ॥
गत्वा सद्योऽतिवेगेन प्रणिपत्य प्रभूत्तमम् । तद्भटा गजवाज्यग्रे यथापूर्वं बभूविरे ॥ २४ ॥
गत्वा कैलासशिखरमगम्यमपि योगिनाम् । अवरुह्य गजादश्वात् सुन्दरः सहभूपतिः ॥ २५ ॥
दक्षिणद्वारमार्गेण प्रविवेश शिवालयम् । अतीत्यावरणद्वाराण्यखिलान्यवनीभुजा ॥ २६ ॥
गायन् कवित्वैरीशानं प्रधानद्वारमाविशत् । तदा चेरनृपालं तं रुरोध द्वारपालकः ॥ २७ ॥

अन्तर्गत्वा ननामायं सुन्दरः स्वामिनं शिवम् । अपृच्छदीशः कुशलमायाहि कमलालयात् ॥ २८ ॥
आगतोऽसीति पृष्टः सन् सख्युश्चेरस्य चागमम् । अब्रवीत्तमथानेतुमन्तरीश्वरसन्निधौ ॥ २९ ॥
किञ्चिदब्जिजपद्भूयो विनयेन समन्वितः । आहूतव्यः स युष्माकं पादसेवनलोलुपः ॥ ३० ॥
तथेति नन्दिनं प्राह चेरमानय मेऽन्तिकम् । इतीशाज्ञाधरो नन्दी निर्गत्य द्वारि तं नृपम् ॥ ३१ ॥
आहूय प्रणतं चेरमग्रे शंभोर्निनाय सः । दृष्ट्वा साष्टाङ्गपञ्चाङ्गप्रत्यङ्गैस्तं ननाम सः ॥ ३२ ॥
ईशोऽपि प्राह तं चेरं किञ्चित्स्मेरमुखाम्बुजः । मदनुज्ञां विना राजन् भूलोकात्कथमागतः ॥३३॥
इति पृष्टोऽब्रवीद्युष्मत्कृपासागरवीचिभिः । नीतोऽस्मि सन्निधौ वोऽत्र मया गन्तुं न शक्यते ॥३४॥
मत्सख्युः सुन्दरस्याहं वाहनाग्रेसरोऽभ्यगाम् । इत्युक्त्वा स्वकवित्वेन तुष्टाव परमेश्वरम् ॥ ३५ ॥
ईशापदानमहितं द्राविडं स्वप्रबन्धकम् । ईशमश्रावयद्धीमांश्चेरः शङ्करकिङ्करः ॥ ३६ ॥
शास्ताथो चेरभूपालकृतिं कल्मषनाशिनीम् । प्राकाशयत्स्वभृत्यौघैश्चोळदेशे शिवज्ञया ॥ ३७ ॥
सुन्दरेण यथा भूमौ तथात्रास्स्वेति शंभुना । तुष्टेनानुगृहीतः सन्नोमित्युक्त्वा स चेरपः ॥ ३८ ॥
तथैवोवास सख्या स सुन्दरोऽप्यवसत् सुखम् । कैलासयात्रावसरे या गीता कविता स ताम् ॥
यादःपतिकरे दत्वा महोदयपुरे भुवि । प्रकाशय प्रबन्धं मे त्वमित्याह स्म सुन्दरः ॥ ४० ॥
प्राकाशयच्च तां तत्र समादाय तथेति सः । यथापूर्वं शिवाग्रेऽभूत् सहालाहलसुन्दरः ॥ ४१ ॥
चेरोऽपि सुहृदा तेन सुन्दरेण सहावसत् । याते कैलासपदवीं सुन्दरे सुन्दरप्रिया ॥ ४२ ॥
परवा शृङ्खला चापि त्यक्त्वा ते मानुषीं तनुम् । धृत्वा कमलिनीत्याख्यां साध्यन्यानिन्दिताभिधाम् ॥
ऊषतुः सन्निधौ देव्याः सख्यौ कैङ्कर्यलोलुपे । कन्दुकक्रीडया गौर्या उभे चिक्रीडतुः सह ॥४४॥
य इदं सुन्दराख्यानं शृणोति श्रद्धया सह । सर्वान् कामानिह प्राप्य पश्चान्मोक्षमवाप्नुयात् ॥४५॥

भक्तास्त्रिषष्टिर्जगदीशभक्त्या विशुद्धया विच्युतकर्मबन्धाः ।
मयोदिता यच्चरितानि लोकैः स्मृतानि निघ्नन्ति महान्त्यघानि ॥ ४६ ॥

जटिलो मिथिलो दाल्भ्यः सौरभेयो जितानसः । बालसिद्धः सिद्धरथो वषड्गुः कवषोऽजितः ॥
ऐत दश महाभक्ता मनसा पूजितेश्वराः । मुक्ताः शंभुप्रसादेन बभूवुर्लोकवन्दिताः ॥ ४८ ॥
शिवोपदिष्टविज्ञानाल्लीनाविघ्नकवृत्तयः । ददृशुः सर्वभूतेषु स्थितं साक्षिणमीश्वरम् ॥ ४९ ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे श्रीसुन्दरकैलासप्राप्तिर्नामैकशततमोऽध्यायः ॥

॥ अथ द्व्येकशततमोऽध्यायः ॥

ऋषयः ॥
कदा कुत्रोपदिष्टं तद्विज्ञानं त्रिपुरद्विषा । तेभ्यस्तद्ब्रूह्यशेषेण यथावत्कुम्भसंभव ॥ १ ॥
कैलासशिखरे देवं सुखासीनं सहोमया । प्रणम्य पादयोर्भक्त्या पप्रच्छुः सनकादयः ॥ २ ॥

देव देव दयासिन्धो दक्षाध्वरविभञ्जन । श्रुताश्च सर्वे वेदान्ताः प्रपञ्चोऽथ न लीयते ॥ ३ ॥
विलीने सकले लोके भवानेकोऽवशिष्यते । वदन्त्येव हि वेदान्तास्त्वविरोधः कथं भवेत् ॥ ४ ॥
दृष्ट्वापि ते पदाम्भोजं भूयश्चेदपि संशयः । शरणं कं प्रयास्यामः कालक्लामहरं परम् ॥ ५ ॥
आसीत् कथं कथं दृश्यं कथं त्वय्येव लीयते । वदैतद्भगवन् येन छिन्नाः स्युः सर्वसंशयाः ॥ ६ ॥
इति संप्रार्थितः शम्भुस्तानाह शशिशेखरः । ज्ञानयोगं मुनिश्रेष्ठाः सविज्ञानं निबोधत ॥ ७ ॥
गोप्यं यत् स्थूलदृष्टीनां न विदुर्यं गुहाशयम् । निर्विकारे निराधारे निर्मले गगनाकृतौ ॥ ८ ॥
उत्पद्यन्ते विलीयन्ते जीवा वार्यूर्मयो यथा । आद्यन्तयोरसद्भावादवभासितमन्तरा ॥ ९ ॥
अधिष्ठानापरिज्ञानाद्भाति दृश्यं यथार्थवत् । भक्त्या जानन्ति परया मयि कर्मार्पणेन च ॥ १० ॥
केचिदेव जितश्वासा ह्यस्मिन् ब्रह्माण्डमण्डले । सविज्ञानमिदं ज्ञानं जायते मदनुग्रहात् ॥ ११ ॥
अनन्यत्कारणात्कार्यं पश्यतां निर्मले हृदि । विश्वं दृश्यं च मय्येव कश्चित्पश्यति योगतः ॥ १२ ॥
अध्यारोपेण सकलमपवादेन तल्लयः । यावदज्ञानमेतत्तन्नाशे सति विलीयते ॥ १३ ॥
अध्यारोपप्रकारं तदवधानान्निबोधत । आसमग्रेऽहमेवैको नो सदासीदसच्च न ॥ १४ ॥
पूर्णत्वात्स्वप्रकाशत्वान्महादेव इति श्रुतः । प्रकृतिर्गुणसाम्याख्या चोदिता मेऽवलोकनात् ॥ १५ ॥
असूत गुणवैषम्यरूपं तत्त्वं महच्च यत् । विजृम्भणं तु सत्त्वस्य साधिष्ठानानुबिम्बकम् ॥ १६ ॥
ईश्वरः कारणोपाधिः साक्ष्यव्याकृत ईरितः । विजृम्भणं यद्रजसः साधिष्ठानानुबिम्बकम् ॥ १७ ॥
तज्जीवतत्त्वं भोक्त्राख्यं नश्वरे यदहंमतिः । मदीक्षितस्य तमसो यदस्ति च विजृम्भणम् ॥ १८ ॥
साधिष्ठानानुबिम्बं तद्यथा दृश्यं तथोच्यते । त्रिगुणात्मकमाकाशं तस्मादासीन्मदीक्षितात् ॥ १९ ॥
तस्यासीत्सत्त्वतः श्रोत्रं रजसो वागथान्यतः । शब्दोऽभवत्ततो वायुर्नभस्त्रिगुणात्मकः ॥ २० ॥
त्वगासीत्सत्त्वतस्तस्य हस्तोऽभूद्रजसोऽन्यतः । स्पर्शस्तेजोऽभवद्वायोस्त्रिगुणात्मकमीक्षणम् ॥ २१ ॥
सत्त्वादस्याभवत्पादो रजसो रूपमन्यतः । अप्तत्वं तेजसश्चाभूत्तस्य सत्त्वादजायत ॥ २२ ॥
रसनं रजसः पायू रसश्च तमसोऽभवत् । त्रिगुणा पृथिवी तस्माद्घ्राणमस्यास्तु सत्त्वतः ॥ २३ ॥
उपस्थं रजसो जज्ञे गन्धस्तामस उच्यते । पञ्चानां सत्त्वसङ्घातादन्तःकरणमुच्यते ॥ २४ ॥
प्राणाः समष्टी रजसामासङ्गो विषयेषु यः । तमसां समुदायोऽसौ स्यादेवं शास्त्रनिर्णयः ॥ २५ ॥
मदीक्षणाच्च तान्यासन् द्विधा भूतानि भूसुराः । दशस्वभूवन् पञ्चाथो चतुर्धैकैकशः पुनः ॥ २६ ॥
अविभक्ताः परे भागाः पञ्चैवासन् यथापुरा । अष्टमांशं परित्यज्य स्वीयमन्यैः समन्वयात् ॥ २७ ॥
मिलितानि यदा तानि तदा पञ्चीकृतानि हि । समन्वितेष्वप्यन्यांशैः स्वाधिक्यान्नाम पूर्ववत् ॥ २८ ॥
तेषामेतैरभूद्दण्डं भूतग्रामश्चतुर्विधः । यथाकर्मानुसारेण पाकात्कालकृतादभूत् ॥ २९ ॥
भोगायतनमेतस्य जीवस्य सुखदुःखयोः । पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितम् ॥ ३० ॥
शरीरं स्थूलमित्याहुः कायोऽन्नमयसंज्ञितः । पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ॥ ३१ ॥

अपञ्चीकृतभूतोत्थं शरीरं सूक्ष्ममुच्यते । अनाद्यविद्यानिर्वाच्या शरीरं कारणं भवेत् ॥ ३२ ॥
जाग्रत्स्वप्नसुषुप्त्याख्यास्तिस्रोऽवस्थाः शरीरिणः । यस्यान्नमयचेष्टासु ममाहमिति धीर्भ्रमः ॥ ३३ ॥
तस्याभिमानिनः सन्ति त्रीणि नामानि योगतः । चिदाभासश्च विश्वश्च व्यावहारिक इत्यपि॥३३॥
कोशत्रयात्मकं नित्यं प्रविष्टो योऽभिमन्यते । भुञ्जानो मानसं भोज्यं तस्य नामान्यपि त्रिधा ॥३४॥
वैकारिकस्तैजसश्च तथैव स्वप्नकल्पितः । स्यात् पारमार्थिकः प्राज्ञो ह्यवच्छिन्नः सुषुप्तिगः ॥३५॥
नित्यं लिङ्गशरीरं तु नश्वरं स्थूलमुच्यते । अङ्कुरन्ति यथा वृक्षाः पत्राणि प्रतिवत्सरम् ॥ ३६ ॥
उत्पद्यन्ते तथा भोक्तुः स्थूलदेहाः स्वकर्मभिः । संसारे यावदज्ञानं भ्रममाणस्य देहिनः ॥ ३७ ॥
ध्वंसाय लिङ्गदेहस्य योगोऽयं संप्रकाश्यते ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे संसारोपवर्णनं नाम त्रिशततमोऽध्यायः ॥

चतुः

॥ अथ [त्रि]शततमोऽध्यायः ॥

श्रीशिवः ॥
बहूनि प्राप्य जन्मानि जन्तुरन्ते तु जन्मनाम् । यथा मां मत्प्रसादेन प्राप्नोत्येतन्निबोधत ॥ १ ॥
नानाविधेषु भूतेषु भ्रमतः कर्मभिर्निजैः । ब्राह्मणत्वं भवेद्दिष्ट्या जन्तोर्ब्रह्मत्वसाधनम् ॥ २ ॥
यथा कार्कटिकी रेखा पङ्के तारायते क्वचित् । तत्र दुस्सङ्गसन्त्यागात् संयोगात्सुलभात्सताम् ॥ ३ ॥
पुण्यतीर्थस्थलावासात् स्वधर्मपरिपालनात् । नित्यं मत्पूजया स्तुत्या मत्कथाश्रवणेन च ॥ ४ ॥
सेवया मम भक्तानां भूतेषु समदर्शनात् । दृष्टादृष्टेषु वैराग्यात् प्रतिबिद्धविवर्जनात् ॥ ५ ॥
गुरौ निर्व्याजया भक्त्या मौनेन गुणदोषयोः । अन्यैश्च नियमैर्युक्तस्त्यक्ताहंधीर्विनश्वरे ॥ ६ ॥
चिराच्चित्तपरीपाकात् सर्वं ब्रह्मेतिधीमतः । कार्यप्रपञ्चविलयो भवेन्मय्येव कारणे ॥ ७ ॥
पञ्चीकृतानां भूतानामपञ्चीकरणे कृते । स्वस्वांशस्वांशयोगेन यथा प्रोक्तेषु पञ्चसु ॥ ८ ॥
लीयते पृथिवीवारिकारणे तच्च तेजसि । वायौ स्वकारणे तेजः सोऽप्याकाशे स्वकारणे ॥ ९ ॥
गुणे तमस्यथमपि स्वाविद्याविलये सति । सर्वसंसारमूलं तन्मायाख्यातत्त्वमस्ति यत् ॥ १० ॥
मद्भक्त्यैव भवेन्मिथ्या योऽवशिष्टः स चास्म्यहम् । इति बन्धस्य मोक्षस्य प्रकारः कथितो मया ॥
एवं ध्यात्वा पुनर्जन्मशोकं तरति कश्चन । यदि चर्मवदाकाशं वेष्टयेयुरिमं नराः ॥ १२ ॥
तदैव मामविज्ञाय दुःखस्यान्तो भवेन्नृणाम् । ऋग्वेदादौ विनिर्दिष्टं तथाथर्वशिखाख्ये ॥ १३ ॥
यत्तदेकमहंज्योतिरिति वेदान्तनिर्णयः । एवं भावयतेत्युक्त्वा चिन्मुद्रां संप्रकाश्य च ॥ १४ ॥
पश्यतां सनकादीनां शंभुरन्तरधीयत । तस्यै दिशे नमस्कृत्य मुनयः पारमेश्वराः ॥ १५ ॥
तदङ्घ्रिसेवयापश्यन् पारं मिथ्यामहाम्बुधेः । इत्युक्त्वा शिवभक्तानामग्रणीः कुम्भसंभवः ॥ १६ ॥
तापसैः पूजितः सर्वैः स्वाश्रमं प्रत्यपद्यत । शिवभक्तेन्द्रमाहात्म्यमिदमाम्नायसम्मितम् ॥ १७ ॥

नाम्ना भक्तविलासाख्यं प्रथितं भुवनत्रये । पुराणं पावनं शंभोः श्रवणात् प्रीतिकारकम् ॥ १८ ॥
आलये वा महेशस्य पुण्ये वाथ नदीतटे । समाजे च द्विजेन्द्राणां पठितव्यं समाहितैः ॥ १९ ॥
धृतत्रिपुण्ड्ररुद्राक्षो गुरुं ध्यात्वा शिवं हृदि । वाञ्छन् प्रसादमीशस्य नियमात् प्रयतः पठेत् ॥ २० ॥
शिवभक्तं गुरुं विप्रमुपवेश्योन्नतासने । वाग्यतः प्रयतो भूत्वा तं नत्वा शृणुयादिदम् ॥ २१ ॥
चरित्रमेकमध्यायमेकं वाकर्ण्य भक्तिमान् । सर्वैः पापैः प्रमुच्येत प्रीतस्तस्य शिवो भवेत् ॥ २२ ॥
ब्राह्मणो ब्राह्मणाच्छ्रुत्वा शिवभक्तिपरायणः । यं यं कामयते काममाप्नुयादचिरेण तम् ॥ २३ ॥
नियमादिदमाकर्ण्य वन्ध्यापि लभते सुतम् । ब्रह्मचारी शुभां कन्यां भर्तारं कन्यकाप्नुयात् ॥ २४ ॥
क्षत्रियो ब्राह्मणाच्छ्रुत्वा विजयेताखिला दिशः । ऊरुजो ब्राह्मणाच्छ्रुत्वा पुराणमिदमुत्तमम् ॥ २५ ॥
द्वापीन्तरगतं वापि धनं स्वं पुनराप्नुयात् । आकर्ण्य ब्राह्मणाच्छूद्रः स्वकुलैः पूज्यतामियात् ॥
श्रुत्वा सङ्करजाताश्च मुच्यन्ते पापसञ्चयैः । निर्धनो धनमाप्नोति रोगी रोगाद्विमुच्यते ॥ २७ ॥
यशस्वी स्याद्यशस्कामो निष्कामो मोक्षमाप्नुयात् । नाध्वरैर्न तपोभिर्वा न व्रतैरपि दुष्करैः ॥ २८ ॥
तथा प्रीतिर्भवेच्छम्भोर्यथास्य श्रवणाद्भवेत् । सर्वमङ्गलदं नित्यं सर्वयज्ञफलप्रदम् ॥ २९ ॥
सर्वतीर्थावगाहस्य सर्वलिङ्गार्चनस्य च । यत्फलं तदवाप्नोति सकृच्छ्रवणमात्रतः ॥ ३० ॥
श्रुत्वा त्रिषष्टिभक्तानां चरितानि सदाशिवम् । ध्यायतो हृदयाम्भोजे नास्ति कालभयं क्वचित् ॥
कलौ युगे विशेषेण पुराणं भक्तिसाधनम् । श्रोतव्यमिदमेवात्र मा विचारोऽस्तु भो द्विजाः ॥
इत्युक्त्वा मुनिशार्दूलः सूतः पौराणिकोत्तमः । पूजितो मुनिभिः सर्वैः स्वेच्छया पर्यटन् महीम् ॥

॥ इति श्रीस्कान्दोपपुराणे शिवभक्तविलासे सनकादिमहर्षिभ्यो
मुक्तिमार्गोपदेशो नाम चतुस्त्रिंशततमोऽयायः ॥

॥ श्रीमदुपमन्युप्रोक्तशिवभक्तविलासः सपूर्णः ॥

श्रीः

देवता प्रार्थना (मङ्गलम्)

१ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ॥
प्रसन्नवदनं ध्याये त्सर्व विघ्नोपशान्तये ॥ १ ॥

२ गुरुर्ब्रह्मा गुरुर्विष्णु र्गुरुरेव महेश्वरः ॥
गुरुरेव परं ब्रह्म तस्मै श्री गुरवे नमः ॥ २ ॥

३ वन्दे दन्तिमुखं दिगन्तकलभत्रातप्रभूताहव-
क्रीडाकंपितकर्णतालयुगलीझञ्झानिलाहूतरैः ॥
दिक्षु भ्रान्तदिगन्तभूसुरपतिं श्रीपार्वतीनन्दनं
लीलाक्लृप्तशिवत्वयार्पितमहं ह्यावर्तपुर्यालयं ॥ 3 ॥

४ आवर्तस्थलमध्यस्थ मादिमध्यान्तवर्जितं ॥
नमाम्यमरसंसेव्यं तिरुमलपुरनायकं ॥ ४ ॥

५ ज्ञानशक्त्यात्मकं देव मज्ञानविषनाशनं ॥
गोपुरद्वारनिलयं गुरुदेवं समाश्रये ॥ ५ ॥

६ भूमिदेव्यार्चितं लिंगं भूसुरैरभिसेवितं ॥
पुन्नागकाननावासं भूमिनाथमहं भजे ॥ ६ ॥

७ पुन्नागारण्यनिलयं पुण्यांबापतिमीश्वरं ॥
भूमिदेव्याऽर्चितं देवं भूमीश्वरमहं भजे ॥ ७ ॥

८ पीनस्तनभरां देवीं भुवनेशमनोहरां ॥
वीणाशुकधरां वन्दे तिरुमलपुरनायिकां ॥ ८ ॥

९ वन्दे तिरुमलनगरीं वन्दे शैलोदितं सरः ॥
वन्देसहायवल्लीं च वन्देश्रीतनुनायकं ॥ ९ ॥

१० सहायवल्लीसहितं सुरेशं
सहायदात्यामिततर्पयुक्तं ॥
सर्वस्य लोकस्यसहायभूतं
सदाऽहमेनं शिरसा नमामि ॥ 10 ॥

11. श्रीभूमिपुन्नागवनेनिवासं
श्रीभूमिदेव्यानतपादपद्मं ॥
श्रीभूमितीर्थस्य तटेनिवासं
श्रीभूमिनाथं शिरसानमामि ॥ 1 ॥ हारणं प्रपद्ये ॥

12. राकंपादमुदस्यकिञ्चिदपरं विन्यस्य भूमीतले
व्यत्यासेन भुजान्प्रसार्य डमरुं व्यावर्तयन्पाणिना ॥
अंबावक्त्रसरोरुहेक्षणवशादानन्दमन्दस्मितो
हैमे संसदि ताण्डवं प्रकटयन्सद्यो नटःपातुनः ॥ 2 ॥

सहायवल्लीस्तुतिः

अनार्दितानां भवताऽसहायः
सहायवल्ली करुणाकटाक्षः ।
यत्पादपूतेरमणो महर्षिः
परं लुलोके भगवान्गुरुर्नः ॥

— काव्यकण्ठगणपति मुनिः

॥हरिः ॐ॥
॥श्रीशिवाभ्यां नमः॥

॥ त्रिशूलपुरमाहात्म्ये प्रथमोऽध्यायः ॥ क्षेत्रमहिमानु-वर्णनम् ॥

ध्यात्वा देवमुमानाथं देवदेवं जगद्गुरुं ॥
पप्रच्छुस्सूतनयं मुनयश्शौनकादयः ॥१॥

मुनयः:—
सूताऽस्मिन्भारते पुण्ये पुण्यक्षेत्रमनुत्तमं ॥
शैवं शुभकरं सद्यः सर्वपापनिकृन्तनं ॥२॥
वदाऽधुना महाभाग विविधाभीष्टदायकं ॥
यत्राऽस्ते गिरिजानाथस्सदा सुरगणार्चितः ॥३॥
कृतानियतकर्माणि सफलानि भवन्ति च ॥
इत्युक्तस्समुनिश्रेष्ठैस्सूतस्संसदि पूजितः ॥४॥
प्रोवाच मुनिशार्दूलानिदं वचनमादरात् ॥

सूतः:—
साधु साधु द्विजश्रेष्ठास्सत्सङ्गस्समीरितः ॥५॥
भवद्भिस्सर्वजन्तूनां श्रेयसे जगतीतले ॥
सर्वे भवन्तस्सर्वज्ञा स्सकलागमपारगाः ॥६॥
तथापि बहुमन्तुर्मां मुनयः! परिपृच्छथ ॥
तस्माद्वक्ष्याम्यहं क्षेत्रं पुण्यं पापप्रणाशनं ॥७॥
अस्मिन्वै भारते देशे शैवक्षेत्राभिमण्डिते ॥
इत्युक्त्वा मुनिशार्दूलान्सर्वानेवकृताञ्जलिः ॥८॥
नत्वा जगद्गुरुं व्यासं पाराशर्यं परात्परं ॥
ध्यात्वा हृदिमहादेवं त्रिणेत्रं चन्द्रशेखरं ॥९॥
पार्वतीवल्लभं शांभुं भक्ताभीष्टप्रदायकं ॥
मुक्तिमुक्तिप्रदं शान्तं भगवन्तं सदाशिवं ॥१०॥
कैलासशृंगनिलयं कामारिं कालनाशनं ॥
तद्ध्यानारूढचित्तस्सन्पुलकाञ्चितविग्रहः ॥११॥
उवाच तान्मुनीन्सूतस्सानन्दजललोचनः ॥

श्रीसूतः —
शृणुध्वं मुनयस्सर्वे नैमिशारण्यवासिनः॥१२॥
वक्ष्यामि क्षेत्रमतुलं श्रवणात्सर्वपापहृं॥
रहस्यं सर्वलोकेषु पावनं पुण्यदायकं॥१३॥
यत्पुन्नागवनं नाम क्षेत्रं लोकेषु विश्रुतं॥
यदावर्तस्थलंचेति प्रथितं भुवनत्रये॥१४॥
लिङ्गमूलमित्यन्ये यद्वदन्ति मनीषिणः॥
भुवनेश्वरमित्यन्ये कालीभरमथापरे॥१५॥
यद्वदन्तिमहाक्षेत्रं बहुधा तत्त्वदर्शिनः॥
पाण्ड्यदेशे मुनिवराः! दक्षिणे मधुरापुरात्॥१६॥
योजनत्रयमात्रेण क्षेत्रमस्ति महत्तरं॥
यत्राऽऽस्ते पार्वतीनाथस्सर्वसिद्धिसमाश्रयः॥१७॥
लिंगरूपी महादेवस्सांबस्सर्वजगन्मयः॥
तत्क्षेत्रसदृशं लोके न भूतं नभविष्यति॥१८॥
महापापप्रशमनं महामंगलदायकं॥
सर्वदुःखार्तिसंहारकारणं सेवितं सुरैः॥१९॥
यत्तप्तं तपईशीघ्रं फलतीशप्रसादतः॥
यद्वदानं जपो होमः पूजा यज्ञादिकाः क्रियाः॥२०॥
फलन्तिबहुधा विप्राः! नात्र कार्या विचारणा॥
कौण्डिन्यारण्या नदीतत्र पृथक्सागरगामिनी॥२१॥
प्रवहत्युत्तरे देशे प्रसन्नसलिला शुभा॥
सैवलिंगस्य पुरत स्थितादक्षिणगामिनी॥२२॥
हंससारससंकीर्णा कुमुदोत्पलमण्डिता॥
चक्रवाकानुचरिता शतपत्रविराजिता॥२३॥
चूतचंपकपुन्नाग नालिकेरोपशोभिता॥
कोविदाराम्रकक्रुभ तमालवनशोभिता॥२४॥
वटजंबीरपनस जंबूप्लक्षवनाकुला॥
तन्नद्या दक्षिणे देशे पुण्ये पुन्नागमण्डिते॥२५॥

वर्तते परमं क्षेत्रं श्रीमदावर्तसंज्ञितं ॥
तत्रास्ति लिंगमतुलं भूमिनाथाह्वयं महत् ॥ २५ ॥
स्वयंभूतं शुभाकारं सच्चिदानन्दलक्षणं ॥
आधारं सर्वलिंगानामादिमध्यान्तवर्जितं ॥ २६ ॥
पुराणमजरं नित्यमखिलागमसंस्तुतं ॥
निर्गुणं निर्मलाकारं निर्द्वंद्वं तन्निरीश्वरं ॥ २८ ॥
चतुर्युगेषु भगवान्सदेवेशः कृतादिषु ॥
नामभेदैर्नगौरीशः कीर्त्यते मुनिपुंगवैः ॥ २९ ॥
कृते प्रलयरुद्राख्यस्सदेवः परिकीर्तितः ॥
भूमिनाथइतिख्यातस्त्रेतायां जगदीश्वरः ॥ ३० ॥
कल्याणसुन्दरोनाम्ना द्वापरे कीर्तितोबुधैः ॥
कलौ श्रीतनुनाथाख्यः कन्दर्पायुतसुन्दरः ॥ ३१ ॥
माणिक्यमालेतिकृते देवीतस्याभिविश्रुता ॥
मुक्तामालेति विख्याता त्रैतेतायुगेऽभवत् ॥ ३२ ॥
द्वापरेस्वर्णमालेति पुष्पमाला कलौ युगे ॥
एवंतिष्ठति देवेशस्तत्रलिङ्गाकृतिर्विभुः ॥ ३३ ॥
तन्नादीलिंगयोर्मध्ये क्षेत्रं काशीसमं स्मृतं ॥
मृतायत्र विमुच्यन्ते नराः पापमृता अपि ॥ ३४ ॥
तत्र यद्यत्कृतं कर्म नरैर्यज्ञादिकाः क्रियाः ॥
तदन्यत्रकृता द्भूमौ सहस्रगुणितं भवेत् ॥ ३५ ॥
तत्र देवं सकृन्नत्वा भूमिनाथंमहेश्वरं ॥
नरः पापविनिर्मुक्तः प्रयाति शिवमन्दिरं ॥ ३६ ॥
पुन्नागकानने मर्त्यस्संपूज्यभुवनेश्वरं ॥
पापौघविनिवृत्तात्मा याति शङ्करमन्दिरं ॥ ३८ ॥
सेवते प्रातरुत्थाय यस्तिशूलपुरेश्वरं ॥
सोऽश्वमेधफलं प्राप्य व्रजेत्कैलासपर्वतं ॥ ३८ ॥

मध्याह्ने श्रीमदावर्त पुरेशं भजते नरः॥
स राजसूययज्ञस्य फलमाप्नोति निश्चितं ॥३९॥
सायाह्ने सेवते यस्तु भक्त्या तं भुवनेश्वरं॥
*जीवन्मुक्तस्स विज्ञेयस्सर्वदा मुनिपुंगवाः॥४०॥
क्षीराभिषेकं कुरुते यस्तिशूलपुरे शिवं॥
स सर्वभोगभाक् भूमावन्ते शिवपुरं व्रजेत्॥४१॥
घृताभिषेकं यः कुर्यात्तु नागवननवासिनः॥
स साम्राज्यमवाप्नोति देवदेव प्रसादतः॥४२॥
नालिकेरोदकैरिक्षुभिर्योभिषेचयते शिवं॥
श्रीमदावर्तनगरी नायकं शिवमेष्यति ॥४३॥
अभिषिच्य जलैरिक्षुभिर्दिव्यैर्गन्धाधिवासितैः॥
प्रयाति परमं स्थानं पावनं गिरिजापतेः॥४४॥
यः पूजयति देवेशं कमलैः कामशासनं॥
स कल्याणमवाप्नोति प्रसादादंबिकापतेः॥४५॥
नीलोत्पलैः पूजयित्वा *नीलकन्धरमव्ययं॥
पुन्नागकाननाधीशं सर्वान्कामानवाप्नुयात्॥४६॥
जाती-चंपकपुन्नागैस्त्रिशूलपुरनायकं॥
पूजयित्वा समाप्नोति पुरुषार्थचतुष्टयं॥४७॥
बिल्वपत्रैस्सुराधीशं पूजयेत्त्रिपुरान्तकं॥
ससायुज्यमवाप्नोति पुनरावृत्तिवर्जितं॥४८॥
धूपदीपादिनैवेद्यैस्सन्तोष्य गिरिजापतिं॥
प्रयाति शिवसायुज्यं योगिनामपि दुर्लभं॥४९॥
भेरीमृदंगपणव वाद्यघोषैस्सदाशिवं॥
सन्तोष्य पार्वतीनाथं नपुनस्तनुमान्भवेत्॥५०॥
नतल्लिंगसमं लिंगं नतक्षेत्रसमं स्थलं॥
विद्यते भुवि विप्रेन्द्राः! सत्यमुक्तमिदं मया॥५१॥

तस्मात्सर्वप्रयत्नेन पूजनीयस्सदाशिवः॥
तिशूलनगरीनाथो नरैर्नरकभीरुभिः॥५२॥
क्रोशद्वयं तत्परितः क्षेत्रं पापप्रणाशनं॥
यस्मिन्क्षिवसतां नृणां विनश्यत्यघसञ्चयः॥५३॥
अथक्षेत्रस्य वक्ष्यामि प्रमाणं मुनिपुङ्गवाः॥
प्राच्यां मानमभूत्तत्र कण्वतीर्थमितिश्रुतं॥५४॥
यत्र कण्वेश्वरं लिंगं [redacted] वर्तते रोधसि द्विजाः!॥
दक्षिणे मानमभवत्कोविदारवनं द्विजाः!॥५५॥
कोविदारेश्वरं तत्र वर्तते लिंगमुत्तमं॥
पश्चिमे पन्नगगिरिः प्रमाणमभवत्तथा॥५६॥
उत्तरे गालवसरः कीर्तितं लोकविश्रुतं॥
यत्तीरे गालवेशारण्यं लिंगमस्त्यखिलार्थदं॥५७॥
इतितत्क्षेत्रमाहात्म्यं संक्षेपात्कथितं मया॥
यच्छ्रुत्वा पापसंघेभ्योमुच्यन्ते मानवा भुवि॥५८॥
यइदंशृणुयान्नित्यं कीर्तयेद्वा समाहितः॥
स पापसंघनिर्मुक्तः प्रयातिशिवमन्दिरं॥५९॥

यत्क्षेत्रमाहात्म्यमिदं सुपुण्यं
संश्रावयेत द्विजमुख्यवर्णात्।
स पापसंघाद्विनिवृत्तचित्तः
प्रयाति कैलासपदं मनुष्यः॥६०॥

इति स्कान्दे महापुराणे तिशूलपुरमाहात्म्ये
क्षेत्रमहिमानुवर्णनं नाम प्रथमोऽध्यायः॥१॥

श्री

॥ त्रिशूलपुरमाहात्म्ये

द्वितीयोऽध्यायः॥

॥क्षेत्रमहिमानुवर्णनं॥

इतिसूतवचःश्रुत्वा सर्वेते परमर्षयः॥
ज्ञात्वा तत्क्षेत्रमाहात्म्यं सन्तोषोत्फुल्ललोचनाः॥१॥
स्तुत्वासूतंमहाभागं व्यासशिष्यंजितेन्द्रियं॥
पुनः प्रोचुरिदंवाक्यं आनन्दाब्धिमध्यगाः॥२॥
ऋषयः—
पुन्नागवनमाहात्म्यं सूताऽस्माभिरिहश्रुतं॥
विचित्रंमहदाश्चर्यं विविधाभीष्टदायकं॥३॥
च्युतं तन्मुखवांभोजात्कथामृतमनुत्तमं॥
पिबतामधुनाऽस्माकं तृप्तिर्नैवोपजायते॥४॥
भूयःकथयतत्क्षेत्रमहिमानंमहाद्भुतं॥
तत्क्षेत्रवासिनांनृणां किं पुण्यं वद सूतज!॥५॥
कियत्प्रमाणं तत्क्षेत्रं चतुर्दिक्षुमहामते!॥
विदिक्ष्वपिमहातेजः! कानिचिह्नानिसन्तिच॥६॥
तत्सर्वं विस्तरेण कृपया सूतनन्दन!॥
इतितेषां वचःश्रुत्वा नैमिशारण्यवासिनां॥७॥
सूतः प्रहृष्टवदनःप्रोवाच मधुराक्षरं॥
श्रीसूतः—
शृण्वन्तु मुनयस्सर्वे नैमिशारण्यवासिनः॥८॥
अथतत्क्षेत्रमुख्यस्य परिमाणं वदाम्यहं॥
प्राच्यमानमभूत्तत्र कण्वतीर्थमितिश्रुतं॥९॥
यस्य कण्वेश्वरं लिंगं तीरे तिष्ठतिपावनं॥
आग्नेय्यामभवल्लिंगं काम्येश्वरमितिश्रुतं॥१०॥
यस्यदर्शनमात्रेण कामासिद्ध्यन्तिसर्वदा॥
दक्षिणेमानमभवत्कृतान्तेश्वरसंज्ञितं॥११॥

यस्यदर्शनमात्रेण कृतान्तं नैवपश्यति॥ ॥
नैऋत्यां नैऋतं लिंगं प्रमाणंपरिकीर्तितं॥१२॥
यस्यदर्शनमात्रेण रक्षोबाधा विनश्यति॥
पश्चिमेपन्नागगिरिः प्रमाणमभवत्तथा॥१३॥
यतोचलेश्वरं दृष्ट्वा तिष्ठत्यमरपूजितः॥
वायव्ये मारुतेशारव्यं सर्वमघविनाशनं॥१४॥
प्रमाणंक्षेत्रमुख्यस्य सर्वकामफलप्रदं॥
उत्तरे गालवसरः कीर्तितं लोकविश्रुतं॥१५॥
यत्तीरे गालवेशारव्यं लिंगमस्त्यखिलार्थदं॥
ऐशान्यां लिंगमप्रमेयं सोमेश्वरसंज्ञितं॥१६॥
यस्यदर्शनमात्रेण नपुनर्जायते नरः॥
एवं पूर्वादि दिक्ष्वष्ट लिंगानिनिवसन्तिहि॥१७॥
तन्मध्येवसतां क्षेत्रे नराणां पापसञ्चयाः॥
विविधाः मुनिशार्दूला! विनश्यन्तिनसंशयः॥१८॥
कृमिकीटपतंगाद्या स्तृणगुल्मलतादयः॥
मुच्यन्ते तत्तनेसर्वे पशुपन्नगरूपिणः॥१९॥
तन्मध्येवसतांक्षेत्रे नराणांपुण्यशालिनां॥
अचिराद्विनशिष्यन्ति महापातकसंचयाः॥२०॥
तस्मात्तत्र प्रयत्नेन वस्तव्यं पापभीरुभिः॥
पूजनीयस्सदादेवः प्रकामंभुवनेश्वरः॥२१॥
तत्क्षेत्रसदृशंक्षेत्रं नास्तिलोकत्रयेऽपिना॥
यत्तीर्थानि विद्यन्ते वन पापहराणिच॥२२॥
प्रथमं ऋत्वतीर्थारव्यं द्वितीयं पापहारिणी॥
तृतीयं कण्वतीर्थारव्यं सर्वपापविनाशनं॥२३॥
चतुर्थं गालवसरः कीर्तितं मुनिपुंगवाः!॥
पञ्चमं कोटितीर्थारव्यं अग्नितीर्थमतःपरं॥२४॥
ज्ञानदा सर्वजन्तूनां सम्यग्मृतवापिका॥
अष्टमं ब्रह्मतीर्थारव्यं सर्वपापप्रणाशनं॥२५॥
यतिलोचनतीर्थारव्यं नवमं तत्प्रकीर्तितं॥

12 रातेषु पुण्यतीर्थेषु स्नात्वायस्सेवते शिवं ॥ २६ ॥
तिरुवत्तनगरीनाथं सकृतार्थो नसंशयः ॥
तस्मिन्धर्मास्सदादेवं भूमिनाथ मुपासते ॥ २७ ॥
चतुर्युगेषु देवेशं कृतात्क्षुनचाकृतिः ॥
कृते पुन्नागरूपेण तिष्ठन्दक्षिणदेशतः ॥ २८ ॥
ध्यायन्प्रलयरुद्राख्यं उपास्तेस उमापतिं ॥
त्रेतायां चूतरूपेण पश्चिमे निवसन्नृषः ॥ २९ ॥
सेवते भूमिनाथाख्यं मंबिकापतिमीश्वरं ॥
द्वापरे बिल्वरूपेण धर्मस्तिष्ठतिचोत्तरे ॥ ३० ॥
कल्याणसुन्दरं देवं सेवमानो वृषध्वजं ॥
कलौयुगे पूर्वदेशेतिष्ठत्यश्वत्थरूपधृक् ॥ ३१ ॥
श्रीमन्मानवनाथाख्यं सेवमानस्सदावृषः ॥
कृते पुन्नागवृक्षस्य मूले काश्यपभार्गवौ ॥ ३२ ॥
तपस्तप्त्वा महाघोरं प्रापतुस्सिद्धिमुत्तमां ॥
त्रेतायां चूतमूलेतु भारद्वाजपराशरौ ॥ ३३ ॥
तपस्तप्त्वा महादेव कृपयासिद्धिमीयतुः ॥
द्वापरे बिल्ववृक्षस्य मूले कौशिकदेवलौ ॥ ३४ ॥
कृत्वा तपश्शाङ्करस्य प्रसादान्मुक्तिमाययौ ॥
कलावश्वत्थवृक्षस्य मूले गौतमनन्दिनौ ॥ ३५ ॥
तपः कृत्वा बहुविधं शंभावमुपागतौ ॥
भद्राश्वत्थइतिख्यातः कलौकलुषनाशनः ॥ ३६ ॥
तपस्तप्तं प्रकुर्वन्ति ये भद्राश्वत्थमूलके ॥
अचिरेणैव कालेन प्राप्नुवन्ति तपःफलं ॥ ३७ ॥
बहवस्तत्र मुनय स्तपसा परमेश्वरं ॥
तोषयन्त स्तपस्सिद्धिमवापुर्मुनिपुंगवाः ॥ ३८ ॥
नतन्मूलसमं लोके तपस्सिद्धिकरंस्थलं ॥
विद्यते तापसश्रेष्ठाः सर्वपापनिवारणं ॥ ३९ ॥

ऋषयः—

कथं तत्र तपस्सिद्धिं प्राप्तौ गौतमनन्दिनौ ॥

भद्राश्वत्थतरोर्मूले ब्रूहि नस्सूतनन्दन!॥४०॥
मुनीनां वचनं श्रुत्वा सूतः प्रोवाच हृष्टधीः॥
श्रीसूतः—
पुरा गौतमनामाऽभून्मुनिर्योगपरायणः॥४१॥
सर्वज्ञस्सर्वदर्शी च सर्वभूतहितेरतः॥
शिवभक्तस्सत्यवादी शिवपूजापरायणः॥४२॥
वेदशास्त्रार्थतत्वज्ञस्स्थिरधीर्ज्ञानसागरः॥
मुमुक्षुस्सकदाचिच्च सनकेन प्रचोदितः॥४३॥
आवर्तक्षौतमगमत्पुण्यं मुक्तिप्रदं नृणां॥
तदासाद्य स्थलं रम्यं भद्राश्वत्थसमीपगः॥४४॥
तपश्चकार सुमहद्ध्यायन्हृदि सदाशिवं॥
ग्रीष्मे पञ्चाग्निमध्यस्थश्शिशिरे सलिलाशयः॥४५॥
वर्षास्वाकाशगोभूत्वा निराहारोमहातपाः॥
कृच्छ्रातिकृच्छ्रपाराकतप्तचान्द्रायणादिभिः॥४६॥
दिव्यवर्षाण्यनेकानि तताप परमं तपः॥
अथ देवः प्रसन्नात्मा तपसा गौतमस्य ह॥४७॥
प्रादुर्बभूव पुरतस्तस्य देव्या सह प्रभुः॥
तमालोक्य महादेवं भगवन्तं पुरस्थितं॥४८॥
प्रणिपत्य प्रसन्नात्मा बद्धाञ्जलिपुटस्स्वयं॥
तमाह भगवानीशः प्रहृष्टवदनं मुनिं॥४९॥
श्रीभगवान्:—
तपसा तव तुष्टोस्मि नितरां महा गौतम!॥
वरं वृणीष्व भद्रं ते वरदोऽहमुपागतः॥५०॥
श्रुत्वेति शांभवीं वाचं प्रहृष्टः प्राह गौतमः॥
गौतमः—
यदि तुष्टोसि मे देव! तपसा परमेश्वर!॥५१॥
देहि मे परमां मुक्तिं साधूनां त्वं हि मुक्तिदः॥
गौतमस्य वचश्श्रुत्वा पुन्नागनिपिनेश्वरः॥५२॥
भूयस्तमाह प्रोवाच गौतमं वृषभध्वजः॥

श्रीभगवान्:— ॥ २ ॥
तथास्तु तव निर्द्वेन्द्र! मुक्तिं दास्यामि पुष्कलां॥ ५३॥
किन्तुश्वेतवराहान्ते कल्पेत्वं मुक्तिमेष्यसि॥
अद्वैतज्ञानममलं मत्प्रसादान्महामुने!॥ ५४॥
भविष्यति महाभाग! सर्वकर्मनिकृन्तनं॥
इति शंभुवचश्श्रुत्वा गौतमः प्राहशंकरं॥ ५५॥
गौतमः—
पुराचिदंबरक्षेत्रे मण्डपेहेमनिर्मिते॥
आनन्दताण्डवंदिव्यं व्याघ्रपादादिमान्प्रति॥ ५६॥
दर्शितं भवतादेव! कथंतन्मे न दर्शितं॥
आनन्दताण्डवंतन्मे दयया दर्शयप्रभो॥ ५७॥
यत्पश्यन्निहदेवेश! मुक्त्यानन्दंसमाप्नुयां॥
कल्याणसुन्दरंरूपं तवयत्स्तुमनोहरं॥ ५८॥
तन्मेदर्शयमेदेव! ब्रह्मानन्दप्रदायकं॥
इतितस्यवचश्श्रुत्वा देवश्चन्द्रार्धशेखरः॥ ५९॥
प्रत्युवाचशुभांवाणीं प्रहसन्गौतमंमुनिं॥
श्रीभगवान्:—
तथास्तु ताण्डवंतेऽद्य प्रमोदादुर्दर्शयाम्यहं॥ ६०॥
कल्याणसुन्दरंरूपमपितेदर्शयाम्यहं॥
इत्युक्त्वा गिरिजानाथो गौतमायमहात्मने॥ ६१॥
आनन्दताण्डवंदिव्यं दर्शयामास शोभनं॥
दर्शितं यत्पुराव्याघ्रपादादीन्तापसान्प्रति॥ ६२॥
कल्याणसुन्दरंरूपमपिदर्शयतिस्मसः॥
तद्दृष्ट्वा गौतमोहृष्टस्तुष्टाव जगदीश्वरं॥ ६३॥
इतिदत्वा गौतमाय वरमावर्तनायकः॥
सहदेव्या गणाध्यक्षैरन्तर्धानमवापह॥ ६४॥
गौतमोपीश्वरवचःश्रुत्वा हृष्टमनास्तदा॥
ततौबास्ते तपःकुर्वन्पश्यंस्ताण्डवमुत्तमं॥ ६५॥
इतिवःकथितं सर्वं यद्गौतमविचेष्टितं॥
एतच्छ्रुत्वानरस्सद्यः पापसंघाद्विमुच्यते॥ ६६॥

अधुना संप्रवक्ष्यामि नन्दिनश्चरितं शुभं॥ ६५॥
पुराशिलादतनयः काले नाष्टमवत्सरे॥ ६६॥
कण्ठार्पितमहापाशरसंस्मरन्सततं शिवं॥
शरण्यं सर्वलोकानां कालकालं जगद्गुरुं॥ ६७॥
स्मृतस्तेनार्भकेणाऽशु पशुपाशविमोचकः॥
स्ववत्समिवगौरीशस्तंपातुमभितोऽर्भकं॥ ६९॥
आगत्यकालपाशेनपाशितंबालमीशिता॥
विमोचयित्वासहसा तंस्ववाहनमातनोत्॥ ७०॥
कृपयादेवदेवस्य नन्दी शङ्करवल्लभः॥
वृषभं रूपमास्थाय तमुवाह त्रिलोचनं॥ ७१॥
नानुमेनेऽथतंदेवी नन्दिनं नगसंभवा॥
आरोढुं वृषभाकार मतिचिन्तनपुर्मुतं॥ ७२॥
अथचिन्तावृतोनन्दी पार्वतीप्रियकारणात्॥
विचिन्त्यमनसादेवी प्रसन्नामेकथंभवेत्॥ ७३॥
कथंप्रसादं भवितसा कोति गिरिसंभवा॥
इतिनिश्चित्यमनसा देवस्थानमनुत्तमं॥ ७४॥
आवर्तक्षेत्रमगमत्तपः कर्तुं शिवाज्ञया॥
देवीपीठेषु सर्वेषु विशिष्टं परमाद्भुतं॥ ७५॥
तपसिसिद्धिकरं सम्यक्सकलाभीष्टदायकं॥
भद्राश्वत्थतरोर्मूले ध्यायन्माणिक्यमालिकां॥ ७६॥
देवीं प्रसन्नवदनामभीष्टवरदायिनीं॥
चचारसुमहत्तप्तं तपस्सवृषपुंगवः॥ ७७॥
निधिना सुप्रसन्नात्मा देवीपूजापरायणः॥
अचिरेणैव कालेन तुष्टा तत्तपसांऽबिका॥ ७८॥
सहदेवैर्नवरदा समागच्छत्तदग्रतः॥
तामुद्वीक्ष्याद्रितनयां जगन्मातरमंबिकां॥ ७९॥
आनन्दमग्नां विलसद्भ्रमिल्लोज्ज्वलमस्तकां॥
मुक्ताललामसंयुक्त ललाटवरशोभितां॥ ८०॥
द्विरेफनिकरप्रख्य चिकुरालंकृताननां॥
शातकुंभनिभाकारां शरदिन्दुनिभाननां॥ ८१॥

16 स्फुरन्मणिविचरवचितचञ्चत्काञ्चनकुण्डलां॥
मुक्ताहारलसत्कंबुकन्धरां मन्दहासिनीं ॥८२॥
लसत्काञ्चनकेयूरविराजितभुजद्वयां॥
मणिविद्रुमसन्नद्धकरकंकणशोभितां॥८३॥
वनमालालसच्चारुपीनोन्नतपयोधरां॥
कृशमध्यां पृथुश्रोणीं रशनादामभूषितां॥८४॥
सुवर्णकदलीकाण्डसन्निभोरुविराजितां॥
कुरुविन्दमणिप्रोतमञ्जीरचरणोज्ज्वलां॥८५॥
बालां भक्तजनाधीनमानसां मन्दगामिनीं॥
कुंकुमागरुकस्तूरीदिव्यचन्दनरूषितां॥८६॥
नमस्कृत्वा तदा नन्दी भक्त्या परमयायुतः॥
अभितुष्टाव तां देवीं स्तुत्वा देवं महेश्वरीं॥८७॥

नन्दी:—

नमस्ते देवि! लोकानां शरण्ये! शंकरप्रिये॥
पाहिमां कृपयादेवि! त्रिशूलनगरेश्वरि!॥८८॥
नमस्ते चन्द्रशकलविराजितशिरोरुहे!॥
पाहिमां कृपयादेवि! त्रिशूलनगरेश्वरि!॥८९॥
नमस्तेलोकजननि! नमस्तेपुरसुन्दरि!॥
पाहिमां कृपया देवि! त्रिशूलनगरेश्वरि!॥९०॥
नमः कुमारजननि नमः कुवलयेक्षणे!॥
पाहिमां कृपया देवि! त्रिशूलनगरेश्वरि!॥९१॥
नमः कामारिदेहार्धभूषणे! भुवनेश्वरि!॥
पाहिमां कृपयादेवि! त्रिशूलनगरेश्वरि॥९२॥
नमोमेनामनोनन्दकारिण्यखिलपावनि!॥
पाहिमां कृपया देवि! त्रिशूलनगरेश्वरि!॥९३॥
नमः कैलासनिलये! नमः कैवल्यदायिके!॥
पाहिमां कृपयादेवि! त्रिशूलनगरेश्वरि!॥९४॥
नमः परमकल्याणि! नमः पद्मायतेक्षणे!॥
पाहिमां कृपया देवि! त्रिशूलनगरेश्वरि॥९५॥

इतिस्तुतातदादेवी नन्दिनाहृष्टमानसा ॥
आविर्भूयपुरस्तस्य नन्दिनंप्राहशंकरी ॥९६॥
देवी :—
परितुष्टास्मि ते नन्दिन् ! तपसाद्भुष्करेणच ॥
वरंवरय भद्रंते दास्यामिवरमीप्सितं ॥९७॥
इतिदेव्यावचः श्रुत्वा नन्दी सन्तुष्टमानसः ॥
कृताञ्जलिपुटोभूत्वा प्रणम्येदमुवाचह ॥९८॥
नन्दी :—
यदितुष्टासिगिरिजे ! मातर्मत्तपसाऽधुना ॥
वाहनं ते भविष्यामि स्वीकुरुष्वाद्य मां शिवे ! ॥९९॥
इतितस्यवचः श्रुत्वा देवीतुष्टाजगादतं ॥
तथास्तु प्रार्थितंतेदं वाहनार्थंगणेश्वर ! ॥१००॥
स्वीकरोमि मुदाहंत्वां मास्तुतेमनसोव्यथा ॥
इतिदत्वा वरं देवी सातस्मैनन्दिनेशिवा ॥१०१॥
अथतं वाहनं कृत्वा सहदेवेनशंभुना ॥
अन्तर्धानंययौ तत्र पूज्यमानःसुरर्षिभिः ॥१०२॥
इत्थंतेनपुरातप्तं नन्दिनाऽश्वत्थमूलके ॥
तत्सर्वाणिभद्राणि तपसायद्वेब्रह्मणा ॥१०३॥
भद्राश्वत्थइतिख्यातिं गतस्सचकलौयुगे ॥
तस्यदर्शनमात्रेण पापसंघो विनश्यति ॥१०४॥
तन्मूले जपहोमादिकर्माणि निविधानिच ॥
सिद्ध्यन्त्यचिरकालेन तच्छ्रेष्ठं हितपस्स्थलं ॥१०५॥
तन्मूलेस्तिनिलंघोरं गंभीरं शूलनिर्मितं ॥
येनप्रलयपानीयं शोषयित्वा महेश्वरः ॥१०६॥
अपालयदमेयात्मा पाण्डवाभूपंनृहद्बलं ॥
एवं तत्प्रोतईशानः कृपयापरमेश्वरः ॥१०७॥
दक्षिणादिषुदेशेषु कृत्वाऽऽवर्तनिलंन्यसौ ॥
युगसन्धिषुसर्वेषु कृतादिष्वभिरक्षति ॥१०८॥
इतिवः कथितंसर्वं पापघ्नं परमाद्भुतं ॥

18 लिङ्गलपुरमाहात्म्यं श्रवणादखिलार्थदं ॥१०९॥
यइदं शृणुयान्नित्यं कीर्तयेद्वासमाहितः॥
सपापसंघनिर्मुक्तः प्रयाति शिवमन्दिरं॥११०॥

ग: सुक्षेत्रमाहात्म्यमिदं सुपुण्यं
संश्रावयेत द्विजमुख्यवर्णात्॥
स पापसंघातनिमुक्तदेहः
प्रयाति कैलासपदं मनुष्यः॥१११॥

इतिश्रीस्कान्दे महापुराणे लिङ्गलपुरमाहात्म्ये क्षेत्रमहिमानुवर्णनंनाम द्वितीयोध्यायः॥२॥

॥ लिङ्गलपुरमाहात्म्ये
तृतीयोऽध्यायः॥

॥ बृहद्बलोपाख्यानं ॥

ऋषयः—
कथंप्रलयपानीयं शोषयित्वा विलेहरः॥
बृहद्बलं पाण्ड्यराजं कथमीशोन्वपालयत्॥१॥
तद्वावर्तपुरस्यैति कथमासीन्महत्स्थलं॥
तत्कारणंवदत्वंनस्तत्त्वतस्सूतनन्दन॥२॥
इतितेषांवचःश्रुत्वामुनीनांभावितात्मनां॥
उवाचसूतस्सन्तोषात्तन्नामागमकारणं॥३॥

श्रीसूतः—
पुराबृहद्बलोनामराजाभूत्पाण्ड्यमण्डले॥
ब्रह्मण्यइज्यान्तिनिरतस्सर्वदातिथिपूजकः॥४॥
यज्ञशीलस्सदाचारनिरतस्सोमवंशजः॥
गजाश्वरथपादातिबहुसेनासमन्वितः॥५॥
शिवभक्तस्सत्यवादीशिवज्ञानपरायणः॥
बाल्यात्प्रभृतिभूपालः पञ्चाक्षरपरायणः॥६॥
रुद्राक्षमालाभरणःशिवभक्तप्रपूजकः॥
ससर्वगुणसंपन्नो धर्मेणासौ बृहद्बलः॥७॥

पालयामास वसुधां षण्ढ्यराद् भुवि विश्रुतः॥
एकदा सनृपश्रेष्ठः पुरसञ्चारतत्परः॥८॥
ययौ नगरे रात्रौ शोधयन्सकलाः प्रजाः॥
तस्मिन्नन्तरे तत्र पुरैकश्चिद्द्विजाधमः॥९॥
दुष्टशीलइतिख्यातस्सदावेश्यापरायणः॥
दुराचाररतोनित्यं मौर्ख्यादतिदुराग्रही॥१०॥
सवेश्यायैधनंदातुं तस्मिन्नवसरेद्विजः॥
तस्मिन्पश्यतिराजेन्द्रे निष्क्रीयेदृश्यसंस्थितः॥११॥
कस्मिंश्चिद्भवने वित्तं गृहीत्वाचौर्यतस्तदा॥
निष्क्रामन्बहिर्गेहाद्भयवान्भीतिवर्जितः॥१२॥
अथतद्गेहमध्यस्थास्तमभिद्रुत्यवेगतः॥
कोशान्तश्चोरइत्येवं राजमार्गंसमागताः॥१३॥
तान् दृष्ट्वाभीतिसंयुक्तश्चकेविप्रः पलायनं॥
पलायमानंतंविप्रं धनमादायचौर्यतः॥१४॥
दृष्ट्वाराजातिकुपितस्तमभिद्रुत्यवेगतः॥
हस्ताभ्यांपरिगृह्याशु रवर्दुवज्रोपमंनिशि॥१५॥
विकृष्यकोशाद्वेगेन द्विधाचिच्छेदतच्छिरः॥
अक्षिणायांधकारेतं ब्राह्मणोयमितिप्रभुः॥१६॥
चकारसुमहत्पापं ब्रह्महत्याभयं नृपः॥
तं विप्रहत्या नृपतिं घोररूपा भयंकरी॥१७॥
अभिद्रुत्यवेगेन नीलांजनचयाकृतिः॥
तांदृष्ट्वा भैरवाकारां गदामुसलधारिणीं॥१८॥
पलायनं चकारासौ राजाभीतिसमन्वितः॥
यतयत नृपश्रेष्ठ श्चके भीत्यापलायनं॥१९॥
ततस्तत नृपं हत्या तंदुद्राव भयंकरी॥
अभिद्रुतस्तुसतया नृपतिर्ब्रह्महत्यया॥२०॥
चचारपृथिवीं सर्वां श्रान्तश्शिवमनुस्मरन्॥
पुण्यक्षेत्राणिसर्वाणि गत्वापि सनृपोत्तमः॥२१॥
तत्पापान्नविमुक्तोऽभूद्घोराद्ब्रह्मणाद्द्विजाः॥
अथतत्रैवयोगेन चरन्राजाबृहद्बलः॥२२॥

महाभीतिसमायुक्तः प्राप पुष्कागकाननं ॥
यत्तास्तेपावनंलिंगं भुवनेश्वरसंज्ञितं ॥२३॥
तत्काननंविवेशाशु विविधद्रुमशोभितं॥
पुण्यं पवित्रममलं महापापविनाशनं ॥२४॥
यदा तत्क्षोलमतुलं विवेश नृपपुंगवः॥
तदाविमुच्यतं हत्या तत्क्षोलस्यस्थितावहिः ॥२५॥
क्षोलाद्बहिस्थितांहत्यां दृष्ट्वाराजाबृहद्बलः॥
सन्तोषंपरमंगत्वा मनसैवमचिन्तयत्॥२६॥
अहो किमेतदाश्चर्यं दृष्टमत्यद्भुतं॥
यदियंपृष्ठगाहत्या दूरादद्यस्थितामम॥२७॥
तस्मादत्र विशेषोस्ति नात्रकार्यविचारणा॥
इतिसंचिन्त्यहृदये भूमिपालो बृहद्बलः॥२८॥
चरन्सतस्मिन्विपिने पुष्कागतरुमण्डिते॥
ददर्श विमलंलिंगं भुवनेश्वरसंज्ञितं॥२९॥
अधस्तात्सप्तपातालादाविर्भूतमतिद्युति॥
आधारं सर्वलिंगानांमलाधारमविक्रियं॥३०॥
अनन्तमजरं नित्यमादिमध्यान्तवर्जितं॥
सत्यंविज्ञानमानन्दंतेजोरूपंनगन्मयं॥३१॥
दर्शनंदेवलोकानां समस्तदुरितापहं॥
भुक्तिमुक्तिप्रदंनृणां मुनिसंघनिसेवितं॥३२॥
सिद्धचारणगन्धर्वविद्याधरसुरार्चितं॥
दृष्ट्वा तल्लिंगमग्र्यंतं पाण्ड्याधीशोबृहद्बलः॥३३॥
प्रहृष्टवदनांभोजश्चिन्तयामास मानसे॥
अनेनदेवदेवेनलिंगरूपेण शंभुना॥३४॥
विमोचितोऽहंभीशेन घोरयाब्रह्महत्यया॥
एवं चिन्तापरेतस्मिन्भूमिपाले बृहद्बले॥३५॥
तदाऽशरीरिणी वाणी प्रोवाच नृपसत्तमं॥

सत्यमेतन्नृपश्रेष्ठ! बृहद्बल! महाबल!॥३६॥
विमुक्तस्त्वं नसन्देहः क्रूरया ब्रह्महत्यया॥
देवदेवप्रसादेन पुण्येऽस्मिन्भुवनोत्तले॥३७॥
पुन्नागवनमित्येतत्क्षेत्रं लोकेषु विश्रुतं॥
महापापप्रशमनं सर्वमंगलदायकं॥३८॥
अस्मिन्क्षेत्रे महादेवः कृपालुरशशिशेखरः॥
प्रादुर्बभूवभुवनरक्षार्थं राजनन्दन!॥३९॥
आदावेतत्तदावर्ते स्रष्टुमेतच्चराचरं॥
लिंगरूपेणभगवान्सर्वामरगणार्चितः॥४०॥
तस्मिन्क्षेत्रेशतमंपुण्यं भुवनेश्वरसंज्ञितं॥
पश्येदंतीर्थममलं महापातकनाशनं॥४१॥
निर्मितंदेवदेवेन शूलाग्रेण नृपोत्तम!॥
जलक्रीडार्थमीशेन पार्थिवेन पुरीजण॥४२॥
यस्माच्छूलेनभगवान्निर्ममेतीर्थमुत्तमं॥
त्रिशूलतीर्थमित्येवं तत्प्रथितंतद्भुवह॥४३॥
शिवतीर्थंचेतिकेचित्प्रवदन्तिमुनीश्वराः॥
तस्मात्त्वमत्तराजेन्द्र! स्नात्वा भक्तिसमन्वितः॥४४॥
पूजयस्व महालिंगं श्रृंगारतनुसंज्ञितं॥
इतिवाणीं समाकर्ण्य नृपतिर्गगनोद्भवां॥४५॥
विस्मयंपरमंगत्वा तदा राजाबृहद्बलः॥
स्नात्वात्रिशूलतीर्थेऽस्मिन्पापेन्धनदवानले॥४६॥
आदायपत्रपुष्पाणि पूजितुं भुवनेश्वरं॥
आजगामान्तिकं शंभोः स्तुतिभक्तिसमन्वितः॥४७॥
अभिषिच्यजलैरिक्षुक्षैलिंगरूपिणमीश्वरं॥
पूजयामासविविधैः पुष्पैर्बिल्वदलैर्नवैः॥४८॥
पूजयित्वाविधानेन देवदेवमुमापतिं॥
भक्त्या परमयायुक्तस्स्तोतुंसमुपचक्रमे॥४९॥

इतिश्रीस्कान्दे महापुराणे तिशूलपुरमाहात्म्ये बृहद्बलोपारन्यानं नाम तृतीयोऽध्यायः॥३॥

॥ लिङ्गपुराणमाहात्म्ये
चतुर्थोऽध्यायः ॥
॥ प्रलयजलशोषणं ॥

॥ वंस नृपतिर्धीमान्पूजयित्वाऽतिभक्तितः ॥
बद्धाञ्जलिपुटीभूत्वा पुलकांचितविग्रहः ॥
ईशप्रसादजनितवाग्जालस्तुतिमातनोत् ॥ १ ॥
तदेतत्संप्रवक्ष्यामि पुण्यं पापप्रणाशनं ॥
बृहद्बलकृतं स्तोत्रं अभीष्टफलदायकं ॥ २ ॥
बृहद्बलः —
यन्नामकीर्तनमुशन्ति मुनीन्द्रमुख्याः
कर्णामृतं निरवलपापविनाशहेतुं ॥
तन्निर्मलं निरवलगोचरमद्वितीयं
पुन्नागकाननननिवासनमीशमीडे ॥ ३ ॥
यं सर्वभूतनिलयं यतिभिर्विचिन्त्यं
ब्रह्मादयोऽपि नविदुः परमात्मरूपं ॥
तं सर्ववेदविनुतं तरुणेन्दुमौलिं
पुन्नागकाननननिवासनमीशमीडे ॥ ४ ॥
यं कालपाशपरिवेष्टितकण्ठनालः
संपूज्य भक्तिसहितस्समृकण्डुसूनुः ॥
मृत्यूद्भवं भयमपोह्य जगाम सौख्यं
पुन्नागकाननननिवासनमीशमीडे ॥ ५ ॥
अब्देऽष्टमे यमभिषिच्य शिलादसूनु
र्नीलस्समस्तपगदन्तकरान्तकेन ॥
शक्तो जगाम गणनाथपदं तमाद्यं
पुन्नागकाननननिवासनमीशमीडे ॥ ६ ॥
यत्फालनेत्रजनिताग्निशिखाभितप्तः
कामस्त्वनंगपदमाप कठोरचेताः ॥
तं कालमभयं तरुणीशितांगं
पुन्नागकाननननिवासनमीशमीडे ॥ ७ ॥

यत्पूर्वमब्धिमथनोद्भवकालकूटं
धृत्वा गले जगदपालयदाशुदेवः॥
तं नीलकन्धरमनन्तमजंशरण्यं
पुन्नागकाननिवासनमीशमीडे॥८॥

यस्य प्रसादमभिगम्य हिरण्यगर्भ-
स्सृष्ट्वा त्वमाप सहसा सुरवन्द्यतांघ्रिः॥
तं पार्वतीहृदयपङ्कजभृंगराजं
पुन्नागकाननिवासनमीशमीडे॥९॥

यस्याहमद्यकृपयावरविप्रहत्या-
मुक्तोऽभवं त्वयविमोहितमूढचेताः॥
यद्दर्शनेनममचित्तमतिप्रसन्नं
पुन्नागकाननिवासनमीशमीडे॥१०॥

एवंस्तुत्वा सराजर्षिर्देवेशं वृषभध्वजं॥
नचवेदस्वमात्मानमानन्दांभोधिमध्यगः॥११॥
बद्धाञ्जलिपुटोभूत्वा तस्थौ देवस्यपार्श्वतः॥
अथदेवः प्रसन्नात्मा स्तोतेणानेनशंकरः॥१२॥
आविर्बभूवपुरतस्तस्यपाण्ड्यमहीपतेः॥
तमालोक्यजगन्नाथं देवदेवं घृणानिधिं॥१३॥
प्रणम्यशिरसा राजासाष्टांगपरिमर्दनः॥
नचवेदस्वमात्मानमानन्दांभोधिमध्यगः॥१४॥
तमीशः कृपयोवाच भगवान्भक्तवत्सलः॥
पुरोबद्धाञ्जलिपुटं पुलकाञ्चितविग्रहं॥१५॥
ईश्वरः—
तुष्टोस्मितवराजेन्द्र! स्तोत्रेणचसपर्यया॥
वरं वरय भद्रंते वरदोहमुपागतः॥१६॥
इतिशंभुवचःश्रुत्वा सराजासोमवंशजः॥
वरं वव्रे महादेवाद्भक्तवत्सलात्॥१७॥

यदि तुष्टोसि देवेश! वरंमेदातुमर्हसि ॥
त्वत्पादपद्मभक्तिंमे दृढां देहिकृपानिधे!॥१८॥
त्वत्क्षेत्रदर्शनादस्माद्ब्रह्महत्या गताऽद्यमे॥
तस्मात्तवैव वत्स्यामि त्वत्प्रसादान्महेश्वर!॥१९॥
इत्थं संप्रार्थितस्तेन भगवान्परमेश्वरः॥
ददौनृपतयेऽभीष्टं करुणावरुणालयः॥२०॥

ईश्वरः—

तथास्तु तवराजेन्द्र! भक्तिर्मयिदृढाभवेत्॥
अस्मिन्मनोहरे देशे कृत्वापुरमनुत्तमं॥२१॥
पालयस्वमहींसर्वां मद्भक्तिसहितोनृप!॥
इतिदत्वा वरं तस्मै हरस्सर्वामरार्चितः॥२२॥
अन्तर्धानंजगामाशु तस्मिन्क्षेत्रे मनोहरे॥
अथराजाप्रसन्नात्मा स्वपुरात्सकलान्नरान्॥२३॥
आनयामासविविधान्क्षेत्रंतत्प्रतिशांभवः॥
ततः पुरंकारयित्वा राजाशास्त्रविशारदः॥२४॥
क्षेत्रपालांश्चतुर्दिक्षु स्थापयामासशास्त्रतः॥
प्राच्यां कालीश्वरंदेवं दक्षिणेशिखिवाहनं॥२५॥
गणेशं पश्चिमेदेशे दुर्गामुत्तरतस्सुधीः॥
आज्ञया देवदेवस्य प्रार्थयामास भूमिपः॥२६॥
इत्थं तस्मिंक्षेत्रपालान्स्थापयित्वाविधानतः॥
कारयामासदेवस्य मन्दिरं मणिमण्डितं॥२७॥
प्राकारगोपुरादीनि कारयामासपाण्डवशत्॥
अथदेवीं नमस्कृत्य दक्षिणेभुवनेशितुः॥२८॥
पूजयामास विविधै र्द्रव्यैः पूर्णमनोरथः॥
इत्थं सतस्मिन्नगरे वर्तमानोबृहद्बलः॥२९॥
पालयामास वसुधां धर्मेणबहुवत्सरं॥

एवं शासति राजेन्द्रे पुरीं तांतु बृहद्बले ॥३०॥
युगसन्धिरिति ख्यातः प्रलयस्समुपागतः ॥
तदा समुद्रः कल्लोलैः कवलीकृत्य मेदिनीं ॥३१॥
आजगामाथ तत्क्षेत्रं निहन्तुमतिवेगतः ॥
तदा समुद्रकल्लोलैः प्लावितं वीक्ष्य भूतलं ॥३२॥
नृपतिर्भयमापन्नः प्राप देवान्तिकं द्विजाः ॥
शिवभक्तस्सराजर्षिर्गत्वा देवेशसन्निधिं ॥३३॥
तदाविज्ञापयामास स्तुत्वास्तोत्रैरनेकधा ॥
बृहद्बलः—
देवदेव! जगन्नाथ! पार्वतीरमणाव्यय! ॥३४॥
पाहि प्रलयपानीयभयादस्मान्महेश्वर! ॥
तवक्षेत्रमिदं देव! त्वद्भक्तजनपूरितं ॥३५॥
हन्तुमायाति जलधिस्तद्भयान्मोचयाधुना ॥
इतीशः प्रार्थितस्तेन भक्ताभीष्टप्रदायकः ॥३६॥
ऊचे गंभीरया वाचा भयाक्रान्तं बृहद्बलं ॥
ईश्वरः—
माभैषीः नृपशार्दूल! प्रलयांभोधिसंप्लवात् ॥३७॥
अहं तं नाशयाम्यद्य यथा ते न भयं भवेत् ॥
कलिद्वापरयोर्मध्ये प्रलयोयमुपागतः ॥३८॥
साक्षिकस्सर्वजन्तूनां भयदोयेनतप्यसे ॥
इत्युक्त्वा भगवान्शंभुस्स्वभक्तार्थंजगन्मयः ॥३९॥
आविर्बभूव तल्लिंगाच्छूलायुधलसत्करः ॥
पुरतस्स्वस्य लिंगस्य वेगेनागत्यशाङ्करः ॥४०॥
निर्भिद्यभूमिं शूलेन त्यावर्तनिलमातनोत् ॥
स्वफालनेत्रसंभूत वह्निज्वालामुमापतिः ॥४१॥
निधाय तद्धि लेघोरे शोषयामासतज्जलं ॥
वर्द्धमानं समुद्रस्य कीलालं कामशासनः ॥४२॥
तदीशशूलसंभूत बिलेनिपतितं पयः ॥
नवृद्धिमभजत्तत्र दर्शे बिंबमिवेन्दवं ॥४३॥

26 इत्थं प्रलयपानीयभीतं पाण्ड्यनरेश्वरं॥
अपालयत्सनगरं सनागरजनं हरः॥४४॥
एवंचतुर्षु भगवान्कृतादि युगसन्धिषु॥
दक्षिणादिषुदेशेषु स्वस्य शूलेनदेवराट्॥४५॥
निलेष्वावर्तसहितेष्वगाधांभोधिसंभवं॥
शोषयिष्यतिदेवेशोभक्तरक्षणतत्परः॥४६॥
यस्मादावर्तनिलत श्शोषयित्वोनुधेर्जलं॥
अपालयदमेयात्मा तत्क्षेत्रमतिपावनं॥
तस्मात्तच्छ्रीप्रदावर्तपुरमित्यभिविश्रुतं॥४७॥
एतद्वः कथितं सर्वं त्रिपुरारि विचेष्टितं॥
यच्छ्रुत्वा पापनिर्मुक्तः प्रयातिमनुजश्शिवं॥४८॥

यः पूर्वमावर्तनिलं विधाय
शूलेनचांभोनिधिवेगमुग्रं॥
निगृह्यरक्षामकरोत्पुरस्य
तस्मै नमः शूलपुरेश्वराय॥४९॥

इतिश्रीस्कान्दे महापुराणे त्रिशूलपुरमाहात्म्ये
वृद्धबलोपाख्याने प्रलयशोषणं नाम-चतुर्थोध्यायः॥४॥

॥ त्रिशूलपुरमाहात्म्ये
पञ्चमोध्यायः॥
॥इन्द्रद्युम्नोपाख्यान॥

इतिसूतवचः श्रुत्वा मुनयश्शौनकादयः॥
सूतं सर्वपुराणज्ञं ऊचुस्सन्तोषसंयुताः॥१॥

ऋषयः—

युत्पुण्यागवनं नाम प्रथितं क्षेत्रमुत्तमं॥
तच्छूलपुरमित्युक्तं कथंतन्नाम्नविश्रुतं॥२॥
एतद्ब्रूहि महाभाग! शुश्रूषूणांमहामते!॥
इतितेषां वचः श्रुत्वा मुनीनांश्रावितात्मनां॥३॥

सूतः प्रोवाच तन्नामकारणं मुनिसङ्घिधौ ॥

श्रीसूतः—

शृणुध्वं मुनयस्सर्वे निशूलपुरवैभवं ॥४॥
यच्छ्रुत्वा पापसंघेभ्यो मुच्यते मानवोभुवि ॥
पुराचाक्षुषमन्वन्ते तत्कोलमभवत्पुरं ॥५॥
ब्रह्मक्षत्रियविट्शूद्र संकुलंबहुमन्दिरैः ॥
गजाश्वरथसंबाधं पदातिशतशोभितं ॥६॥
प्रासादमालासंकीर्णं राजमार्गोपशोभितं ॥
नटनर्तकसंबाधं वारस्त्रीशतशोभितं ॥७॥
विविधोद्यानसंकीर्णं जलाशयशतावृतं ॥
पताकाध्वजसंयुक्तं स्वर्णतोरणमण्डितं ॥८॥
पुरेतस्मिन्नभूत्पाण्ड्यः पुरन्दरसमोबली ॥
इन्द्रद्युम्नइतिख्यातस्सत्यवादीजितेन्द्रियः ॥९॥
रूपलावण्यसंपन्नस्सर्वशास्त्रविशारदः ॥
दक्षःप्रशान्तोद्युतिमान्गोब्राह्मणहितेरतः ॥१०॥
दातायज्वादेवभक्तश्शूरश्शात्रुनिबर्हणः ॥
सदाचाररतश्शान्तःश्शान्त सर्वगुणाकरः ॥११॥
शिवभक्तियुतःश्रीमान्सदाशिवकथाश्रयः ॥
दाक्षिण्ययुक्तस्सर्वेषु देवब्राह्मण पूजकः ॥१२॥
सतस्मिन्नागरे राजा धर्मेणमुनिपुंगवाः ॥
अपालयदतिप्रीत्या सर्ववैपाण्ड्यमण्डलं ॥१३॥
सयज्ञान्विविधांश्चक्रे हयमेधादिकान्बहून् ॥
ददौधनानिविप्रेभ्यः स्वर्णादीनिनृपोत्तमः ॥१४॥
इत्थंतस्मिन्पुरवरे सराजासत्यसंगरः ॥
पालयामासधर्मेण मेदिनींबहुवत्सरं ॥१५॥
ततस्मिन्नन्तरेकाले चाक्षुषान्तरसंभवः ॥
आजगाम मुनिश्रेष्ठाः लोकलयविनाशकः ॥१६॥
एकीभूयतदासप्तसागरास्सर्वमेदिनीं ॥
आप्लाव्य सलिलैस्वीयैर्नाशयन्ति जगत्त्रयं ॥१७॥
नगराणिचराष्ट्राणि सद्वीपानिधिसन्नहः ॥

प्रलयांभोधिकल्लोलै र्नाशितानि मुनीश्वराः ! ॥१८॥
तदानीं नृपतिश्रेष्ठ प्रणम्येत्थं भुवनेश्वरं ॥
शरण्यं शरणं गत्वा देवदेवं दयानिधिं ॥१९॥
सामात्यभृत्यसहित स्स्वस्तीपौरजनैस्सह ॥
प्रणम्यदेवमीशानं साष्टांगप्रणिपातकः ॥२०॥
बद्धाञ्जलिर्भीतियुक्तः प्रोवाच भुवनेश्वरं ॥
इन्द्रद्युम्नः—
भुवनेश्वर ! देवेश ! भक्तवत्सल ! शंकर ! ॥२१॥
पाह्यस्मात्प्रलयांभोधिजलादतिभयंकरात् ॥
कामशासन ! देवेश ! कालान्तक ! नमोऽस्तुते ॥२२॥
पाह्यस्मात्प्रलयांभोधिजलादतिभयंकरात् ॥
गंगाधर ! विरूपाक्ष ! गौरीनाथ जगद्गुरो ! ॥२३॥
पाह्यस्मात्प्रलयांभोधिजलादतिभयंकरात् ॥
नीलकण्ठ ! निरीशान ! निर्विकार ! निरञ्जन ! ॥२४॥
पाह्यस्मात्प्रलयांभोधिजलादतिभयंकरात् ॥
कैलासवासिन्कान्तार्धकमनीयकलेवर ! ॥२५॥
पाह्यस्मान्प्रलयांभोधिजलादतिभयंकरात् ॥
भुवनेश्वर ! कामारे ! पुन्नागवननायक ! ॥२६॥
पाह्यस्मान्प्रलयांभोधिजलादतिभयंकरात् ॥
नीललोहित ! निर्वैर ! कालकूटभयापह ॥२७॥
पाह्यस्मान्प्रलयांभोधिजलादतिभयंकरात् ॥
इतिस्तुतोमहादेवः कृपालुर्भुवनेश्वरः ॥२८॥
इन्द्रद्युम्नेन भीतेन स्वभक्तेन यशस्विना ॥
प्रत्यक्षीभूयभगवान्ददौ नृपतयेवरं ॥२९॥
भुवनेश्वरः—
इन्द्रद्युम्न ! नृपश्रेष्ठ ! माभैषीः प्रलयांबुधेः ॥
अहमुत्तारयिष्यामि भयादस्मादिमं पुरं ॥३०॥

त्वयासह नरश्रेष्ठ! सौप्रतं सजनंमहत्॥
स्वस्थो भव महीपाल! [redacted] मद्भक्तस्य नतेभयं॥३१॥
मद्भक्ता मद्गतप्राणा मद्ध्यान निरतास्सदा॥
नते प्रलयकालेपि विनश्यन्ति नृपोत्तम!॥३२॥
इत्युक्त्वा भगवान्शंभु र्भक्तरक्षणतत्परः॥
पुरमुद्धारयामास सजनं नृपसंयुतं॥३३॥
गजाश्वरथपादातिसहितं स्त्रीगणान्वितं॥
नमुत्पाद्यत्रिशूलाग्रे निधायभुवनेश्वरः॥३४॥
अपालयदमेयात्मा पुरन्तं त्रिपुरान्तकः॥
प्रलयान्तेपुनर्भूमौ तमेव भगवान्हरः॥३५॥
[redacted] मनुंवैवस्वताभिख्य मकरोदं निकापतिः॥
इत्थंस्वभक्तरक्षार्थं भगवान्भूतभावनः॥३६॥
पुरंतत्पालयामास मन्वन्तरमहोंबुधेः॥
तदद्भुतमिदंद्रष्टु मागतस्सत्यलोकतः॥३७॥
ब्रह्मास्वलोकनिलयैस्सहवाण्यापितामहः॥
विष्णुर्वैकुण्ठनिलयाद्रागतोरमयासह॥३८॥
कल्पयासहमहादेवः कालीश्वरमहास्थलात्॥
तयासंप्रार्थितस्तत्र यथौ तद्द्रष्टुकाम्यया॥३९॥
ससमागम्य तत्क्षेत्रं पवित्रं पापनाशनं॥
(ईशान्यां) ईशान्ये भूमिनाथस्य समास्ते सुरपूजितः॥४०॥
कालीश्वरइतिख्यातस्सर्वेषांपापनाशनः॥
लिंगरूपेणभगवान्देव्यासहमहीसुराः!॥४१॥
तंकालिकेश्वराभिख्यलिंगरूपिणमीश्वरं॥
सेवन्ते येनरा जातु ते मुच्यन्तेऽघसञ्चयैः॥४२॥
कल्पया कालीश्वरक्षेत्रादागत्यभगवान्हरः॥
यस्मात्तत्रावसत्तस्मात्तत्कालीश्वरमुच्यते॥४३॥
भुवनेश्वरकालीशलिंगयोर्यदन्तरं॥
तत्क्रोशीसदृशंक्षेत्रं पवित्रं पापनाशनं॥४४॥
सर्वदुःखहरंसर्वनरकक्लेशनाशनं॥

80

महापापहरं विप्राः! महामंगलदायकं॥४५॥
भुक्तिमुक्तिप्रदं नृणां मुनिसंघनिसेवितं॥
तत्क्षेत्रसदृशंक्षेत्रं नभूतं नभविष्यति॥४६॥
तत्रये मानवानित्यं निवसन्तिमुनीश्वराः!॥
ते सर्वे शंभुसायुज्यं प्राप्नुवन्त्यपुनर्भवं॥४७॥
कृमिकीटादयस्सर्वे पशुपक्षिमृगाण्डजाः॥
मुच्यन्ते तत्रये चान्ये तृणगुल्मलतादयः॥४८॥
तत्रयद्यत्कृतं कर्म दानयज्ञादिकं महत्॥
तदन्यत्र कृताद्भौमं सहस्रगुणितं भवेत्॥४९॥
गोभूतिलहिरण्यादि दानानि विविधानिच॥
दास्यन्ति तत्रये मर्त्याः तेषां पुण्यमनन्तकं॥५०॥
तत्रान्नं ये प्रयच्छन्ति ब्राह्मणेभ्योविशेषतः॥
तदन्नं मेरुसदृशं भविष्यति नसंशयः॥५१॥
महादानानियेतत्र कुर्वन्तिनरपुंगवाः॥
नचतेषांफलंवक्तुं शक्यतेब्रह्मणापिवा॥५२॥
तत्क्षेत्रेवसतांनित्यं ब्राह्मणानां महात्मनां॥
दास्यन्तिधनधान्यादि तेहरांश्चसमुद्भवाः॥५३॥
तस्मात्सर्वप्रयत्नेनवस्तव्यंतत्र मानवैः॥
दातव्यंच यथाशक्ति स्वर्णधान्यांबरादिकं॥५४॥
सराजा देवदेवस्य कृपयासत्यसंगरः॥
मनुराज्यमनुप्राप्य सर्वमानवदुर्लभं॥५५॥
प्राप्यतत्क्षेत्रममलं स्वनाम्नालिंगमुत्तमं॥
भुवनेश्वरलिंगस्य स्थापयामास दक्षिणे॥५६॥
यद्धि मानवनाथेश प्रसिद्धिमगमद्भुवि॥
यः श्रीमन्मनुनाथाख्यं सेवते लिंगमुत्तमं॥५७॥
ससर्वभोगभुक्त्वाभूमावन्तेशिवपुरं व्रजेत्॥
तत्र प्रतिष्ठाप्यमनुस्तल्लिंगमतिसुन्दरं॥५८॥

मनोहरेश्वरमिति चक्रे नाम्नास्य भूतले ॥
एवं लिंगं प्रतिष्ठाप्य संपूज्य सहसामनुः ॥
अभिवाद्य स्वकं लोकं प्रययौ सुरपूजितः ॥ ५९ ॥
इतीदं कीर्तितं पुण्यं कोटिपापविनाशनम् ॥
त्रिशूलपुरमाहात्म्यमितिहाससमन्वितं ॥ ६० ॥
यस्मात्पुरं त्रिशूलाग्रे निधायप्रलये हरः ॥
पालयामास तत्तस्मात्त्रिशूलपुरमुच्यते ॥ ६१ ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा महीसुरान् ॥
सपापसंघनिर्मुक्तः प्रयाति हरमन्दिरं ॥ ६२ ॥
इति श्रीस्कान्दे महापुराणे त्रिशूलपुरमाहात्म्ये
इन्द्रद्युम्नोपाख्यानं नाम पञ्चमोऽध्यायः ॥

॥ त्रिशूलपुरमाहात्म्ये
षष्ठोऽध्यायः ॥
॥ त्रिशूलतीर्थमहिमानुवर्णनं ॥

ऋषयः—

उत्कर्षेणत्वया सूत त्रिशूलपुरवैभवं ॥
श्रुतं चास्मभिरधुनात्वन्मुखांभोजनिस्सृतं ॥ १ ॥
शूलतीर्थमितिप्रोक्तंत्वया सूतनन्दन ॥
तद्ब्रूहि विस्तरेणाद्य सर्वज्ञस्त्वं नसंशयः ॥ २ ॥
तस्मिन्निमज्जतांनृणांकीदृशंफलमुच्यते ॥
किमर्थं निर्मितंतेन शूलेन त्रिपुरारिणा ॥ ३ ॥

श्रीसूतः—

वक्ष्यामि मुनयः पुण्यं शूलतीर्थस्यवैभवं ॥
श्रवणात्सर्वपापघ्नं धर्मकामार्थदं नृणां ॥ ४ ॥
जगदादौ पुराशंभुर्भूत्वात्मभुवनेश्वरः ॥
लिंगरूपेण पुन्नागकानने ऽवर्ततान्वहं ॥ ५ ॥
इत्थं तत्कानने रम्ये चूतचंपकशोभिते ॥
मन्दारपूगपनस कुटजार्जुनशोभिते ॥ ६ ॥

कपित्थाश्वत्थजंबीर जंबुनीपाश्चिमण्डिते॥
कोविदारकरञ्जादि ककुभासनसंकुले ॥७॥
माधवीकुन्दकुटज जात्यंजननिराजिते।
तस्मिन्मनोहरेदेशे पुण्येभुवनविश्रुते॥८॥
विराजमानंदेवेशं त्रिणेत्रंचन्द्रशेखरं॥
दृष्ट्वा देवी जगन्नाथमिदमाह जगात्मजा॥९॥

देवी—

शिवशंकर! देवेश! भगवन्भक्तवत्सल!॥
विज्ञप्तिं शृणुमेनाथ! विधुसूर्याग्निलोचन!॥१०॥
क्षेत्रेऽस्मिन्भावनेरम्ये वर्तसे त्वं सदाविभो!॥
अहमप्यत्रवत्स्यामि तवसेवापरायणा॥११॥
स्नानार्थंमम देवेश! अभिषेकार्थमेवच।
विधेहि तीर्थमुत्तमं विश्वरक्षशिरोमणे!॥१२॥
इतिदेव्या विशालाक्ष्या प्रार्थितःपरमेश्वरः॥
तथेतिदेवीं सन्तोष्य भगवान्भक्तवत्सलः॥१३॥
आदायशूलं निशितं निर्विभेद सरोहरः॥
लिंगस्य पुरतस्तस्य शंकरस्त्रिपुरान्तकः॥१४॥
शूलाग्रेण सुतीक्ष्णेन दारिताक्षमहीतलात्।
पातालगंगासलिलं प्रोत्सस्थौ विश्वतेजसा॥१५॥
अथदेवीं विशालाक्षीं दृष्ट्वा देवोमहेश्वरः।
स्मितांतत्सरोवीक्ष्य प्रोवाचमुनिपुंगवाः॥१६॥

ईश्वरः—

पश्यकान्ते! सरःपुण्यं त्वदर्थंनिर्मितंमया॥
विशालमनवद्यांगि! निर्मलांबुसमाकुलं॥१७॥
नातत्तीर्थसमंतीर्थं विद्यतेनात भामिनि!॥
शूलतीर्थमितिख्यातिंगमिष्यतिममाज्ञया॥१८॥
शिवगंगेतिचपुनः प्रथितंतद्भविष्यति॥
अत्रयेमनुजादेवि! कुर्वन्तिस्नानमुत्तमं॥१९॥
तेसर्वेपापनिर्मुक्तायास्यन्तिममंमन्दिरं॥

For correction in
Transcript copy.

का-मा- (31) नक्षत्रमण्डलगत | नक्षत्रचक्र
(36) सदा तत्र - यत्र
(40) प्रायात् - प्राय होना
(41) दूत्तरे - उत्तरे
(44) मोदनेनार्य - नान्ने
(62) आगच्छतां - तं
(75) विचिन्त्य - विचिन्वन्
(84) समुपेतं युवां ?
(90) अगत्वा ? कियामसि ?
(95) तन्निष्ठनुजांप्रतम् ?
(99) कुन्देरण यथेतराम् ?
(106) वर्तिनीमपि - वर्तनीत्मपि
(107) जाघटीति ?
(121) नमन्दृष्ट्वा | ? ?
(132) सहभक्तिकः ?

पिपासाक्लान्तोऽहं ?

(121) समुद्रात्रं -
(136) यावतो ?
(139) ज्योतिरेकं दृश्यं यत्
(140) तर्हि - ?
142. वरमीक्षणं ?
149. यत्रास्तां
151. तदर्शनार्धिगत ?
155. पापेभ्यः प्रविमुच्यते

महापातकयुक्तोवा युक्तोवा सर्वपातकैः॥ २० ॥
अस्मिंस्तीर्थे निमज्ज्याशु मुक्तो भवति निश्चितं॥
ज्ञानाज्ञानकृतं पापं पुराजन्मान्तरे कृतं॥ २१ ॥
तत्सर्वं नाशमायाति ह्यस्मिंस्तीर्थे निमज्जनात्॥
मानसं वाचिकं यत्स्यात्कायिकं पापमेववा॥ २२ ॥
तत्सर्वमत्तस्नानेन तत्क्षणादेव नश्यति॥
बाल्येवयसि यत्पापं कृतं यच्चापियौवने॥ २३ ॥
वार्द्धक्ये चाऽनवद्यांगि! तन्नश्यत्यत्तमज्जनात्॥
अस्मिन्पापहरे तीर्थे स्नात्वा भक्तिसमन्वितः॥ २४ ॥
सेवतेयस्तुमांदेवि! सकृतार्थोभविष्यति॥
मातृद्रोही पितृद्रोही देवब्राह्मणदूषकः॥ २५ ॥
नास्तिकः पिशुनः कामी दुराचाररतस्सदा॥
अग्निदो गरदश्चैव मित्रघ्नो गुरुहिंसकः॥ २६ ॥
परदाररतश्चैव परद्रव्यापहारकः॥
अत्तस्नानेनतेसर्वे मुच्यन्तेपापकर्मुकात्॥ २७ ॥
गंगागोदावरीसिन्धुःकावेरीकृष्णवेणिका॥
ताम्रपर्णी वेगवती सरस्वत्यघनाशिनी॥ २८ ॥
पयोष्णी फल्गुनी पंपा याश्चान्यास्सरितोवराः॥
सर्वाश्चात्तनिवत्स्यन्ति सर्वदेवसमाज्ञया॥ २९ ॥
अस्मिन्निमज्यमनुजाश्चत्तीर्थे शुभावहे॥
पितॄनुद्दिश्ययश्श्राद्धं करोति भुवनेश्वरि!॥ ३० ॥
गयाश्राद्धेकृतंतेन भविष्यति नसंशयः॥
स्नानंदानंजपोहोमःपूजायज्ञादिकाःक्रियाः॥ ३१ ॥
अनन्तफलदाःप्रोक्ताःयदन्यत्सुकृतंकृतं॥
वैशाखे कार्तिकेमाघे मार्गशीर्षेतुलारवौ॥ ३२ ॥
येचस्नानं प्रकुर्वन्ति ते ममान्तिकवासिनः॥
चन्द्रसूर्योपरागेषु व्यतीपातायनेषुच॥ ३३ ॥
पूर्णिमायाममायांच द्वादश्यांसंक्रमेरवेः॥
अत्तस्नात्वायथाशक्ति दत्वापापैःप्रमुच्यते॥ ३४ ॥

84 किमत्र बहुनोक्तेन तीर्थं नैतत्समं भुवि ॥
विद्यते सुमनोज्ञांगि! स्वर्गे नाथरसातले ॥ ३५ ॥
तस्मादत्र प्रयत्नेन स्नातव्यं पापभीरुभिः ॥
दातव्यं च यथाशक्ति स्वर्णधान्यादिकं नरैः ॥ ३६ ॥
इत्युक्त्वा भगवान्शंभुर्दैव्या तस्मिन्सरोवरे ॥
विधायाथ जलक्रीडां नन्द्यादिगणपूजितः ॥ ३७ ॥
तस्मिंस्तिरोदधेलिंगे गौर्या सह महेश्वरः ॥
इत्थं तद्देवदेवेन निर्मितं तीर्थमुत्तमं ॥ ३८ ॥
शूलेन निर्मितं यस्माच्छूलतीर्थमितिश्रुतं ॥
तत्तीर्थसदृशं तीर्थं नास्ति विप्राः! जगत्त्रये ॥ ३९ ॥
अत्रैनां तालपतिना गृहीतां मालिनीं पुरा ॥
स्नात्वासद्योविनिर्मुक्ता तेन किं समतां व्रजेत् ॥ ४० ॥

ऋषयः—

सूत! सामालिनी नाम कस्य पुत्री [redacted] नः ॥
वेतालपीडिता तत्र कथं स्नानेन मोचिता ॥ ४१ ॥
श्रुत्वेतिवचनं तेषां मुनीनां सूतनन्दनः ॥
अवदत्पुण्यमारण्यानं अखिलाघनिवारणं ॥ ४२ ॥

श्रीसूतः—

पुराहेमरथोनाम चेरःकश्चिन्महीपतिः ॥
बभूव कीर्तिमान्लोके विख्यातबलपौरुषः ॥ ४३ ॥
सर्वधर्मरतोनित्यं सत्यवादी जितेन्द्रियः ॥
तस्याभून्मालिनी [redacted] नाम कन्यका कमलेक्षणा ॥ ४४ ॥
शरदिन्दुमुखी चारुबिंबाधरमनोहरा ॥
उन्निद्रपद्मनयना पीनोन्नतपयोधरा ॥ ४५ ॥
रूपलावण्यसंपन्ना नृत्तगीतविशारदा ॥
हेमगौरी पृथुश्रोणी करान्तमितमध्यमा ॥ ४६ ॥
नवयौवन [redacted] संभूत चित्तरूपामनोहरा ॥
सा सखीभिः परिवृता मालिनी मन्दगामिनी ॥ ४७ ॥
यत्किंचिद्दुद्यानवनं जगाम वरवर्णिनी ॥

राजमन्दिरमध्यस्थं गतिरभ्यमनुत्तमं॥४८॥
नालिकेराम्रपनस पूगपुन्नागमण्डितं॥
जंभीरकक्कुभप्लक्षकुटजांकोलशोभितं।४९॥
तिलकाशोकनारंगतमालार्जुनशोभितं॥
मालतीकुन्दमन्दारजातीचंपकशोभितं॥५०॥
पद्मेन्दीवरकल्हार रम्यकासारमण्डितं॥
शुककोकिलसंपुष्टं शारिकारावसंकुलं॥५१॥
नीलमेघनिभैर्वृक्षैर्निवारितसरविप्रभं॥
मन्दमारुतसञ्चारं चन्दनद्रुमराजितं॥५२॥
तत्प्रविश्यवनंकन्या निश्चितकुसुमोज्ज्वलं॥
चचारपरितस्तत्र सखीभिस्सहमालिनी॥५३॥
ततस्तत्रविचिन्वन्ती पुष्पाणिसुरभीणिच॥
तस्मिन्नुद्यानविपिने ददर्शवटपादपं॥५४॥
बहुशाखासमाकीर्णं मालिरवन्तमिवांबरं॥
नीलमेघनिभाकारं शीतलं हरितच्छदं॥५५॥
तस्मिन्मनोहरेवृक्षे न्यग्रोधे मुनिपुंगवाः!॥
कश्चित्तिष्ठतिवैतालःपापात्माक्रूरमानसः।५६॥
सतामुत्तुंगवक्षोजां नीलकोमलकुन्तलां॥
शातपत्रेक्षणां सुभ्रूं शातकुंभनिभाकृतिं॥५७॥
ददर्शमदनाविष्टो मन्मथस्यरतीमिव॥
तांदृष्ट्वा सुमुखींबालां वैतालःपापचेतनः॥५८॥
जग्राहमन्मथाविष्टो सिंहोगजवधूमिव॥
साग्रहीताऽतिबलिना वैतालेनवरांगना॥५९॥
पपातभूमौ विच्छिन्नलतेव कुसुमोज्ज्वला॥
पतितां तां समीक्ष्य बालांतस्यास्सखीजनाः॥६०॥
निन्युर्भूपालभवनं राज्ञेसर्वं न्यवेदयन्॥
तामालोक्य नृपःखिन्न स्समाहूयाथमान्त्रिकान्॥६१॥
कारयामासतच्छान्तिं उपायैर्विविधैस्सदा॥
तथापि नासौ वैतालो मालिनीमत्यजद्बली॥६२॥
अनिवार्यमथालोक्य वैतालाधिष्ठितं॥

दुःखितस्सम हीपालि स्स्वपुरे वर्ततेऽन्वहं॥६३॥
इत्थं दुष्टस्स भेतालस्तस्मिंश्चेरनृपालये॥
तयारेमे विशालाक्ष्या मालिन्या मदनातुरः॥६४॥
साभेतालपतिग्रस्ता कृशांगी खिन्नचेतना॥
बभूव पाण्डुवदना वृष्टेववयमिस्थिता॥६५॥
एतस्मिन्नैवकालेतु गौभिलारव्योमहामुनिः॥
आजगामनृपंद्रष्टुं महातेजामहातपाः॥६६॥
तमागतमृषिंदृष्ट्वा नत्वाहैमरथोनृपः॥
तमभ्यर्च्य विधानेन पाद्यार्घासनवन्दनैः॥६७॥
उपवेश्यासनेदिव्ये श्रान्तंवीक्ष्यचतंमुनिं॥
आनाययित्वातनयां पुनैरन्तिकमञ्जसा॥६८॥
उवाचप्राञ्जलिर्भूत्वा दुःखव्याकुलितेन्द्रियः॥
हैमरथः—
मुने! गौभिल! धर्मज्ञ! सर्वशास्त्रविशारद!॥६९॥
पश्येमां मालिनीनाम्नीं तनयां ममसुव्रत!॥
सैयं गृहीतानलिनाभेतालेन दुरात्मना॥७०॥
कृशांगी खिन्नवदना त्वामद्यशरणंगता॥
एनामुद्धरधर्मज्ञ! कृपया मुनिसत्तम!॥७१॥
यथा भेतालपतिना विमुक्तास्यादियैसुता॥
तथाकुरुष्व भद्रन्ते सर्वज्ञ! करुणानिधे!॥७२॥
इतिस्यवचःश्रुत्वामुनीन्द्रः चेरभूभुजः॥
ध्यात्वाचिरमुवाचेदं नृपेन्द्रं हृष्टमानसः॥७३॥
गौभिलः—
शृणुष्व नृपशार्दूल! वक्ष्यामिवचनंहितं॥
तत्कुरुष्व नृपश्रेष्ठ! त्वत्सुतार्तिविनाशनं॥७४॥
अस्तिक्षेत्रं महापुण्यं दक्षिणेपाण्डुमण्डले॥
यत्पुन्नागवनंनाम्ना प्रवदन्ति मनीषिणः॥७५॥
शूलतीर्थमितिख्यातं तस्मिन्नस्तिसरोवरं॥
तत्तीर्थे निमज्यासौ कन्याभेतालपीडिता॥७६॥

तत्क्षणादेव मुक्तास्या द्भूतप्रेतविनाशने ॥
स्नानं येतत्र कुर्वन्ति भूतभेतालपीडिताः ॥६६॥
पूतनागणकूष्माण्ड प्रेतराक्षसबाधिताः ॥
तेसर्वे तत्क्षणादेव मुच्यन्तेमनुजोत्तमाः ॥६८॥
तस्मात्त्वमपि राजेन्द्र! कन्यामादाय सत्वरं ॥
गच्छ पुन्नागगहनं पुण्यं परमपावनं ॥६९॥
यत्राऽस्तेपावनंलिंगं भुवनेश्वरसंज्ञितं ॥
अनयाकन्ययातत्रकारयस्वाभिषेचनं ॥७०॥
सेयंतत्रविमुक्तास्या द्वेतालेनबलीयसा ॥
इत्युक्त्वागौतमोमौनी प्रययौ स्वाश्रमंप्रति ॥७१॥
इतितस्यवचः श्रुत्वाराजासन्तुष्टमानसः ॥
प्रययौ कन्ययासार्धं तत्पुन्नागवनं प्रति ॥७२॥
तदागम्यनृपः क्षेत्रं पुण्यं दुष्कर्मनाशनं ॥
भक्त्यापरमया राजा नत्वातं भुवनेश्वरं ॥७३॥
पुण्यं तीर्थवरंदृष्ट्वा प्रारब्धंनिचारणं ॥
स्नानं तत्रमहातीर्थे कारयामास कन्यया ॥७४॥
यदाचकारसास्नानं तीर्थे शूलाभिधेद्विजाः! ॥
तदानीमेवभेतालस्तांत्यक्त्वा वरवर्णिनीं ॥७५॥
विमुच्यभेतालतनुंक्रूरां तत्तीर्थवैभवात् ॥
प्रययौदिव्यदेहस्सन्स्वर्गंदिव्यविमानगः ॥७६॥
अथभेतालपतिनाविमुक्तामालिनीद्विजाः ॥
प्राप्तेशौ राहुनिर्मुक्ता पूर्णचन्द्रकलेवसा ॥७७॥
ततोराजास्वयं तीर्थे निमज्ज्य निखिलार्थदे ॥
संपूज्यभुवनाधीशमाजगामात्मनः पुरं ॥७८॥
इतीदंकथितं पुण्य मितिहासं पुरातनं ॥
यइदंशृणुयान्नित्यमारख्यान मघनाशनं ॥
नबाध्यतेऽसौ भेताल पूतनाप्रेतराक्षसैः ॥७९॥

इतिश्रीस्कान्दे महापुराणे ति शूलपुरमाहात्म्ये
ति शूलतीर्थमहिमानुवर्णनंनाम षष्ठोऽध्यायः ॥६॥

सप्तमोऽध्यायः॥

॥ पापहरी महिमानुवर्णनं॥

ऋषयः—

उक्तमेतत्त्वयासूत! शूल तीर्थस्यवै भवं॥
अधुनावद कौण्डिन्यनद्या माहात्म्यमुत्तमं॥१॥
तत्स्नानं कृतवतां नराणां किंफलंभवेत्॥
कथंकौण्डिन्यनद्यारव्या साभूद्भूमौ सरिद्वरा॥२॥
तत्सर्वं महाभाग! ब्रूह्यस्मान्सुसमागतान्॥
इतिसंचोदितस्तत्र मुनिभिस्सूतनन्दनः॥३॥
कौण्डिन्यनद्याश्चरितं वक्तुं समुपचक्रमे॥

श्रीसूतः—

पुराऽभून्मुनिशार्दूलः कौण्डिन्यस्योमहातपाः॥४॥
सत्यवादी सदा मौनी सर्वज्ञस्सज्जनप्रियः॥
वेदवेदांगतत्वज्ञ स्सर्वशास्त्रार्थकोविदः॥५॥
जितेन्द्रियोजितक्रोधस्सदासन्तुष्टमानसः॥
दयापरो महातेजा दान्तस्सर्वगुणाकरः॥६॥
शिवभक्तायणीर्विद्वान्शिवपूजापरायणः॥
पञ्चाक्षरीजपपरः पञ्चयज्ञपरायणः॥७॥
रुद्राक्षमालाभरण स्सदाश्रीरुद्रजापकः॥
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्रोज्वलमस्तकः॥८॥
वल्कलाजिनवीतांगो जटामण्डलमण्डितः॥
इत्थंसर्वगुणोपेतः कौण्डिन्यः पापवर्जितः॥९॥
समेत्यपुन्नागवनं तत्पुराग्नेयदेशतः॥
मुनिस्तत्राश्रमंकृत्वा तपस्तेपेसुदुष्करं॥१०॥
सतुपञ्चाग्निमध्यस्थो ग्रीष्मकालेमहातपाः॥
वर्षास्वाकाशगोनित्यं शिशिरेसलिलाप्लुतः॥११॥
मासोपवासंविधिवच्चक्रे चान्द्रायणं ततः॥
कृच्छ्रातिकृच्छ्रपाराक तप्तसान्तपनादिभिः॥१२॥

अन्यैश्चनियमैर्विप्रः कालंनिन्येमहातपाः॥
पञ्चयज्ञपरोनित्यमागतार्थिपूजकः॥१३॥
ध्यायन्हृदिमहादेवं त्रिणेत्रं चन्द्रशेखरं॥
गिरीशमगजानाथमनन्तमजरंविभुं॥१४॥
सच्चिदानन्दनिलयं सर्वभूतान्तरस्थितं॥
एवंतपश्चकारासौ मोक्षेच्छुर्वत्सरायुतं॥१५॥
अथदेवः प्रसन्नात्मा तपसातस्यशंकरः॥
प्रादुरासीत्पुरस्तस्य देव्या सुरगणैस्सह॥१६॥
समागम्य मुनिश्रेष्ठं तपोराशिमकल्मषं॥
इदमाह महादेवः प्रसन्नः पार्वतीपतिः॥१७॥
ईश्वरः—
परितुष्टोऽस्मि भद्रंते कौण्डिन्य! तपसातव॥
वरंवृणीष्वमत्तस्त्वं हृदियत्कांक्षितंत्वया॥१८॥
अस्मिन्क्षेत्रे तपः पुण्ये कृतंशीघ्रंफलिष्यति॥
सर्वेषु पुण्यक्षेत्रेषु मदीयेषु महामुने!॥१९॥
विशिष्टतममेतद्धि क्षेत्रं प्रियकरं मम॥
यथाहमत्तवत्स्यामि क्षेत्रेनित्यंसहांबया॥२०॥
तथा नान्यत्तवत्स्यामि काशीश्रीपर्वतादिषु॥
यद्यदत्तकृतं विप्र! तपोदानं शिवार्चनं॥२१॥
कृतादन्यत्र तद्विप्र! सहस्रगुणितं भवेत्॥
इतीश्वरवचः श्रुत्वा समुनिर्गिरिजापतिं॥२२॥
विलोक्य दूरतस्तस्य विबुधेन्द्रगणस्तुतं।
भक्त्यापरमयायुक्तः प्रणम्यस्तुतिमातनोत्॥२३॥
कौण्डिन्यः—
मुरवैरिधातृपुरुहूतसेवितं
तरुणेन्दुरत्नरुचिरमणीयमस्तकं॥
करुणामृतार्द्रहृदयान्तरं सदा
गिरिशं त्रिशूलनगरीपतिंभजे॥२४॥

॥ ७ ॥

कृपयातुयस्य कमलासनः पुरा
सृजतिस्वयं सकलजीवसन्ततिं॥
हरिरुत्तमायुधमवाप तं सदा
गिरिशं त्रिशूलनगरीपतिंभजे॥२५॥

निगमाश्व भूरथमथाजसारथिं
फणिशिञ्जिनीयुतनगेन्द्रकार्मुकं॥
हरिबाणपातितपुरत्रयं शिवं
गिरिशं त्रिशूलनगरीपतिंभजे॥२६॥

विधुसूर्यवह्निनयनं विदांप्रियं
मथितांधकासुरमुदग्रपौरुषं॥
सुदतीमनोज्ञसुकुमारविग्रहं
गिरिशं त्रिशूलनगरीपतिंभजे॥२७॥

गरलं समुद्रमथनोद्भवंगले
प्रणिधाय नीलमणिचिह्नभातनोत॥
यइदंजगत्सृजतिपातिहन्ति तं
गिरिशंत्रिशूलनगरीपतिंभजे॥२८॥

सुरसिद्धसेवितजटाविभूषणं
करिराजचर्मकलितांगमीश्वरं॥
हरिशक्रमुख्यसुरनाथसेवितं
गिरिशं त्रिशूलनगरीपतिंभजे॥२९॥

रजताद्रिमध्यशिखरान्तवासिनं
भुजगेन्द्रभूषणमजंनिरञ्जनं॥
गजवक्त्रशक्तिधरसेवितंसदा
गिरिशं त्रिशूलनगरीपतिंभजे॥३०॥

गणनाथमद्रिगणनाथजाप्रियं
प्रणतार्तिभञ्जनकरं त्रिलोचनं॥

हतदक्षाध्वरं रिपक्षमदनं
गिरिशं तिशूलनगरीपतिंभजे॥ ३१॥

श्रीसूतः—
इतिस्तुत्वासकौण्डिन्यस्त्वभिवाद्यकृताञ्जलिः।
ववन्दे वरं महादेवा द्वरदा द्भक्तवत्सलात्॥ ३२॥
कौण्डिन्यः—
यदि तुष्टस्सुराधीश! वरं मेदातुमिच्छसि॥
देहिमेमोक्षमतुलं जरामरणवर्जितं॥ ३३॥
त्वत्प्रसादाज्जगन्नाथ! गच्छाम्यिपरमांगतिं॥
इतिसंप्रार्थितस्तेन कौण्डिन्येनमहेश्वरः॥ ३४॥
उवाच तं मुनिवरं भगवान्भक्तवत्सलः॥
ईश्वरः—
ज्ञानं विनानसर्वेषां विद्यते मोक्षसाधनं॥ ३५॥
तस्मात्त्वंज्ञानममलं साधयस्वमहामुने!॥
तस्मादलमहाभाग! क्लेशैः प्रियकरैमम॥ ३६॥
अभ्यसन्विमलंज्ञानं तिष्ठत्वं मामनुस्मरन्॥
तदातवशरीरान्ते मुने! मुक्तिर्भविष्यति॥ ३७॥
इत्युक्त्वाभगवान्शंभु र्मुनिं ज्वलिततेजसं॥
उचे गंभीरयावाचा कृपार्द्रीकृतमानसः॥ ३८॥
ईश्वरः—
तुष्टोस्मितवविप्रेन्द्र! स्तोत्रेणतपसापिच॥
पुनरन्यं वरंतुभ्यं दास्यामिमनसेप्सितं॥ ३९॥
तस्माद्वृणीष्वभूयोपि वरं यत्तोऽभिकांक्षितं॥
इत्याज्ञप्तस्सदेवेन शंभुनाऽभीष्टदायिना॥ ४०॥
वरं ववृते पुनस्तस्मात्स्वाभीष्टं हृष्टमानसः॥
कौण्डिन्यः—
यद्यन्यममराधीश! दातुमिच्छसिमेवरं॥ ४१॥
आनयस्वातदेवेश! गंगां कलुषनाशिनीं॥
स्नानार्थंमंभसादेवीं समागच्छतुशंकर!॥ ४२॥
इदमेववरं देव! दातुमर्हतिमेभवान्॥

42 कुर्वन्गंगांभसि स्नानं मनसा त्वामनुस्मरन्॥४३॥
अतैवाहं निवत्स्यामि शरीरपतनावधि॥
इतीशः प्रार्थितस्तेन सगंगानयनंप्रति॥४४॥
स्वकपर्दस्थितांगंगामाजुहाव हरस्तदा॥
ईश्वरः—
गच्छ गंगे! महापुण्ये कौण्डिन्याश्रमंप्रति॥४५॥
आज्ञया मम सुश्रोणि! समागच्छातिवेगतः॥
इति गंगासमाहूता शंकरेण सरिद्वरा॥४६॥
चतुर्मुखाच्च गवरोदायावत्तिवेगतः॥
पश्चिमाद्दागता तत्र प्राङ्मुखीपापनोदका॥४७॥
लिंगस्यागनेयदिग्भागे साकौण्डिन्याश्रमंप्रति॥
पुरस्तादृषदेवस्य गतादक्षिणगामिनी॥४८॥
तामागतां नदीं दृष्ट्वा गंगां गंगाधरस्स्वयं॥
तमालोक्य सकौण्डिन्य मिदमाहपिनाकधृक्॥४९॥
ईश्वरः—
पश्यकौण्डिन्य! विप्रेन्द्र! मयाऽऽनीतामिमांनदीं॥
गंगामखिललोकाना मतिनिलाघविनाशिनीं॥५०॥
सेयंदेवी जगत्पूज्या जाह्नवीसरिदुत्तमा॥
यस्मात्त्वदर्थमानीता कौण्डिन्यारव्याततोभवेत्॥५१॥
सद्यःपापहरायस्मा न्नाम्नासापापहारिणी॥
महापातकसंघांश्च उपपातकसंचयान्॥५२॥
यं हरतीयतस्तस्मा त्कौण्डिन्यापापहारिणी॥
अस्यां दक्षिणवाहिन्यांयस्स्नानंममसन्निधौ॥५३॥
करोति मनुजःपापैः मुच्यते मुनिपुंगव!॥
मदाज्ञयाऽत्रतीर्थानि सर्वाणि विविधानिच॥५४॥
निवसन्तिमहाभाग! सर्वदाममसन्निधौ॥
अतस्स्नात्वामहानद्यां यःकुर्यात्पितृतर्पणं॥५५॥

सपैतृकाद्दृणान्मुक्तो भविष्यति नरोत्तमः ॥
पितॄनुद्दिश्य यैः श्राद्धं क्रियतेऽत्र नरोत्तमैः ॥५६॥
तद्वृद्धिश्राद्धसदृशं भविष्यति न संशयः ॥
मत्पुरस्तादियं देवी स्थिता दक्षिणगामिनी ॥५७॥
महापापप्रहृद्रोगि विनाशायति निश्चयं ॥
कौण्डिन्यनद्यास्सलिले यस्स्नात्वा सेवतेशिवं ॥५८॥
सर्वपापविनिर्मुक्तस्समे मन्दिरमश्नुते ॥
इतिदत्वा वरंदेवः कौण्डिन्याय महेश्वरः ॥५९॥
स्तूयमानस्सुरगणैरन्तर्धानगतोऽभवत् ॥
सतां दृष्ट्वा मुनिश्रेष्ठस्सर्वपापनिवारिणीं ॥६०॥
महेश्वरजटाजूटादागतामकलोदकां ॥
प्रहृष्टस्तज्जलेस्नात्वा सन्तर्प्य पितृदेवताः ॥६१॥
कृतकृत्यमिवात्मानंमेने देवप्रसादतः ॥
इत्थंसादेवदेवेन शङ्करेणशंभुना ॥ ६२ ॥
समानीतातु कौण्डिन्या सर्वेषां हितकारणात् ॥
सानदीसकलाघौघान्निवारयति सर्वदा ॥ ६३ ॥
स्नातॄणां तस्यलिंगस्य पुरोदक्षिणगामिनी ॥
सापापहारिणीत्येव विश्रुता भुविनामतः ॥ ६४ ॥
भुवनेश्वरकालीशं मध्यगासा महानदी ॥
दर्शनादेवमर्त्यानां सर्वपापनिवारिणी ॥ ६५ ॥
महापातकयुक्तोवा युक्तोवा सर्वपातकैः ॥
तत्र स्नानेन सकलैर्मुक्तो भवतिपातकैः ॥ ६६ ॥
चतुर्दश्यांतथाष्टम्यां पूर्णिमायामथादिने ॥
उपरागेव्यतीपाते संक्रान्तौ द्वादशीदिने ॥ ६७ ॥
स्नात्वातत्रयथाशक्ति दत्वा मुक्तोभविष्यति ॥
इहजन्मनियत्पापं पूर्वजन्मनियत्कृतं ॥ ६८ ॥
तत्सर्वं नाशमायाति कौण्डिन्यास्स्नानमात्रतः ॥
ज्ञानेनयत्कृतंपाप मज्ञानेनचयत्कृतं ॥ ६९ ॥

तत्सर्वं पातकंविप्राः! स्नानमात्रेणनश्यति॥
यत्कृतं मनसावाचा कायेनापिचयत्कृतं॥७०॥
तत्सर्वमत्रस्नानृणांतत्क्षणादेव नश्यति॥
सर्वनिन्दाकृतंपापं गुरुनिन्दाकृतंचयत्॥७१॥
मातृनिन्दाकृतंपापं पितृनिन्दाकृतंचयत्॥
शिवनिन्दाकृतंपापं विष्णुनिन्दाकृतं तथा॥७२॥
तत्सर्वं नाशमायाति कौण्डिन्यास्नानमात्रतः॥
नानयासदृशीलोके पापहानिर्धृतेनदी॥७३॥
सर्वमंगलदानित्यं सर्वदुःखनिकृन्तनी॥
सर्वैश्वर्यप्रदानित्यं सर्वकामार्थदायिनी॥७४॥
पुत्रपौत्रप्रदानित्यं पुरुषार्थप्रदायिनी॥
तस्यांनिमज्ज्यसरिति कालीशाभुवनेश्वरौ॥
भक्त्यायस्सेवतेनित्यं सकृतार्थोभविष्यति॥७५॥

अत्राप्युदाहरन्तीममितिहासं पुरातनं।
आस्तेजनपदःकश्चिन्मालवान्योगहोतले॥
यवगोधूमशाल्यादि नवधान्यसमृद्धिमान्।
प्रासादैर्नेकभूमिःपूर्णस्रवन्तीशतसंकुलः॥
आरामाम्रवणोपेतो नानाविधमहापणः।
वाजिवारणसंपूर्णो वारनारीगणावृतः॥
[redacted]ऽस्मिन्मालवेदेशेराजाशत्रुमोत्सोमशीलवान्।
रूपलावण्यसंपन्न[redacted]स्त्रीणांकामविवर्द्धनः॥
सामन्तमौलिमाणिक्य नीराजितपदोलुब्धः।
एवंगुणस्सभूपालस्तंदेशंपर्यपालयत॥
सतुसुन्दररूपोपि प्रकृत्यानास्तिकोऽभवत।
नास्तिक्याद्वेदशास्त्रादि प्रामाण्यंस नेमन्यते।
नधर्मो नाप्यधर्मोवा नस्वर्गो नरकोपि न।
अग्निहोत्रं त्रयोवेदा स्त्रिदण्डं भस्मकुण्ठनं।

बुद्धिपौरुषहीनानां जीविकासंप्रकल्पिता॥
धर्माधर्मौ यदिस्यातां गवाश्वादिवरूपिणौ।
प्रत्यक्षंनकथंदृश्यौ लवसन्तौ ततोमतौ॥
स्त्रीपुंल्लातिं विनासातिर्ब्राह्मणादिर्न विद्यते।
प्रत्यक्षमेकमेवातो मानं नैवेतरद्भवेत्॥

पुरापालंवदेशेश स्सोमक्षीतलसंज्ञकः॥
श्वेतकुष्ठेनमहता दुर्निवार्येणपीडितः॥६५॥
तद्व्याधिपरिहारार्थं ययौगंगांमहीपतिः॥
तत्रश्रुत्वापहर्त्रिभ्यः स्नात्वापापहरींनदीं॥६६॥
गंगातोपिविशिष्टांतां बुध्वाऽयंसोमशीतलः॥
त्रिशूलपुरमागत्यपद्भ्यांराजाप्रहृष्टधीः॥६८॥
तत्रापापहरीनद्यां स्नानंकृत्वाविधानतः॥
मुक्तःकुष्ठेनरोगेण विज्वरः प्रमुमोदसः॥६९॥
संपूज्यभुवनेशंतं भक्त्यापरमयायुतः॥
पूर्ववत्सुन्दरांगस्सन्जगामस्वपुरंप्रति॥७०॥
इतिकौण्डिन्यसरितोमाहात्म्यं कथितंमया॥
श्रुत्वैतत्पापनिकरैर्मुक्तोभवतिमानवः॥७१॥
यइदंशृणुयान्नित्यंमाहात्म्यमघनाशनं॥
सतत्तदीजलस्नानफलमाप्नोतिनिश्चितं॥७२॥

इतिश्रीस्कान्दे महापुराणे त्रिशूलपुरमाहात्म्ये पापहरीमहिमानुवर्णनंनाम सप्तमोऽध्यायः॥७॥

॥ शिवमहापुराणे

अष्टमोऽध्यायः ॥

॥ कण्वतीर्थमहिमानुवर्णनं ॥

ऋषयः —

उक्तमेतत्त्वयासूत! कौण्डिन्यायाश्रमे वैभवं ॥
श्रुतं तवमुखांभोज निस्सृतं दुरितापहं ॥१॥
वदाधुनामहाभाग! कण्वतीर्थस्यवैभवं ॥
कण्वतीर्थमितिख्यातिः केनवाकर्मणाऽभवत् ॥२॥
किंवा फलं भवेत्सूत! तत्स्नानं प्रकुर्वतां ॥
इतिपृष्टश्शौनकाद्यै र्मुनिभिर्वेदपारगैः ॥३॥
उवाचसूतस्सन्तोषादिदं वचनमुत्तमं ॥

श्रीसूतः —

वक्ष्यामि मुनयस्सर्वे! कण्वतीर्थस्यवैभवं ॥४॥
शृणुध्वं सावधानेन श्रवणादखिलार्थदं ॥
वामदेवस्यशिष्योऽभूत्पुरा कण्वाह्वयोमुनिः ॥५॥
सर्वशास्त्रार्थकुशलस्सर्वधर्मपरायणः ॥
सत्यवादीजितक्रोधश्शान्तस्सर्वगुणाकरः ॥६॥
निर्ममोनिरहंकारोनिर्वैरस्सर्वजन्तुषु ॥
दान्तस्स्वकर्मनिरतश्शिवभक्तियुतस्सदा ॥७॥
सकदाचिद्गुरुंस्वस्यवामदेवं महामुनिं ॥
तपःकर्तुमनाःकण्व इदं वचनमब्रवीत् ॥८॥

कण्वः —

वामदेव! महाभाग! कामशासनपूजित! ॥
अहं तपश्चरिष्यामि शंकरप्रीतयेऽधुना ॥९॥
अनुग्रहात्तवमुने! मुक्तिं यास्यामि पुष्कलां ॥
तत्तपःकर्तुकामस्य शिष्यस्यमम सोप्रतं ॥१०॥
आचक्ष्वमुनिशार्दूल! तपोवनमनुत्तमं ॥

यस्मिन्क्षेत्रे तपस्सिद्धिर्भविष्यतिममौजसा॥११॥
तादृशंक्षेत्रमतुलं ब्रूहि सर्वज्ञ सत्वरं॥
इत्याकर्ण्यवचस्तस्य कण्वस्यमुनिपुंगवः॥१२॥
वामदेवो महादेवः प्रोवाचमधुराक्षरं॥
वामदेवः—
शृणुष्व भद्र! तत्क्षेत्रं परमं पापनाशनं॥१३॥
यत्पुन्नागवनंनाम प्रवदन्तिमहर्षयः॥
तपस्सिद्धिकरं नृणामचिरादेव मोक्षदं॥१४॥
सर्वपापहरंसद्यस्सर्वदुःखविनाशनं॥
तत्रास्तिपावनंलिंगं भुवनेश्वरसंज्ञितं॥१५॥
देवमानवगंधर्वविद्याधरनिषेवितं॥
मुक्तिप्रदं मुमुक्षूणां मुनिसंघनिषेवितं॥१६॥
सर्वाभीष्टप्रदं वत्स! सर्वपापप्रणाशनं॥
गच्छ तत्क्षेत्रममलं तपःकर्तुंसमाहितः॥१७॥
नतत्क्षेत्रसमंक्षेत्रं विद्यतेभुवनत्रये॥
लिंगशूलनगरैश्चैति ख्यातंभुविसुव्रत!॥१८॥
तत्पूर्वदेशेविमले पवित्रेपापनाशने॥
तपःकुरुमहाभाग! कृत्वातीर्थमनुत्तमं॥१९॥
गुरुणैवमनुज्ञातः कण्वस्सन्तुष्टमानसः॥
नत्वागुरुपदांभोजे प्रायात्पुन्नागकाननं॥२०॥
तत्प्राप्यानुपमंक्षेत्रं दृष्ट्वा तंभुवनेश्वरं॥
लिंगशूलतीर्थे सस्नात्वासंपूज्यविधिनाशिवं॥२१॥
ईशानकोणेतस्यलिंगस्य प्राग्देशेनिर्मलेमुनिः॥
कृत्वातीर्थंमहापुण्यं स्वनाम्नासर्वसिद्धिदं॥२२॥
तत्तीरेलिंगममलंप्रतिष्ठाप्यविधानतः॥
तपश्चकारतत्तीरे कण्वः कामारिमर्चयन्॥२३॥
जपन्पञ्चाक्षरंमन्त्रं ध्यायन्हृदिसदाशिवं॥
सत्यं विज्ञानमानन्दं निर्गुणंप्रकृतेः परं॥२४॥

॥ ८ ॥

अनन्तमजरं नित्यं मन्नन्दानन्दभाजनं॥
पर्वतपक्षकारासौ निर्ममोविगतस्पृहः॥२५॥
दिव्यवर्षशतं विद्वान्कण्वः कलुषनाशनं॥
अथदेवः प्रसन्नात्मा भुवनेश्वरसंज्ञितः॥२६॥
आजग्मुर्मालकण्वस्य वरदातुं वरप्रदः॥
सनकादिमहायोगिसेवितस्सच्चिदात्मकः॥२८॥
समागम्यमुनिंदृष्ट्वा भगवान्भक्तवत्सलः॥
उवाचतंतपस्यन्तं कण्वं ध्यानपरायणं॥२८॥
ईश्वरः—
तुष्टोस्मितवकण्वाद्य तपसामहतामुने!॥
वरंवृणीष्व भद्रंते कांक्षितं हृदयेतव॥२९॥
इत्युक्तस्सपरेशेन वरदेन मुदान्वितः॥
विलोक्यपुरतोदेवं विविधामरसेवितं॥३०॥
प्रणिपत्याथसाष्टांगं अंबिकापतिमीश्वरं॥
शिरस्यञ्जलिमाधाय सानन्दजललोचनः॥३१॥
पुलकांकितगात्रोथ मानन्दांभोधिमध्यगः॥
उवाचदेवमीशानं स्तुत्वास्तोत्रैरनेकधा॥३२॥
कण्वः—
देवदेव!जगन्नाथ! भगवन्भक्तवत्सल!॥
सच्चिदानन्दसर्वेश! निरीशानन्दनिर्गुण!॥३३॥
यदिदेवः प्रसन्नोमेवरंदातुमिहागतः॥
देहिमे मोक्षममलं मुनीनांमुक्तिदोभवान्॥३४॥
इतीशः प्रार्थितस्तेन मुनीन्द्रेणमुमुक्षुणा॥
उवाचतंमहात्मानं कण्वं कामान्तकस्तदा॥३५॥
ईश्वरः—
तथास्तु मुनिशार्दूल! मुक्तिंदास्यामिसुव्रत!॥
यतद्देहावसानेत्वं शिष्योभूत्वामदन्तिके॥३६॥
अध्यात्मज्ञानममलं लब्ध्वा मोक्षमवाप्स्यसि॥
त्वयाकृतमिदंतीर्थं पुण्यं पापप्रणाशनं॥३७॥
कण्वतीर्थमितिख्यातिं गमिष्यतिमहीतले॥

येत्वयानिर्मितेतीर्थे स्नात्वाभक्तिसमन्विताः॥३८॥
कण्वेश्वराभिधंलिंगं सेवन्तेमनुजाभुवि॥
तेसर्वे पापनिर्मुक्ता यान्तिमत्परमंपदं॥३९॥
ज्ञानाज्ञानकृतैःपापैर्मनोवाक्कायसंभवैः॥
अत्रस्नानेनमनुजाः भविष्यन्तिविमोचिताः॥४०॥
अत्रस्नात्वा नरस्तीर्थेयःकुर्यात्पितृतर्पणं॥
पितरस्तस्यतुष्यन्ति सर्वेतत्कुलसंभवाः॥४१॥
उपरागेव्यतीपाते चतुर्दश्यष्टमीषुच॥
पूर्णिमायामयायांच संक्रान्तौ द्वादशादिने॥४२॥
येतत्स्नानं प्रकुर्वन्ति मुच्यन्तेतेऽखिलात्
पितृनुद्दिश्ययैश्श्राद्धं क्रियतेऽत्रनरोत्तमैः॥४३॥
तद्भवाश्राद्धमक्षयं भविष्यति मुनीश्वर!॥
इतिदत्वावरंतस्मै कण्वाय गिरिजापतिः॥
स्तूयमानस्सुरगणैः प्रायात्स्वस्यालयंहरः॥४४॥
इतीदंकीर्तितं पुण्यं माहात्म्यं परमाद्भुतं॥
कण्वतीर्थस्यविप्रेन्द्र! कथितंकांक्षितार्थदं॥४५॥
कीर्तयेद्यइदंपुण्यमध्यायंमुनिपुंगवाः॥
सकण्वतीर्थसलिले स्नानजंफलमाप्नुयात्॥४६॥
कण्वेननिर्मितंयस्मात्तीर्थमेतदघापहं॥
तस्मात्तत्तीर्थमघवत्कण्वतीर्थमितिश्रुतं॥४७॥
यइदंश्रावयेन्नित्यं ब्राह्मणानांमहात्मनां॥
सपुत्रपौत्रसहितः श्रियं प्राप्यसुखीभवेत्॥४८॥

यः पूर्वमत्युग्रतपस्समीक्ष्य
कण्वाय मुक्तिं प्रददौ वृषेशः॥
अनेकजन्मार्जितयोगगम्यं
वन्देतमार्तपुराधिनाथं॥४९॥

इतिश्रीस्कान्दे महापुराणे त्रिशूलपुरमाहात्म्ये
कण्वतीर्थमहिमानुवर्णनं नामाष्टमोऽध्यायः॥८॥

॥ लिङ्गपुराणे
नवमोऽध्यायः॥

॥ गालवतीर्थमहिमानुवर्णनं ॥

ऋषयः—
कण्वतीर्थस्य माहात्म्यं कथितं सूतजात्वया॥
अधुना गालवसरः कीर्तयस्वमहामते॥१॥

श्रीसूतः—
वक्ष्ये गालवतीर्थस्य वैभवं मुनिपुंगवाः।
विचित्रमद्भुतंक्षेत्र शृणुध्वमवधानतः॥२॥
पुरा गालवनामाभून्मुनीन्द्रोगन्धमादने॥
सतपःपरमास्थाय महादेवमतोषयत्॥३॥
तपस्यन्तमृषिंतत्र राक्षसःक्षुद्रबुद्धिमान्॥
क्षुधितःप्रतिजग्राह कर्णेकालान्तकोपमः॥४॥
गृहीतस्तेनबलिना राक्षसेनमुनीश्वरः॥
चुक्रोश शंकरप्राणसिंधुं भैरवंभीमविक्रमं॥५॥
संस्तुतस्तेनमुनिना नलोवाल्कालभैरवः॥
आविर्बभूव तस्याग्रे शूलटंकगदाधरः॥६॥
तमालोक्यमहाक्रूरं राक्षसंकालवर्तिनं॥
निर्भिद्य हृदयंतस्य शूलेनाथसराक्षसात्॥७॥
गालवं मोचयामास भगवान्भैरवोबली॥
सभैरवप्रसादेन तदाराक्षसमोचितः॥८॥
स तंकान्तगिरिंमत्वा नत्वा तंकालभैरवं॥
प्रापपुन्नागविपिनं तस्माद्वै गन्धमादनात्॥९॥
दृष्ट्वा प्रथितंक्षेत्रं गालवः पापनाशनं॥
उत्तरेभुवनेशस्य तत्रक्रोशद्वयान्तरे॥१०॥
विधायस्वाश्रमंविद्वान्मुनिशिष्यगणैर्वृतः॥
स्नानार्थमात्मनस्तत्र विशालंनिर्ममे सरः॥११॥
तत्तीरेऽसौ प्रतिष्ठाप्यस्वनाम्नालिंगमीश्वरं॥
ततोवसुचिरंकालं तपश्चक्रेसुदुष्करं॥१२॥
गालवेनयतस्तीर्थंनिर्मितंमुनिपुंगवाः॥

तद्गालवसरोनामविश्रुतं जगतीतले ॥१३॥
पुण्यं पवित्रमतुलं महापातकनाशनं॥
सर्वदुःखार्तिशमनं सर्वकामार्थसाधनं॥१४॥
योगालवसरस्तोये स्नातिपापौघसंयुतः॥
सनिर्धूयाखिलान्पापान्याति श्रीकण्ठसन्निधिं॥१५॥
जन्मान्तरेषुयत्पापमस्मिन्जन्मनियत्कृतं॥
तत्तद्गालवतीर्थस्य स्नानमात्रेण नश्यति॥१६॥
योगालवकृतेतीर्थे स्नात्वा तं गालवेश्वरं॥
सेवते भक्तिभावेन स कृतार्थो भविष्यति॥१७॥
स्नानं दानंजपो होम स्तर्पणं पैतृकंचयत्॥
तदन्यत्कृतात्पुण्यात्तत्तानन्तफलप्रदं॥१८॥
तस्माद्गालवतीर्थेन सर्वं भुवि नविद्यते॥
यत्र स्नात्वापुराकश्चिद्गन्धर्वश्शापबन्धनात्॥१९॥
राक्षसत्वाद्विमुक्तोऽभूत् बहुदुःखसमन्वितात्॥

ऋषयः—

सगन्धर्वः कस्यशापाद्राक्षसत्वमुपागतः॥२०॥
[redacted]थंगालवकृतेतीर्थे स्नात्वा विमोचितः॥
एतत्सर्वं महाभाग! वदविस्तरशोमुने!॥२१॥

श्रीसूतः—

पुराचित्रलघुर्नाम गन्धर्वश्चित्ररूपवान्॥
चित्तबाहुसुतः श्रीमां[redacted]सीदतुलकान्तिमान्॥२२॥
प[redacted]पनेषुणका[redacted]न्त श्शारदिन्दुनिभाननः॥
मूर्तिमानिवकन्दर्प स्सर्वाभरणभूषितः॥२३॥
सकदाचिद्ध्रुवं प्राप्यविमानवरमाश्रितः॥
चचारपरितस्तत्र वनेषुमधुगन्धिषु॥२४॥
तत्रतत्रचरन्श्रीमान्गन्धर्वतनयोयुवा॥
[redacted]

मुद्गलस्य मुनेः पुण्यमाययावाश्रमान्तिकं॥२५॥
सततदृश्यशोभ्यं सरःकमलमण्डितं॥
कुमुदोत्पलसंकीर्णं सौगन्धिकविराजितं॥२६॥
कलहंससमाकीर्णं चक्रवाकोपशोभितं॥
वीचिमालासमायुक्तं निर्मलांबुसमाश्रयं॥२७॥
तीरस्थद्रुमसंच्छन्नं शाकुन्तकलकूजितं॥
परितः कुन्दमन्दारमाधवी कुंजशोभितं॥२८॥
पूगपुन्नागजंबीर कदलीवनराजितं॥
तत्तीरंसमुपागम्य स गन्धर्ववरस्स्वयं॥२९॥
ददर्शतत्रगच्छन्तीं मुद्गलस्यमुनेस्सुतां॥
सुकुमारीं पृथुश्रोणीं सुप्रभांनामनामतः॥३०॥
शातकुंभनिभाकारां शारदेन्दुनिभाननां॥
शातपत्रेक्षणां सुभ्रूं नीलकुन्तलमूर्द्धजां॥३१॥
उत्तुंगस्तनभारार्तां वृत्तमध्यां विलासिनीं॥
वन्याभरणसंपन्नां वनमालाविराजितां॥३२॥
चूतप्रवालैर्मृदुलैःकृतकर्णावतंसकां॥
ततस्ततविचिन्वन्तीं पुष्पाणिसुरभीणिच॥३३॥
सर्वाभरणसंपन्नां [illegible] ॥
नैपुण्यान्निर्मितांधाता नेत्रानन्दकरींनृणां॥३४॥
दृष्ट्वातांभद्रनाविष्ट स्सगन्धर्वकुलाधमः॥
विस्मृत्यात्मानमपरंकलुषीकृतलोचनः॥३५॥
जग्राहतांवरारोहां मूर्द्धजेषु पतिव्रतां॥
साग्रहीताबलवतां विमानमधिरोपितां॥३६॥
चुक्रोशतातताते[illegible]ति उच्चैर्गंभीरयागिरा॥
सुप्रभा——
तात! मुद्गल! धर्मज्ञ! गन्धर्वोऽयं दुराशयः॥३७॥
मांविमानेसमारोप्य यातिचारितदूषकः॥
अस्माद्दुरात्मनः पापाद्गन्धर्वान्मोचयाद्यमां॥३८॥
इत्येवंकरुणांवाचं सुप्रभायानिशम्यसः॥

मुद्गलः परमक्रोधान्निर्गम्यस्वाश्रमात्तदा॥३९॥
ददर्शदिविगन्धर्वं विमानवरमाश्रितं॥
गृहीत्वासुप्रभांतन्वीं गच्छन्तमतिवेगतः॥४०॥
पलायमानंतंदृष्ट्वा मुनिश्चिन्तापरोऽभवत्॥
विमानंस्तंभयामास मन्त्रशक्त्या महामुनिः॥४१॥
स्तंभीकृतपथवेगेन तत्तदाक्षणविद्यया॥
सतमाकर्षयामास मन्त्रविद्याविशारदः॥४२॥
कृष्टस्स मुनिशार्दूल मन्त्रपाशैर्दुरात्मवान्॥
विमानेनसमागच्छन्मुनेरन्तिकमञ्जसा॥४३॥
तमन्तिकगतंदृष्ट्वासविमानं सप्रभं॥
मुद्गलस्तमुवाचेदंकोपेनज्वलिताननः॥४४॥
मुद्गलः—
यस्माद्राक्षसवत्क्रूर! त्वंगन्धर्वकुलाधम!॥
चोरयित्वापमत्सुतांकरिष्यसिपलायनं॥४५॥
तस्मात्त्वंक्रूर! दुर्बुद्धे! राक्षसः क्रूरदर्शनः॥
सहस्रंवत्सरान्घोरान्चरिष्यसिमहीतले॥४६॥
निर्दयोनिष्कृपःक्रूरः निर्जलोनिर्गताशनः॥
शीतवातपरिक्लिष्टःक्लेशभाग्नोदिवानिशं॥४७॥
मत्प्रसादात्तपश्श्रीमान्गालवस्त्वांसमुद्धरेत्॥
दयापरोमहातेजाः पुण्येपुन्नागकानने॥४८॥
इतिशप्त्वासगन्धर्वं मुद्गलोमुनिपुंगवः॥
आश्वासयित्वातनयामादायस्वालयंयौ॥४९॥
सोपिमुद्गलशापेन गन्धर्वोराक्षसोऽभवत्॥
अतिक्रूरोमहाकायः कालाञ्जननिभाकृतिः॥५०॥
दंष्ट्राकरालवदनः प्रलंबरदनच्छदः॥
रक्ताक्षःकोपनश्चण्डोरक्तश्मश्रुशिरोरुहः॥५१॥
इत्थंघोरतनुर्भूत्वा शापाच्चित्रलुप्तस्तदा॥
हाहेतिप्रलपन्घोरं क्षुद्व्याधिप्रपीडितः॥५२॥
दैशाद्दैशंभ्रमन्दुःखात्तुल्यांद्रुल्यंवनाद्वनं॥
ततःकालेनमहतापापपुन्नागकानने॥५३॥

54

यत्रास्ते गालवः श्रीमान्मुनिः कारुण्यसागरः ॥
सत्याश्रममासाद्य गालवस्य महात्मनः ॥ ५४ ॥
ददर्श विपलं तीर्थं तत्र गालवनिर्मितं ॥
विशालं विविधांभोजं वीचिमालासमाकुलं ॥ ५५ ॥
विचित्रविहगारावं विचित्रद्रुमशोभितं ॥
तत्तीरेसमुपासीनं मुनिभिः परिवेष्टितं ॥ ५६ ॥
ददर्श गालवं तत्रं शोधयन्तं द्विजन्मनां ॥
एतस्मिन्नन्तरेतत्र वायुस्तत्तीर्थबिन्दुभिः ॥ ५७ ॥
तमश्यामिश्रं चकार राक्षसं क्रूरचेतनं ॥
सतेन वायुनास्पृष्टस्तीर्थं भोजनिषेविना ॥ ५८ ॥
तत्क्षणाद्विगतक्रूरस्तत्क्षेत्रस्य च वैभवात् ॥
प्रसन्नहृदयो भोजस्स्मरन्पूर्वकृताशुभं ॥ ५९ ॥
प्रोवाच गालवमुनिं नत्वाबद्धाञ्जलिस्तदा ॥

राक्षसः—

आत्मपापाग्नितप्तं मां दुःखितं क्रूरमानसं ॥ ६० ॥
अस्माद्दुःखांबुधेर्विप्रः पाहिमांकृपयाऽधुना ॥
इतिसंप्रार्थितस्तेन भगवान्गालवोमुनिः ॥ ६१ ॥
ज्ञात्वाज्ञानेनतत्कर्म प्रोवाचेदं सराक्षसं ॥

गालवः—

जानामि त्वां महाभाग दुष्कर्मविकलीकृतं ॥ ६२ ॥
त्वं हिचित्राङ्गभोनाम गन्धर्वकुलसंभवः ॥
मुद्गलस्य मुनेश्शापाद्राक्षसत्वमुपागतः ॥ ६३ ॥
तत्सुताकचसंस्पर्शी पापेनेदमुपस्थितं ॥
दुःखजातं महाघोरं दुर्निवारं सुरैरपि ॥ ६४ ॥
माभैषीस्त्वं महाभाग ह्येतस्माद्दुःखसागरात् ॥
अहमुत्तारयिष्यामि सत्यमेतद्ब्रवीमितो ॥ ६५ ॥
अस्मिंस्तीर्थे महापुण्ये कुरुस्नानंममाज्ञया ॥
तेन दुष्कर्मजं पापं तवैतद्विनशिष्यति ॥ ६६ ॥
इत्युक्त्वासमुनिस्तस्मै ददावनुमतिं तदा ॥

स्नातुं तत्तीर्थसलिले प्रारब्धस्त्रनिवारणे ॥६६॥
मुनेरथाज्ञायासोपि स्नानमत्र चकार च ।
पावनेतीर्थसलिले शुभे गालवनिर्मिते ॥६८॥
निमज्ज्य तस्मिन्सलिलेऽति पुण्ये
सराक्षसस्संप्रति नष्टपापः ॥
विमुच्यतद्राक्षसरूपमाशु
गन्धर्वरूपंनिजमापसद्यः ॥६९॥
सदिव्यदेहं प्रतिपद्यचित्रं
विमानरत्नं प्रतिगृह्य नैजं ॥
बभूव हृष्टस्स्वकुलांगनाभिः
समागताभिस्सहितस्तदानीं ॥७०॥
सपुष्पवर्षैरभिवर्ष्यमाणः
सुरांगनाभिस्सुकुमारदेहः ॥
प्रणम्यतंगालवमुग्रतेजसं
उवाचवाक्यं मुदितस्सुरेशः ॥७१॥
चित्रलक्षजः—
अद्यैवमुक्तोऽस्मि मुनीन्द्रशापा-
दस्मिन्निमज्ज्यांबुनि पापनाशे ॥
अनुग्रहात्तेनिजरूपमेव
संप्राप्तवानस्मि नमोस्तुतुभ्यं ॥७२॥
यत्तीर्थसमंतीर्थं विद्यतेभुविनापरं ॥
यत्तमेस्नानमात्रेण राक्षसत्वंविनाशितं ॥७३॥
अतराक्षसभेतालपूतनाकामिनीगणैः ॥
ग्रस्तास्स्नानेनमुच्यन्ते नात्रकार्याविचारणा ॥७४॥
ब्रह्मराक्षसकूष्माण्ड भूतप्रेतप्रपीडिताः ॥
मुच्यन्ते मुनिशार्दूलतीर्थेऽस्मिन्नभिषेचनात् ॥७५॥
तेजसातवविप्रेन्द्र! मोचितोऽहं महाभयात् ॥
नमोऽस्तुते मुनिश्रेष्ठ! गमिष्येस्वपुरंप्रति ॥७६॥
इत्युक्त्वाऽथनमस्कृत्वा गालवायमहात्मने ।

ययौ गन्धर्वनगरं प्रणम्य भुवनेश्वरं ॥६६॥
इत्थं चित्राङ्गजस्तत्र स्नात्वा शापाद्विमोचितः ॥
पुण्येपुण्यागविपिने भुवनेशप्रसादतः ॥६८॥
इदं यः कीर्तयेत्पुण्यमाख्यानमपवारणं ॥
सपापान्मुच्यतेसद्यः क्रूरान्नानाविधादपि ॥६९॥
रक्षोविमोचनं नाम कीर्तयेद्यइदं नरः ॥
तस्यराक्षसंपीडा जायतेनकदाचन ॥७०॥
इतिश्रीस्कान्दे महापुराणे लिङ्गलपुरमाहात्म्ये
गालवतीर्थमहिमानुवर्णनंनाम नवमोऽध्यायः ॥९॥

॥ लिङ्गलपुरमाहात्म्ये
दशमोऽध्यायः ॥
॥ कोट्यादितीर्थमहिमानुवर्णनं ॥

श्रीसूतः —
तेषुपञ्चमतीर्थस्य कोटितीर्थस्यभूसुराः ॥
वक्ष्ये माहात्म्यमधुना महापातकनाशनं ॥१॥
पुराऽभूत्पाण्डुतनयः कीर्तिमानर्जुनाह्वयः ॥
सतीर्थयात्रान्याजेन धर्मपुत्रप्रचोदितः ॥२॥
लिङ्गलपुरान्निर्ययौ धीमान्द्रष्टुं तीर्थानि भूतले ॥
स्नात्वासर्वतीर्थेषु पुण्येषुविधिनांऽभसि ॥३॥
चित्रांगदां समुद्वाह्य सपाण्ड्यनृपतेस्सुतां ॥
तयासहसमागम्य कोटितीर्थसंस्थिते ॥४॥
कल्याणसुन्दरंनत्वा पूजयित्वाविधानतः ॥
तदासस्मारगाण्डीवं तीर्थनिर्माणहेतवे ॥५॥
तदागतमयंप्रेक्ष्य स्वायुधंपाण्डुनन्दनः ॥
गाण्डीवकीर्त्यानिर्श्रिय भूमिं भूमीश्वराग्रतः ॥६॥

निर्ममे तीर्थममलं सर्वपापहरं वरं॥
यद्दर्शनधनुष्कोट्या निर्मितंतीर्थमुत्तमं॥ ७ ॥
कोटितीर्थमितिख्यातं सर्वलोकेषु विश्रुतं॥
सर्वपापप्रशमनं सर्वमंगलदायकं॥ ८ ॥
सर्वैश्वर्यप्रदं नृणां मज्जतामातिपावनं॥
स्नानं यत्प्रकुर्वन्ति कोटितीर्थेनरोत्तमाः॥ ९ ॥
मुच्यन्तेतेऽचिरेणैव पापसंघातपंकिलात्॥
ज्ञानाज्ञानकृतं पापं मनोवाक्कायसंभवं॥ १० ॥
तत्सर्वं नाशमायाति कोटितीर्थनिषेवणात्॥
आजन्मसंचितंपापं पूर्वजन्मनियत्कृतं॥ ११ ॥
तत्सर्वं नाशमायानि कोटितीर्थनिषेवणात्॥
नैतत्तीर्थसमंतीर्थं विद्यते भुवनत्रये॥ १२ ॥
तस्मादत्रविशेषेण स्नातव्यं भुविमानवैः॥
इतिवः कथितं पुण्यं कोटितीर्थस्यवैभवं॥ १३ ॥
भूमितीर्थस्यवक्ष्यामि माहात्म्यमधुनाद्विजाः॥
पुराभूमिर्महादेव्या शप्तागिरिजया रुषा॥ १४ ॥
तत्कोपशान्त्यैप्रययौ भुजागवनमुत्तमं॥
कर्तुकामातपस्तीव्रं पार्वत्याःप्रियकाम्यया॥ १५ ॥
अग्निगम्याथसादेवी भूमीश्वरमहास्थलं॥
स्वनाम्नातीर्थममलंविधायविधिनाम्हो॥ १६ ॥
तपश्चकारसुमहद्दुश्चरं बहुवत्सरं॥
तपसातेनसुप्रीता देवी माणिक्यमालिनी॥ १७ ॥
प्रत्यक्षीभूयवसुधामिदमाह महेश्वरी॥
देवी—
परितुष्टाऽस्मिवसुधे! तपसातवसुव्रते!॥
मन्युर्मगतादेवि! वरंवरय मेदिनि!॥ १८ ॥
इतिदेव्यावचःश्रुत्वा धरणीलोकधारिणी॥
प्रणिपत्याद्रितनयामिदमाह कृताञ्जलिः॥ १९ ॥
भूमिदेवी—

नमस्ते गिरिराजेन्द्रकन्यके! नलिनेक्षणे!॥
नमः कामारिवामार्धदेहपीठसमाश्रये!॥२०॥
नमः कुमारहेरंबवामदक्षिणशोभिते॥
नमस्ते देवि! भक्तानामभीष्टफलदायिनि!॥२१॥
नमोलक्ष्मीशचीवाणीपूजितांघ्रिसरोरुहे!॥
नमस्तेसर्वजननि! नमश्शंकरवल्लभे!॥२२॥
नमोऽखर्वापराधीनभानसे! भवहारिणि!॥
नमस्ते दिव्यमाणिक्यभूषितामलकन्धरे!॥२३॥
नमस्तेहेमवलयमकुटांगदशोभिते॥
कुरुविन्दमणिप्रोतन्मंजुपुरांघ्रिविराजिते॥२४॥
नमस्तेसर्वलोकानां शरण्ये! गिरिसंभवे॥
अपराधंमयादेवि! कृतमज्ञानतश्शिवे!॥२५॥
क्षमस्वशोभनापांगि! कृपयास्वीकुरुष्वमां॥
देहिमेतनयान्देवि! सर्वसंपत्प्रदायिनि!॥२६॥
इतिस्तुतातदादेवी धरण्यालोकनायकी॥
मुदापरमयायुक्ता मन्दस्मेरमनोहरा॥२७॥
तामुवाचसमाश्लिष्य वसुधामंबिकांमुदा॥
देवी—
तथास्तुतवदेवेशि! वसुधे! लोकपावनि!॥२८॥
अद्यप्रभृतितेपुत्रा भविष्यन्ति मदाज्ञया॥
प्रतिप्राप्स्यसिलोकेऽस्मिन्महतीं पुत्रसंभवां॥२९॥
त्वयाकृतमिदं तीर्थं भूमितीर्थमितिश्रुतं॥
ख्यातिमेष्यतिलोकेस्मिन्पुण्यं पापप्रणाशनं॥३०॥
अस्मिंस्तीर्थेऽभिषेकंयः करोतिशुचिमानवः॥
सर्वसंपत्समायुक्तः प्राप्नोतिमममन्दिरं॥३१॥
इतितस्यैवरंदत्वावसुधायैसुरेश्वरी॥
जगामादृश्यतांतत्र सर्वलोकनमस्कृता॥३२॥
सैयंलब्धवराभूमिर्मुदिताभुवनेश्वरं॥
नत्वादेवींगिरिसुतां प्रययौस्वहितंस्थलं॥३३॥

यस्माद्भूमिकृतं तीर्थं भुवनेश्वरसन्निधौ॥
तद्भूमितीर्थमित्येव प्रथितं भुवनत्रये॥३४॥
कथिता भूमितीर्थस्य कथा कलुषनाशिनी॥
अधुनाज्ञानतीर्थस्य महिमानं वदाम्यहं॥३५॥
पश्चिमे भूमिनाथस्य यत्तीर्थं लोकविश्रुतं॥
तज्ज्ञानतीर्थं मुनयः कीर्तितं भुवि विश्रुतं॥३६॥
यस्मिन्निमज्जतां नृणां जायते ज्ञानसन्ततिः॥
ज्ञानतीर्थे नरो यस्तु निमज्जति विधानतः॥३७॥
सोऽज्ञानपटलं क्षित्वा ज्ञानपूर्णो भविष्यति॥
जन्ममृत्युकरज्ञानहीनाः भ्रान्ता मूढान्धकास्तुये॥३८॥
तत्तद्दोषैर्विमुच्यन्ते तेऽप्यत्र स्नानवैभवात्॥
ज्ञानतीर्थसमं तीर्थं नभूतं न भविष्यति॥३९॥
यत्र स्नात्वा पुराकश्चिद्गन्धर्वश्शापसंभवात्॥
शुकरूपाद्विमुक्तोऽभूत्तेनकिं समतां व्रजेत्॥४०॥
पुरागन्धर्वतनयश्चित्ररूप इतिश्रुतः॥
अभूद्रूपगुणोपेतस्सर्वाभरणभूषितः॥४१॥
सचैकदाऽऽश्रमं प्राप [redacted]निशाकरमहामुनेः॥
ददर्शतत्र मुनिं समाप्तनियमव्रतं॥४२॥
वन्यं नैवारपाहारं संपाद्यविधिना तदा॥
भोक्तुकामं महाभागं कृत्वाऽतिथिसमर्चनं॥४३॥
दृष्ट्वासमुनिशार्दूलं भोक्तुकामंक्षुधाकुलं॥
शुकरूपं समास्थाय कामरूपी दुरात्मवान्॥४४॥
अवलेपेन तस्याग्रे वर्तमानमथोदनं॥
अदूषयत्सबहुधा कौतुकाविष्टचेतनः॥४५॥
पक्षैः पादप्रहारैश्च तुण्डेनचसुराधमः॥
चिक्षेपबहुधाग्रे गन्धर्वः कालचोदितः॥४६॥
तदन्नं विफलीभूतं दृष्ट्वामुनिवरस्तदा॥
किमेतदितिसंचिंत्यज्ञात्वागन्धर्वचेष्टितं॥४७॥

तिकालज्ञस्तमालोक्य कोपेनज्वलिताधरः॥
शशाप तंदुरात्मानं कलुषीकृतलोचनः॥४८॥
निशाकरः—
भोः कामस्यमेयस्माद्गन्धर्वान्नमदूषयः॥
अवलेपस्यतेपापी फलमद्यभविष्यति॥४९॥
तंदेवास्तुतेमूढ! शुकरूपंसुराधम!॥५०॥
यद्रूपेणमदान्धस्त्वमन्नंदूषितवानसि॥
इतिशापस्समुनिनाचितरूपीतिदुःखितः॥५१॥
गतदर्पोनिरुत्साहस्तदानिर्वेदमाप्तवान्॥
प्रणम्यशिरसाभक्त्यानिशाकरमहामुनिं॥५२॥
प्रार्थयामासगन्धर्वस्तदामन्युप्रशान्तये॥
गन्धर्वः—
क्षमस्वमुनिशार्दूलाह्यपराधंमयाकृतं॥५३॥
विमोचनंकुरुष्वाद्य शापस्यास्यमुनीश्वरः॥
इतिसंप्रार्थितस्तेन गन्धर्वेणनिशाकरः॥५४॥
कृपयातस्यपापस्य चक्रेशापविमोचनं॥
निशाकरः—
शृणुष्वचित्रसेनात्वं प्रवक्ष्यामिहितंतव॥५५॥
सप्तवर्षसहस्रान्ते शुकरूपंसमास्थितः॥
दैवात्पुन्नागगहनं गमिष्यसिमदाज्ञया॥५६॥
तत्रत्वं भूमिनाथस्य पत्न्यामेतीर्थमुत्तमं॥
द्रक्ष्यस्यज्ञानतिमिरभेदनंत्वघवारणं॥५७॥
तद्दर्शनात्तवज्ञानं भविष्यतिसुरोत्तम।॥
ततस्त्वं ज्ञानसहितस्स्नात्वामुक्तोभविष्यसि॥
इतिदत्त्वामुनिस्तस्यैतदाशापविमोचनं॥५८॥
ययौस्वनिलयं धीमान्धर्मात्मासनिशाकरः॥
गन्धर्वोपिमुनेश्शापात्सशुकत्वमुपागतः॥५९॥

दुःखेन महतायुक्त्या प्रचारपरितोमहीं॥ ६० ॥
अथवर्षसहस्रान्ते गन्धर्वश्शुकरूपधृक्॥
पुन्नागकाननंगन्धर्वः पापनाशनं॥ ६१॥
चरन्यदृच्छयातत्र पुण्ये पुन्नागकानने॥
ज्ञानतीर्थमगात्तत्र प्रारब्धाघनिकृन्तनं॥ ६२॥
तत्तीरंससमासाद्य स्थित्वाक्षणमसौखगः॥
महिम्नातस्यतीर्थस्य संस्मारप्राक्तनाशुभं॥ ६३॥
तदासंप्रागतज्ञानस्स्मृत्वा मुनिवचःखगः॥
तत्तीर्थवारिणि स्नानं चकारसुसमाहितः॥ ६४॥
तदानीमेव तज्जन्म त्यक्त्वा शोकमथात्मनः॥
गन्धर्वश्शापसंभूतं दिव्यरूपधरोऽभवत्॥ ६५॥
तदातत्रागतंतत्र मणिमालाविभूषितं॥
विमानंस्वर्णसंकाशं हेमजालविराजितं॥ ६६॥
आरुह्यतद्विमानाग्र्यं दिव्याभरणभूषितः॥
दिव्यगन्धानुलिप्तांगस्तप्तकाञ्चनकुण्डलः॥ ६७॥
विराजमानोवपुषा दिशोदशविराजयन्॥
स्तूयमानस्ससगन्धर्वैर्वेष्टितस्स्वांगनागणैः॥ ६८॥
प्रहृष्टवदनोभूत्वा चित्तरूपोतिविस्मितः॥
आलोक्यतत्तज्ज्ञानतीर्थमुवाचांबरमध्यगः॥ ६९॥
गन्धर्वः—
अहोतीर्थस्यमहिमा वर्ण्यतेकेनवाभुवि॥
यस्यदर्शनमात्रान्मे सञ्जाताज्ञानसंततिः॥ ७०॥
निमज्ज्याहमहोऽद्यैव शुकदेहाद्विमोचितः॥
निशाकरमुनेश्शापादुत्पन्नादनिवारणात्॥ ७१॥
तस्मादेतत्समंतीर्थं विद्यतेभुविनापरं॥
अस्मिन्योमानवस्स्नानं कुरुतेभक्तिसंयुतः॥ ७२॥
ससर्वपापनिर्मुक्तो जायतेज्ञानवान्भुवि॥
इत्युक्त्वासोऽथगन्धर्वस्तत्तीर्थमभिवाद्यच॥ ७३॥
नत्वास्तुत्वाजगन्नाथं पूजयित्वाविधानतः॥
प्रययौस्वपुरं स्त्रीभिस्स्वाभिःपरिवृतस्स्वयं॥ ७४॥
कथितंतीर्थराजस्यज्ञानतीर्थस्यवैभवं॥
शृण्वन्तुब्रह्मतीर्थस्य माहात्म्यं मुनिपुंगवाः॥ ७५॥

॥११॥

इतिश्रीस्कान्देमहापुराणेत्रिशूलपुरमाहात्म्ये कोटितीर्थादिमहिमवर्णनंनाम दशमोऽध्यायः॥१०॥

॥त्रिशूलपुरमाहात्म्ये

एकादशोऽध्यायः॥

॥ब्रह्मादितीर्थमहिमानुवर्णनं॥

श्रीसूतः—

वक्ष्यामिब्रह्मणस्तीर्थं विचित्रफलदं नृणां॥
यच्छ्रुत्वामुच्यतेपापैर्घोरैर्विविधसंभवैः॥१॥
यदात्रिशूलनगरीनायकःपरमेश्वरः॥
लीलयापुरमुत्पाद्य प्रलयांभोधिसंप्लवात्॥२॥
अपालयत्पाण्ड्यनृपमिन्द्रद्युम्नंसुसेवितं॥
तदातद्देवदेवस्य द्रष्टुंकर्ममहाद्भुतं॥३॥
सत्यलोकात्समागम्य ब्रह्मामरगणैस्सह॥
विलोक्यतन्महाश्चर्यं देवदेवस्यशूलिनः॥४॥
पुरमाकाशगंदृष्ट्वा सजनंसन्नृपंतथा॥
देवदेवंनमस्कृत्य पार्वतीनायकंशिवं॥५॥
तत्रस्वनाम्नाविदधेतीर्थंलोकैकपावनं॥
आदायतज्जलंलिंगमभिषिच्यपितामहः॥६॥
पूजयामासविधिना नानाविभवविस्तरैः॥
स्तुत्वाबहुविधैस्स्तोत्रैस्स्वमगाल्लोकमुत्तमं॥७॥
ब्रह्मणानिर्मितंयस्मात्तीर्थं तत्तमहीतले॥
ब्रह्मतीर्थमितिख्यातं तद्भुवमहीतले॥८॥
तत्तीर्थंलोकविख्यातं पापाटविदवानलं॥
उत्तरेदेवदेवस्यतिष्ठत्यघनिवारणं॥९॥
तत्रस्नानंकृतवतां विनश्यन्त्यघसंचयाः॥
स्नात्वासरसिपुण्येच दत्वादानानिभूसुराः॥१०॥
दृष्ट्वादेवमुमानाथं कृतकृत्योभविष्यति॥
पुण्यकालेषुसर्वेषु संक्रान्तिग्रहणादिषु॥११॥

ब्रह्मतीर्थजलस्नानमनन्तफलदंभवेत्॥
तत्तीरे यत्कृतंकर्म जपहोमादिकंनरैः॥१२॥
तदसंख्येयफलदं भविष्यति मुनीश्वराः!॥
अथवक्ष्यामि पापघ्नं पावनंजगतीतले॥१३॥
यत्तिलोचनतीर्थाख्यं निश्रुतं मुनिपुंगवाः॥
सोऽपिकालीश्वरक्षेत्रात्कात्यासार्द्धंतिलोचनः॥१४॥
[illegible]ष्णुंसमायय्यौ देवमहिमानंमहाद्भुतं॥
दृष्ट्वातच्चरितं चित्रमसाधारणमैश्वरं॥१५॥
निर्ममेनिखिलत्रपघ्नं तीर्थमीशान्यदेशतः॥
तत्तीर्थवारिणालिंगमभिषिच्यत्रिलोचनं॥१६॥
तस्मैंतीर्थाय भगवान्ददौवरमनुत्तमं॥
यत्तत्स्वयंतिलैर्यत्नस्तीर्थमुत्तमपातनात्॥१७॥
तत्तिलोचनतीर्थाख्यं प्रसिद्धंजगतीतले॥
यस्तिलोचनतीर्थांबु सेवतेमनुजोत्तमः॥१८॥
नपुनर्जायतेभूमौ सोऽमृतत्वायकल्पते॥
यस्तिलोचनतोयांबुबिन्दुभिःप्रोक्षणंनरः॥१९॥
करोतितावन्मात्रेण मुच्यतेसर्वपातकैः॥
तत्तीर्थसलिलंयस्तु पिबेद्भक्तिसंयुतः॥२०॥
सपुमान्जननीस्तन्यं नपिबेन्मोक्षभाक्भवेत्॥
अथवातज्जलंमर्त्यस्स्पृशेत्पाणितलेनयः॥२१॥
सोपिपापविनिर्मुक्तः प्रयातिशिवमन्दिरं॥
तत्तीरेयस्तुदानानि करोतिकलुषापहे॥२२॥
ससर्वभोगसंयुक्तः कैलाससदनंव्रजेत्॥
तत्तीरेपितृयज्ञंयः करोतिमनुजोत्तमः॥२३॥
आकल्पंतस्यपितरः तुष्यन्तिमुनिपुंगवाः॥
तत्पूजाजपदानं क्रतुहोमादिकंचयत्॥२४॥
कृतंनरेणविधिना तत्कोटिगुणितंभवेत्॥
इतितिलोचनेतीर्थं कीर्तितं पुण्यवर्द्धनं॥२५॥
श्रुत्वेदंमानवः पापान्मुच्यतेमुनिपुंगवाः!॥

इतितस्मिन्महाक्षेत्रे तीर्थानि नवभूसुराः॥२५॥
कीर्तितानि महापापहारीणि मुनिपुंगवाः!॥
निमज्ज्यपुण्यतीर्थेषु पुण्यदेष्वघहारिषु॥२६॥
भूमिनाथंसमाराध्य देवीं कुसुममालिनीं॥
नत्वाकालीश्वरंदेवं जीवन्मुक्तोभविष्यति॥२७॥
त्रिशूलनगरीतुल्यं क्षेत्रं नास्तिमहीतले॥
भूमिनाथेनदेवेन तुल्योदेवो नदृश्यते॥
शिवतीर्थसमंतीर्थं नदृष्टं नश्रुतंभुवि॥२९॥
इतीदंकीर्तितं पुण्यं तीर्थमाहात्म्यमुत्तमं॥
मयाऽधुनापापहरं पावनंजगतीतले॥३०॥
यइदंतीर्थमाहात्म्यं श्रृणोतिनरसत्तमः॥
सचतीर्थस्नानफलमाप्नोतिभुविमानवः॥३१॥
यइदंश्रावयेन्नित्यं विप्राणांधर्मशालिनां॥
अन्येषामपिमर्त्यानांसतीर्थफलदोभवेत्॥३२॥

इतिश्रीस्कान्दे क्षेत्रखण्डे महापुराणे त्रिशूलपुर-माहात्म्ये ब्रह्मतीर्थादिमहिमवर्णनंनामएकादशो-ध्यायः॥११॥

॥ त्रिशूलपुरमाहात्म्ये
द्वादशोऽध्यायः॥
॥ शूलतीर्थप्राशस्त्यवर्णनं॥

ऋषयः—
सूताःसर्वपुराणज्ञ! सर्वशास्त्रविशारद!॥
भगवन्!वदतांश्रेष्ठ! करुणावरुणालय!॥१॥
आवर्तपुरमाहात्म्यमद्भुतंचातिपावनं॥
पुण्यदंसर्वपापघ्नं श्रीतनोलिंगरूपिणः॥२॥
भुक्तिमुक्तिप्रदंनृणां सर्वेष्टफलदायकं॥
शूलतीर्थादितीर्थानांमाहात्म्यंचपृथक्पृथक्॥३॥
तत्सर्वं शूलतीर्थस्य समंमन्यज्जगत्त्रये॥

नविद्यत इतिप्रोक्तंसर्वज्ञेनामितौजसा ॥ ४ ॥
सत्सु गंगादितीर्थेषु सर्वपापापहारिषु ॥
सर्वोत्कृष्टत्वमेतस्य तीर्थस्यासीत्कथंमुने! ॥ ५ ॥
तामेतां विचिकित्सांनश्छेत्तुमर्हसिसत्तम! ॥
तच्छ्रिदानस्यशुश्रूषा कौतुकंचपरंहिनः ॥ ६ ॥
तदाख्याहियथावृत्तं कृपातःभवतोयदि ॥
श्रीसूतः—
साधुसाधुमहाभागाः प्रश्नोयंलोकपावनः ॥ ७ ॥
यवद्भिरशास्त्रसारज्ञैः कृतोलोकहितेच्छया ॥
श्रूयतांतीर्थस्यगंगादितीर्थेभ्यःश्रैष्ठ्यमूर्जितं ॥ ८ ॥
निदानमत्रवक्ष्यामिबाहुमुद्धृत्यदक्षिणं ॥
शृण्वन्तुमुनयस्सर्वे सावधानेनचेतसा ॥ ९ ॥
अत्रस्नाताःस्वयंगंगा श्रीतनुंपरमेश्वरं ॥
अभ्यर्च्यसर्वपापेभ्योमुक्तात्माऽस्तेसदामुदा ॥ १० ॥
ऋषयः—
तीर्थानामुत्तमंतीर्थं त्रिषुलोकेषुविश्रुतं ॥
गंगेति तस्याःपावित्र्यं पापस्पर्शैःकथंभवेत् ॥ ११ ॥
कस्यहेतोःकदावाऽत्रस्नातंनिर्झरसिन्धुना ॥
तत्त्वंवदमुनिश्रेष्ठ! श्रोतुंकौतूहलंहिनः ॥ १२ ॥
श्रीसूतः—
हन्तवःकथयिष्यामि इतिहासंपुरातनं ॥
सर्वपापक्षयकरं लोकेसर्वार्थसाधनं ॥ १३ ॥
दिलीपराजस्यसुतो भगीरथइतिश्रुतः ॥
धर्मज्ञस्सत्यवाक्चैव प्रजापालनतत्परः ॥ १४ ॥
तेनराजर्षिवर्येणपितॄन्स्वर्गनिनीषया ॥
आनीताऽऽकाशगंगेयं रसातलमुपाविशत् ॥ १५ ॥
साकदाचिन्मुनिश्रेष्ठाः गंगालोकैकपावनी ॥
दिव्यरूपंसमास्थाय योषिद्भूत्वाऽतिसुन्दरी ॥ १६ ॥
गलद्बाष्पमुखीविघ्ना सत्यलोकमुपाविशत् ॥
तत्रदृष्ट्वा विधातारं सर्वलोकपितामहं ॥ १७ ॥

संपूज्यांघ्रियुगंगंगा चास्तौषीदब्जसंभवं॥
नमस्तेदेवदेवेश! नमस्तेभक्तवत्सल!॥१८॥
नमस्तेभूतपतये पितामह! नमोऽस्तुते॥
इतिस्तुत्वाऽऽत्मनिर्वेदं हेतुंतस्मैन्यवेदयत्॥१९॥
गंगा—
ब्रह्मन्! पापिनोलोके महापातकिनोपिच॥
स्वपातकविमुक्त्यर्थंमांस्पृशन्ति दिनेदिने॥२०॥
सर्वेषांसिमयिन्यस्यमुक्ताघौघा व्रजन्तितै॥
कावाऽस्यानिष्कृतिर्ब्रह्मंस्तदालोच्यवदाशुमे॥२१॥
इत्थंरुदन्त्यागंगायावाचमाकर्ण्यचात्मभूः॥
उवाचतामिदंवाक्यंकरुणाविष्टमानसः॥२२॥
ब्रह्मा—
माशुचोदेवि! हेगंगे! सर्वेषांशोकनाशनः॥
अधितिष्ठतिकैलासंईश्वरस्त्रिजगद्गुरुः॥२३॥
तत्रगत्वामहेशाय विज्ञाप्यार्तिमिमांशुभे!॥
दोषान्निवर्तयिष्यामि यदसौलोकशंकरः॥२४॥
इत्युक्त्वागंगयासार्द्धंकैलासंप्रययौविधिः॥
विष्णुनासहकैलासमगमद्गलशोकरः॥२५॥

इतिश्रीस्कान्दे महापुराणे क्षेत्रखण्डे त्रिशूलपुरमाहात्म्ये शूलतीर्थप्राशस्त्यवर्णनंनाम
द्वादशोऽध्यायः॥१२॥

॥त्रिशूलपुरमाहात्म्ये
त्रयोदशोऽध्यायः॥
॥शूलतीर्थप्राशस्त्यवर्णनं॥

श्रीसूतः—
अथगंगांपुरस्कृत्यसविष्णुः कमलासनः॥
नत्वासंप्रीणयामास भगवन्तमुमापतिं॥१॥
नमोनमस्तेऽखिललोकसाक्षिणे
परायदेवासुरवन्दितांघ्रये॥

शिवाय शर्वाय सुधांशु मौलये
हराय गौरी पतये नमो नमः ॥ २ ॥
सच्चिदानन्द रूपाय स्वाश्रिताभीष्टदायिने ।
नमोवेदान्तवेद्याय भूतानांपतये नमः ॥ ३ ॥
देवदेव! जगन्नाथ! पार्वतीप्रियशंकर! ॥
पाहीमामार्तितोगंगां सर्वलोकहितैषिणीं ॥ ४ ॥
इत्युक्तादणुवक्तत्र प्रणनामाऽब्जसंभवः ॥
तमुद्दीक्ष्याह भगवान्शंकरो लोकशंकरः ॥ ५ ॥
ईश्वरः—
सत्वरंकथ्यतांब्रह्मन्! नद्यागमनकारणं ॥
यथाभिलषितं सर्वं करोम्यत्तनसंशयः ॥ ६ ॥
ब्रह्मा—
सेयं सर्वानवद्यांगी सर्वलोकोपकारिणी ॥
गंगाप्रार्थयते स्वात्मन्यस्तसर्वाघनुत्तये ॥ ७ ॥
तल्लोपायस्तुवक्तव्यस्सर्वज्ञेन महात्मना ॥
पुनर्यतोऽब्जसाप्ताहारंहारं नृणामघं ॥ ८ ॥
ईश्वरः—
अहन्यहनि पापानि ब्रह्महत्यादिकान्यपि ॥
क्रियन्तेमनुजैस्सर्वैरात्माज्ञानविमोहितैः ॥ ९ ॥
तत्पापहरणायैषा गंगास्पृष्टा स्वयं मया ॥
दर्शनस्पर्शनाभ्यांच स्मरणेनच देहिनां ॥ १० ॥
हरतीयं सदाब्रह्मन्! दुरितानि मयाज्ञया ॥
तत्पापनुत्तयेऽवश्यं कार्याऽमुष्याहिनिष्कृतिः ॥ ११ ॥
त्वत्पापध्वंसनेगंगे! नास्त्युपायोऽपरोभुवि ॥
यत्पापानि नश्यन्ति तूलानीव हुताशने ॥ १२ ॥
तदुपायमहंवक्ष्ये सावधानमनाःशृणु ॥
महान्लोकोपकारश्च यतो भवति तत्कुरु ॥ १३ ॥
गंगा—
अनुगृह्णातु मांस्वामीशरणागतवत्सलः ॥
तदुपायोपदेशेन येनांजःपापमोचनं ॥ १४ ॥

68 ईश्वरः—

अस्तिभद्रेऽत्रनौक्षेत्रमावर्तपुरसंज्ञितं॥
हाटकास्यक्षेत्रतोयाग्यदिग्भागेयोजनत्रये॥१५॥
आतिहृद्यतमंयत्तत सान्निध्यंममसर्वदा॥
तत्पुरोभागतस्तीर्थंमस्तिमच्छूलनिर्मितं॥१६॥
शूलतीर्थमितिख्यातं तीर्थानामुत्तमोत्तमं॥
पातालगंगातोयाढ्यं सर्वाघौघविनाशनं॥१७॥
तत्प्रतिसमैं तीर्थैमाघमासेसुमध्यमे॥
पूर्णिमायांतुमध्याह्ने स्नात्वाश्रीतनुरूपिणं॥१८॥
लिंगमभ्यर्चयेथास्त्वं शुचिर्भूत्वावरानने॥
सर्वपापविनिर्मुक्ताभविष्यसिनसंशयः॥१९॥
इत्युक्त्वासतिरोऽधत्तकैलासपतिरीश्वरः॥
तदाप्रभृतिविप्रेन्द्राः!माघमासेऽनुवत्सरं॥२०॥
आवर्तनेतुराकायां आयातिसुरनिम्नगा॥
स्नानार्थमभिषेकार्थंश्रीतनोर्लिंगरूपिणः॥२१॥
शूलतीर्थं तदापूर्वपक्षेवैवर्द्धितोदकं॥
राकायांदर्शनंयावत्ततोयातिस्थलंस्वकं॥
तदाप्रभृतिविप्रेन्द्राः!क्षयंयातिदिनेदिने॥२२॥
तदेतद्भ्रमकंविप्राः! दृश्यतेप्रतिवत्सरं॥
तत्पूर्णिमायांयस्स्नातिशूलतीर्थेऽतिपावने॥२३॥
गंगास्नानफलंतस्य नात्रकार्याविचारणा॥
तृप्यन्तिपितरस्तस्य सकृत्स्नानेनतत्रवै॥२४॥
देवताश्चापिमोदन्तो सर्वश्रेयोभविष्यति॥
तदुक्तंश्रेष्ठमेतस्यतीर्थस्याखिलतीर्थतः॥२५॥
नास्तितत्सदृशंतीर्थंत्रिषुलोकेषुभूसुराः॥
तत्सर्वथाऽत्रतीर्थेऽस्मिन् स्नातव्यंमोक्षकांक्षिभिः॥२६॥

यइदं शृणुयान्नित्यं पठेद्वातीर्थवैभवं।
सर्वपापविनिर्मुक्तो युक्तिमुक्तीच्चविन्दति॥२८॥
इति श्रीस्कान्दे महापुराणे खेलखण्डे लिंशूलपुर-
माहात्म्ये शूलतीर्थमाहात्म्यवर्णनं नाम [redacted]
त्रयोदशोऽध्यायः॥१३॥

॥ लिंशूलपुरमाहात्म्ये
चतुर्दशोऽध्यायः॥
॥ पन्नगगिरिकथावर्णनम् ॥

ऋषयः—
पश्चिमेपन्नगगिरिर्यस्त्वयाकीर्तितःपुरा॥
पुन्नागकाननेसूत! भुवनेश्वरसंज्ञिते॥१॥
कथंपन्नगनामाऽभूत्कथंतद्ब्रूहितत्वतः॥
इतिपृष्टस्समुनिभिर्मुदितस्सूतनन्दनः॥२॥
प्रोवाचतत्कथांपुण्यांमुनीनांभावितात्मनां॥
श्रीसूतः—
वक्ष्यामिमुनयः! पुण्यं नागशैलस्यवैभवं॥३॥
श्रवणाद्यस्यपापानि विनश्यन्ति महान्तिच॥
पुराहालास्यनिलयस्तुन्दरेशोदयानिधिः॥४॥
यच्चकारस्वभक्तार्थं तद्ब्रवीमिमुनीश्वराः॥
अभूतांप्रथितौपूर्वं पाण्ड्यचोलनरेश्वरौ॥५॥
अन्योन्यवैरसंयुक्तावतिमात्सर्यसंकुलौ॥
सचोलःपाण्ड्यभूपालपीडितःक्रोधसंयुतः॥६॥
असमर्थस्तेनसार्द्धं युद्धं कर्तुं यदाऽभवत्॥
तदाकथंचिच्चोत्तव्यइतिनिश्चित्यमानसे॥७॥
समाहूयाथनृपतिर्नगनान्ब्राह्मणोत्तमान्॥
कारयामासतैर्दुष्टैराभिचारुकमाहृतं॥८॥
नग्नेनकृतहोमाग्नेर्मन्त्रशक्त्याद्विजैः॥
सर्पःकश्चित्समुत्तस्थौ महाकायोमहाबलः॥९॥
योजनद्वयविस्तारदेहःकोपसमाकुलः॥
तमुत्थितं महासर्पं महावेगं महाविषं॥१०॥

70

दृष्ट्वा नग्नान्नृपतिनासार्धमूचुः फणीश्वरं ॥
नग्नाः—
गच्छ शीघ्रमितस्सर्प! दक्षिणेपाण्ड्यमण्डलं ॥११॥
निहत्य तंनृपंशीघ्रं सराष्ट्रं पाण्ड्यनायकं ॥
विषज्वालासमायुक्तः फूत्कारैरतिभीषणः ॥१२॥
नाशयामासनिखिलान्पाण्ड्यान्पन्नगनायकः ॥
विषेणकांश्चिद्दष्ट्वा तु कांश्चित्पुच्छेनवेगतः ॥१३॥
कांश्चिच्छ्वासानिलैः क्रूरैर्नाशयामासनागराट् ॥
तच्छ्वासवायुनास्पृष्टास्सविषेण तदाजनाः ॥१४॥
निपतन्तिगतप्राणाः पाण्ड्यदेशनिवासिनः ॥
इत्थंसनाशयामास पन्नगः पापचेतनः ॥१५॥
तंनाशयन्तंसकलान्दृष्ट्वा पाण्ड्यमहीपतिः ॥
अनिवार्यबलंज्ञात्वातन्नागप्रगसन्निभं ॥१६॥
जेतव्यइतिनिश्चित्यदेवदेवप्रसादतः ॥
शिवभक्तस्सनृपतिश्शिवमेनहृदिस्मरन् ॥१७॥
आययावालयंशंभोर्हालास्यपुरवासिनः ॥
मन्दिरंसुन्दरेशस्य चन्द्रेखावतंसिनः ॥१८॥
समागम्यनृपश्रेष्ठः कृत्वाशिरसिचाञ्जलिं ॥
अभिवाद्यमहादेवं मालभाषेतिदुःखितः ॥१९॥
राजा—
देवदेवजगन्नाथ! भक्तवत्सल! शंकर! ॥
पार्वतीनाथभगवन्मांरक्षमांरक्षजाड्यात् ॥२०॥
इदं तवपुरंदेव! त्वद्भक्तजननपूरितं ॥
विनाशयतिनागोसौ विषज्वालासमाकुलः ॥२१॥
महाकायोमहावेगस्तद्भयान्मोचयाधुना ॥
त्वमेवनगरस्यास्य राजामातापितागुरुः ॥२२॥
त्वमेवदातादैवंच सखाबन्धुस्तथैवच ॥
तस्मात्पुरमिदंशंभो रक्षत्वंकृपयाऽधुना ॥२३॥

पुरासागरसंभूतं धृत्वाकण्ठे महाविषं॥
यथारक्षितवान्लोकं तथेदं पाहि मे पुरं॥२४॥
यथामृकण्डुतनयं कालपाशावपाशितं॥
कृतवान्मोचनं मृत्योस्तथामांपाहि पन्नगात्॥२५॥
इतीशमुक्त्वाप्रणिपत्यभक्त्या
सपाण्डुराट् भीतियुतान्तरात्मा॥
बद्धाञ्जलिर्बाष्पनिरुद्धनेत्रः
शंभोःप्रसादामृतमाचकांक्षे॥२६॥
अथावनीशार्तिमवेक्ष्यदेवः
कृपानिधिश्चन्द्रकलावतंसः॥
प्रोवाचवाचं भगवान्प्रसन्नः
तमात्मभक्तं सहपक्षिवर्गं॥२७॥
ईश्वरः—
मागच्छभीतिं नृप! नागजातां
स्वस्थान्तरात्मा भव पौरवर्गैः॥
निवारयिष्याम्यहमुग्रवेगं
निहत्य नागं तवभीतिमद्य॥२८॥
उक्त्वेतिराजानमुमापतिश्शिवः
पिनाकमादायगिरीन्द्रसारं॥
ससन्दधेबाणमुदग्रवेगं
तंगारुडास्त्रेण नियुज्यदेवः॥२९॥
सदेवबाणासननिस्सृतश्शरः
तार्क्ष्यास्त्रयुक्तश्श्वसनातिवेगः॥
आगत्यवेगादहिनाथदेहं
त्रिधासचिच्छेदतीव्रप्रदेशः॥३०॥
छिन्नस्तदाहिश्शिवसायकेन
पपातभूमौ निगतोग्रवीर्यः॥
तस्याग्रभागोह्यहिनायकस्य
पपातत्पश्चिमभूमिभागे॥३१॥

पुच्छस्तुपुन्नागवनेपपात
ईशाशृगच्छेदितपन्नगस्य॥
शृंगारआवर्त पुरेश्वरस्य
यःपश्चिमेतिष्ठतिशैलरूपः॥३२॥
इतिद्विजेन्द्राःकथितंसुपुण्यं
माहात्म्यमायुष्करमिष्टदंच॥
पापाद्रिपन्नगभूधरस्य
यद्यत्कृतंनश्यतिपापमत्र॥३३॥
सगिरिर्भुवनेशस्य पश्चिमेऽद्यापिवर्तते॥
दक्षिणोत्तरमायामो मानदण्डइवस्थितः॥३४॥
तस्मिन्महीधरेपुण्ये मुनयस्सुसमाहिताः॥
तपश्चरन्तिनियमात्प्रीत्यर्थंपार्वतीपतेः॥३५॥
तत्रकाश्यपजाबालिगौतमादिमुखाद्विजाः॥
वसन्तिनियताहाराः तपश्चरणकांक्षया॥३६॥
तस्मिन्गिरिवरेपुण्ये येवसन्तिनरोत्तमाः॥
तेसर्वेपापनिर्मुक्ताः प्रयान्तिशिवमन्दिरं॥३७॥
दृष्टमात्रेणपापानि सर्वाणिसनगोत्तमः॥
विविधानिहरत्याशु पावकस्समिधोयथा॥३८॥
इतिवःकथितंपुण्यं सर्वपापप्रणाशनं॥
पुन्नागवनमाहात्म्यं श्रवणादखिलेष्टदं॥३९॥
इदंयःशृणुयान्नित्यमाख्यानं परमाद्भुतं॥
सभुक्त्वाविपुलान्भोगानन्तेशिवपदंव्रजेत्॥४०॥
पुत्रकामस्तुयोमर्त्यःपुन्नागवनवैभवं॥
शृणोतिश्रद्धयायुक्तस्सप्राप्नोतिसुतंनरः॥४१॥
यःश्रीकामःशृणोतीदं तिरुचुलपुरवैभवं॥
सोऽखिलांश्रियमाप्नोति त्रिपुरारिप्रसादतः॥४२॥

कन्याकामस्तुयोनित्यंश्रुणुयादिदमुत्तमं॥
सकन्यांलभतेमर्त्यः कुलशीलसमन्वितां ॥४३॥
विद्याकामोभजेद्विद्यां धनकामोधनंभजेत्॥
वृष्टिकामोभजेद्वृष्टिं पशुकामोभजेत्पशून्॥४४॥
रूपकामोभजेद्रूपं जयकामोभजेज्जयं॥
पुष्टिकामोभजेत्पुष्टिं धृतिकामोभजेद्धृतिं॥४५॥
माहात्म्यमेतत्परमं श्रुणोतिसततंनरः॥
शास्त्राज्ञानकृतैःपापैर्मुच्यतेनात्रसंशयः॥४६॥
यन्मनस्संभवं पापं यत्पापंवचसाकृतं॥
पूर्वजन्मनि यत्पापमिहजन्मनियत्कृतं॥४७॥
बाल्येवयसियत्पापं कृतंयद्वार्द्धके नरैः॥
तत्सर्वमेतन्माहात्म्यश्रवणेनविनश्यति॥४८॥
माहात्म्यमेतत्पापघ्नं महादुःखनिवारणं॥
आयुष्यमारोग्यकरं मखिलाघविनाशनं॥४९॥
यशस्यं पुष्टिजननं आधिव्याधिनिवारणं॥
सर्वमंगलदं नृणां सर्वकामार्थसाधनं॥५०॥
इदंयःपठयेन्नित्यं शृणुयाद्वापुनांद्विजन्मनां॥
ससर्वकामसंयुक्तः पुत्रपौत्रसमन्वितः॥
भुक्त्वेह विविधान्भोगान्तेयातिहरालयं॥५१॥

इतीदमुक्त्वा भुवनेश्वरस्य
माहात्म्यमायुष्करमाशुसूतः॥
कृत्वाप्रणामं विधिवन्मुनीनां
बद्धाञ्जलिः प्रीतिमनापतत्तत्॥५२॥
श्रुत्वाथमाहात्म्यमिदं सुपुण्यं
मुनीश्वराः नैमिशकाननस्थाः॥
मुदापरिष्वज्यतमाशुसूतं
संपूजयामासुरुदारभावं॥५३॥

श्लो-८५५

इति श्रीस्कान्दे महापुराणे शोलखण्डे निशूलपुर-
माहात्म्ये पन्नगगिरिकथावर्णनं नाम
चतुर्दशोऽध्यायः॥१४॥

॥समाप्तमिदं निशूलपुरमाहात्म्यं॥
॥श्रीसांबशिवार्पणमस्तु॥

V.j.S

2.8-9-45

90 பிரஹ்ம வைவர்த்த மஹாபுராணத்தின் உத்தர பாகத்தில் சிவமோஹத்திரப் பிரசங்கத்தில், காளிபுரமாஹாத்மியத்துள்ள சுந்தர முர்த்தி சரித்திரம்

ஸூதமுநிவர்:- அரசர்திலகமாம் தேவவர்ம! எனக்கு வியக்கப் பெற்ற அற்புதமாய காளிச்வர லீலையைக் கேட்டும் உனக்கு வேட்கை தணியவில்லை. இச்சரித்திரமானதால் நீ தன்னியனாய்; நானும் தன்னியனானேன். பரந்து வுலகிற் சாலவும் சிவபக்தர்களாய்த் திகழுபவர் எவ்வருணாதிரமத்தவரேனும், அல்லது வருணாச்ரமங்களைப் பிறந்தவரேனும், நிஷ்களாயினும், முனிவராயினும், வேறெவராயினும் அவர்களிடமே காளிதன் லீலையாடுகிறாள். அவர்களுக்கே அவள் கூட்டுண்பட்டவள். வ்வள்ளவல்லி சமேத சிவபிரான் பக்தபராதீனனையால், சிவபக்தர்கள் விரும்பி ருத்ராக்ஷங்களணிந்து, உற்சாகத்துடன் அவனை வணங்கி ஏத்தி நினைந்து பாடுகின்றனர்.

தன் குழந்தைகளின் மழலையைக் கேட்க விரும்பும் தந்தைபோல், அன்பர் சொல் மறி ஓம் வியவாம் காளிச்சன் வ்வள்ளவல்லியைமேதனையத் தன்னை நாடித் தானே முன்வருகால், காளிச்வரத்தினின்று புறப்பட்டுச் சென்று, பிரான்பணிந்து மனம் சிவபக்தி சிகாமணியுளம் சிந்தி சேர்த்தினையப் பாடுவித்தான். அதனை நிதியாய்ப் பக்தர்களுக்கப்பரிகரித்த புண்ய காளிச்வரமடைந்து வ்வள்ளவல்லியுடன் விஸ்வாதர்ய சென்று, சாஸ்த்ரவிதிகளாய் மாறிய பலதெரர்களை சாபவிமோசனஞ் செய்து ரக்ஷித்து, அங்கே தானும் சுகநிதி கொண்டுள்ளான். வணங்குவார் துயரதற்றும் காளிச்வரனான், தினமொருகால் காளிபுரத்தினின்று வ்வள்ளவல்லி மஹாதேவியுடன் இச்சரித்தைச் சென்று தன் பக்தனைக் காத்து தினமும் அங்கே திருவிளையாடுகின்றான். இவ்வாறு, ஆச்சர்ய விதிதி சரித்தம் காளிச்சன் நோதிவனத்தினாறபானினும், அவ்வளவே பலவிடத்தும் அனைபுகழ்ந்துள்ளது

தேவவர்மா:- யோகிராஜனே சுமந்துவே! யாவருமுணர் கிருபாநிதியே! காளிச்வரனது அற்புதகதையை விரித்தும் நிகரறு புலவ! சுந்தரனென்னும் நாமம் வணைக்கப்பெற்ற அந்தணன் யார்? எவ்விடத்துவர்? எவரது புத்திரர்? காளிச்வரன் எவ்வகைசென்று எவ்விடத்

தே அவரைத் தன்னைப் பாடச் செய்தான் உரிமையோடு! [illegible]
வேண்டும், ஆலய பொருளும் எனக்கு விரயம் புரிக்கவேண்டும்.

லாமந்து:- அரசே! கேட்டமாந்ரிரிஞ் கொண்டவனுக்கும்
அவனது வரலாற்றைக் கேள். திருவளருரென்று, சோழநாட்டை
அலங்கரிக்கும் ஆச்சரியகரமான பெரிய, தூய சிவதேஜஸ்ஸினால்
அனைவரும் சான்றோனான் அவனே தியாகராஜனிடத்தும் பெயருடன்
தோன்றினான். அவனே சான்றாண்மையும் அன்புநிறைந்த கனையக்கண்ட
வனும், வேதாந்தநிலை மிகுதமிழ்பயிலும், தியாகராஜனிடம் பேரன்பு
மூண்டவனுமான ஒர் விப்பிரோத்தமன் இருந்தான். அவனுக்குப் பிறந்து
வந்த மூன்றெனனிர் சுந்தரமூர்த்தி. ஒருகால், மாசற்ற கன்னியின்
மேனிய யுவேசனது பிரதிபிம்பமே சுந்தர ரூபமிற்று. சினந்தநிய
தூதனும், தூளாதனும், ஒருக்காதனும், சிவபாதவிருதனும், சிவனே
சிரேஷ்டனும், சிவயோகாங்கியனானந்தனும், சிவசேஷ்டியார்
ணிரையாளும், சிவபத்தர் சேர்க்கையாளும், ஏகசிவ பாவனையாளும்,
சிவசேஷ் தூசிப்பதே நிஷ்டையெனக் கொண்டதனாலும் சுந்தரன் சுந்தரன்
(அழகியவர்) ஆனான். எவர் மகனின்பத் துய்க்க விரும்பினாலும்,
அன்பர்சிந்தனையை அனுசரித்தும் வியூகமும் தியாகராஜ ஆசிர்வாதமும்
சென்றதே, அற்புதமய சிவவல்லபரூபம் சுந்தரத் தெய்வமையை
உனக்கு வல்லவர் யாரே யுளர்?

சிறுவயதிலேயே, ஒருகால், புவி முழுதும் தூள்ள சிவ
க்ஷேத்திரங்களுக்குச் சென்று, அவ்விடங்களிலுள்ள சிவபூர்த்திகளை
பணிந்து துதித்து நிச்சயித்து, ஊடை முழுவதும் விபூதி ருத்திராக்ஷ
சிவனாங்களினி எழுதுற்ற பலசிவபக்தர்களுடன் புறப்பட்டான். தினச
யெல்லும் சிவகதையின்உயர்தியானம் உயர்ந்தொலிக்கப் பரமபாவ
வமாய கேதாரிலிங்கமே அவர்களே தரிசித்துக்கொண்டு சென்ற
சுந்தரர் நகரதரிசனமண்டபநடுவே யிலகும் சுதரிசிபிம்பம் போல்
சிவபக்தசங்கதரிசனம் மிகவும் பிரகாசித்தார். சிவஸ்தலங்களுக்குச்
செல்லும், புண்யதீர்த்தங்களில் நீராடலும், சிவதேர்த்தியைத்தரி
சித்து வாஸஸ்தி பதிகம் பாடித் துதிப்பதனால், இவ்வாறு, சுந்தர
மூர்த்தி மேன்மேலும் சென்று, கொண்டபுண்யதரிசனங்களினால்
தியமேனி தாளன் தூயமாலையணிவதுடன் சுந்தரி என்னும்
அழகிறைவியும் திருக்கல்யாண மடைந்தார். அவ்வேளை

தெய்வத்தன்மையால் மிகவும் முதிர்ச்சி பெற்று, தெய்வத்திலிருந்து பிரிந்து சுந்தரர் நல்லன்பர் நிலையை அடைந்தபின் அவர் தெய்வப் புன்மை நீங்கி, நிறைவுக்கண்களை முழுமையாகப் பெற்று, முதிர்ந்த ஞானத்தையும் தெளிவையும் தந்திருப்பதால் பரவையார் இல்லத்தில் பாடியபின், திருக்கூட்டத்துடன் தெய்வத்தன்மை மன்னிடைக் சென்றார். தொண்டுள்ளத்தினின்ற வடகரையில் வன்னி அம்பலத்தில் சுந்தரர் கூடல் சூழப்பட்டு சுகமாய் புறப்படும்போது, உச்சியிற் பொன்மலர்க் கொத்துடன் கூடிய பொற்றிரம்புக்கையையுடைய பொற்றூணை மாலை சூட்டிய சுடிய மொனின் சிறந்தனை, மன்னிக்கப்பாதுகை மீதானின் பாதாரவிந்த விணையனைக் காலைப் பணிவதற்கு சூடனானியனை, நன்கலைந்த கமலம் போலிருக்கும் எழின் முகத்தனை, உலகெலாம் யாருங்காணுவையுடிவழகுடன் வெள்ளாவல்லியின் உள்ளத்தைக் கொள்ளைகொண்டோனும் காளீச்சுரமமர்ந்து ரன் அவரது கனவிலே தோன்றினான். அங்கமெலாம் அழகிய அவ்வடதாரணை புலகிக்கொண்ட சுந்தரர் கனவிலேயே அவனை நோக்கி "நீயார், எங்கிருப்பவன்? இங்கே நீ வந்த காரியத்தைத் கூறினால், செய்வோம் அழகனே! அதை நான் செய்கிறோம் என்று சென்றார். அதற்கு அவன், "இங்கிருந்து வடகிழக்கில் நின்று யோஜனை தூரத்திற்கப்பால் நீலாதிவனமென்ற ஒயர் பெற்ற நிகரிலாத சிவதீர்த்தம் இருக்கிறது. அவ்விடமிருப்பவன்யான் உன்னிடம் வந்த காரியமோ வெனில், தெய்வத்தன்மை ஆ! நீ சிவஸ்தலங்கள் எல்லாம் சென்று, அவ்வவ் விடத்து மூர்த்திகளைத் தரிசித்துப் பதிகம் பாடி வருகிறாயே; என்னையும் நீ தரிசனம் பாடு" என்று சுந்தரருக்கு விடையளித்தான். தானவிக் கிவ்வற்புதத்தைக் கண்ட சுந்தரர் விழிப்புற்று, ஆச்சரியப் பரவசப்புடன் உடனேயெழுந்து, கைகால் கழுவித் திருநீறணிந்து, செம்பனார்தியைப் பிரணவமாகியது யாரென்று யோசித்து, அந்தானவனை நினைத்தபடியே, அப்பொழுதே "தொண்டருள்ளத் தொடியும்" எனத் தொடங்கும் பதிகத்தால் உலகெலாம் புகழும் அழகனை அவனை காளியிடனைத் துதித்தார். காலையிலெழுந்து, திருக்கூட்டத்துடன் சுந்தரர் விரைந்து புறப்பட்டு புறப்பட முயன்று கொண்டிருக்கும்போது, தெய்வத்தன்மை நிறைந்த பதினாயிரவாயிர

ஐய் இறைவன், அற்புத வடிவழகுற்ற ஸ்வர்ணவல்லியம்மை நங்கையுடன் அங்கே தோன்றினான். சாந்தார்வியப்புற்று, "நீயார், இவள் யார், எங்கே வந்தீர்கள்" என்று வினவ, சிவன், "எல்லாம் தெளிவுறுகிறேன். இப்பொழுது மிகப் பசித்திருக்கிறேம். முதலில் எங்கள் பசி உணவளிக்க வேண்டும். பிறகு பேசுவோம்" என்று இனிமையுற மொழிந்தான். சாந்தரும், "அவ்வாறே செய்வோம். நீங்கள் இப்படியே இருங்கள். இவ்விடம் வளர்ந்திருக்கும் பலவகைப் பழங்களையும் நீராடி, நித்திய கர்மங்களையும் முடித்துக்கொண்டு சீக்கிரம் சாப்பிட வாருங்கள்" என்று தெளிவித்து அவர்களை விட்டு நீங்கினர். சாந்தர் சிந்தனையிற்கொண்டவண்ணம் கூப்பிட்ட நாவல்மரத்தடியை நோக்கினர், தினபண்டங்களும் சக்கரைப் பொங்கலும் ஏராளமாய் பாகுசெய்து, இனிய பழங்கள், கற்கண்டுகள், நித்திரைவரையும் முடிவடைந்துடன் சகிதராய் எல்லாவற்றையும் நித்தமாகியிருக்கக் "எல்லாம் சிவமயமே, அவர்கள் அவ்வாறே செய்தனர். எல்லாம் நித்தமானதைத் தானமே நேரில் பார்த்தபின், சாந்தர் நித்யகர்மம் திவ்யஸ்நானமெல்லாவற்றையும் முடித்து நீராடிவிட்டு, சாமையற்காரர்களிடம், "உமையோடுகள் போலத் தோற்றமளிக்கும் பழங்களைப் பறித்து இவ்விடமாகவும் கொண்டு வந்து பிரித்து வைத்துக்கொண்டு திரும்பிவருக" என்று கூறி அனுப்பினர். அவர்களோ உடனே சென்று "அழைத்து வருகிறோம்" என்று பரிவுடன் சென்றனர். அவர்கள் விரைந்து சென்று விவசாயனுடைய தோட்டமும் பிரகாரமும் பறித்துக் கொண்டிருந்தனர். "எங்களுக்கு தேடிப்பார்த்தும் அவர்களைக் காணவில்லை; அவர்கள் எங்கே போயினரென்று தெரியவில்லை. நீங்களாவது அறிவீர்களா" என்று வினவினர். சாந்தர் சற்றுச் சிந்தித்து "திருவெண்ணை! அவர்கள் பசியாறக் கொம்பை விருந்தளித்து நான் பார்த்தேன்; அவர்கள் எங்கே போயிருப்பார்கள்? தெரியவில்லை. எங்களோடு பழகியிருக்கிறார்கள்" என்று [illegible] அனுப்பிவிட்டு சென்னல்லி என்னும் அன்பர் கூட்டத்துடன் விவசாயனுடைய தோட்டத்தை நோக்கிச் சென்றனர். அவர்களே, நீடிய பசியாறினாற்போலிருந்தது. மடிந்து சுமையுலைந்திருந்த உணவுகள் பழங்கள் முதலியவைகளின் பரிமளமாகவும் வீசியது. அதைக் கண்ட அவர்கள் யாவரும் மிகவியப்புற்றனர். இதனிடையே, சிவபெருமானும் சாந்தரை அழைத்து, "ஸ்வாமின்! பக்தவத்சலனான உனக்கு என்றென்

றும் சமமயலறையில் காணப்படவில்லை; திரௌன்ன அச்சமியம்! நாழிர்க்கருகில் தெரிவிக்க வினாற்றோடிவந்தோம்" என்று சொன்னார்கள். சாந்தநாதர் செய்வதையறியாது திகைத்துக் கலங்கிப் பார்வையை எங்கும் செலுத்தியவாறு, "பிராமணனுக்குக் கொடுப்பதாகப் பிரதிஜ்ஞை செய்தனை, அதிலும் கலக்கத்தால், அவனுக்குக் கொடாவிடில், பிழையாகி நம்மைச் சூழ்ந்து நாசந்தி, அவர்கள் பசித்திருக்கிறார்கள் என்று சாப்பாடு செய்விப்பதாய் வாக்களித்து விட்டு, இப்போதவர்கள் வந்து சேர்ந்தால் என்ன செய்வேன்" என்று மெல்லிக்கொண்டே யிருந்தபோது, அவர் முன்னே அவ்வியலும் பசுநெய்த் தாரையைத் தோராக் காணப்பட்டன. அக்கணமே, அங்கிருந்தோர் யாவருமே, சாப்பிடாவிடினும் திருப்தி நிறைவுற்றனர்; ஆச்சரியமும் உற்றனர். சாந்தநாதர் அவ்வியலையும் வரவேற்றதும், "இதுவிருந்தாகும். இன்று சிவபூஜையில் என்னுடன் நியேதித்தவர்கள் அன்னங்களைவிடாமல் மறைத்தனர்; பாத்திரங்களை எடுக்கவில்லை. இங்கே, வில்வமரத்தடியிலோ, பூஜையில் நான் நிவேதியாச்சிரித் தனிக்கும் மலர்களும் காணப்படுகின்றன. ஈசனே! மேன்மேலும் விருந்தாக வீற்றிருந்தே" என்று ஏதோ சிந்திப்பதாகப் பேசவிருக்கும்போது, அவ்வியலும் மறைந்தனர். உடனே, "அம்மாதா! கேள். என் அடிமைகளை வரவழைத்தும் மந்திராலயனாகிய என்னுடன் சிகரித்தது, நிகரற்றது, முக்கியமானது. அங்கே என்னை ஏன் வரச் சொன்னாய், எங்கே என்பதாகிய யோகத்தினாலும்?" என்று சங்கரன்பால் எழுந்தது. அதைக் கேட்ட சாந்தநாதர் மனம் மிக்க பக்தியுடன் பலவாறு துதித்து, "ஈசனே! பக்தவத்சலனே! உன்னைப் புகழ்ந்து பாடுவதற்கு ஒரேயொரு முறையே வாய்த்தது! அப்படிக்கு முறை ஒரேயொரு முறையே வாய்த்தது! உன்னைப் புகழ்ந்து பாடுவதற்கு

வினவத் தொடங்கினார். அவர்கள் அவ்வாறு கூறும்படி
தடைசெய்தோடு தொடர்ந்து கொள்ளுமாறு, சுந்தர மூர்த்தியைத் தொடர்ந்து
நிற்பதாக, விரைவிலேயே ஒரு திருவாளர் காட்டு நடுவே காணாமலே
ஆவது தவறிவிழுந்து மோகச் செய்தான். உடனே அந்தக் கூட்டத்தார்
எல்லாம் பக்கமும் வழியைத் தேடியவர்களாய்க் காணாமல் நலமுடன்
னோ, முன்புறமோ, தூரமோ, ஒன்றேயோ எனக்காவது பதிலளிக்க
மனமெனினும் பகர்ந்தும், ஒன்றும் கூறவில்லை. அவர்களுள் ஒருவன்
"இதுவரை காவது இதோ காணப்படுகிறோ" என்பதும், மற்றொருவன் "அது
வல்ல காவது, இதுதான்" என்பதும், மற்றவர்கள் தாறுமாறுமாகவும் ஒரு
தேடிப் பார்ப்பதுமாக எல்லாரையும் [redacted] பாடுபட்டும் வழியொன்றும் தென்
படவில்லை. தூரமெல்லாம் கூடிய தங்களும் முட்களும் நிறைந்து வளர்ந்
தன் முன்னேற்றத்தை தடையுறுமுயர்ந்திருந்ததினால் வந்தவழியே திரு
ம்பிதான் போகவேண்டுமோ என்று பெருமூச்சுடன் கூறிக்கொண்டும்
திரும்பிக்கொண்டும், தினமென்ன செய்வதென்று சிந்தித்து விம்மினார்.
இவ்வளவும் அவர்கள் வாயலும் [redacted] பேசாமல் கண்பார்வை கொண்டு
தே தெளிவோடு மூன்றுகோடு தூரத்தில், வழித்தெரியாது தினறித் தவிக்கும்
சுந்தரர் கண்ணோக்கி, "இப்படி எல்லோரும் கூட்டத்துடன் காட்டு
நடுவே தொலைந்து விட்டோமே! நாமென்ன செய்வோம்!" என்று
வேதனைப்படுகின்றார், அவர்களிருவரும் வழக்கம் போல் ஆண்டவனை
தே தோன்றினர். சுந்தரர் அவரை நோக்கி, திருவாளர் உலகை நோக்கி
து, "சுந்தரா! இதோ பார்! வேடுவர் காட்டுப் பாதை; காணாமலிருப்பட்
டைப் பார்த்து நீயும் வழியே வா" என்று மோகனமொழி கூறி மறை
ந்தருளினர். இவ்வினிமொழிகளைக் கண்டு ரோஜாக்காட்டிய வழியை
சுந்தரர் தம்முடன் வந்தவர்களுக்கு காட்டி, தானும் பார்த்து
மேலான பாதையை அடைந்தார். வழி தெரியாது மயங்கிய சுந்தரர்
அப்பெருங்காட்டை நடுவே வழிவகுத்தருளிய கடவுளின் அருளை
இவ்வளவும் அவர் உள்ளத்தில் எண்ணிய போது, அழுகையானது மேலிட்டு
அவரைத் தடுமாறச் செய்தது. எனினும், கோடிக்கணக்
கான விலங்குகள் எவ்வகையிலும் தீங்கு எதுவுமளிக்காமலிருப்
பின்னர். இந்நிலையில் வழியை அடைந்துச் சென்றபோது விலங்கோடுக்
களின் தொடர்ச்சியில் காணப்பட்ட ஒரு பாதையிற் சென்றபோது
பாதை எல்லையைக் கண்டு, அவ்வழியே திருக்கூட்டத்தை சுந்தர
பெருமிதக்கியுடன் வளர்ந்தவாறு ஜோதிவனம் போய்ச்சேர்ந்தார்.

சுந்தரமூர்த்தியும் அன்பர்களும் வழியெல்லாம் எல்லோ
ராலும் போற்றப்பெற்றுக் காளையர் கோயிலை அடைந்து

செறிந்து யாற்றை கோயிற்பூவையும் பிரகாரத்தையும் பரபரப்புடன் நிலவி நோக்கி வருவிக்கினர். எள்ளும் தெய்வீக நறுமணமுடையவர்கள் தேனுவிய பந்தரா, சந்தன, தேவதாரு மரக்கலையும், தெளிய கனிகள் நிறைவுடைய மாதவ முலிவயலரத்தையும், உளதுணர்த்தவல்ல பத்தை வயல்களையும், தலைத்தலை தழுத்து பின்னை தாலைகளையும், கலவிக்கூவிக் குயில்களையும், மயில்களையும், சுற்றவாகவுள்ளவும் அன்னங்களும் அழுதைக் கூடுத்தாமரை செங்குளிர் நீலோற்பலம் முதலிய பூக்கள் நிறைந்த [illegible]வுகளையும், மதரந்த முன்று மத முற்று நீங்காரமதுர கீத மிசைக்கும் தேனிவின்னகளையும் பார்த்துப்பார்த்து மகிழ்ந்தவாறு, அவர்கள் வாவரும் யாவுமுவென்னும் பெயர் பெற்ற திருக்குள முற்றினர். கன்கருக்குப் பேரின்ப விருந்தளிக்கும் கானிசனது எந்திலம் பருகி யாவரும், அவ்வொப்பற்ற புண்ணியநீர்த் தடத்தில் நீராடினர். சுற்றத்தரும் ஸ்நானஞ்செய்து, வெண்பட்டுடுத்து, விபூதி ருத்ராக்ஷங்கள் அணிந்து, பக்தர்களுடன் பூஜைக்குரிய திருவாயிற் கோபுரத்தை அடைந்தார். அப்பொழுது, தெய்வலிலாவிநோதனும் பூஜைக்குரிய முதலியவற்றோடு கூடிய திருக்கோயிலைத் தன் மாலையபால் மறைத்து, அவ்விடத்தே புனல் நிறைந்த ஒரு தடாகத்தைத் தோற்றுவித்தான். சுற்றத்தர் அனைக்கண்டு வியந்து, "இந்தடாகம் இவ்விடத்தில் எப்படி வந்தது?" கோயிலும் மண்டபங்களும் கோபுரங்களும் எங்கே போயின வென்று சுற்றே நினைந்து, "திருவாரூரை விருந்து தலயாத்திரை கொண்டிய நாள் இங்கே வரையுற்றுக்கிடக்கவில்லை. தருணேசன் இவ்வாறு மறைந்தது அற்புதமாகத்தான் போலும்!" என்று சுற்றத்தார் நெகிழ்ந்து நிலைகுலைந்தனர். யாவரும் தாம் நேற்றுண்ட மன்னித்து ருசியானது பதிகமென்று பாடினர். வானவர்கோன் துயரகற்றும் பூஜைசன் அர்ச்சாமனைக்கோயிலின் முற்றியில் உளன்கள் நேற் காலையிலும் அருளைக்காலையே காண்டற்கியல்வதுமாய் இவ்வுலகோதனையைக் கருணையுடன் சுற்றத்தருக்குக் காண்பித்தான். சுற்றத்தார் அகமகிழ்ந்து, மீண்டுந்துதியைக் கூவி, இறைவன் அவருக்குத் தன் திருவடித்தியானத்தைக் காண்பித்தான். மேன்மேலும் அவர் பாடப்பாடப் பிறையுருக்கண்ணியும் தூய தலையுடன் மான்மழுவராபயங்கள் தாங்கிய கைகளுடன் அணிகள் யாவும் பூண்ட திருமேனியுடன் பதினாறு வயதினையொத்து, எல்லாவல்லிவாமபாகனும் தருணேசன் அவருக்குத் தோன்றினன். பிறகு, அவனருளாற் கோயிலும் அங்கே தோன்றியது.

சுந்தரர் கோசீசனைத் தரிசித்து வணங்கித் துதித்து, வைகலுடனே
யும் சுற்றாம்பினைகளையும், சுற்றுநேனியும் மீறுகிணையும் வலம்
வந்து, மீண்டும் கானிசனை வணங்கிப் பத்தியுடன்விளைதிசுற்றிலும்
நின்றார். தயாநிதியாம் யுவேசுவரன் நிகேசுட்டித்துடன் இவ்விய
சுந்தரருக்கு வரங்களும் மிகவரிய பெருஞ்செல்வத்தை அருளினான்.
சுந்தர மூர்த்தியும், அன்பர்துன்பமகற்றுபவரும் கீர்த்தியை அவரும்
கருள்பவருமாம் தினைவனே மனமார வணங்கிப் புகழ்ந்து, அங்கி
நின்று வெளியேறினார். நிருமேனிநாதன் கோயிலுக்கு வடக்குத்திக்கில்,
கௌரிபுண்ணியநதியின் பாவனதீரத்தில், சுந்தரரைத் தன்பாலிருக்கத்
தூதுசோசன் எழுந்தருளிய பன்மிடமெனப்பெயர்பெறும்திருத்
தினும் எல்லாவல்லியும் யுவேசனும் வினவுகின்றனர். அவ்வி
ஆகந்நாயகன் ஜோதிவனத்தை நோக்கிச் செல்லுகையிற் காவேரியின்
தென்பகுதிதனை மறைத்து நானும் மறைந்து சுந்தரரிடம்
திரு[illegible]விடம் மறையூர் எனும் வழக்கமும். கோயிலையும்
நோக்கையும் கானிசன் சுந்தரருக்குக் காண்பித்தபின்விழுங்கே
காவேரிதனது கம்பீரச் சோற்றம் வாய்ந்த திருக்கோயில் நின்றுவிளங்
கிறது. அற்புதங்களும், கேட்போர்க்குத் தீவினைநீக்கத்தைரியத்தை
னையும் அருள்வதுமான கானிசன் மனிதனை இவ்வாலயத்தில்
நியமிக்கப்பெற்றது. இந்தனையே பாவவிமோசனம் பன்மிடத்திற்
சுந்தரிகொண்டவரே கானிசனும் எல்லாவல்வினையும் நீங்க
பவர்கள் பாபங்களை அவர்கள் நீக்கி வேண்டுமெனுங்கையும் அருள்
கின்றனர். சுந்தரமூர்த்தியின் திருமொழாரியத்தைக் கேட்போரும்
படிப்போரும் பாபம் யாவுமகன்றவராய் நிவனாயுஞ்சம் எய்துவர்.
இவ்வண்ணம், கானிசனில் நிவபக்தர்திருமணியாம் சுந்தரர் பால்
அருளடையப்பெற்றதும், கேட்போர்தீவினைகளைக் காய்வதுமான
இவிருத்தமிதுவே, தேவவம்மகிபனே! இப்போதுனக்குரைக்
ப்பெற்றது. இதனைக்கேட்பிக்கும் புண்ணியர்தோள் அர்ச்சுனர்
நலன்களையும் எண்ணும்பொன்றச் செல்வத்தையும் பெறுவர்.

இவ்வண்ணம், பிரமாண்டபுராணத்தில்
பிரமதேவியில் தகுதிணகானிசுவரமாகாத்மியத்தில்,
மூப்பதாம் அத்யாயமுடிய
சுந்தரமூர்த்திவரலாறு
முற்றிற்று.